एवंविधस्य सूत्रस्य व्याख्यानं कृत्वा ऋषिदैवतछन्दसामनुक्रमणं करिष्यामः। इत्यर्थः। तं विवस्वन्तमित्युक्तं। तत्र तं कमित्यपेक्षायामाह येन विवस्वता सूर्येण मण्डलं दक्षिणमक्षि हृदयं चाऽधिष्ठितं व्याप्तं। मण्डलं आकाशे जगत्प्रकाशकत्वेन परिदृश्यमानं तेजोमयं सूर्यमण्डलं, दक्षिणमक्षीति पुरुषस्य दक्षिणं चक्षुः। पुरुषस्य हृदयं च। एतत्त्रयमाक्रम्य यः स्थितवांस्तमित्यर्थः। तथा च श्रूयते(१)। "स एषऽएव मृत्युर्यऽ एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेऽक्षन्पुरुषस्तस्य हैष हृदये पादावति ष्ठतीताविति"। पुनः कं तं। यतो यस्माद्विवस्वतो भगवान्याज्ञवल्क्यो मुनिः शुक्लानि विशुद्धानि अपौरुषेयत्वादकर्तृदोषरहितानि यजूंषि प्राप प्राप्तवान्। तथा च श्रूयते(२)। "आदित्यानीमानि शुक्लानि यजूꣳषि वाजसनेयेन याज्ञवल्क्येनाख्यायन्ते" इति। तत्र केषां चिन्मते यजुषां छन्दो नास्तीत्याह।

यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यते

एकेषामाचार्याणां मते यजुषा इषे त्वेत्यादीनां छन्दो न विद्यते। गायत्र्युष्णिगादिनामकं छन्दो नास्ति, कुतो न विद्यते इत्यपेक्षायामाह। अनियताक्षरत्वादिति। गायत्र्यादि छन्दो हि नियताक्षरं चतुर्विंशत्यक्षरा गायत्रीत्याद्यक्षरसङ्ख्यानियमश्रवणात्। न च यजूꣳषि नियताक्षराणि। अतस्तेषु नियताक्षरसङ्ख्यास्वरूपं छन्दो नास्तीत्यर्थः। एकेषामित्युक्तत्वात्केषां चिन्मते यजुषामपि छन्दोऽस्तीति प्रतीयते। तत्र छन्दस्त्वाङ्गीकारपक्षे। छन्दो गायत्री "द्व्येक"मित्यादि पिङ्गलादुक्तप्रकारेणैकाक्षरद्व्यक्षरत्र्यक्षरादीनि छन्दांसि यजुःषु कल्पनीयानि। तानि चास्मिन्ग्रन्थे नोक्तानि अतः प्रथमं तान्यष्टप्रकाराणि गायत्र्यादीनि छन्दांसि प्रदर्श्यन्ते॥

(१) पूर्वोक्तकाण्डकायामस्त्येति॥

(२) शतपथब्राह्मणचतुर्दशब्दारण्यककाण्डस्य काण्डिका ज्ञातव्येति॥

तच ऋग्वेदप्रातिशाख्ये। "गायत्र्युष्णिगनुष्टुप् च बृहती च प्रजापतेः। पङ्क्तिस्त्रिष्टुब्जगती च सप्त छन्दांसि तानिह। अष्टाक्षरप्रभृतीनि चतुर्भिः परं परं। दैवान्यपि च भूयेव सप्त चैवासुराण्यपि। एकोत्तराणि दैवानां तान्येवैकाक्षरावधि। एकादशान्यसुराणां ततः पञ्चदशाक्षरत्वात्। तानि त्रीणि सामगस्य समानानि स नाम तत्। एकं भवत्यृषिच्छन्दस्तथा गच्छति सम्पदं। एकं त्रिप्रभृतीन्याहुर्युक्तानि चतुरक्षरम्। ऋषिच्छन्दांसि तैः प्रायो मन्त्रः श्लोकश्च वर्त्तते। तत्पादो यजुषां छन्दस्साम्नां तु द्वादशां त्रयः। तत्पादस्तेषां ऋषिच्छन्दसां चतुर्थो भागो यजुषां छन्दो वेदितव्यं। साम्नां छन्दो द्वौ द्वौ पादौ वेदितव्यौ। ऋचां छन्दस्त्रयः। गायत्र्यादि जगत्यन्तमेकद्व्यधिकं तु तत्। आर्षवत्तत्समाहारो ब्राह्मो वर्गः षडुत्तरः। अक्षराणि षड्विंशद्गायत्री ब्राह्मणो मिता। यजुषां षड्वां त्रिः षट् साम्नां द्वादश सम्पदि। एकोत्तरो यजुर्वर्गः साम्नां वर्गस्तु द्व्युत्तरः। ऋचां तु त्र्युत्तरो वर्गो ब्राह्मो वर्गः षडुत्तरः। ऋषीणां तु त्रयो वर्गाः सप्तका एव नेतरे। ऋषिच्छन्दांसि गायत्री सा चतुर्विंशत्यक्षरास्त्रयः पादाश्चत्वारो वा पञ्चक्षरा इत्यादि प्रजापतिप्रभृतीनां छन्दांसि व्याख्यातानि, तेषु ऋषिच्छन्दांसि सोदाहरणानि वक्ष्यन्ते। गायत्री सा चतुर्विंशत्यक्षरेत्यादिना। छंदोगानामपि। देवासुरप्रजापतीनां यजुःसामर्चां च छन्दांसि भवन्ति। दैव्येका गायत्री। पञ्चदशासुराणां। प्रजापतेरष्टौ। षड्वा दशाष्टादशा इतरेषां क्रमशोऽथ प्रतिछन्दोऽक्षरविद्द्विदैवयजुषोरेकैकेन तथा हानिरसुराणां प्रजापतेश्चतुर्भिर्विवृद्धिर्द्वाभ्यां साम्नामृचां त्रिभिस्त्रिभिर्द्वौ त्रिवर्गौ छन्दसामाद्यस्य तु त्रयं त्रयं समेत्यार्ष्यः, परस्ये ब्राह्मयऋचां च द्विगुणा यजुषां च चतुर्गुणाऽऽदितस्त्रितययुक्ता। ऋग्यजुषां च साम्नामन्त्यौ। प्राजापत्या च षोडशदति। तथा। पादभेदेन पादानां विभागोऽभिसमीचतु। छन्दसः सम्पदं तां तायायां मन्येत

पादस्तदिति। छन्दसां पादतो यां यां सम्पदं मन्येत तां तां संख्यक् पूर्वं अभिसमीक्ष्य पादांश्च पदान् अभेदेन तु पादानां विभागः कर्त्तव्यः। प्रायोऽर्थो वृत्तमित्येते पादज्ञानस्य हेतवः। प्रायः अर्थः वृत्तं। इत्येते त्रयः पादज्ञानस्य हेतवो भवन्ति। प्रायस्त्रिष्टुप्प्रायः, अनुष्टुप्प्राय इति। विशेषसन्निपाते तु पूर्वं पूर्वं परं परं। एषामेव प्रायोऽर्थवृत्तरूपाणां विशेषाणां सन्निपाते तु पूर्वं निमित्तं पूर्वं भवति। परं निमित्तं परं भवति पूर्वो हेतुरुत्तराद्बलीयानित्यर्थः, प्रायोऽर्थयोर्विरोधे प्रायो बलीयः। प्रायो बलीयस्त्वा "दूर्ध्वो व्यजस्य सनिता यदञ्जिभिरिस्यपादां जिघ्नासेत्। पिङ्गलोऽप्याह छन्दः। गायत्री दैव्येकं। आसुरी पञ्चदश। प्राजापत्याऽष्टौ। यजुषां षट्। साम्नां द्विः। ऋचां त्रिः। द्वौ साम्नां वर्धेत। त्रीं स्त्रीनृचां। चतुरश्चतुरः प्राजापत्यायाः। एकैकशेषे। जह्यादासुरी। तान्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीरित्येवं सञ्ज्ञानि, एकविंशतिसंख्यान्यपराण्यपि छन्दांसि सन्ति। तत्र चतुर्विंशत्यक्षरा गायत्री अष्टाविंशत्यक्षरा उष्णिक्॥ द्वात्रिंशदक्षराऽनुष्टुप्षट्त्रिंशदक्षरा बृहती। चत्वारिंशदक्षरा पङ्क्तिः। चतुश्चत्वारिंशदक्षरा त्रिष्टुप्, अष्टाचत्वारिंशदक्षरा जगती। द्वापञ्चाशदक्षरा अतिजगती। षट्पञ्चाशदक्षरा शक्वरी। षष्ट्यक्षरा अतिशक्वरी। चतुःषष्ट्यक्षरा अष्टिः। अष्टषष्ट्यक्षरा अत्यष्टिः। द्वासप्तत्यक्षरा धृतिः। षट्सप्तत्यक्षरा अतिधृतिः। अशीत्यक्षरा कृतिः। चतुरशीत्यक्षरा प्रकृतिः। अष्टाशीत्यक्षरा आकृतिः। द्वानवत्यक्षरा विकृतिः॥ षण्णवत्यक्षरा संस्कृतिः। शताक्षराऽभिकृतिः। चतुःशताक्षरोत्कृतिरिति। एकमेकाक्षरं छन्दो दैवी गायत्री। एकं द्व्यक्षरं दैव्युष्णिक्। एकं त्र्यक्षरं दैव्यनुष्टुप्। एकं चतुरक्षरं दैवी बृहती। पञ्चाक्षरं दैवीपङ्क्तिः। द्वे षडक्षरे यजुर्गायत्री दैवीत्रिष्टुप्। द्वे सप्ताक्षरे दैवी जगती। यजुरुष्णिक्। द्वे अष्टाक्षरे यजुरनुष्टुप्। प्राजापत्या गाय-

णी च । द्वे नवाक्षरे आसुरीजगती यजुर्बृहती च । द्वे द्वादशाक्षरे आसुरी त्रिष्टुप् यजुः पङ्क्तिश्च । द्वे एकादशद्वादशाक्षरे आसुरीपङ्क्तिर्याजुषी त्रिष्टुप् च । चत्वारि द्वादशाक्षराणि सामगायत्री यजुर्जगती आसुरी बृहती ॥ प्राजापत्योष्णिक् । एकं त्रयोदशाक्षरं आसुर्यनुष्टुप् । द्वे चतुर्दशाक्षरे आसुर्युष्णिक् । सामोष्णिक् । एकं पञ्चदशाक्षरं आसुरी गायत्री । द्वे षोडशाक्षरे प्राजापत्यानुष्टुप् । सामानुष्टुप् च । सप्तदशाक्षरं नास्ति । द्वे अष्टादशाक्षरे सामबृहती ऋग्गायत्री च । एकोनविंशत्यक्षरं नास्ति । द्वे विंशत्यक्षरे प्राजापत्या बृहती सामपङ्क्तिः एकमेकविंशत्यक्षरं ऋगुष्णिक्, एकं द्वाविंशत्यक्षरं सामत्रिष्टुप् । त्रयोविंशत्यक्षरं नास्ति । चत्वारि चतुर्विंशत्यक्षराणि । प्राजापत्या पङ्क्तिः, सामजगती । ऋगनुष्टुप् । आर्षी गायत्री च । पञ्चविंशति-षड्विंशत्यक्षरे नस्तः । एकं सप्तविंशत्यक्षरं ऋग्बृहती । द्वे अष्टाविंशत्यक्षरे प्राजापत्या त्रिष्टुबार्षी उष्णिक् । एकोनत्रिंशदक्षरं नास्ति । एकत्रिंशदक्षरं ऋचां पङ्क्तिः । एकत्रिंशदक्षरं नास्ति । द्वे द्वात्रिंशदक्षरे प्राजापत्या जगती । आर्षी अनुष्टुप् च । एकं त्रयस्त्रिंशदक्षरं ऋचां त्रिष्टुप् । चतुस्त्रिंशदक्षरे नस्तः । त्रीणि षट्त्रिंशदक्षराणि ऋग्जगती । ब्राह्मी गायत्री आर्षी बृहती च । अन्तरा न सन्ति । एकं चत्वारिंशदक्षरमार्षीपङ्क्तिः । एकं द्विचत्वारिंशदक्षरं ब्राह्मी उष्णिक् । एकं चतुश्चत्वारिंशदक्षरं आर्षी त्रिष्टुप् । द्वे अष्टाचत्वारिंशदक्षरे आर्षी जगती । ब्राह्मी अनुष्टुप् च । एकं चतुष्पञ्चाशदक्षरं ब्राह्मी बृहती । द्वे षष्ट्यक्षरे ब्राह्मी पङ्क्तिरतिशक्करी च । एकं षट्षष्ट्यक्षरं ब्राह्मी त्रिष्टुप् । द्वे द्वासप्तत्यक्षरे ब्राह्मी जगती धृतिश्चेति । एषु पठिताक्षरैर्यत्राक्षरसङ्ख्या न पूर्यते तत्र वक्ष्यमाणेन व्यूहेन पादपूरणार्थं तु क्षेप्रसंयोगैकाक्षरी भाव्यविति व्यूहेदित्यनेन पूरणं । तदसम्भवे न्यूनाधिकेनैकेन निचृद्भूरिजौ द्वाभ्यां विराट्स्वराजावि-

न्युपायेन छन्दःकल्पनीयं ॥ एवमेकाक्षरप्रभृत्येकैकाक्षरवृध्या पञ्चाधिकशताक्षरपर्यन्तानि छन्दांसि सन्ति । ततोऽप्यधिकाक्षराणां यजुषां छन्दो नास्ति छन्दोगपरिशिष्टेऽपि। सर्वछन्दस्स्वेकेन पञ्चाक्षरेण गङ्कुमती भवति। अथैकाक्षरहीना निचृदेकाक्षराभूरिक्। न्यूना विराट्। दृय्धिका स्वराट्। अल्पीयमध्यापिपीलिकमध्या यवमध्येति। यथाभ्यां यकारवकारविकर्षेण न्यूनानि छन्दांसि पूरयेत्। नशब्देन च तदन्तवर्जं पदप्रकृत्या च। त्वशब्देन च। न्यूनत्वे तु शब्दः पूरणइति। तदेवं सर्वयजुषामक्षराणि गणयित्वा गणयित्वा अनेन प्रकारेण यजुःषु कल्पनीयं। सूत्रस्य चायमेवार्थः। यानि यजूंष्यनियताक्षराणि तेषां छन्दो नास्त्येव ॥ यानि च नियताक्षराणि तेषां छन्दोऽस्त्येव। यानि च नियताक्षराणि इषेत्वेत्यादीनि पिङ्गलाद्युक्तछन्दोलक्षणयुक्तानि तेषां छन्दो विद्यतएवेति। युक्तोऽयं पक्ष, अन्यथा एकाक्षरप्रभृतीनां चतुरधिकशताक्षरपर्यन्तानां छन्दसां पाक्षिकवैयर्थ्यापत्ते। तस्मादेवमेव व्याख्येयं। एकेषां यजुषामनियताक्षराणां सप्ताधिकशताक्षरपर्यन्तानां छन्दो नास्त्येव। ततोऽर्वाचीनसङ्ख्याक्षराणां त्वस्त्येवेति ऋषिदैवतछन्दांस्यनुक्रमिष्यामइति पूर्वं प्रतिज्ञातं। तत्र के ऋषयइत्याकाङ्क्षायामाह ॥

द्रष्टार ऋषयः स्मर्तारः परमेष्ठ्यादयः।

परमेष्टि आदिः प्रथमो येषां ते परमेष्ठ्यादयः, संहितायामादौ दर्शपूर्णमासमन्त्राः पठिताः। तेषां च परमेष्ठीऋषिः ॥ परमेष्ठ्यादयइति परमेष्ठीप्रजापतिप्रभृतयो मन्त्राणां द्रष्टारऋषयइत्युच्यन्ते। द्रष्टारइत्यस्यैव व्याख्यानं स्मर्तारइति। परमेष्ठ्यादयो हि पूर्वस्मिन्कल्पे नानाविधदुष्करतपश्चरणादिविशिष्टकर्मजनितस्मृतिसंस्कारादनुच्छित्तिधर्मोपः, सृष्टप्रतिबुद्धवत्कल्पादौ सह विषयाभिव्यज्यमानाः

कल्पान्तेऽध्येतव्यादुत्पन्नान्मन्त्रान् कल्पान्तरे स्मरन्तीति स्मर्तार ऋषय उच्यन्ते। अतश्च यः परमेष्ठ्यादिर्यं मन्त्रं स्मरति तस्य मन्त्रस्य स ऋषिरित्युच्यते। अत एवाह यास्कः "ऋषिर्दर्शनादिति"। दर्शनमत्र मानसम्॥ छन्दसां स्वरूपमाह।

छन्दांसि गायत्र्यादीनि।

(१)अथ छन्दांसि गायत्र्युष्णिगनुष्टुबित्येवमादीनि गायत्र्यादीनि छन्दांसि ज्ञेयानि। न ऋषिदैवछन्दसां ज्ञानं विनाऽपि मन्त्राणामध्ययनादिसिद्धेः किमर्थं तत्कथनमित्याशङ्क्य तदज्ञानेऽनिष्टमाह।

एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्वीर्यं यातयामं भवति।

एतानि ऋषिदैवतछन्दांस्यविदित्वाऽज्ञात्वा योऽधीते यो वेदं पठति योऽनुब्रूतेऽन्यं पाठयति रुद्राध्यायादिकं जपति व्याहृत्यादिमन्त्रेण यो यजते स्वार्थं यागं कुरुते याजयति स्वयमृत्विग्भूत्वा परान्याजयति तस्य पुरुषस्य ब्रह्म वेदो निर्वीर्यं स्वकार्यसाधने शक्तिहीनं यातयामाकिञ्चित्करं निष्फलं भवति। ऋष्यादिकमज्ञात्वाऽध्ययनेऽध्यापने जपे होमे यजने याजने वा प्रयुक्ता मन्त्रा निर्वीर्यत्वात्स्वकार्यसाधका न भवन्तीत्यर्थः। अनिष्टान्तरमाह।

अथान्तरा श्वगर्तं वाऽऽपद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवति॥

अथ ऋष्याद्यज्ञात्वाऽध्ययनादिकरणानन्तरं श्वगर्तमन्तरा आपद्यते श्वगर्तमन्ध्यं प्राप्नोति। शुनां गर्तः अशुचिस्थानं नरकमुच्यते।

---

(१) गायत्र्यादिछन्दसां दैवतनिर्वचनानि सामगदैवतब्राह्मणे प्रतिपादितान्यतस्तस्माद्बोध्यानीति ।।

गतं । मन्त्राणां वर्णात्मकत्वेन चक्षुषा दर्शनासम्भवात् । अतएव स्म-र्तार इति पर्यायोपादानम् । श्रुतिगतानामपश्यदित्यादीनां व्याख्या-नार्थं द्रष्टार इत्युक्तम् । अथ देवतालक्षणमाह ।

देवता मन्त्रान्तर्भूता अग्न्यादिका हविर्भाजः स्तुति-भाजो वा ।

या मन्त्रान्तर्भूता मन्त्रमध्यपठिता मन्त्राक्षरप्रेयस्वरूपा हविर्भाजः स्तुतिभाजो वा । अग्न्यादिकास्ता देवताः । मन्त्रवर्णादेवता अग्निसो-मेन्द्रविष्ण्वादयो देवता इत्यर्थः । तत्र काश्चन हविर्भजन्ते काश्चन स्तु तिम् । तथा च यास्कः । "अस्तु सूक्तं यजते यस्मै हविर्निरूप्यत इति" । तथा इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज इति । तथा यत्का-म ऋषिर्यस्यां देवता या सार्थऽऽपत्यमित्थं स्तुतिं प्रयुङ्क्ते तद्दैवतः स मन्त्रो भवतीति च । ननु भवतु महाप्रभावानामग्न्यादीनां देवतात्वं अनः ग्रावादीनां त्वचेतनानां कथं । नहि तानि हविष्प्रतिग्रहणसम-र्थानि । न च अन्तां स्तुतिं जानन्तीत्यत आह ।

अनः ग्रावोखाग्न्योपवेषकपालेध्मोलूखलादयश्च प्रतिमाभूताः ।

यथा विष्ण्वादिदेवतानां सुवर्णादिमय्यः प्रतिमा भवन्ति ताश्च देवतारूपा अपि देवतावत्पूज्यन्ते स्तूयन्ते वाञ्छितं प्रयच्छन्ति । एवमनः ग्रावादयो देवतारूपा अपि देवतानां प्रतिमाभुता देवता ज्ञेयाः । तथा च यास्कः॥ "अपि ह्यदेवता देवतावत्स्तूयन्ते यथाऽश्वप्रभृतीन्यो षधिपर्यन्तानीति" । अनः ग्रावादिषु प्रतिमाभूतासु विष्ण्वादिप्रतिमा-स्विवाधिष्ठात्र्यो देवताः सन्ति ताश्चाभिमतं सर्वं करिष्यन्तीत्यभिप्रायः । एतच्च देवतानां च विग्रहवत्त्वाङ्गीकारे पक्षे । अग्न्यादिशब्दानामेव देवतात्वपक्षे त्वियमाशङ्कापि नास्ति । यथा ऽग्न्यादिशब्दानां देवतात्वं

तथाऽन्य: शाखादिमन्त्राणामपि भविष्यति मन्त्वाविधानात् ॥ अथ छन्दसां स्वरूपमाह ।

छन्दांसि गायत्र्यादीनि ।

(१)अथ छन्दांसि गायत्र्युष्णिगनुष्टुबित्यभिहितानि गायत्र्यादीनि छन्दांसि ज्ञेयानि । न ऋषिदेवछन्दसां ज्ञानं विनाऽपि मन्त्राणामध्ययनादिसिद्धि:, किमर्थं तज्ज्ञानमित्याशङ्क्य तदज्ञानेऽनिष्टमाह ।

एतान्यविदित्वा योऽधीतेऽनुब्रूते जपति जुहोति यजते याजते तस्य ब्रह्म निर्वीर्यं यातयामं भवति ।

एतानि ऋषिदैवतछन्दांस्यविदित्वा अज्ञात्वा योऽधीते यो वेदं पठति योऽनुब्रूते अन्यं पाठयति रुद्राध्यायादिकं जपति व्याहृत्यादिमन्त्रेण यो यजते स्वार्थं यागं कुरुते याजयते स्वयमृत्विग्भूत्वा परान्याजयते तस्य पुरुषस्य ब्रह्म वेदो निर्वीर्यं स्वकार्यसाधने शक्तिहीनं यातयामाकिञ्चित्करं निष्फलं भवति । ऋष्यादिकमज्ञात्वाऽध्ययनेऽध्यापने जपे होमे यजने याजने वा प्रयुक्तो मन्त्रो निर्वीर्यत्वात्स्वकार्यसाधको न भवतीत्यर्थ: । अनिष्टान्तरमाह ।

अथान्तरा श्वगर्तं वाऽऽपद्यते स्थाणुं वर्च्छति प्रमीयते वा पापीयान्भवति ॥

अथ ऋष्याद्यज्ञात्वाऽध्ययनादिकरणानन्तरं श्वगर्तमन्तरा आपद्यते श्वगर्तमध्यं प्राप्नोति । शुनां गर्त: अशुचिस्थानं नरकमुच्यते । अनेन पापेन नरके पततीत्यर्थ: । तथा स्थाणुं वा ऋच्छति । ऋच्छगतीन्द्रियप्रलयमूर्तिभावे, स्थाणुं मूर्तिभावं स्थाणुरूपत्वं प्राप्नोति वाता-

(१) गायत्र्यादिछन्दसां दैवतनिर्वचनानि सामगदैवतब्राह्मणे प्रतिपादितान्यत-स्तस्माद्द्रष्टव्यानीति ॥

द्दिना भग्नशाखः शुष्को वृक्षः स्थाणुरित्युच्यते। एवंविधवृक्षयोनिं गच्छतीत्यर्थः। तथा प्रमीयते वा एतेन पापेन प्रमीयते अचिरान्मरणं प्राप्नोति। परमायुषः प्रागेवापमृत्युना म्रियत इत्यर्थः। "अन्धो वा प्रमीयते अन्धो वा बधिरो वा भवति"। एष ह वै प्रमायुकोऽन्धो वा बधिरो भवति। मपूर्वस्यास्य धातोरेवमर्थत्वाद्दर्शनात्। तथा। पापीयान्भवति। अतिशयेन पापाचारी भवति "पुण्यो वै पुण्येन कर्मणा भवति पापः पापेनेति श्रुतेः"। अतिशयेन पापः पापीयान्। चाण्डालाद्यधमजातिषु जायत इत्यर्थः। तथा च स्मृतिः। अविदित्वा ऋषिं छन्दो दैवतं योगमेव च। अध्यापयेज्जपेद्वापि पापीयाञ्जायते तु सः। इति। तथा। ऋषिच्छन्दो दैवतानि ब्राह्मणार्थं स्वरानपि। अविदित्वा प्रयुञ्जानो मन्त्रकंटक उच्यते। इति। कंटकः पीडक इत्यर्थः। तथा मन्त्राणां दैवतं छन्दो निरुक्तं ब्राह्मणानृषीन्। कृत्तिताद्दीनाज्ञात्वा यजन्ते यागकंटकाः इति। छन्दोगानामार्षेयब्राह्मणेऽपि श्रूयते। "यो ह वा अविदितार्षेयब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्तं वाऽऽपद्यते वा प्रमीयते पापीयान्भवति। यातयामान्यस्य छन्दांसि भवन्ति। तस्मादेतानि मन्त्रे मन्त्रे विद्यादिति"। तदेवमृष्याद्यज्ञानेऽनिष्टप्राप्तिमभिधायाथ तेषां ज्ञाने यद्भवति तदाह॥

अथ विज्ञायैतानि योऽधीते तस्य वीर्यवत्॥

एतानि ऋषिदैवतछन्दांसि विज्ञाय विशेषेण ज्ञात्वा योऽधीते वेदं पठति। तस्य ब्रह्म वीर्य्यवद् भवति। प्रबलशक्तियुक्तं यदर्थं प्रयुज्यते तत्कारणसमर्थं भवति॥ ब्रह्मशब्देन वेदमुच्यते। अर्थज्ञाने च फलविशेषमाह॥

अथ योऽर्थवित्तस्य वीर्यवत्तरं भवति॥

यो द्विजो मन्त्राणामृष्यादिज्ञानवानर्थश्च मन्त्राणां यद-मभिजानाति । तस्य मन्त्रा वीर्यवत्तरं अतिशयेन वीर्यवत् । मन्त्रार्थसाधने अतिप्रबलशक्तिमद्भवति वेदेऽप्यर्थज्ञानशून्यस्य निन्दा सम्-दृश्यते । अर्थज्ञानवत: प्रशंसा च । स्थाणुरयं भारहार: किलाभूदधी-त्य वेदं न विजानाति योऽर्थम् । योऽर्थवित्सकलं भद्रमश्नुते नाकमे-ति ज्ञानविधूतपाप्मेति" । ऋष्यादिमन्त्रार्थज्ञातवता कृतं ज-पादिकमपि सकलसाधकं भवतीत्यतमाह ॥

जपित्वा हुत्वेष्ट्वा
तत्फलेन युज्यते ॥९॥

ऋषिदैवतछन्दोमन्त्रार्थज्ञानवान्पुरुषो जपहोमयागान्कृत्वा त-त्फलेन जपादिफलेन युज्यते सम्बन्धं प्राप्नोति । तादृशैर्वीर्यवत्तरै-र्ज्ञातार्थैर्ज्ञातर्षिदैवतछन्दस्कैश्च मन्त्रै: कृतं जपहोमयागादिकमव-श्यं फलदं भवतीत्यर्थ: । अथ संहितापठितं सर्वमन्त्रसाधारणमेकं ऋषिमाह ॥

इषे त्वादि खमृब्रह्मान्तं विवस्वानपश्यत् ॥ (१)

इषे त्वोर्जे त्वेत्यतआरभ्योंखं ब्रह्मेत्यन्तं सर्वं मन्त्रजातं विवस्वानप-श्यत् । तत्सर्वं स्मृतवान् । "आदित्यानीमानि यजूंषि वा आहुरि-ति श्रुते:" ॥

तत: प्रतिकर्मविभागेन ब्राह्मणानुसारेण ऋषयो वेदितव्या: ॥

तत इति सर्वकर्मसु सर्वसाधारणं विवस्वन्तं ऋषिं विदित्वा ततोऽनन्तरं प्रतिकर्म कर्मणि कर्मणि सर्वकर्मसु विभागेनेति । ए-

(१) इषे त्वादिनमऽर्कि विधमेत्यन्तामति कात्यायनीसर्वानुक्रमपाठ: ॥

तत्तत्संज्ञकमन्त्रगणस्यायमृषिरित्यायं अध्यायमित्येवं रूपेण वि-भागेन ब्राह्मणानुसारेणेति तत "एतं परमेष्ठीप्राजापत्यो यज्ञमपश्य-द्यद्दर्शपूर्णमासौ प्रजापतिः प्रथमां चितिमपश्यदित्यादि" ब्राह्मणवा-क्यानुसारेण वक्ष्यमाणा ऋषयो वेदितव्या ज्ञातव्या । अथ सर्वेषां दर्शपूर्णमासमन्त्राणां साधारणमृषिमाह ॥

परमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणामृषिः ॥

प्रजापतेरपत्यं परमेष्ठीसंज्ञः । सर्वेषां दर्शपूर्णमासमन्त्राणामृ-षिर्ज्ञातव्यः । "तत एतं परमेष्ठीप्राजापत्यो यज्ञमपश्यद्यद्दर्शपूर्ण-मासाविति श्रुतेः" । यत्र तु ऋषिविशेषोऽभिधीयते ॥ तथा पुरा । अथ षट्ँ०मोऽपश्यदीतिश्रौचं विश्वावसुरित्यादौ तत्रोभावृषी भव-तः । दर्शपूर्णमासमन्त्राणामेव पुनरपि वैकल्पिकानृषीनाह ॥

देवा वा प्राजापत्याः ॥

अथ वा प्रजापतेः पुत्रा देवा दर्शपूर्णमासमन्त्राणामृषयः । ते दे-वा अकामयन्तेत्युपक्रम्य "एतठँ हविर्यज्ञं ददृशुर्यद्दर्शपूर्णमासा-विति श्रुतेः" ॥ अत उभयश्रवणाद्विकल्पः ॥ (१)

इषे त्वा शाखाऽनुष्टुप् ॥

इषेत्वेत्यस्य यजुषः शाखा देवता अनुष्टुप्छन्दः इयं दैव्यनुष्टुप् ष्यक्षरत्वात् । एतच्च यजुषां छन्दःसद्भावपक्षे ज्ञेयम् ॥

विनियोगः कल्पकारोक्तः ॥

वेदितव्यऽइति शेषः । अस्य मन्त्रस्य । तस्मिन्कर्मणि विनियो-गः । अनेन मन्त्रेणेदं कर्म कर्तव्यं । अनेनेदमित्येवं विधौ मन्त्रा-

---

(१) अत्राप्यादौ विशेषऽउक्तः पद्धतिकारेण । ममाग्ने वर्चो विहवेष्वस्तु वयन्त्वेन्धानास्तन्वं पुषेम ॥ मह्यन्नमन्तां प्रदिशश्चतस्रस्त्वयाऽध्यक्षेण पृतना जयेम । इत्यग्न्याधानमन्त्रस्य परमेष्ठी प्राजापत्यऋषिर्देवा वा प्राजापत्या ऋषयः शाखा देवता दैव्यनुष्टुप्छन्दः शाखाछेदने विनियोगः ॥ इति ज्ञातव्यः । तैत्ति०सं०४का० ७ प्रपा० अ०१४ ॥

र्थां विनियोगः। कल्पकारोक्तएवेह वेदितव्यः। कर्मानुष्ठानवेलायां मन्त्राणां विनियोगस्यावश्यकत्वं। तदज्ञाने दोषस्य प्रागुक्तत्वात्। यतः कल्पकारेण कात्यायनेन इषेत्वेति शाखां छिनत्ति। ऊर्जे त्वेत्यनुमार्ष्टि वायवस्थेति वत्सानपाकरोति इत्यादिसूत्रैरुक्तः अतः स इह नोच्यते। तत एव ज्ञेय इति भावः। तत इषे त्वेत्यस्य शाखाच्छेदने विनियोगः॥

ऊर्ज्जे त्वा॥

पूर्वोक्तस्य शाखानुष्टुवित्यस्यान्वैवमित्यतिदेशः तेनोर्ज्जे त्वेत्यस्यापि यजुषः शाखादेवता दैव्यनुष्टुप्छन्दः व्यक्षरत्वात्। शाखाया अनुमार्ज्जने पर्वादिपातनेन समीकरणे विनियोगः॥

वायवो वायव्यं॥

वायवस्थेतीदं यजुर्वायव्यं वायुर्देवता यस्य तद्वायव्यं "वायृतुपितुषसो यदिति यत्"। दैवी बृहतीछन्दः। चतुरक्षरत्वात्। वत्सापाकरणे विनियोगः॥

देवो वऽऐन्द्रम्॥

देवो वः सवितेतीदं यजुरैन्द्रं इन्द्रो देवता यस्य तदैन्द्रं। अत्र द्वाषष्ट्यक्षरत्वात्। द्वाभ्यामक्षराभ्यामूना विराडुष्टिछन्दः। अथ वा द्वाभ्यामधिका अतिशक्करी वा स्वराट् द्वाभ्यामधिका ब्राह्मीपङ्क्तिर्वा स्वराट्। गाः शाखयोपस्पर्शने विनियोगः॥ (१)

यजमानस्य शाखा॥

यजमानस्य पशूनित्यस्य शाखादेवता यजुर्बृहती या आसुरी जगती वा। नवाक्षरत्वात्। शाखोपगूहने विनियोगः॥

---

(१) अत्र पद्धतिकारेण विशेषोऽभिहितः। येषोऽस्युपवेषो द्विषतोऽउपवेविड्ढि- वेशी ७॥ ऽअग्ने सुभगधारय॥ ऋद्धाः कर्म्मण्याऽअनपायिनो यथासन्नुपवेषः। इति मन्त्रस्य परमेष्ठी ऋषि उपवेषो देवता ब्राह्मी उष्णिक् छन्द उपवेषकरणे विनियोगः। इति बोध्यः॥

वसोर्वायव्यं ॥

वसोः पवित्रमसीत्येतद्यजुर्वायव्यं वायुदेवतं दैवीजगती यजुरुष्णिग्वा। सप्ताक्षरत्वात्। शाखायां पवित्रबन्धने विनियोगः॥

द्यौर्मातरिश्वनऽउखा।

द्यौरसि मातरिश्वनइत्यनयोरुखा देवता। द्यौरिति दैवीजगत्युष्णिग्वा। सप्ताक्षरत्वात्। स्थाल्यादाने विनियोगः। मातरिश्वनइति द्वात्रिंशदक्षरत्वात्त्वार्ष्यनुष्टप्प्राजापत्या जगती वा स्थाल्यधिश्रयणे विनियोगः॥

वसोर्वायव्यम्॥ (१)

द्वितीयं वसोः पवित्रमिति वायव्यं वायुरस्य देवता प्राजापत्या पंक्तिर्वा साम्नजगती वा ऋचामनुष्टुब्वा। चतुर्विंशदक्षरत्वात्। उखायामुपरि पवित्रस्य निधाने विनियोगः॥

देवस्त्वा पयः॥

देवस्त्वा सवितेत्यस्य यजुषः पयो देवता साम्नत्रिष्टुप् द्वाविंशत्यक्षरत्वात्। दोग्ध्र्याउखायामासिच्यमाने पयसि जपे विनियोगः॥

कामधुक्षः प्रश्नः॥

कामधुक्षइत्यस्य यजुषः प्रश्नो देवता दैवी बृहतीछन्दः। चतुरक्षरत्वात् गोनामप्रश्ने विनियोगः।

सा विश्वायुस्त्रीणि गव्यानि॥

सा विश्वायुरित्यादीनि त्रीणि यजूंषि गव्यानि। एषां गौर्देवतेत्यर्थः। आद्यस्य दैवीबृहती चतुरक्षरत्वात् उत्तरयोर्दैवीपङ्क्तिः पञ्चाक्षरत्वात् गोनाम्नीर्दाने विनियोगः।

---

(१) द्वितीय कण्डिका खण्डपठनकस्यपाठः कात्यायनसर्वानुक्रमे नास्तीति बोध्यः॥

इन्द्रस्यैन्द्रम् ।

इन्द्रस्य त्वा भागांसीत्येतदैन्द्रं इन्द्रदैवतं द्वादशाक्षरत्वात् । प्राजापत्योष्णिक्सामगायत्री वा यजुर्ज्जगती वा आसुरी बृहती वा आलम्भने विनियोगः ॥

विष्णो पच्यः ॥ २ ॥

विष्णो हव्यं इत्यस्य पयो देवता । दैवीत्रिष्टप्यजुर्गायत्री वा षड क्षरत्वात् ।(१) अभिधाने विनियोगः ॥ २ ॥

अग्नऽइदमाग्नेये ॥

अग्ने व्रतपते इदमहमित्येते यजुषी आग्नेयो अनयोरग्निर्दैवतेत्यर्थः । प्रथमा ऋगुष्णिक् एकविंशत्यक्षरत्वात् ॥ द्वितीया प्राजापत्योष्णिक् सामगायत्री वा । आसुरी बृहती वा प्राजापत्योष्णिग्वा । द्वादशाक्षरत्वात् । व्रतग्रहणे पर्यायेण विनियोगः ।

कस्त्वा प्राजापत्यम् ।

कस्त्वेत्येतत्प्रजापतिदैवतं । साम्नां त्रिष्टुप्द्वाविंशत्यक्षरत्वात् । प्रणीतानामाहवनीयस्योत्तरतो निधाने विनियोगः ।

कर्मणे स्रुक्शूर्पम् ।

कर्मणे वामित्य स्रुक्शूर्पं देवता स्रुक्च शूर्पंच स्रुक्शूर्पं इहैकवद्भावे निर्देशः । अष्टाक्षरत्वात् । प्राजापत्यागायत्री यजुष्वनुष्टुब्वा । शूर्पाग्निहोत्रहवण्योरादाने विनियोगः ॥

प्रत्युष्टं द्वे राक्षसे ।

प्रत्युष्टं निष्टतमिति द्वे यजुषी राक्षसे । अनयोरक्षो देवतेत्यर्थः । द्वादशाक्षरत्वात् सामगायत्री । यजुर्जगती वा आसुरी बृहती वा । प्राजापत्योष्णिग्वा शूर्पाग्निहोत्रहवण्योः प्रतपने विनियोगः । अन-

---

(१) अभिधाने इति पद्धतिपुस्तकपाठः ॥

चोदयार्थत्वादनन्तरं यर्थां समर्थः कार्यः राक्षसमन्त्रत्वात् ॥

उरु मन्त्रा रक्षोघ्नं सर्वत्र ।

उर्वन्तरिक्षमन्वेमीत्येतद्य-

जुर्मन्त्रा रक्षोघ्नं । एतेन यजुषा रक्षसां हननं क्रियत इत्यर्थः । न केवलमत्र किं तु सर्वत्रैतद्यजुरित्येवं विधमेवेत्यर्थः । लिङ्गादन्तरिक्षं देवता । अथ वा अयमर्थः । उर्वन्तरिक्षमित्यस्य रक्षोघ्नं मन्त्रदेवतेति एवं कल्पसंहिताभाष्ये व्याख्यातमस्ति । प्राजापत्या गायत्री यजुरनुष्टुब्वा । अष्टाक्षरत्वात् । अनः प्रतिगमने विनियोगः

धूरसि धूः ।

धूरसीत्यस्य धूर्देवता । चतुर्विंशत्यक्षरत्वात् । प्राजापत्या पंक्तिर्वा । साम्नजगती वा । साम्न्यनुष्टुब्वा । युगधुरोऽभिमर्शने विनियोगः ।

देवानां विष्णुऽस्त्वा नः ।

देवानामसि विष्णुस्त्वा क्रमतामित्यनयोरनो देवता । देवानामिति ब्राह्मी अनुष्टुप् अष्टाचत्वारिंशदक्षरत्वात् । ईषाभिमर्शने विनियोगः । विष्णुस्त्वा दैवी त्रिष्टुप् । यजुर्गायत्री वा । षडक्षरत्वात । अनसमारोहणे विनियोगः । पात्रीतो हविर्ग्रहणपक्षे धूरसि देवानां विष्णुस्त्वेत्येतेषां पात्रीविले जपे विनियोगः ॥

उरु हविष्याः ॥

उरुवातायेत्यस्य यजुषो हविष्या व्रीहियवादयो देवताः दैवीपंक्तिः पञ्चाक्षरत्वात् । हविःप्रेक्षणे विनियोगः ।

अपहतꣳ॰ रक्षः ।

अपहतमित्यस्य रक्षोदेवता दैवीत्रिष्टुप् यजुर्गायत्री वा । षडक्षरत्वात् । अपद्रव्यनिरसने तदभावे हविरभिमर्शने वा विनियोगः ।

राचसत्वादृपां स्पर्श: ॥

यच्छन्ताए हविष्या: ।

यच्छन्तां पञ्च त्वस्य हविष्या देवता: । पञ्चाक्षरत्वाद्दैवीपंक्तिश्छंद: । हविरादाने विनियोग: ।

देवस्य त्वा सावि मृ० ।

देवस्य त्वा सवितुरित्येतत्सावित्रं सवितृदेवतं ॥ न केवलमत्र । किंतु सर्वत्र देवस्यत्वेत्येतत्सवितृदेवत्यमेव। प्राजापत्याबृहती सामपंक्तिर्वा विंशत्यक्षरत्वात् । अत्र हविर्ग्रहणे विनियोग: ॥

अग्नये लिंगोक्ते।

अग्नये जुष्टमग्नीषोमाभ्यां जुष्टमित्यनयोर्लिंगेनैवाग्निरग्नीषोमौ च यथाक्रमं देवते उक्ते,अग्नये प्राजापत्या गायत्री याजुषी अनुष्टुब्वा । अष्टाक्षरत्वात् । अग्निषोमाभ्यां आसुरीत्रिष्टुप् । याजुषी पंक्तिर्वा । द्वयोर्हविर्निर्वापे विनियोग: ॥

भूताय त्वा हवि:

भूतायत्वेत्यस्य हविर्देवता । अष्टाक्षरत्वात्प्राजापत्या गायत्रीछंद: यजुषीअनुष्टुब्वा । शेषाभिमर्शने विनियोग: ॥

स्व: सूर्य:

स्वरित्यस्य सूर्यो देवता । षडक्षरत्वाद्दैवीत्रिष्टुप् यजुर्गायत्री वा प्राङ्वीक्षणे विनियोग: ॥

दृ॑ꣳ॰हन्तां गृहा: ।

दृꣳ॰हन्तान्दुर्याइत्यस्य गृहा देवता नवाक्षरत्वादासुरी जगती । यजुर्बृहती वा छंद: अनसोहविर्ग्रहणपक्षे अनसोऽवरोहणे विनियोग: । पात्रीतो ग्रहणपक्षे तूष्णीं ॥

पृथिव्यास्त्वा हव्यम् ।

पृथिव्यास्त्वेत्यस्य हव्यं देवता प्राजापत्या बृहती सामपंक्तिर्वा छंदः। विंशत्यक्षरत्वात्। अस्यास्य पवनाद्धविःसादने विनियोगः॥

पवित्रे लिंगोक्तं।

पवित्रे स्थइत्यस्य यजुषो लिंगेनैव पवित्रे देवतमुक्तं। सप्ताक्षरत्वाद्देवी गायत्री यजुरुष्णिग्वा पवित्रछेदने विनियोगः।

सवितुर्देवीः प्रोक्षिताश्चापानि।

सवितुर्वः देवीरापः। प्रोक्षितास्थेत्येतानि त्रीणि यजूंष्यापानि एषामापो देवता इत्यर्थः। सवितुर्वः प्राजापत्या पङ्क्तिः सामजगती वा। यजुरनुष्टुब्वा। चतुर्विंशत्यक्षरत्वात् प्रोक्षण्युत्पवने विनियोगः। देवीरापश्चष्टाविंशत्यक्षरत्वाद्द्वाभ्यां न्यूना आर्षी पङ्क्तिः। उद्दिङ्गने विनियोगः। प्रोक्षिता देवीबृहती चतुरक्षरत्वात्। प्रोक्षणीनाम् प्रोक्षणे विनियोगः।

अग्नये लिङ्गोक्ते।

अग्नये त्वाऽग्नीषोमाभ्यां त्वेत्यनयोर्लिङ्गेनैवाग्नीरग्नीषोमौ च क्रमेण देवते उक्ते। अग्नये त्वा आसुरीजगती। यजुर्बृहती वा। नवाक्षरत्वात्। हविःप्रोक्षणे विनियोगः।

अग्नीषोमाभ्यान्त्वा।

एकादशाक्षरत्वादासुरीपङ्क्तिः। याजुषी त्रिष्टुब्वा हविःप्रोक्षणे विनियोगः॥

दैव्याय पात्राणि

दैव्याय कर्मणेत्यस्य पात्राणि देवताः, अष्टाविंशदक्षरत्वात् प्राजापत्या त्रिष्टुप् पात्रप्रोक्षणे विनियोगः॥ २॥

शर्मास्यदित्याः कृष्णाजिनम्।

(१) इदं सूत्रखण्डं कात्यायनीयसर्वानुक्रमे नास्ति पाठः॥

शर्मासि शर्मार्थवर्ग्मासि। श्वशिरमयीः कृष्णाजिनं देवता । शर्मदेवानु-ष्टुप्छन्दत्वात् । कृष्णाजिनादाने विनियोगः, आदित्या आसुर्यनु-ष्टुप्छन्दोऽष्टाक्षरत्वात् । कृष्णाजिनास्तरणे विनियोगः ॥

अवधूतᳬ॰ रक्षः ।

अवधूतमित्यस्य रक्षोदेवता आसुर्यनुष्टुप्छन्दोऽष्टाक्षरत्वात् । रा-क्षसत्वादुत्कालत्वः । अवधूनने विनियोगः ॥

अद्रिग्रावोलूखले

अद्रिरसि वानस्पत्य इत्येते द्वे यजुषी उलूखले । अनयोरुलूखलम् देवता । षोडशाक्षरत्वात्प्राजापत्यानुष्टुप्साम्नानुष्टुब्वा उलूखल-स्थापने विनियोगः ॥

अग्नेर्हविः

अग्नेस्तनूरित्यस्य हविर्देवता एकविंशत्यक्षरत्वात् । अनुष्टुप्हवि-रावपने विनियोगः ॥

बृहत्स दृढम् मौसले, ।

बृहद्ग्रावाऽसि स दृढम् देवेभ्य इत्येते यजुषी मौसले । मुसलदेवते । बृहत्आसुरी जगती यजुर्बृहती वा नवाक्षरत्वात् । मुसलादाने वि-नियोगः । सदृढम् प्राजापत्यानुष्टुप्साम्नामनुष्टुब्वा मुसलाघाते विनियोगः ॥

हविष्कृदधिदैवतं वागधियज्ञं पत्नी ।

हविष्कृदेहीत्यस्याधिदैवतं दैवतेषु वा देवता । अनियतम् यज्ञ-विषये पत्नी देवता । पञ्चाक्षरत्वाद्दैवीपङ्क्तिः पत्न्याघ्नीध्रस्य वा आह्वाने विनियोगः ॥

कुक्कुटो वाक् ।

कुक्कुटोसीत्यस्य वाग्देवता । सप्तविंशत्यक्षरत्वाद्दृग्बृहती हन्तुपक्ष-योरा हनने विनियोगः ॥

वर्षवृद्धꣳ शूर्पम् ।

वर्षवृद्धमित्यस्य शूर्पं देवता दैवीत्रिष्टुप्यजुर्गायत्री वा षडक्षरत्वात् शूर्पादाने विनियोगः ॥

प्रतित्वा हविः

प्रतित्वेत्यस्य हविर्देवता आसुरीजगती यजुर्बृहती वा नवाक्षरत्वात् । हविर्ग्रहणे विनियोगः ॥

परापूतमपहतꣳ राक्षसे

परापूतꣳ रक्षोऽपहतꣳ रक्ष इत्येते यजुषी राक्षसे रक्षोदेवते प्रथमा साम्न्युष्णिक् आसुर्युष्णिग्वा चतुर्दशाक्षरत्वात् । निष्पवने विनियोगः । अपहतम् षडक्षरत्वाद्यजुर्गायत्री दैवीत्रिष्टुब्वा तुषनिरसने विनियोगः । राक्षसत्वादुदकालम्भने ॥

वायुर्वो देवो वस्तण्डुलाः ।

वायुर्वो विविनक्तु॥ देवो वः सविता इत्यनयोस्तण्डुलादेवता । वायुर्वः । दैवी जगती यजुरुष्णिग्वा सप्ताक्षरत्वात् । विवेचने विनियोगः । देवो वः साम्नीत्रिष्टुप् द्वाविंशत्यक्षरत्वात् । अभिमन्त्रणे विनियोगः ॥

धृष्टिरुपवेषः ।

धृष्टिरसीत्यस्योपवेषो देवता दैवी बृहती चतुरक्षरत्वात् उपवेषादाने विनियोगः ॥

अपाग्नेऽग्निमादेवयजमाग्नेये ।

अपाग्ने अग्निं आदेवयजमित्येते यजुषी अग्निदेवते । अपाग्ने प्राजापत्यानुष्टुप् । साम्न्यनुष्टुब्वा । अङ्गाराणाम् प्राकरणे विनियोगः । आदेवयजं दैवी जगती यजुरुष्णिग्वा। सप्ताक्षरत्वात् । अङ्गाराहरणे विनियोगः ॥

ध्रुवमसि पञ्चाम् कपालानि ।

ध्रुवमसि; धरुणमसि । धर्त्रमसि विश्वाभ्यस्त्वा । चितस्थ । भृगूणामित्येतेषाम् पञ्चाम् यजुषाम् कपालानि देवता । [illegible] पञ्चानाम् कपालोपधाने विनियोगः । भृगूणामित्यस्याङ्गारैरभ्यूहने । ध्रुवमसि स्वक् विष्टुर् । एकाधिका चतुस्त्रिंशदक्षरत्वात् । धरुणमसि ब्राह्मी गायत्री स्वग्जगती वा षट्त्रिंशदक्षरत्वात्, धर्त्रमसि । स्वचात्रिष्टुप्त्रयस्त्रिंशदक्षरत्वात्, विश्वाभ्यस्त्वा याजुषीत्रिष्टुप् ऽऽसुरी पङ्क्तिर्वा । एकादशाक्षरत्वात् । चितस्थ दैवीत्रिष्टुपयजुर्गायत्री वा सप्ताक्षरत्वात् । भृगूणाम् । आसुर्यनुष्टुप् त्रयोदशाक्षरत्वात् ॥

अग्ने ब्रह्माग्नेयम् ।

अग्ने ब्रह्मगृभ्णीष्वेत्येतदग्निदैवतम् । मध्यमकपालस्योपर्यङ्गारनिधाने विनियुक्तम् । दैवीजगती याजुषी उष्णिग्वा । सप्ताक्षरत्वात् ॥

धिषणाऽसि दार्षदम् ।

धिषणासीत्येतद्दृषद्देवतम् । कृष्णाजिनस्योपरि दृषदुपधाने विनियुक्तम् । आसुरी गायत्री पञ्चदशाक्षरत्वात् । अत्र शर्मासि अवधूतम् अदित्यास्त्वगित्येतेषाम् सर्वं प्रागुक्तमिति । पुनर्नोक्तम् ॥

दिवः शम्या ।

दिवस्कम्भनीरित्यस्य शम्यादेवता दृषदोऽधस्तात्शम्योपोहने विनियोगः । दैवी जगती यजुरुष्णिग्वा सप्ताक्षरत्वात् ।

धिषणोपलम् ।

धिषणाऽसि पार्वतेयीत्येतद्यजुरौपलं । उपलदैवतं । उपलनिधाने विनियुक्तं प्राजापत्यानुष्टुप् । साम्न्यनुष्टुप् षोडशाक्षरत्वात् ।

धान्यमसि षण्णाᳫं हविः ।

धान्यमसि । प्राणाय । उदानाय । व्यानाय । दीर्घामनु । चक्षुषे त्वा इत्येतेषां षण्णां यजुषां हविर्देवता धान्यमसि आसुरीजगती यजुर्बृहती वा । नवाक्षरत्वात् । प्राणाय दैवी बृहती चतुरक्षरत्वात्, उदानाय दैवीपङ्क्तिः पञ्चाक्षरत्वात्, व्यानाय दैवीबृहती चतुरक्षरत्वात् । दीर्घामनु त्रिष्टुप् । त्रयस्त्रिंशदक्षरत्वात् । चक्षुषे त्वेति दैवीबृहती चतुरक्षरत्वात् । धान्यमसीत्यस्य तण्डुलावापे विनियोगः । प्राणायेत्यादित्रयाणां पेषणे । दीर्घामित्यस्य प्रोहणे । चक्षुषे त्वेत्यवेक्षणे ।

महीनामाज्यम् ।

महीनां पयोऽसीत्यस्याज्यं देवता । यजुर्गायत्री दैवीत्रिष्टुब्वा षडक्षरत्वात् । आज्यनिर्वापे विनियोगः ॥ ४ ॥(१)

सँव्वपामि हविः ।

संव्वपामीत्यस्य हविर्देवता । दैवीबृहती चतुरक्षरत्वात् । पात्र्यां संवापे विनियोगः । देवस्य त्वेत्यस्य प्रागुक्तम् ।

समापऽआपम् ।

समापऽओषधीभिरित्येतद्यजुराप्यं । आपोऽस्य देवताऽइत्यर्थः । एकोनाभार्षीपङ्क्तिः एकोनचत्वारिंशदक्षरत्वात् । उपसर्जनीप्रतिपत्तौ विनियोगः ।

जनयत्यै त्वेदᳫं हविः

जनयत्यै त्वा । इदमग्ने रिदं अग्नीषोमयोरित्येतेषां त्रयाणां हविर्देवता । जनयत्यै त्वा । प्राजापत्या गायत्री याजुषीमनुष्टुब्वा अष्टाक्षरत्वात् । संयवने विनियोगः । इदमग्नेः, दैवीबृहती चतुरक्षर-

(१) देवोऽसि वेदवर्षᳫं इति काण्वशाखीयसर्वानुक्रमपाठः ॥

त्वात् । इदमग्नीषोमयोरिति दैवीजगती यजुरुष्णिग्वा समाक्षरत्वात् । उभयो र्वैशव्यानयने विनियोगः ।

इषे त्वाऽऽज्यम् ।

इषे त्वेत्यस्याज्यम् देवता । दैव्यनुष्टुप्त्र्यक्षरत्वात् आज्याभिमर्शे विनियोगः ॥

घर्मोऽसि यवानां पुरोडाशः । (१)

घर्मोऽसि विश्वायु, उरु प्रथाः । अग्निष्टे । देवस्त्वा । मा भेः । अतमेरुः, इत्येषाम् यवानाम् पुरोडाशो देवता । घर्मोऽसि यजुर्गायत्री । दैवी त्रिष्टुब्वा । षडक्षरत्वात् । पुरोडाशाभिमर्शे विनियोगः । उरुप्रथाः । सामबृहती ऋग्गायत्री वा अष्टाक्षरत्वात् । प्रथने विनियोगः । अग्निष्टे । प्राजापत्या गायत्री । यजुरनुष्टुब्वा अष्टाक्षरत्वात् । अङ्गारैरभिमर्शने विनियोगः । देवस्त्वा । प्राजापत्यानुष्टुप् । सामानुष्टुब्वा । षोडशाक्षरत्वात् श्रपणे विनियोगः,मा भेः यजुर्गायत्री दैवी त्रिष्टुब्वा । षडक्षरत्वात् आलम्भने विनियोगः । अतमेरुः । सामबृहती गायत्री अष्टादशाक्षरत्वात् भूताभिधासने विनियोगः ॥

त्रिताय त्वा यवानाम् त्रितो द्वितऽएकतः क्रमेण

त्रितो द्वित एकतः । क्रमेण । त्रिताय त्वेत्यादीनाम् यवानाम् यजुषां क्रमेण त्रितो द्वित एकतः च दाणाम् देवताः । त्रिताय त्वेत्यस्य त्रितः, द्विताये त्यस्य द्वित, एकताये त्यस्यैकतः । आद्ययोर्दैवीबृहती चतुरक्षरत्वात् । एकताय दैवीपङ्क्तिः पञ्चाक्षरत्वात् । अभ्युदकनिनयने विनियोगः ॥

आददऽइन्द्रस्य स्फ्यः ।

---

(१) अन्तरिक्षर्छ०राक्षसम् । इति कण्वशाखीयसर्वानुक्रमपाठः ॥ अन्तरिक्षमित्यस्य परमेष्ठी ऋषीरक्षो देवताऽऽसुर्य्यनुष्टुप्छन्दः पर्य्यग्निकरणे विनियोगः ॥

माददेऽध्वरकृतम्, इन्द्रस्य बाहुरसीत्यनयो: इन्द्रो वा देवता:। चाष्ट-दशाक्षरत्वादासुरीत्रिष्टुप्। यजुः पङ्क्तिर्वा स्फ्यादाने विनियोगः, इन्द्रस्य प्राजापत्या जगती भार्षी अनुष्टुब्वा जपे विनियोगः॥

पृथिवि वेदिः। (१)

पृथिवि देवयजनीत्यस्य वेदिर्देवता सामबृहती ऋग्गायत्री वा। अष्टादशाक्षरत्वम् यव्यूहेनाष्टादशाक्षरत्वात्। अवहने विनियोगः।

व्रजम् पुरीषम्।

व्रजङ्गच्छेत्यस्य पुरीषन्देवता। दैवी जगती अनुष्टुब्वा। अष्टा-क्षरत्वात्। पुरीषादाने विनियोगः॥

वर्षतु वेदिः।

वर्षतु ते इत्यस्य वेदिर्देवता। दैवी पङ्क्तिः पञ्चाक्षरत्वात्। वेदि-प्रोक्षणे विनियोगः॥

बधान सावित्रम्।

बधान देव सवितरित्येतद्यजुः सावित्रम्। सविताऽस्य देवता इ-त्यर्थः, ऋग्जगती वा। ब्राह्मी गायत्री वा। योऽस्मानित्यत्रैकादशपू-र्वरूपव्यूहेन षट्त्रिंशदक्षरपूरणात्। (२) पुरीषस्योत्करे प्रक्षेपे विनि-योगः॥

अपारुमररोऽसुरे।

अपारुम्। अररो दिवमिति द्वे यजुषी आसुरे अनयोरसुरो देवता। अतउत्कालश्च:, अपारुम् आसुरीगायत्री पञ्चदशाक्षर-

(१) पृथिव्यै पृथिवि वेदिरिति काराषशास्त्रीयसर्वानुक्रमपाठः। पृथिव्यै वर्मासीत्यस्य परमेष्ठी ऋषिस्तृणम् देवता दैवी त्रिष्टुप्तृणनिधाने विनियोगः॥ पृथिव्यै वर्मोऽसि पृथिवि देवयजनि।

(२) पुरीषस्योत्तरे इति "क" पुस्तकपाठः॥

स्त्वात्, अररो प्राजापत्या गायत्री यजुरनुष्टुब्वा । अष्टाक्षरत्वात् । प्रथमस्य प्रहरणे (१) विनियोगः । द्वितीयस्योत्करनिवपने विनियोगः ॥

द्रप्सस्ते वेदिः

द्रप्सस्ते द्यामित्यस्य वेदिर्देवता । दैवी त्रिष्टुप् यजुर्गायत्री वा षडक्षरत्वात् तृतीयप्रहरणे विनियोगः ॥

गायत्रेण त्रीणि वैष्णवानि ।

गायत्रेण त्वा, त्रैष्टुभेन त्वा, जागतेन त्वेत्येतानि त्रीणि यजूंषि वैष्णवानि विष्णुदेवतानि पूर्वपरिग्रहे विनियुक्तानि । त्रयाणामपि त्रयोदशाक्षरत्वादासुर्यनुष्टुप्छन्दः ॥

सुक्ष्मा त्रयाणाम् वेदिः

सुक्ष्मा चासि । स्योना चासि । ऊर्जस्वती चेत्येषाम् त्रयाणाम् वेदिर्देवता । उत्तरपरिग्रहे विनियोगः । सुक्ष्मा प्राजापत्यागायत्री यजुरनुष्टुब्वा अष्टाक्षरत्वात् स्योना नवाक्षरत्वादासुरीजगती यजुर्बृहती वा । ऊर्जस्वती एकादशाक्षरत्वात् । यजुस्त्रिष्टुप् आसुरी पङ्क्तिर्वा ॥

पुराऽवघठं॰सोऽपश्यच्चान्द्रमसीं त्रिष्टुभम् ।

पुराक्रूरस्येत्येतामृचम् चान्द्रमसम् चन्द्रमो देवताम् त्रिष्टुप्छन्दस्काम्, अघमर्षण ऋषिरपश्यत् । दृष्टवान् । अनुमार्जने चास्या विनियोगः, अस्या एकादशाक्षराश्चत्वारः पादाः सा चतुश्चत्वारिंशद्दा त्रिष्टुप्छब्देनोच्यते, अथान्त्यः पादो द्वादशाक्षरस्तेनैकाक्षराधिकाः ॥

प्रोक्षणीः प्रैषः ।

प्रोक्षणीरासादयेत्ययम् प्रैषः । तस्य सम्बोध्यत्वात् । एवम् स-

(१) प्रहारे इति 'ख' पुस्तकपाठश्च ॥

वैदेवानाम् प्रेयम् । यजुरन्त्यकृदैवी जगती वा छन्दः सप्ताक्षरत्वा-त् । स्रुचोऽधिश्रयणे विनियोगः ॥

द्विषतऽआभिचारिकम् ।

द्विषतो वधोऽसीत्येतद्यजुराभिचारिकम् । अभिचारसाधकमि-त्यर्थः । निराहृत्य स्फ्यो देवता । कर्मणा शत्रोः पीडनमभिचारः सप्रयोजनमस्य तदाभिचारिकम् । "प्रयोजनमिति ठक्" । यदा चाभि-चारबुद्ध्या द्विषतइत्यस्य स्थाने शत्रुनाम गृह्यते तदा तस्योच्चारणान-न्तरमुदकस्पर्शः कर्त्तव्यो, न परथा । इयम् दैवीत्रिष्टुप् यजुर्गायत्री वा । षडक्षरत्वात् । स्फ्यस्योत्करे प्रक्षेपे विनियोगः ॥ (१)

अनिशित स्रुवः ॥

अनिशितोऽसीत्यस्य स्रुवोदेवता स्रुवसम्मार्जने विनियोगः । प्रा-जापत्या बृहती सामपङ्क्तिर्वा विंशत्यक्षरत्वात् ॥

अनिशिताः स्रुचः ।

अनिशितोऽसीत्यस्य स्रुग्देवता प्राजापत्या बृहती सामपङ्क्तिर्वा विंशत्यक्षरत्वात् स्रुक्संमार्जने विनियोगः ।

अदित्यै विष्णोर्योक्त्रम् ।

अदित्यै रास्ना, विष्णोर्वेष्प इत्यनयोर्योक्त्रम् देवता, अदित्यै दैवीत्रि-ष्टुप् यजुर्गायत्री वा षडक्षरत्वात् । योक्त्रपरिहरणे विनियोगः । वि-ष्णोः । दैवीपङ्क्तिः । पञ्चाक्षरत्वात् । आज्यमुद्गूहने विनियोगः ।

ऊर्ज्जे त्रयाणामाज्यम्

ऊर्जे त्वा, अदब्धेन, त्वा सवितुस्त्वा, इत्येतेषाम् त्रयाणाम् यजुषा-माज्यम् देवता । ऊर्जे त्वा दैव्यनुष्टुप् । ष्यक्षरत्वात् आज्यासादने

---

(१) प्रत्युष्टं निष्टप्तमित्यनयोः परमेष्ठी देवता रक्षो देवता साममायत्री छन्दः प्रतपने विनियोगः ।। इति पद्धत्याः पाठः ।।

विनियोगः, षड्क्षि नेति एकाक्षराधिका बृहती त्रिष्टुप् वा वैपसं-योगैकाक्षरीभावव्यूहेन षट्त्रिंशदक्षरा ब्राह्मी गायत्री वा जगज-गती वा आर्षी बृहती वा । आज्यावेक्षणे विनियोगः ॥

सवितुरापम् ।

सवितुर्वइत्येतस्यशुरापम् । अस्यापो देवता इत्यर्थः । छन्दस्तु प्राजापत्यादिपूर्वोक्तम् चतुर्विंशत्यक्षरत्वात् । (१) मोक्षणुत्पवने विनियोगः ॥

तेजोऽसि धामाज्यम् ॥५॥(२)

तेजोऽसि, धाम नामासीत्येतयोराज्यम् देवता । तेजोऽसि यजुस्त्रिष्टुबासुरी पङ्क्तिर्वा । एकादशाक्षरत्वात् । आज्यावेक्षणे विनियोगः । धाम नाम एकविंशत्यक्षरा आर्युष्णिक् आज्यग्रहणे विनियोगः ॥

कृष्णोऽसीध्मः ।

कृष्णोऽसीत्यस्येध्मो देवता चतुर्दशाक्षरा आसुर्युष्णिक्नामोष्णिक्वा । इध्मप्रोक्षणे विनियोगः ॥

वेदिर्बर्हिर्लिङ्गोक्ते ।

---

(१) आज्योत्पवने इति पद्धतिपाठः । सवितुरित्यापो दे० प्राजा पं० प्रो० ॥

(२) अत्र काण्वीयसर्वानुक्रमे यस्ते प्राणश्च त्रिष्टुप् प्रथमाकण्डिका ॥ यस्ते प्राणः पशुषु प्रविष्टो देवानां विष्टामनुयो वितस्थे ॥ आतमन्वान्त्सोम घृतवान्हि भूत्वाऽग्ने गच्छ स्वर्यजमानाय विन्द ॥ इति शुक्लयजुःकाण्वशाखीयसंहितायां दशानुवाके पञ्चाशत्कण्डिका ॥ मया माध्यन्दिन्याः शाखायाः संहितायां अनुवाकसूत्रमात्रं मुद्रितं, परन्तु काण्वशाखीयसंहितायां अनुवाकक्रमसूत्राणि सर्वाध्यायशेषे लिख्यन्ते । इषे त्वा तिस्रो वसोरसि चतस्रोऽग्नेतपनेऽष्टौ पवित्रे स्थश्चतस्रः शर्मासि सप्त धूरसि चतस्रः शर्मासि पुनः पञ्च देवस्य त्वा चतस्रो देवस्य त्वा पुनः षड् प्रत्युष्टं रक्षः पञ्च प्रथमे, दश, पञ्चाशत् ॥१।१०।५०॥ इत्यनुवाक. ॥

वेदिरसीत्यस्य वेदिर्देवता । बर्हिरसीत्यस्य बर्हिर्देवता लिङ्गोक्तेवोक्तो वेदिरसि षडक्षरासुर्यनुष्टुप् वेदिमार्जने विनियुक्ता । बर्हिरसि बर्हिःप्रोक्षणे विनियोगः ॥

अदित्याऽआपम् ।

अदित्यै व्युन्दनमसीत्येतद्यजुरापम् । आपोऽस्य देवताः । अष्टाक्षरा यजुरनुष्टुप्प्राजापत्या गायत्री वा मूलोपवेषणे विनियोगः ॥

विष्णोः प्रास्तरम् ।

विष्णोः स्तुपोऽसीत्येतत्प्रास्तरम् । प्रस्तरदेवतम् । प्रस्तरग्रहणे विनियुक्तम् । पञ्चाक्षरा दैवी पङ्क्तिः ॥

ऊर्णम्रदसं वेदिः ।

ऊर्णम्रदसमित्येतस्य वेदिर्देवता । पञ्चदशाक्षरा आसुरी गायत्री वेदिस्तरणे विनियोगः ॥

भुवपतये त्रीण्याग्नेयानि । (१)

भुवपतये स्वाहेत्यादीनि त्रीणि यजूंष्याग्नेयानि । एषामग्निर्देवता । आद्यस्य दैवीजगती यजुरुष्णिग्वा सप्ताक्षरत्वात् । अन्त्ययोरष्टाक्षरा यजुरनुष्टुप् । प्राजापत्या गायत्री वा करस्याभिमर्शने सर्वेषां विनियोगः ॥

गन्धर्वस्त्रयाणाम् परिधयः

गन्धर्वस्त्वा । इन्द्रस्य बाहुर्मित्रावरुणौ त्वेति त्रयाणाम यजुषाम् परिधयो देवता । आद्या सवर्णदीर्घादेशव्यूहने षड्विंशदक्षरा भुरिग्बृहती ब्राह्मी गायत्री वा । द्वितीया यणादेशव्यूहने द्वात्रिंशदक्षरा ब्राह्मी उष्णिक् । त्रयाणाम् परिधिपरिधाने विनियो

(१) भूपतये इति क्वचित्पाठः ॥

नः ॥

वीतिहोत्रम् विश्वावसुराग्नेयीं गायत्रीम् ।

वीतिहोत्रम् त्वेत्येतामृचमाग्नेयीमग्निदेवताम् गायत्रीछन्दस्काम् विश्वावसुऋषिरपश्यत् । यस्याष्टाक्षराः पादाः सा चतुर्विंशत्यक्षरा गायत्री शब्देनोच्यते । अत्र प्रथमपादे त्वायत्रे तु वा इति व्यूहेनाष्टाक्षरपूरणम् । समिदाधाने विनियोगः ॥

समिदाग्नेयम् ।

समिदसीत्येतद्यजुराग्नेयम् । अग्निरस्य देवता । चतुरक्षरा दैवीबृहती समिदाधाने विनियोगः ॥

सूर्यस्त्वा लिङ्गोक्तम् ।

सूर्यस्त्वेत्येतल्लिङ्गोक्तम् दैवतम् । आहवनीयाग्निदैवतमित्यर्थः । पञ्चदशाक्षरासुरी गायत्री आहवनीयप्रोक्षणाच्छादनवर्जने विनियोगः ॥

सवितुर्विधृती ।

सवितुर्बाहूस्थइत्यस्य विधृतिर्देवता । यजुर्गायत्री । विधृत्योस्तरणे विनियोगः ॥

ऊर्णम्रदसमात्वा प्रास्तरे

ऊर्णम्रदसं । आत्वा वसवइत्येते प्रास्तरे प्रस्तरदैवते ऊर्णम्रदसम् पञ्चदशाक्षरा आसुरी गायत्री । प्रस्तरस्तरणे विनियोगः । आ त्वा चतुर्दशाक्षरा चासुर्यनुष्टुप् । प्रस्तराभिमर्शे विनियोगः ॥

घृताच्यसि त्रयाणाम् जुहूपभृद्ध्रुवाः क्रमेण ।

घृताच्यसि जुहूरित्यादित्रयाणाम् यजुषां क्रमेण जुहूपभृद्ध्रुवाः देवताः । घृताच्यसि जुहूरित्यस्य जुहूर्देवता जुह्वासादने विनियोगः । घृताच्यस्युपभृदित्यस्योपभृद्देवता उपभृदासादने विनियो-

गः । ध्रुवा नामेत्यस्य ध्रुवादेवता ध्रुवासादने विनियोगः । तिस्रोपि द्वाविंशत्यक्षराः सामत्रिष्टुप् ।

प्रियेण हविः ।

प्रियेण धाम्नेत्यस्य हविर्देवता । द्वादशाक्षरा सामगायत्री यजुर्जगती वा आसुरी बृहती वा । प्राजापत्यापि वा । आज्यपुरोडाशाद्यासादने विनियोगः ॥

ध्रुवाऽअसद—न्पाहि मां वैष्णवे ।

इमे द्वे यजुषी विष्णुदेवते पञ्चविंशत्यक्षरत्वादेकाक्षराधिका प्राजापत्या पङ्क्तिर्वा सामजगती वा । ऋचामनुष्टुब्वा । सर्वहविरामर्शने विनियोगः । पाहि मां षडक्षरादैवी त्रिष्टुप् । यजुर्गायत्री वा आमार्जने विनियोगः ॥

अग्ने वाजजिदाग्नेयम् ।

अग्ने वाजजिदित्येतदग्निदेवतम् । एकोनविंशत्यक्षरत्वादेकाक्षराधिका सामबृहती । ऋग्गायत्री वा । अग्निसंमार्गे विनियोगः ।

नमो दैवम् ।

नमो देवेभ्य इत्येतद्यजुर्दैवम्, देवा देवता अस्येत्यर्थः । पञ्चाक्षरा दैवीपङ्क्तिः । अञ्जलिकरणे विनियोगः ॥

स्वधा पित्र्यम् ।

स्वधा पितृभ्य इत्यस्य पितरो देवताः पञ्चाक्षरा दैवीपंक्तिः अञ्जलिकरणे विनियोगः । पितृत्वादुदकस्पर्शः

सुयमे स्रुचौ ।

सुयमे मे इत्यस्य स्रुचौ देवता एकविंशत्यक्षरा ऋगुष्णिक् । स्रुचोरादाने विनियोगः ॥

अङ्घ्रिणा वैष्णवम् ।

अङ्घ्रिणा विष्णोरित्येतद्यजुर्वैष्णवम् । विष्णुरस्य देवता । एकादशाक्षरा याजुषी त्रिष्टुब्वा । आसुरीपंक्तिर्वा द्विविधा । तत्र विनियोगः ॥

वसुमतीमाग्नेयम्

वसुमतीमित्येतदग्निदेवतम् । एकोनविंशत्यक्षरत्वादेकाक्षराधिका साम्नी बृहती । साम्नी गायत्री वा । होमार्थे (१) समस्थाने विनियोगः ॥

हुतऽऐन्द्रम् ।

हुतऽइन्द्र इत्येतद्यजुरैन्द्रदैवतम् । एकाक्षराधिका शक्वरीछन्दः । सप्तपञ्चाशदक्षरत्वात् उत्तराधारहोमे विनियोगः ॥

संज्योतिषाऽऽज्यम् । (२)

अस्याज्यम् देवताः षडक्षरा दैवी त्रिष्टुप् यजुर्गायत्री वा । ध्रुवासमञ्जने विनियोगः ॥

मयीदमाशीःप्रतिग्रहणम् ।

मयीदमित्येतद्यजुराशीः प्रतिग्रहणम् आशासनमाशीः अप्राप्तस्य वस्तुनः प्रार्थना आशीःप्रतिगृह्यते प्रार्थ्यते येन ताःआशीः प्रतिग्रहणम् । लिङ्गादिन्द्रो मघवा देवता अथवाऽऽशीः प्रतिग्रहणी देवता जपे वा रूपकथनस्याप्रस्तुतत्वात् । सवर्णदीर्घयणादेशयोरन्यतरव्यूहेन षड्विंशदक्षरा । ब्राह्मीगायत्री जगती वा

उपहूता द्यावापृथिव्यम् ।

(१) समस्थाने इति भाष्यपाठः ।

(२) अत्राभीमदन्त पितरो इति काण्वीयसर्वानुक्रमपाठः ॥ एतस्याग्रे उपहूता तस्याग्रे मयीदमाशीस्तस्याग्रे अग्ने वाजजिदित्यादि व्युत्क्रमेण पाठः ॥

उपहूता पृथिवी उपहूतो द्यौरितीदं यजुर्द्वयम् व्युत्क्रमेण द्यावा पृथिव्यौ अस्य देवते । द्यावापृथिव्यां प्रथमस्य पृथिवीदेवता जगद्बृहती । द्वितीययोः सामविष्टुप्[illegible] विनियोगः ॥६॥

ब्रह्मत्वं प्रतिष्ठान्तं बृहस्पतिराङ्गिरसोऽपश्यत्

देवस्य त्वेत्यस्य प्राशित्रग्रहणे विनियोग, अत्र देवस्य त्वेत्यस्य प्रागुक्तम् । प्रतिगृह्णामीति पञ्चाक्षरा दैवी पंक्तिः

अग्निष्ट्वा प्राशित्रम् । (१)

अग्निष्ट्वेत्यस्य प्राशित्रम् देवता । अष्टाक्षरा यजुरनुष्टुप्प्राजापत्या गायत्री वा । प्राशने विनियोगः ॥

एतं ते वैश्वदेवम् ।

---

(१) एतस्मात्सूत्रखण्डात्पूर्वं काण्वीयसर्वानुक्रमण्याम् "देवसवितरेतमित्यादीनि सर्वाणि यजूंषि लिङ्गोक्तदेवत्यानि बृहस्पतिर्देवानां बार्हस्पत्यं निरस्तः पाप्मा राक्षोऽभिदहमहम्बार्हस्पत्य मित्रस्य त्वा मैत्रम्„ । इति पाठो मन्त्रश्चाधिकः ॥ पुनरस्मादग्रे "याऽअप्सु नाभ्य प्रजापतेर्भागोऽन्वाहार्यम् ॥ ते मनसा यथा देव सवितरेतं त्वा वृणते बृहस्पतिम्ब्रह्माणम् ॥ तदहम्मनसे प्रब्रवीमि ॥१॥ मना गायत्र्यै गायत्री त्रिष्टुभे त्रिष्टुब्जगत्यै जगत्यनुष्टुभे ॥ अनुष्टुप्प्रजापतये प्रजापतिर्विश्वेभ्यो देवेभ्यः ॥२॥ बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणाम ॥ भूर्भुवः स्वर्निरस्तः पाप्मेदमहं बृहस्पतेः सदसि सीदामि ॥३॥ मित्रस्य त्वा चक्षुषा प्रतीक्षे ॥ देवस्य त्वा सवितुः पृथिव्यास्त्वा एतस्याग्रे काण्वीयानामिदं सूत्र "याऽअप्सु नाभ्यं प्रजापतेर्भागोऽन्वाहार्यम्„ ॥ देव सवितुः प्रसवे ॥ ४ ॥ आददेऽग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मुखेन ॥ याऽअप्स्वन्तर्देवतास्ता इदं शमयन्तु ॥५॥ स्वाहा कृतं जठरमिन्द्रस्य गच्छ ॥ असिना मे मा सम्पृक्था ऊर्दर्श्वमग्रे नाभेः सीद ॥ ६ । इन्द्रस्य त्वा जठरे सादयामि ॥ प्रजापते भागोस्यूर्जस्वान्पयस्वान् ॥ ७ ॥ प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानव्यानौ मे पाहि ॥ ऊर्गस्यूर्जम्मयि धेह्यक्षितिरसि मा मे क्षेष्ठा अमुत्रामुष्मिल्लोकइह च ॥ ८ ॥ एते मन्त्राः स्वशाखातोऽधिकाः काण्वशाखायां समधिकाः सन्ति ॥

एतन्तद्इत्येतद्यजुर्वैश्वदेवम् विश्वे देवाश्च देवतेत्यर्थः । तन्तोल्लिष्ट-मित्यत्र यथा व्यूहेन चतुरशीत्यक्षरा मक्कलिप्रश्वे विनियोगः ॥

एषा तेऽनुष्टुबाग्नेयी । (१)

एषा तइत्येषा ऋगनुष्टुप्पुरस्तात् । आग्नेयी अग्निरस्या देवताइ-त्यर्थः । समिदनुमन्त्रणे विनियोगः, यस्या अष्टाक्षराश्चत्वारः पादाः सा द्वात्रिंशदक्षराऽनुष्टुबित्युच्यते । अत्र तु प्रथमः । पादसप्तकः । द्विती-ये दशकः, ततोऽष्टकः, ततः सप्तकइति । इयमानुष्टुप्पादानामनिय-ताक्षरत्वात् ॥

अग्ने वाजजिदाग्नेयम् । (२)

अग्ने व्वाजजिदित्येतदाग्नेयम् । अग्निदैवतम् । एकाक्षराधिका ऋग्गायत्री वा सामबृहती वा एकोनविंशत्यक्षरत्वात् । अग्निसम्मा-र्जने विनियुक्तम् ॥

अग्नीषोमयोश्चत्वारि लिङ्गोक्तानि ।

अग्नीषोमयोरुज्जितिम् । अग्नीषोमौ तमप । इन्द्राग्न्योरुज्जितिम् । इन्द्राग्नीतमपेरयेतानि चत्वारि यजूᳬंषि लिङ्गोक्तानि । पूर्वयो-र्द्वयोरग्नीषोमौ देवता । उत्तरयोर्द्वयोरिन्द्राग्नी देवतेत्यर्थः । प्रथमस्य एकादेशव्यूहेन चतुर्विंशत्यक्षरत्वात् । आर्षी गायत्री द्वितीयस्यैकादश व्यूहेन द्वात्रिंशदक्षरत्वात्प्राजापत्या जगती । तृतीयस्य ऋगुष्णि-क् । एकविंशत्यक्षरत्वात् । चतुर्थस्य त्रिंशदक्षरत्वादार्षी पंक्तिश्छन्दः प्रथमतृतीययोर्जुह्वाव्यूहने विनियोगः, द्वितीयचतुर्थयोरुपभृद्व्यूहने ॥

वसुभ्यस्त्रयाणाम् परिधयः ।

वसुभ्यस्त्वा, रुद्रेभ्य, स्त्वादित्येभ्यइत्येतेषाम् त्रयाणाम् परिधयो दे-

---

(१) एतस्यामे एनन्ते वैश्वदेवमिति व्युत्क्रमेण पाठो बोध्यः ॥

(२) एतस्यामे यत्सूत्रमत्रास्ति तत्पूर्वमुक्तम् ॥

यता: अग्निष्वात्ते विनियोग: ॥

सञ्ज्ञानाथाम् व्यन्तु प्रास्तरे ।

सञ्ज्ञानाथाम् व्यन्तु वयोतामित्येते द्वे यजुषी प्रास्तरे । प्रस्तरदेवते । प्रस्तरावाने प्रस्तराञ्जने च यथाक्रमं विनियुक्ते पादस्य व्यूहेन विंशत्यक्षरत्वात् प्राजापत्या बृहती सामपंक्तिर्वा । द्वितीयस्याष्टाक्षरत्वाद्यजुरनुष्टुप् ।

मरुतां कपिर्बृहतीं प्रास्तरीं । (१)

मरुतां पृषती रित्येतामृचम् कपिर्ऋषिरपश्यत् । कीदृशीं बृहतीं बृहतीछन्दस्काम् । पुनः कीदृशीं प्रास्तरीं प्रस्तरदेवताम् । नीवेर्हरणेऽस्या विनियोगः, इयमेकाधिकाआर्षी बृहती । पादानामनियताक्षरत्वात् ।

चतुष्पाऽग्नेयम् ।

अन्त्यः पादऽआग्नेयः (२)

अन्त्यस्तुऽ इत्ययम् पाद,आग्नेयोऽग्निदेवतः आलम्भे विनियुक्तः ।

यं परिधिं (३)देवलऽआग्नेयीं, त्रिष्टुभम् विराड्रूपां यजुरन्ताम् ।

यं परिधिमित्येतामृचम् यजुरन्ताम् देवलऋषिरपश्यत् । आग्नेयीमग्निदेवताम् । विराड्रूपाम् । त्रिष्टुभम् । एकादशिनस्त्रयोऽष्टकश्च विराड्रूपेति, विराड्रूपालक्षणम् । तेन यस्याएकादशाक्षरास्त्रयः

---

(१) बृहतीमित्यत्र बार्हतमिति काशिपाठः प्रास्तरीमित्रापि प्रास्तरमिति पाठश्च ॥

(२) इदं सूत्रशकलं काशिशास्त्रीयसर्वानुक्रमे नास्ति ॥

(३) देवलमाग्नेयमित्येव तत्र पाठः । एतत्सूत्रीयैकादशाक्षराणि न सन्ति काशिशास्त्रीयमिति ॥

पादा एकोऽष्टाक्षरः सा विराड्रूपा। अत्र पादानाम् क्रमनियमो न। तेन प्रथमोऽष्टाक्षरः अन्यत्र यएकादशाक्षरः। चतुर्थस्य न, इत्यादौ लेकाक्षराभावव्यूहेन पूरणम्। तथा च यजुरन्ताम्। यजुरन्ते यस्याः सा यजुरन्ता। ताम् यजुःपर्यन्तायाएषैव देवताएमएव च ऋषिर्द्दृष्टेत्यर्थः। किं तद्यजुरित्यपेक्षायामाह॥

अग्नेः प्रियम् (१) यजुः।

अग्नेः प्रियम्पाथोपीतमित्येतद्यजुः। अष्टाक्षरत्वात्। प्राजापत्या गायत्री यजुरनुष्टुब्वा परिस्तरणप्रहरणे विनियोग उभयोः॥

सꣳस्रवभागाः (२) सोमसूक्ष्मो वैश्वदेवी त्रिष्टुप् यजुरन्ता।

इत्यनेन यजुषोप्येष एव ऋषिर्देवता चेति गम्यते किं तद्यजुरित्याकांक्षायामाह॥

स्वाहा वाड्यजुः।

स्वाहा वाडित्यनेन यजुःप्रत्येतद्यम् दैव्यनुष्टुप्त्र्यक्षरत्वात्। संस्रवे होमेऽस्या यजुःसंहितायाम् विनियोगः॥

घृताची स्त्रुचौ।

घृताचीस्थइत्यस्य स्त्रुचौ देवता षोडशाक्षरा प्राजापत्यानुष्टुप्। साम्नानुष्टुब्वा। अनःपत्ने धुरिनिधाने। पाचीपत्ने स्थग्निधाने विनियोगः॥

यज्ञनमः शूर्पं (३)यवमानृऋषिरुद्वालवान्धानान्तर्वी-

---

(१) प्रियं चेति कारावशाखीयसर्वानुक्रमपाठः। यजुरिति पदमधिकमस्ति॥

(२) सोमसुक्ष्म इति "ख" पुस्तकपाठः। सोमशुष्म इति कारावपाठः॥ वैश्वदेवामिति च, त्रिष्टुब् यजुरन्ता इति पदन्नास्ति॥

(३) यवमान्कृषिरिति कारावशाखीयसर्वानुक्रमपाठः॥

निति पञ्चार्षेयो यज्ञो देवता ।

यज्ञ नमश्च त इत्येष मन्त्रः । पञ्चार्षेयः पञ्चार्षेयाणि ऋषयो यस्यासौ पञ्चार्षेयः । के ते पञ्चऋषय इत्यत आह । यूपं, यवमान् । ऋषिः । उद्दालवान् । धानान्तर्वानित्येते । एतस्य मन्त्रस्य यज्ञो देवता वेद्यामालम्भे विनियोगोऽस्य पञ्चविंशत्यक्षरत्वादेकाधिका आर्षी गायत्री ॥ सामजगती वा ॥

अग्ने दब्धायो गार्हपत्यः ।

अग्ने दब्धायोऽशीतमित्यस्य गार्हपत्योऽग्निर्देवता । पञ्चचत्वारिंशदक्षरत्वादेकाधिका आर्षी त्रिष्टुप् । संस्रवहोमे विनियोगः ॥

अग्नये दक्षिणाग्निः ।

अग्नये संवेशपतय इत्यस्य दक्षिणाग्निर्देवता । आसुरीपङ्क्तिः याजुषी त्रिष्टुब्वा । एकादशाक्षरा दक्षिणाग्निहोमे विनियोगः ॥

सरस्वत्यै लिङ्गोक्तम् ।

सरस्वत्या इत्येतल्लिङ्गोक्तम् । लिङ्गेनैवोक्तदेवतमित्यर्थः । दक्षिणाग्निहोमे विनियुक्तः । छन्दः पूर्वसूत्रोक्तम् ॥

---

(१) उलूखल इन्विराप्यायतां ध्रौवाज्यमिति कात्यायना सर्वानुक्रमेऽधिकः पाठः ॥ उलूखले मुसले इति परमेष्ठी ऋषिर्विश्वेदेवा देवता त्रिष्टुप्छन्दः प्रायश्चित्तहोमे विनियोगः । उलूखले मुसले यच्च शूर्पे आशिश्लेष दृषदि यत्कपाले ॥१॥ उलूखो विपरूषः सज जुहोमि सत्याः सन्तु यजमानस्य कामाः स्वाहा ॥ आप्यायतां ध्रुवा हविषा घृतेन शं यज्ञं प्रति देवयद्भ्यः ॥ सूर्याया ऊधोऽदित्या उपस्थ ऽउरुधारा पृथिवी यज्ञेऽआस्मिन् ॥ ३ ॥

वेदोऽसि वेदः । (१)

वेदोसि येनत्वमित्यस्य वेदो देवता । प्रचरद्दयव्यूहेन सप्तविंश-त्यक्षरा बृहती (२) वेदविमोके विनियोगः ॥

देवा मनसस्पतिर्वातदेवत्याम् विराजम् । (३)

देवा गातुविदइत्येतामृचम् वातदेवत्याम् विराट्छन्दस्कां म-नसस्पतिऋषिरपश्यत् । द्वाभ्यामक्षराभ्यामूना विराडनुष्टुबियम् त्रिंशदक्षरा विराडिति श्रुतेः, ऋचां पङ्क्तिर्वा । पादानामक्षरनिय-माभावात् । आर्ष्यनुष्टुब्वा । सा च द्वाभ्यामूनत्वाद्विराडुच्यते । (४)

(५) सम्बर्हिर्लिङ्गोक्ता त्रिष्टुब्विराड्रूपा ।

सम्बर्हिरित्येषा ऋक् लिङ्गोक्तदेवता दिष्टम् नमोऽस्या देवता । बर्हिर्देवता वेत्यर्थः, विराड्रूपात्रिष्टुप्छन्दोऽस्याः । त्रयः पादा एका-दशाक्षराः : एकोऽष्टाक्षरइति । विराड्रूपालक्षणम् । अत्र तृतीयो दशाक्षरः । तेनैकोना बर्हिर्होमेऽस्या विनियोगः ॥

कस्त्वा प्राजापत्यम् ।

कस्त्वा विमुञ्चतीत्येतत्प्रजापतिदैवतम् । एकोनत्रिंशदक्षरत्वा-देकाक्षरोना ऋचां पङ्क्तिः प्रणीतानिनयनेऽस्य विनियोगः ।

---

(१) इदं सूत्रखण्डं कात्यायनीयसर्वानुक्रमे नास्ति ॥

(२) वेदबन्धविमोके इति पद्धत्याः पाठः ॥

(३) देवा गातुविदो मनसस्पतिर्वातदेवत्यां विराजमिति कात्यायनशाखीयपाठः ॥

(४) अनयोर्मन्त्रयोः समिष्टयजुर्होमे विनियोगः । इतिपद्धत्याः पाठः ॥

(५) सम्बर्हिर्लिङ्गोक्तदेवत्यामिति तस्यैव पाठश्चेति ॥

रक्षसां० राक्षसम् । (१)

रक्षसां भागइत्येतद्राक्षसं रक्षोदैवतम् । अस्योच्चारणानन्तरमपां स्पर्शः कार्यः । षळक्षरा दैवी त्रिष्टुप् यजुर्गायत्री वा कल्पामानने विनियोगोऽस्य ॥ ७ ॥

अथ याजमानम् ।

अथानन्तरम् याजमानमिदम् याजमानकर्म । तत्सम्बन्धीनि ऋषिदेवतछन्दांसि । वक्ष्यन्त इति शेषः । अत्र याजमानप्रकरणेन तन्मन्त्रा लक्ष्यन्ते ।

संवर्चसा त्वाष्ट्री त्रिष्टुप् । (२)

संवर्चसेत्येषा त्वाष्ट्री । त्वष्टाऽस्या देवता । त्रिष्टुप्छन्दः अत्र चतुर्थे व्यूहः । पूर्णपात्रजलप्रतिग्रहणे विनियोगः ॥

दिवि विष्णुस्त्रीणि वैष्णवानि ।

दिवि विष्णुः । अन्तरिक्षं विष्णुः, पृथिव्यां, विष्णुरित्यादीनि त्रीणि वैष्णवानि विष्णुदेवतानि । प्रथमा ऋचा पङ्क्तिः । यांस्मानिति । पूर्वरूपव्यूहेन त्रिंशदक्षरत्वात् द्वितीया व्यूहेन द्वात्रिंशदक्षरा आर्षी-नुष्टुप्प्राजापत्या जगती वा तृतीया त्रिंशदक्षरा ऋचां पङ्क्तिरेव

---

(१) एतस्य मन्त्रस्याग्रे "वेषोऽसि जुहोम्युपवेषः ॥ अस्य मन्त्रस्य परमेष्ठी ऋषिरुपवेषो देवता ब्राह्मी उष्णिकछन्दः उपवेषकरणे विनियोगः ॥ वेषोऽस्युपवेषो द्विषतो मीवा उपयाविडढि ॥ वेशी ॥ २ ॥ ऽअग्ने सुभग धारयेह ॥ १ ॥ ऋद्धाः कर्मण्या अनपायिनो यथासन् ॥ जुहोमि त्वा सुभगसौभगाय पुरूत्तम पुरुहूतश्रवस्यन् ॥ २ ॥ इति काठकशाखिनां मन्त्रद्वयाधिकपाठः ॥

(२) यत्र शूर्पो यवमानित्यादि पूर्वोक्तसूत्रमत्र पठितं पाठभेदेन मन्त्रोऽपि यत्र श्रुतं तत्र ॥ शिवे मे सन्तिष्ठ स्वाराष्ट्रे मे सन्तिष्ठस्व स्वस्त्ये मे सन्तिष्ठस्व ॥ १ ॥ इति ॥

विष्णुक्रमवै चैवास् विनियोगः ॥

अस्माद्भागः । (१)

अस्मादन्नादित्यस्य भार्गो देवता व्यूहेनाष्टादशाक्षरत्वात् । सानुषङ्गस्य ऋग्गायत्री सामबृहती छन्दः भागावेक्षणे विनियोगः ॥

अस्यै भूमिः ।

अस्यै प्रतिष्ठाया इत्यस्य भूमिर्देवता, व्यूहने विंशत्यक्षरत्वात् । सामपङ्क्तिः प्राजापत्या बृहती वा । भूम्यवेक्षणे विनियोगः ॥

अगन्म दैवम् ।

अगन्म स्वरित्येतद्यजुर्दैवो देवाश्चास्य देवता । दैवी बृहती, चतुरक्षरत्वात् । प्राङ्गीक्षणे विनियोगः ॥

संज्योतिषाऽऽहवनीयः ।

सञ्ज्योतिषेत्यस्याहवनीयो देवता । यजुर्गायत्री दैवीत्रिष्टुब्वा । षडक्षरत्वात् आहवनीयेक्षणे विनियोगः ॥

स्वयम्भ. सूर्यस्य (२) सौरे ।

स्वयम्भूरसि सूर्यस्याव्रतमित्येते द्वे यजुषी सौरे सूर्यदेवते । यथाक्रमं सूर्यवीक्षणे प्रदक्षिणावर्तने वा विनियुक्ते., स्वयम्भूः एकोनविंशत्यक्षरत्वात् एकाधिका ऋग्गायत्री वा एकोना सामपङ्क्तिर्वा सूर्यस्येति नवाक्षरत्वाद्यजुर्बृहती आसुरी जगती वा ॥

अग्ने गृहपते गार्हपत्यः

अग्ने गृहपते सुगृहपतिरित्यस्य गार्हपत्यो देवता । चतुःपञ्चाशक्षरा ब्राह्मी बृहती गार्हपत्योपस्थाने विनियोगः ॥

---

(१) अस्मादन्नाद्भागाऽस्यै भूमिरगन्म स्वरित्यर्थः इति क्वचिद्विशेषः पाठस्तत्र शोध्यः ॥

(२) द्वे इत्यधिकः पाठः ॥

सूर्य्यस्य सौरम् । (१)

सूर्य्यस्यावृतमित्येतत्सौरम् । छन्दः पूर्वोक्तम्, सूर्यदेवतम् । प्रदक्षिणावर्त्तने विनियुक्तम् ॥

अग्नेऽथऽइदमाग्नेये ।

अग्ने व्रतपते व्रतमचारिषम् । इदमहमित्येते यजुषी । आग्नेये । अग्निदेवते व्रतविसर्गे विनियोगः, अग्ने विंशत्यक्षरा प्राजापत्या बृहती सामपङ्क्तिर्वा । इदमहन्त्र्यक्षरा आसुरी त्रिष्टुप् यजुःपङ्क्तिर्वा । एतावन्त्यमन्त्राः दर्शपूर्णमासमन्त्राः ॥ अथ पिण्डपितृयज्ञमन्त्राणाम् साधारणमृषिमाह ॥ ८ ॥

पितृयज्ञः प्रजापतेरार्षम् ।

अथ पितृयज्ञप्रकरणेन तन्मन्त्रा उच्यन्ते । पितृयज्ञमन्त्राणाम् प्रजापतिर्ऋषिरित्यर्थः ॥

अग्नये सोमाय ह दैवे स्वाहाकारश्रुतेः ।

---

(१) एतत्सूत्रस्याग्रे "उरु विष्णो वैष्णव्यनुष्टुप् ततोऽसीति यजुरन्तेदग्ने पौत्रमग्न ऽइदमाग्नेये,, अत्र मन्त्रपाठभेदेन "अग्ने गृहपते सुगृहपतिरहं त्वया गृहपत्या भूयासम् ॥ सुगृहपतिस्त्वम्मया गृहपत्या भूयाः ॥ अस्थूरि णौ गार्हपत्यानि सन्तु शतर्ठ० हिमाः ॥ तिग्मेन नस्तेजसा सर्ठ०शिशाधि सूर्यस्यावृतमन्वावर्ते ॥ स्वाहा विराजित उरु विष्णो इति पञ्चमाध्यायस्थाऽष्टित्रिंशकण्डिकात्र पठितः । तदग्रे ततोऽसि तन्तुरस्यनुमातनुहि ॥ अस्मिन्यज्ञे स्वाठें साधुकृत्यायामाईमन्त्रान्नाईमंल्लोके ॥ इदम्मे कर्म्मेदं वीर्यम्पुत्राऽनुसन्तनोतु ॥ तदग्रे अग्ने व्रतपतऽइति मन्त्रो बोध्यः । उरु विष्ण इत्यस्य परमेष्ठीऋषिर्विष्णुर्देवता अनुष्टुप्छन्दः प्रागमने विनियोगः । ततोऽसीत्यस्य यज्ञो देवता त्रिष्टुप्छन्दः पुत्रनामग्रहणे विनि० ॥ अग्ने व्रत० अग्निर्दे० प्राजापत्या बृहतीछन्दो व्रताविसर्गे वि० ॥ इदमह परमे० अग्निर्दे० यजुः पंक्तिश्छन्दो व्रतविसर्गे वि० ॥ इति दर्शपूर्णमासमन्त्राः समाप्ताः । २ । तदग्रे पितृयज्ञमन्त्राणां ऋष्यादिकमुच्यते ॥

अग्नये कव्यवाहनाय, सोमाय पितृमते हे यजुषी देवे । दैवदेवत्ये । कस्मात् स्वाहाकारश्रुतेः । अनयोर्यजुषोरन्ते स्वाहाकारश्रवणात् । स्वाहाकारश्च देवे एव हि वेः प्रदानार्थत्वात्, वषट्कारेण च स्वाहाकारेण वा देवेभ्योऽन्नम् प्रदीयते श्रुतेः, । चरुहोमे चानयोर्विनियोगः । अग्नये । एकादशाक्षरत्वात् । यजुस्त्रिष्टुप्आसुरीपङ्क्तिर्वा, सोमाय नवाक्षरा यजुर्बृहती आसुरी जगती वा ।

अपहताऽअसुरम् ।

अपहताइत्येतदासुरम् असुरदैवतम् । तन्त्रोक्षणे विनियुक्तम् । आसुरत्वादस्योच्चारणानन्तरमपां स्पर्शः कार्यः, चतुर्दशाक्षरा साम्नी उष्णिक् आसुर्युष्णिग्वा ॥

ये रूपाणि कव्यवाहनोऽग्निस्त्रिष्टुप् ।

ये रूपाणीत्यस्या ऋचः कव्यवाहनोऽग्निर्देवता त्रिष्टुप्छन्दः अत्र चतुर्थस्य व्यूहेन पूरणम्, प्रथमो दशाक्षरएव । तत्रैकोनाः प्रजापतिऋषिः उल्मुकनिधाने विनियोगः ॥

अत्रामीमदन्त पित्र्ये ।

अत्र पितरः, अमीमदन्त, पितरइत्येते द्वे यजुषी पित्र्ये । अनयोः पितरौ देवताइत्यर्थः । द्वयोरप्यष्टादशाक्षरत्वात्साम्न्यनुष्टुभौ ब्राह्म्युष्णिहौ वा जपे विनियोगः । अनयोरुच्चारणानन्तरमपां स्पर्शःकार्यः ।

नमो वः षट्लिङ्गोक्तानि ।

नमो वः पितरइत्यादीनि यजूंषि लिङ्गोक्तानि एषाम् स्वगतलिङ्गेनैव देवतोक्ताः । तत्र परे पित्र्ये इति । परयोः पित्र्यत्वस्य पृथगुक्तत्वादिमानि पित्र्याणि न भवन्तीति प्रतीयते, न रसशोषजीवस्वधाघोरमन्युदेवतानीत्यर्थः । आद्यानाम् पञ्चानाम् नवाक्षराणां यजुर्बृहती आसुरी जगती वा । षष्ठस्य एवम् विंशत्यक्षरा अनु-

णाम् [illegible] विनियोगः । परे पित्र्ये । अत्र पितर, एतत, इत्येते द्वे यजुषी पितृदेवत्ये तयोराद्यं षोडशाक्षरा प्राजापत्यानुष्टुप् । एतदष्टाक्षरा यजुरनुष्टुप् । प्रजापतिर्गायत्री वा अग्ने सूर्योऽमनेन च क्रमेण विनियुक्ते । (१)

आधत्त पितरो गायत्री ।

आधत्त पितर इतीयमृक् पित्र्या पितृदेवत्या गायत्रीछन्दस्का । अत्र तृतीयस्य व्यूहेन पूरणम् । पुत्रकामायाः पत्न्या मध्यमपिण्डप्राशनेऽस्या विनियोगः ॥

ऊर्जमापो विराट् ।

ऊर्जं वहन्तीरितीयमृक् आपी अब्दैवत्या अस्या आपो देवता विराट्छन्दः । दशकास्त्रयो विराडिति विराडनुष्टुभा । द्वितीया नवकेनैव न्यूना । इति पितृयज्ञमन्त्राणामृष्यादिकमुक्तम् । (२) अथाग्न्याधेयमन्त्राणाम् साधारणमृषिमाह ॥ ८ ॥

आग्न्याधेयम् प्रजापतेरार्षम् ।

अथाग्न्याधेयपदेन तन्मन्त्रा लक्ष्यन्ते । अग्न्याधेयमन्त्राणाम् सर्वेषाम् सामान्येन प्रजापतिरृषिरित्यर्थः अत्र तु ऋषिविशेषोऽभिधीयते तयोर्भावेऽपि ऋषी भवतः अत्रैव विकल्पेनैतानृषीनाह ॥

देवानामग्नेर्गन्धर्वाणाम् वा ।

देवानामग्नेर्गन्धर्वाणाम् वा । अग्न्याधेयमार्षमित्यनुवर्तते अग्न्याधेयमन्त्राणाम् देवा ऋषयः अग्निर्वा ऋषिः । गन्धर्वा वा ऋषयः

(१) कव्यवाहनोऽनुष्टुप् तत्रैवमेव पाठः ॥ एतद्द्वयं परे पित्र्ये, एतत्सूत्रस्थाने "उदायुषामृतदैवत्यम्" ॥

(२) कृष्णोऽसि नाम्ना [illegible] देवसवितर्[illegible]काद्दशाग्निर्मियो: षडग्ने दक्षिणा- योऽग्नौ [illegible] दक्षिणाग्नये कव्यवाहनाय [illegible] द्वितीये [illegible] इत्यनुवाकसूत्रकारात् शाखीयानामग्न्याधेयम् ॥

प्रजापतिर्वा पूर्वसूक्तोक्तानि सर्वमन्त्रेषु चत्वारो निरुक्ताः ॥

समिधाग्नेयस्त्र्यूचतस्रो गायत्र्यः ।

समिधाग्निं सुसमिद्धाय । तन्त्वा । उपत्वाग्ने एतावतस्र्यृच-आग्नेयो अग्निदेवताः । गायत्रीछन्दस्काः ।

समिधा विरूपाङ्गिरसः ।

समिधाग्निमित्यस्या अङ्गिरसः पुत्रो विरूपसंज्ञकऋषिः समिदाधाने विनियोगः ॥

सुसमिद्धाय वसुश्रुतः ।

सुसमिद्धाय शोचिषइत्यस्य वसुश्रुतऋषि । अध्वर्योर्जपे विनियोगः ॥

तन्त्वा भरद्वाजः ।

तन्त्वा समिद्भिरित्यस्या भरद्वाजऋषिः समिदाधाने विनियोगः अत्र तृतीये व्यूहः । उपत्वेत्यस्य पूर्वोक्ताएवऋषयः ॥

भूर्भुवः स्वस्तिस्रो महाव्याहृतयोऽग्निवायुसूर्या देवत्याः क्रमेण ।

भूरित्यस्याग्निर्देवता । भुवइत्यस्या वायुः स्वरित्यस्याः सूर्यइति । भूरिति दैवी गायत्री आसां तिसृणामप्यग्निस्थापने विनियोगः ॥

द्यौरिव यजमानाशीर्लिङ्गोक्तदेवता

द्यौरिव भूम्नेतीयं यजमानस्याशीर्लिङ्गोक्तदेवता । पृथिवी च-द्यौ देवतेति यावत् । व्यूहेन षट्त्रिंशदक्षरा ऋग्जगती ब्राह्मी गायत्री वा याजी बृहती वा यजमानकर्तृके जपे विनियोगः ॥

आयङ्गौः सार्पराज्ञस्तृचो गायत्रोऽग्निः परात्ररूपेण देवता ।

आयङ्गौः, अन्तश्चरति, त्रिंशद्धामेत्यृचम् तृचः सार्पराज्ञ्यः सर्पाणाम् राज्ञीः कद्रूः पृथिव्यामभिमानिनीति मत्वा अयं सार्पराज्ञः सार्पराज्ञीः अस्य कद्र्वाख्य दृष्टी इत्यर्थः। गायत्रीछन्दः परूपेणावरूपेण च स्तूयमानोऽग्निरस्य तृचस्य देवता। आयं गौरित्यनेनादित्यरूपेणाग्निः स्तूयते। अन्तश्चरसीत्यनेन वायुरूपेण। आदित्यः परः। दिवि वा एष हितो दिवि प्रतिष्ठितः। "दिवो ह्यसौ प्रतिष्ठिता ज्योतिषामादित्य इति श्रुतिः"। अवरो वायुः अन्तरिक्षं यस्तिर्यग्वायुः पवत इति अर्वाचीनं च "तद्दिवो वायुं दधाति। अन्तरिक्षस्य ह्यपाम् एते ज्योतिषाम्वायुरित्यादिश्रुतिः"। आयङ्गौरित्यस्यास्तृतीयः समाचरणो नैकोना अन्तरित्यत्र तृतीयस्य व्यूहेन पूरणम्। प्रथमद्वितीयपादयोर्व्यूहेन छन्दः पूरणम् आहवनीयागन्युपस्थाने विनियोगः। इत्यन्त्याधेयमन्त्राः॥ अग्न्याग्निहोत्रयाणाम् साधारणमभिधाय॥१०॥

अग्निहोत्रम् प्रजापतेरार्षम्॥

अथाग्निहोत्रपदेन तन्मन्त्रा लक्ष्यन्ते। अग्निहोत्रमन्त्राणाम् यत्र ऋषिविशेषोऽभिधीयते तत्रोभावृषी भवतः प्रजापतिरृषिः सर्वेषाम्॥

अग्निर्ज्योतिः सप्त लिङ्गोक्तदेवता गायत्र्यः। (१)

(१) अग्निर्ज्योतिषं त्वा सीमदाग्निं ज्योतिर्लिङ्गोक्तदेवतं० सूर्यज्योतिषं त्वा सूर्यो ज्योतिर्हसमित्सौरे सजूर्देवेन द्वे आग्नेयसौरे इह पुष्टि लिङ्गोक्तदेवतमग्नयेऽन्नादाय दक्षिणाग्निमनमित्रमाग्नेयमिन्द्रः पश्चादैन्द्री बृहतां सीमदासि लिङ्गोक्ताम् इत्यधिकः पाठः काण्वशाखानाम् ॥ इहपुष्टिमित्यस्य प्रजापति ऋषिरग्निर्गृहपतिः रयिमान्पुष्टिमाँश्च देवता पङ्क्तिछन्दो गार्हपत्ये पूर्णाहुतिहोमे विनियोगः। इह पुष्टिं पुष्टिपतिर्दधात्विह प्रजार्ठ०रमयतु प्रजापतिः॥ अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा॥ अग्नयेऽन्नादायान्नपतये स्वाहा। अनमित्रम्मे अधरागनमित्रमुद्कृधि॥ इन्द्रनामित्रम्पश्चान्मेऽनमित्रं पुरस्कृधि॥ इन्द्रः पश्चादिन्द्रः पुरस्ता-

अग्निर्ज्योतिः । सूर्यो ज्योतिः । अग्निर्वर्चः । सूर्यो वर्चः । ज्योतिः सूर्यः । सजूर्देवेन । द्वितीया सजूर्देवेन एताः सप्तऋचः लिङ्गोक्तदेवता यथा लिङ्गमग्निसूर्यदेवता इत्यर्थः । आसां सप्तानाम् गायत्री-छन्दः । अत्रैव विशेषमाह ॥

आद्याः पञ्चैकपदाः ।

अग्निर्ज्योतिरित्यारभ्य ज्योतिः सूर्य इत्येतत्पर्यन्ताः पञ्चएकपदा गायत्र्यः, "अष्टाक्षरा गायत्रीति श्रुतेः" । प्रजापत्या गायत्र्य एताः प्राजापत्याष्टावित्युक्तेः स्वाहाकारस्तु पृथक्त्वतुः । षष्ठीसप्तम्यौ त्रिपदे-गा त्र्यौ त्रिपदा वै गायत्री चतुर्विंशत्यक्षरा वै गायत्री इत्यपि श्रवणा-त् । तत्र द्वितीयपादस्य व्यूहेन पूरणम् प्रथमायाम् । तृतीयपादस्तु-भयोः सप्तकस्तेनैकोने ॥

अग्निर्वर्चो द्वे तन्नापश्यत् ।

अग्निर्वर्चः सूर्यो वर्च इति द्वे एकपदे तन्नामऋषिरपश्यत् । दृष्टवान् । "तदु हैतद्देवाः रूपये ब्रह्मवर्चसकामाय तथाग्र वाचाग्निर्वर्च इत्यादिश्रुतेः ।

परान् जीवलश्चैलकिः ।

परामिति पूर्वोक्ताभ्यां परा ज्योतिः सूर्य इत्येताम् चैलकस्य पुत्रो जीवलऋषिरपश्यत् । "तदु हो वा च जीवलश्चैलकिरिति प्रकृत्य

दिन्द्रो अस्मार ॥ ऽअभिपातु विश्वत । इन्द्रो जितं हसतो मा हिंसि विष जिनन्त्य-स्यताम ॥ अग्नयेइत्यस्य प्रजापति ऋ० अग्निरन्नादो ऽन्नपतिर्देवता सामगायत्री छन्दो दग्निनाग्नौ पूर्वाहुतिहोमे विनियोगः । समिदसि इत्यस्य प्रजा० अग्नि० दे० दैवी बृहतीछन्दः समिद्धोमे विनियोगः । समिदसि समिद्धोमे अग्ने दीदिहि ॥ समे-द्धाते अग्ने दीद्यासम् ॥ समिदसीत्यस्य प्रजा० ऋ० आसुरी जगती सा समिद्धोमे वि-नियोग । सममस्य सामगायत्री त्रिष्टुप विद्युदसि प्रजा० ऋ० आपो दे० ऋक्पंक्तिश्छन्दः आचमने विनियोगः ॥ इति पद्धत्या पाठो बोध्य. ॥

ऽथ प्रातर्ज्योतिः सूर्यः सूर्यो ज्योतिः स्वाहेति श्रुतेः„॥ अथ यजमान-कर्तृकं बृहदग्न्युपस्थानमाह ॥ ११ ॥

यजमानाग्न्युपस्थानम् बृहत् ।

अथ यजमानाग्न्युपस्थानशब्देन तन्मन्त्रा लक्ष्यन्ते । सायमग्निहोत्रे यजमानस्याग्न्योर्गार्हपत्याहवनीययोर्बृहदुपस्थाने उच्यन्त इति शेषः ॥

देवानामार्षम् ।

तच्च बृहदग्न्युपस्थानम् । देवानामार्षम् । बृहदुपस्थानमन्त्राणाम् देवा ऋषय इत्यर्थः ॥

उपप्रयन्त इत्यनुवाक आद्येऽर्द्ध आग्नेय्यौ गायत्र्यौ ।

उपप्रयन्तोऽध्वरमित्यस्मिन्ननुवाके आद्ये द्वे ऋचौ, उपप्रयन्तोऽध्वरम् । अग्निर्मूर्द्धा दिव इत्येते गायत्र्यौ गायत्रीछन्दस्के । द्वयोरपि द्वितीयपादयोर्व्यूहेन पूरणम्, अनयोरेव ऋषिविशेषमाह ।

उपवत्या गोतमो राहूगणः ।

उपेत्ययम् शब्दोऽस्ति अस्यामित्युपवती । उपप्रयन्त इत्येषाम् । तस्या राहूगणस्य पुत्रो गोतमसञ्ज्ञक ऋषिः ॥

मूर्द्धन्वत्या विरूपः ।

मूर्द्धशब्दोऽस्त्यस्यामिति मूर्द्धन्वती । अग्निर्मूर्द्धेति द्वयमेक । तस्या विरूपऋषिः आहवनीयोपस्थाने उभयोर्विनियोगः ॥

उभा वां भारद्वाजऐन्द्राग्नी त्रिष्टुभम् ।

उभावामिन्द्राग्नी इत्येताम् इन्द्राग्नीदेवताकाम् त्रिष्टुप्छन्दस्काम् भरद्वाजऋषिरपश्यत् । अत्र प्रथमद्वितीये दशाक्षरौ तेन द्व्यूना ॥

अयन्ते देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टु-

भम् ।

अयम् ते योनिरितीमामृचम् अग्निदेवत्याम् । अनुष्टुप्छन्दस्काम् भारती भरतस्य पुत्रौ । देवश्रवा देववातश्चेति तौ द्वौ ऋषी द्रष्टारो अपश्यताम् । पादसन्धौ व्यूहेन छन्दःपूरणीयम् ॥

अयमिह वामदेवो जगतीम् ॥

अयमिह प्रथमइति इमामृचम् जगतीछन्दस्काम् वामदेव ऋषिरपश्यत् । आग्नेयीमित्यनुवर्त्तते तेनास्या अग्निर्देवता: अस्या द्वादशाक्षराश्चत्वारः पादाः साऽष्टाचत्वारिंशदक्षरा जगत्युच्यते । "अष्टाचत्वारिंशदक्षरा जगतीति श्रुतेः", अत्र तु आद्यो द्वादशकः । द्वितीयो व्यूहेनैकादशकः । तृतीयो द्वादशकः एकोना ॥

अस्य प्रत्नाम्वत्सारो गव्यां (१) वाऽऽग्नेयीं वा पयोदेवत्याम् वा गायत्रीम् ।

अस्य प्रत्नामनुद्युतमित्येतामृचम् गव्याम् आग्नेयीं वा पयोदेवत्याम् वा गायत्रीछन्दस्काम् वत्सारऋषिरपश्यत् । अस्या गौर्देवता । अग्निर्वा पयोवेति त्रयो देवा विकल्पाः ॥

तनूपाऽआग्नेयानि ।

तनूपाऽअग्नेऽसीत्यादीनि चत्वारि यजूंषि आग्नेयानि अग्निदेवत्यानि, तनूपा, वर्चोदा, इति द्वे एकादशाक्षरे यजुस्त्रिष्टुभौ । आसुराङ्गौ वा । आयुर्दाऽइति दशाक्षरा यजुःपङ्क्तिरासुरी त्रिष्टुब्वा । अग्ने यन्मे तन्वा इति त्रयोदशाक्षरा आसुर्यनुष्टुप् ॥

इन्धानाऽआग्नेयी महापङ्क्तिस्त्र्यवसाना: ॥ (२)

---

(१) वत्सार इति, आवत्सार इति "गघ,, योः पुस्तकयोः पाठ इति, वत्सार इति कात्यायनीयपाठश्च बोध्यः ॥

(२) तत्र महापङ्क्तिर्बोध्यः ॥

इत्यागात्त्वा शतमित्यस्य आग्नेयी अग्निदेवत्या। महापङ्क्तिश्छन्दः। अवसाना विराडोऽवसानम्। अवसानानि विराडवसानानि यस्याम् सा अवसाना नाम तस्या अष्टाक्षरा षट्पादा सा महापङ्क्तिः षडष्टका वा महापङ्क्तिरित्युक्तत्वात् अत्र अष्टसमाक्षरस्त्वेकोना ॥ १२ ॥

चित्रावसो रात्रिदेवत्यमृषयोऽपश्यत् ।

चित्रावसो स्वस्तीत्येतद्रात्रिदेवत्यम् यजुरृषयोऽपश्यत् । "एतेन ह स्म वा ऋषयो रात्री स्वस्ति पारᳩ समश्नुवन्" इति श्रुतेः । (१) द्वादशाक्षरा यजुर्जगती साम्नगायत्री वा आसुरी बृहती वा प्राजापत्योष्णिग्वा । उपप्रयन्त इत्यत आरभ्य चित्रावसो स्वस्तित इत्यन्तस्य मन्त्रगणस्याहवनीयोपस्थाने विनियोगः ॥

सन्त्वमाग्नेयम् ॥

सन्त्वमग्न इत्येतद्यजुरग्निदेवतम् । अष्टाचत्वारिंशदक्षरा आर्षीजगती ब्राह्मी अनुष्टुब्वा। आहवनीयस्याग्रे उपविश्य जपे विनियुक्तम् ॥

अन्धस्थ रेवतीः सᳬहितेति त्रीणि गव्यानि ।

त्रयाणाम् गोदेवतेत्यर्थः । अन्धस्थ एकाधिका ब्राह्मी गायत्री सप्तत्रिंशदक्षरत्वात् । रेवतीः षड्विंशत्यक्षरा प्राजापत्या त्रिष्टुप्(२) आर्षी उष्णिग्वा । सᳬहितासि विश्वरूपीत्यष्टादशाक्षरा ऋग्गायत्री साम्नबृहती वा । [illegible]याम् अति गमने विनियोगः । संहितेत्यस्य गोरभिमर्शने ॥

उपत्वाग्नेयन्त्र्यृचम् गायत्रम् मधुच्छन्दा वैश्वामित्रः ।

---

(१) इयं श्रुतिः शतपथब्राह्मणस्य एकपादीनामककाण्डस्येति ॥

(२) रेवती रस्मिन्मन्त्रे यो नाऽस्मिन्, अस्मिँक्षयेऽस्मिंल्लोके इति काण्वपाठः ॥ इहैवस्तेतो मापगातेति च पाठो बोध्यः ॥

उपत्वाग्ने दिवे । राजन्तम् । स नः पितेवेत्येतत्त्र्यृचम् गायत्रम् आग्नेयमग्निदैवतम् विश्वामित्रपुत्रो मधुच्छन्दा नामक ऋषिरपश्यत् दृष्टवान् । राजन्तमित्यस्याः प्रथमतृतीयौ समानौ । तेन व्यूढा, न तृतीयस्याः तृतीयस्य व्यूहेन पूरणम् । अस्य तृचस्य गार्हपत्योपस्थाने विनियोगः ॥

अग्ने त्वम् चतस्रो द्विपदास्त्वाग्नेयीर्बन्धुः सुबन्धुः श्रुतबन्धुर्विप्रबन्धुरेकैकशः ।

अग्ने त्वन्नोऽअन्तमः ॥ वसुरग्निः । तन्त्वा शोचिष्ठ । स नो बोधि एताश्चतस्रो द्विपदाः आग्नेयीरग्निदैवत्याः बन्ध्वादयश्चत्वार ऋषय इत्यर्थः । द्वौ द्वौ पादौ यस्याः सा द्विपदा । आसाम् गार्हपत्योपस्थाने एव विनियोगः ॥ द्विपदासु विशेषमृग्वेदानुक्रमण्याम्, "द्विद्विपदास्त्वृचः समामनन्ति"। ऋचोऽध्ययने त्वध्येतारो द्वे द्विपदे संयोज्य एकैकामृचम् कृत्वा समाप्नोति । "अयुक्षु अन्त्या द्विपदैवेति" ॥

इडे काम्या गव्ये ।

इडऽएहि । काम्याएत इतीमे यजुषी गव्ये । अनयोर्गौर्दैवतेत्यर्थः । इडे अष्टाक्षरा प्राजापत्या गायत्री यजुरनुष्टुब्वा, काम्या एत । चतुर्दशाक्षरा आसुर्युष्णिग्वाक्रमम् गां प्रतिगमने गोरालम्भे च विनियोगः ॥ (१)

सोमानम् ब्राह्मणस्पत्यम् त्र्यृचम् गायत्रम् ब्रह्मणस्पतिर्मेधातिथिर्वा ।

सोमानम्, स्वरणम्, यो रेवान्, मा नः शंस इत्येतत्त्र्यृचम् ब्राह्मणस्पतिदैवतम् गायत्रीछन्दस्कम् ब्रह्मणस्पतिऋषिर्मेधातिथिर्वा अपश्यत्

(१) काम्यऽएहि, इति काण्वपाठः ॥

[illegible] जपे विनियुक्तम् । [illegible] [illegible] प्रथमो व्यूहेनाऽपि समाचर । तेविंशाना मा गद्दत्यस्याः द्वितीयः समाचरस्तस्य व्यूहेन पूरणम् ॥

मह्रि त्रीणाम् ० सत्यधृतिर्वारुणीमादित्यदेवतम् तच्च जपन्मायनम् पथि स्वस्त्ययनम् ।

मह्रि त्रीणामवोऽस्तु । नहि तेषाम् । ते हि पुत्रासइत्येतामृचम् आदित्यदेवताम् गायत्रीछन्दस्काम् वरुणस्यापत्यम् सत्यधृतिरपश्यत् जपे विनियोगोऽस्य । मह्रि त्रीणामित्यस्याः प्रथमतृतीययोर्व्यूहेन पूरणम् न हि तेषामित्यस्य तृतीयस्य व्यूहेन पूरणम् । ते हीत्यस्या द्वितीयस्य तृतीयस्य च व्यूहेन पूरणम्, किं च इदम् तचम् पथि मार्गे स्वस्त्ययनम् तस्कराद्युपद्रवभयनाशकरम् । मार्गे गच्छता मितस्यृचजपेन कुशलेन वाञ्छितस्थानप्राप्तिर्भवतीत्यर्थः । स्वस्तीत्यविनाशि नाम । अविनाशप्रापकम् ।

कदा चनेन्द्री पथ्याबृहतीम् मधुच्छन्दाः ।

कदा चन स्तरीरसीत्येतामृचमैन्द्रीं इन्द्रदेवत्यां पथ्याबृहतीछन्दस्काम् मधुच्छन्दा ऋषिरपश्यत् जपएवास्या अपि विनियोगः । यस्यास्तृतीयः पादो द्वादशाक्षरः अन्ये त्रयः त्रयः पादा अष्टाक्षराः सा पथ्याबृहती पथ्यापूर्वयोस्तृतीयो द्वादशकइत्येतद्व्यतिरिक्तम् पथ्याबृहतीलक्षणम् पृथङ्नास्ति तेन बृहत्येव पथ्या बृहतीत्युच्यते ॥

तत्सवितुर्विश्वामित्रः सावित्रीं गायत्रीम् ।

तत्सवितुर्वरेण्यमित्येतामृचम् सावित्रीम् सवितृदेवत्याम् गायत्री नैकाना । व्यूहेन पूर्येतइति केचित् । अस्यामपि जपे विनियोगः ॥

परि ते वामदेव (१) आग्नेयीमनिरुक्ताम् गायत्रीम् ॥

(१) वामदेवामाना कारावशाखीयस्य पाठो बोध्यः ॥

(१)परि ते दूडभोऽस्त्वितास्यम् अग्निदेवत्याम् अग्निसूक्ताम् मन्त्रोऽग्निपदप्रयोगरहिताम् गायत्रीछन्दस्काम् वामदेवऋषिरपश्यत् विश्वामित्रऋषिरपश्यत् । यत्रापि प्रथमं सप्ताक्षरास्त्रिपादस्त्री व्यूहेन छन्दः पूर्तिः । अस्या अपि जपएव विनियोगः ॥ १२ ॥

यजमानाग्न्युपस्थानमन्त्राः समाप्ताः । अथ क्षुल्लकोपस्थानमन्त्रस्य ऋषिमाह ॥

क्षुल्लकोपस्थानमासुरेरार्षम् भूर्भुवः स्वः ।

भूर्भुवः स्वरित्येतत्क्षुल्लकोपस्थानम् पूर्वोक्तदीर्घवाग्न्युपस्थाना-पेक्षया लघुपस्थानम् ॥

आसुरेरार्षम् ॥ आसुरिमन्त्रकोपस्थानस्य सर्वमन्त्राणाम् साधारणऋषिरित्यर्थः । पूर्वोक्तदीर्घोपस्थानापेक्षयाऽस्य क्षुल्लकत्वम् । तस्यैव स्थाने विकल्पेनाहवनीयगार्हपत्ययोरुपस्थाने विनियुक्तम् । तावेवास्य देवता एकविंशत्यक्षरा ऋगुष्णिक्छन्दः ॥

प्रवत्स्यदुपस्थानम् (२) तदुभयमादित्यस्यार्षम् ।

तन्मन्त्राणाम् सर्वेषामेकमादित्यऋषिरित्यर्थः ॥

नर्य(३) गार्हपत्यः ।

नर्य प्रजाम् मइत्यस्य गार्हपत्यो देवता सप्ताक्षरा दैवी जगती यजुरुष्णिग्वा गार्हपत्योपस्थाने विनियोगः ॥

शंस्य (४) हवनीयः ।

---

(१) एतन्मन्त्रान्ते "समिद्धोग्निमहं मह्यं प्रजया च धनेन च" इति मन्त्रार्धः काण्वशाखायामधिकः पठितः ॥

(२) मागतोपस्थानं चादित्यस्येति काण्वशाखीयस्य च पाठः ॥

(३) प्रजामित्यधिकः काण्वशाखीयस्य पाठः ॥

(४) शंस्य पशूनाहवनीय इति काण्वपाठः ॥

मठं॰स्य पशून्मेत्याहवनीयोपस्थाने विनियोगः ॥

अथर्व दक्षिणाग्निः । (१)

अथर्व पितुमित्यस्य दक्षिणाग्निर्देवता अष्टाक्षरा यजुरनुष्टुप्प्राजापत्या गायत्री वा । दक्षिणाग्न्युपस्थाने विनियोगः ॥

आगन्माहवनीयोऽनुष्टुप् ।

आगन्म विश्ववेदसमित्यस्य आहवनीयो देवता अनुष्टुप्छन्दः । आहवनीयोपस्थाने विनियोगः ॥

अयमग्निर्न्यङ्कुसारिणी (२) गार्हपत्यः।

अयमग्निर्गृहपतिरित्यस्या ऋचो न्यङ्कुसारिणी बृहतीछन्दः । गार्हपत्योपस्थाने विनियोगः, यस्या ऋचो द्वितीयः पादो द्वादशाक्षरः अन्ये त्रयोऽष्टाक्षरा सा न्यङ्कुसारिणी । द्वितीयश्चेन्न्यङ्कुसारिणीत्युक्तत्वात् । अत्र तृतीयो नवाक्षरस्तेनैकाधिका ॥

अयमग्निरन्वाहार्यपचनोऽनुष्टुप् । (३)

अयमग्निः पुरीष्य इत्यस्याः अन्वाहार्यपचनो देवता अनुष्टुप्छन्दः । अत्र प्रथमः सप्ताक्षरस्तेनैकोना दक्षिणाग्न्युपस्थाने विनियोगः ॥

गृहा मा त्रिष्टुब्विराड्रूपा ।

गृहा मा बिभीतेत्यस्या विराड्रूपा त्रिष्टुप्छन्द एकादशिनः त्रयोदशिनः त्रयोऽष्टकश्चेद्विराड्रूपेत्युक्तत्वात् । यस्या एकादशाक्षरास्त्रयः पादा एकोऽष्टाक्षरः सा विराड्रूपेत्युच्यते । अत्र प्रथमो दशाक्षरस्तेनैकोना ॥

(१) इदं सूत्रखण्डं अथर्व पितुम्मे पाहि" मन्त्रखण्डं च काशीयसर्वानुक्रमण्यां नास्तीति ॥

(२) बृहतीत्यधिकं काशीवाली पाठः ॥

(३) इदं सूत्रखण्डं काशीवाली नास्तीति ॥

येषामनुष्टुप् ।

येषामध्येतीत्यस्या अनुष्टुप् छन्दः ॥

उपहूता महापङ्क्तिः (१) त्र्यवसाना ।

उपहूता इह गाव इत्येषा महापङ्क्तिछन्दस्का त्र्यवसाना त्रीण्यवसानानि यस्याम् सा त्र्यवसाना । यस्या अष्टाक्षराः षड्वा सामपङ्क्तिः षडष्टका वा महापङ्क्तिरित्युक्तेः, अत्र पञ्चमो नवाक्षरो नैकाधिका ॥

तिस्रोऽपि वास्तवीः शंयुर्बार्हस्पत्यः ।

गृहा मेत्याद्यास्तिस्रोऽपि वास्तवीः वास्तुदेवताः बृहस्पतेरपत्यं शंयुर्नामकऋषिरपश्यत् गृहोपगमने तिसृणामपि विनियोगः । क्षेमाय वइत्यस्य गृहप्रवेशे ॥ १५ ॥

इत्युपस्थानमन्त्राः ॥ अथ चातुर्मास्यमन्त्राणाम् साधारणऋषिमाह ॥

(२)चातुर्मास्यानि प्रजापतेरार्षम् ।

अत्र चातुर्मास्यशब्देन तन्मन्त्रा लक्ष्यन्ते । तेन चातुर्मास्यसम्बन्धिमन्त्राणाम सर्वेषाम् एकः प्रजापतिऋषिरित्यर्थः । अत्र तु ऋषिविशेषोऽभिधास्यते तत्राभावेऽपि ऋषी ज्ञेयौ ।

प्रघासिनो मारुती गायत्री ॥

प्रघासिनो हवामह इत्येषा मारुती । मरुतोऽस्या देवता गायत्री छन्दः पत्न्या वाचने विनियोगः ॥

यद्ग्रामे मारुत्यनुष्टुबनिरुक्ता ।

यद्ग्रामइतीयमृक् मारुती मरुद्देवत्या । अनिरुक्ता । मध्ये मरुत्पदप्रयोगाभावात् । अनुष्टुप् छन्दस्का । करम्भपात्रहोमे विनियुक्ता ।

(१) अनुरवसाना इति कारावस्य पाठः ।।

(२) अपेत्यधिकं करावस्य च पाठः ।।

अत्र प्रथमः सप्ताक्षरः चतुर्थो नवाक्षरः द्वावष्टाक्षरौ । तेन पूर्वच्-छन्दः ॥

मो षूणोऽगस्त्य (१) ऐन्द्रामारुतीम् विराजम् ।

मो षू णः सोमाख्यम् इन्द्रमरुद्देवत्याम् विराजम् विराट्छन्दस्का-मगस्त्यऋषिरपश्यत् यजमानस्य जपे विनियोगोऽस्याः, यस्याद्दशा-क्षराश्चत्वारः पादाः सा विराट् । पञ्चमं पङ्क्तिः पञ्चप-दा चतुष्पदा विराट्दशका इत्युक्तेः । अथैन्द्रीं मरुत्वतीं जपतीति श्रुतेरैन्द्रा मारुतीमित्युक्तं । इन्द्रामरुतश्चास्या देवताइत्यर्थः ।

अक्रन्नकर्मेत्येषा अनिरुक्ताग्नेय्यनुष्टुप् । (२)

अक्रन् निरुक्ताग्नेय्यनुष्टुप् ॥ अस्येऽग्निपदप्रयोगरहिता यस्या अनुष्टु-प्छन्दः । अत्र तृतीयः सप्ताक्षरस्तेनैकोना पत्नीयाचने विनियोगः ॥

अवभृथ यज्ञदैवतम् । (३)

अवभृथ निचुंपुणेत्येतद्यजुर्यज्ञदेवतम् । नपुंसकनिर्देशादस्य य-जुष्टम् । अष्टाचत्वारिंशदक्षरत्वात् ब्राह्मीअनुष्टुप् ॥

पूर्णादर्वि द्वे और्णवाभऐन्द्र्यावनुष्टुभौ ।

पूर्णा दर्वि, देहि मे, इतीमे ऋचौ ऐन्द्र्यौ इन्द्रदेवते । अनुष्टुप्छ-न्दस्के और्णवाभऋषिरपश्यत् । प्रथमायां दर्व्यां स्थालीत आदनयह-वे विनियोगः । द्वितीयायास्तथैवेमे ॥ (४)

अक्षन्न् (५) द्वे गौतमऐन्द्र्यौ पङ्क्ती ।

---

(१) अगस्त्यस्येति काण्वस्य पाठः ॥

(२) अस्मिन्सूत्रे इत्येषा पदं काण्वस्य नास्ति ॥

(३) अथावभृथेति काण्वस्य पाठश्च ॥

(४) देहि मइत्यस्मिन्मन्त्रे धेहि नि ते दधौ ॥ निहारं निहरामि ते निहारं निहरासि मे स्वाहा । इति काण्वस्य पाठः ॥

(५) अक्षमीमदन्तेति काण्वस्य पाठः ॥

अवयमीमदन्त । सुसन्दृशन्त्वेतीमे ऋचौ इन्द्रदेवत्ये पङ्क्तिच्छन्दस्के गोतमऋषिरपश्यत् । पाकयज्ञीयोपस्थाने विनियुक्ते । यस्याः पञ्चपादा अष्टाक्षरा सा पङ्क्तिः पञ्चपदा । यत्राद्येऽष्टाक्षराः पादा इति चोक्तत्वात् । सुसन्दृशं द्वितीयं समाक्षरा तेनेयमेकोना । पञ्चमयोस्तूभयव्यूहेन पूरणम् ॥

मनो नु मानसम् त्र्यृचम् बन्धुर्गायत्रम् ।

मनो न्वाह्वामहे, आ न एतु । पुनर्न इत्येतत्त्र्यृचम् मानसम् मनोदेवतम् गायत्रीछन्दस्कम् बन्धुऋषिरपश्यत् । गार्हपत्योपस्थाने विनियुक्तम् मनो न्विति व्यूहेनाऽपि समाक्षरः तृतीयोऽपि तथा । तेनेयम् ऊनना । आ न एत्वत्र तृतीयः षडक्षरस्तेन ऊना । पुनर्न इत्यत्र द्वितीयः समाक्षरः तेनेयमेकोना ॥

वयꣳ सामीं गायत्रीम् बन्धुः ।

वयꣳ सोम व्रते इत्येतामृचम् सोमदेवताम् । गायत्रीछन्दस्काम् बन्धुऋषिरपश्यत् । अस्या विनियोगे उक्तो नास्ति ॥

एष ते द्वे रौद्रे ।

एष ते रुद्र भाग इमे द्वे रुद्रदेवते यजुषी प्रथमस्य विंशत्यक्षरा । प्राजापत्या बृहती सामपङ्क्तिर्वा [illegible] विनियोगः । द्वितीयस्य द्वादशाक्षरत्वाद्याजुषी जगती । अधिकपुरोडाशस्यात्सूत्करोपकिरणे विनियोगः ॥

अव रुद्रꣳ(१) रौद्र्यौ ।

अवरुद्रम् (२)मेवजमसीत्येते द्वे ऋचौ रौद्र्यौ रुद्रदेवते । अनयोश्छन्दसी आह ॥

एका पङ्क्तिरपरा ककुप् ।

---

(१) चनस्रो रौद्रग्रहति काराावस्य पाठः

(२) एनांस्म-बे सुगर्म्मषायेति काण्वशाखीयपाठः ॥

एका रुद्रमितोऽयम् पङ्क्तिछन्दस्का । द्वितीयपादस्य व्यूहेन पूरणम् । परो (१)ऽवसमसीति ककुप्छन्दस्का । पङ्क्तिः पूर्वमुक्ता । यस्य द्वितीयः पादो द्वादशाक्षरः । प्रथमतृतीयावष्टाक्षरौ । सा ककुबुच्यते । मध्यमस्य ककुभित्वुन्नतत्वात् । अत्रापि द्वितीये तृतीये च व्यूहेनाक्षरपूरणम् । उभयोर्जपे विनियोगः ॥

त्र्यम्बकन् द्वे अनुष्टुभौ पूर्वस्याम् वसिष्ठः

रौद्र्यावेव्यनुवर्तते । त्र्यम्बकम् यजामहइति द्वे ऋचौ अनुष्टुप्छन्दस्के रुद्रदेवते । अनयोः प्रथमौ सप्ताक्षरौ । तृतीयौ नवाक्षरौ । तेन व्यूहम् विनाऽपि छन्दः पूर्यते अनयोर्मध्ये पूर्वस्या ऋचो वसिष्ठऋषिः ॥ उत्तरस्यास्तु साधारणप्रजापतिरेवेदम् । पूर्वस्या मन्त्र-यजमानाध्वर्य्वग्नीध्राणाम् अग्निपरिगमने विनियोगः ॥

उत्तरस्य यजमानकुमार्या अग्निपरिगमने विनियोगः ॥

एतन्दास्तारपङ्क्तिः । (२)

---

(१) एतास्मन्मन्त्रे सूत्रमित्यत्र मृगमिति पाठः ॥

(२) एतेन गौतमास्तारपङ्क्तयाजिना वाजस्त्रगुद्धवाजिनदेवत्या वाज्यहं न्द्रे पृषदेवस्मै सावित्रा प्रसूता आपः गायत्रं कश्यपस्य नारायणऽउष्णिहं यजमानशिषे यो माता लौहसूरं चतुरवसानं दीर्घायुत्वाय लिङ्गोक्तदेवतमाशीः प्रायम् ॥ ३ ॥ ईदृशः पाठः काण्वशाखीयसर्वानुक्रमण्याम् । एतेन रुद्रावसेन परो मूजवतोऽतीहि ॥ अवततधन्वा पिनाकावसः कृत्तिवासा अहिꣳसन्नः शिवः शान्तोऽतीहि । वाजिना वाजोऽवतु भगो अस्मान्त्वेनः मित्रमपूर्वं वष्ठय ॥ विश्वेदेवा अभिरक्षन्तु सन्मा धिनोतु प्रजया धनेन ॥ वाज्यहं वाजिनस्योपहूतउपहूतस्य भक्षयामि ॥ वाजो वाजी भूयासम् ॥ सविता प्रसूता दैव्य आप उन्दन्तु ते तनूम् ॥ दीर्घायुत्वाय वर्चसे ॥ कश्यपस्य त्र्यायुषं जमदग्नेस्त्र्यायुषम् ॥ यद्देवानां त्र्यायुषन्तन्मेऽअस्तु त्र्यायुषम् ॥ येन धाता बृहस्पतेरिन्द्रस्य चायुषं वपत् ॥ तेन ते वपामि ब्रह्मणा जीवातवे जीवनाय ॥ दीर्घायुत्वाय बलाय वर्चसे ॥ सुप्रजास्त्वाय चासा अथो जीव श-

रौद्रीपदमनुवर्त्तते । एतत्ते रुद्रेत्यस्या आस्तारपङ्क्तिश्छन्दः रुद्रो देवता । यस्या ऋचोऽन्त्यौ पादौ द्वादशाक्षरौ आद्यावष्टाक्षरौ । सा आस्तारपङ्क्तिः अन्त्यौ चेदास्तारपङ्क्तिरित्युक्तेः । यत्र तु प्रथमो नवकः । द्वितीयोऽष्टकः तृतीय एकादशक इति छन्दोऽर्वाचि पर्यन्तएव ऽनावशिष्टानां रौद्रपुरोडाशानाम् भूतयोः स्थानान्तम् स्थापनावासस्थाने विनियोगः ॥

त्र्यायुषन्नारायणउष्णिहम् यजमानाऽऽशिषम् ।

त्र्यायुषम् जमदग्नेरितीमामृचम् उष्णिक्छन्दस्कां नारायण ऋषिरपश्यत् । कीदृशी यजमानाशीरेवात्र देवता । यजमानस्य जपे विनियोगोऽस्याः । यस्या ऋचश्चत्वारोऽपि पादाः सप्ताक्षराः साऽप्युष्णिगित्युच्यते । चतुः सप्तकोष्णिगित्युक्तेः ॥

शिवो नाम क्षौरम् ।

शिवो नामेत्येतद्यजुः क्षौरम् । क्षुरदेवताम् । विंशत्यक्षरा प्राजापत्या बृहती साम्नी पङ्क्तिर्वा । क्षुरादाने विनियोग. ॥

निवर्त्तयामि लिङ्गोक्तदेवताशीः प्रायम् ।

निवर्त्तयामीत्येतल्लिङ्गोक्तदेवम् यजमानस्यात्र प्राधान्यात्स एवात्र देवतेत्यर्थः । आशीः प्रायम् । आशीर्बहुलम् । अष्टाविंशत्यक्षरा प्राजापत्या त्रिष्टुप् । आर्षी उष्णिग्वा । (१)ऋषिस्तु यथानुक्तः तत्र सर्वत्र साधारणः प्रजापतिरेव ज्ञेयः ॥ १५ ॥

रदः शतम् ॥ ७६ ॥ इति शुक्लयजुः काण्वसंहितायां मन्त्रानुवाकेषु षट्सप्ततिकाण्डकायां तृतीयोऽध्यायः ॥ ३ ॥ समिधाग्निमग्निज्योतिषन्त्वाऽऽका ऽउपप्रयन्तो ऽअध्वरमग्नाविर्ठ०शतिर्भूर्भुवः सप्त प्रयासिनो हवामहे पञ्च पूर्णा दर्वि द्वे अक्षन्नमीमदन्तैष त रुद्र भागो वाजिना वाजः षट्कास्तृतीये नव षट्सप्तातः । ३ । ९ । ७६ ॥ इत्यादिः काण्वशाखीयसंहिताया पाठस्य बोधोदयः ॥

(१) यजने विनियोगः इति पद्धतिपाठः ॥

इति चातुर्मास्यमन्त्राः ॥

अथाग्निष्टोममन्त्राणां सर्वेषां साधारणमेकमृषिमाह ॥

अग्निष्टोमः प्रजापतेरार्षम् ॥

अग्निष्टोमपदस्थं तच्छब्दोपलक्षणार्थं तेनाग्निष्टोममन्त्राणां सर्वेषां प्रजापतिरेवर्षिरित्यर्थः । यत्र तु ऋषिविशेषोऽभिधीयते तत्राभा-वपूर्वौ ज्ञेयौ ॥

एदन्द्वेऽत्यष्टी व्यवसाने ॥(१)

एदमगन्म, आपोऽस्माकं, इति इमे द्वे ऋचौ अत्यष्टी । अत्यष्टिछन्दस्के व्यवसाने अवसानत्रययुक्ते । अष्टषष्ट्यक्षरं छन्दोऽत्यष्टिः तत्र एदमिति त्रिभिरक्षरैरधिका । आपइति तु पूर्वैवाष्टषष्ट्यक्षरा न्यूनाधिका । यथार्थविनियोगानुसारेण लक्ष्मी देवता चाह ॥

आद्यावर्द्धर्चौ देवयजनदेवत्यौ ।

एदमगन्मेत्यस्याद्यावर्द्धर्चौ देवयजनदेवत्यौ अवशिष्टाभ्यां पूर्वार्द्धभागाभ्यामस्य यजमानस्याशीर्वादे विनियुक्तौ ॥३॥

इमा आपः ॥

इमा आपः शमित्यस्य आपो देवताः सोमाभिषवे विनियोगः ॥

ओषधे कुशतरुणम् ॥

ओषधे त्रायस्वेत्यस्य कुशतरुणं (२)देवता । कुशतरुणच्छेदने विनियोगः ॥

स्वधिते क्षुरः ॥

स्वधितइत्यस्य क्षुरो देवता । क्षुराभिधाने विनियोगः ॥

(१) एदमित्यस्य द्वयमाद्या देवयजनदेवत्या इति काण्वसर्वानुक्रमपाठः ॥

(२) कुशतृणं इति पुस्तकपाठः ॥

आपोऽपश्यामापः

आपो अपश्यामित्यस्याऽऽपो देवता । [illegible] विनियोगः । न तु कुम्भोदकेन ।(१)

दीर्घायुत्वाय ... ॥

दीर्घायुत्वायेत्यस्य वासो देवता । [illegible] विनियोगः ॥

मह्यीनां नवनीतम् ॥

मह्यीनां पयइत्यस्य नवनीतं देवता । षं ... प्राजापत्याऽनु
ष्टप्सामानुष्टुभा । नवनीतेन शरीराभ्यञ्जने विनियोगः ॥

वृत्रस्याञ्जनम् ॥

वृत्रस्यासीत्यस्याञ्जनं देवता । अष्टादशाक्षरा ... गायत्री ...
हती वा । अञ्जने विनियोगः ॥

चित्पतिर्द्वे प्राजापत्ये ॥

चित्पति [illegible] वाक्पतिर्मेत्येते द्वे यजुषी प्राजापत्ये प्रजापतिदेवत्ये ।
आद्या ... व्यूहेन चतुश्चत्वारिंशदक्षरा आर्षीत्रिष्टुप् । द्विती-
यापि ... विनियोगः ॥

देवो मा सवितम् ॥

देवो मा सवितेत्येतत्सवितृदैवतं । ... पञ्चचत्वारिंशदक्ष
रत्वादेकाक्षराधिकं पूर्वोक्तमेव छन्दः । ... विनियो-
गः ॥

आपो दैव्यनुष्टुबाषी ॥

आपो देवा इतीयं ... अनुष्टुप्छन्दस्का । ...
... विनियोगः । अत्र द्वितीये पादे व्यूहेन पूर्वते ।

(१) ... प्रजापति ... ॥ आद-
द्रामः ... ।

स्वाहा यज्ञं चतुर्णां यज्ञः ॥

स्वाहा यज्ञं । आर्षीरेः आद्या यज्ञा । आद्या याताद्दित्येतेषां चतुर्णां यजुषां यज्ञो देवता । प्रथमचरा दैवी जगती यजुः प्राज्य । च तुर्णां छंदः, [illegible] : । प्रथा दित्यस्य दैवीउष्णिक् [illegible] [illegible] : ॥

आकूत्यै चतुर्णामौद्ग्रभणानामग्निः ॥

आकूत्ये प्रयुजे मेधायै सरस्वत्यै एतेषां चतुर्णामौद्ग्रभ- णानामग्निर्देवता । [illegible] विनियो- गः । तृतीयस्य जपि चतुर्णामपि दशाक्षरत्वादासुरी त्रिष्टुप्छन्दः यजुः पङ्क्तिर्वा ॥

आपो देवीर्लिङ्गोक्तदेवता विराट् ॥

आपो देवीर्बृह तीरित्येन लिङ्गोक्तदेवता अन्तरिक्षपृथिव्यन्तरिक्ष- बृहस्पतिदेवतेत्यर्थः । अस्या विराटछन्दः एकादशाक्षराश्चत्वारः पा- दा यस्याः सा विराडुच्यते । दशकाक्षर्या विराडेकादशका वेति व- चनात् । अत्र प्रथमो द्वादशाक्षरः । तेनैका धिका । [illegible] वि नियोग ॥ १६ ॥

विश्वो देवस्य इत्यस्याः सवितानुष्टुभम् ॥

विश्वो देवस्येतीत्यस्य सवितृदेवतामनुष्टुपछन्दस्का मस्या देय च्छ परपद्यत् । अस्याद्य पादो सप्ताक्षरो । तेन दृश्यते । [illegible] [illegible] अपि विनियोग ॥

ऋक्सामयोः कृष्णाजिने ॥

ऋक्सामयोरित्यस्य द्वे कृष्णाजिने देवता । व्यक्तिस्तत्र त्रिंशत्यक्षरा प्रा जापत्या पङ्क्ति [illegible], विनियोग ।

शर्मासि कृष्णाजिनम् ॥

अर्यासि शर्म मे यच्छेत्यस्य कृष्णाजिनं देवता समदशाक्षरत्वात् । ऋग्गायत्री एकोना । साम्नानुष्टुब्वा एकाधिका । [illegible] के विनियोगः ॥

ऊर्गस्याङ्गिरोभिर्ह्रिष्टं मेखलम् ॥

ऊर्गस्याङ्गिरसीत्येतन्मेखलं मेखलादैवतं यजुराङ्गिरोभिर्ह्रिष्टम् । मेखलाबन्धने विनियुक्ता । पञ्चदशाक्षरा आसुरीगायत्री ॥

सोमस्य नीविः ॥

सोमस्य नीविरित्यस्य नीविर्देवता । सप्ताक्षरा दैवी जगती यजुरुष्णिग्वा । नीविकरणे विनियोगः ॥

विष्णोर्वासः ॥

विष्णोः शर्मासीत्यस्य वासोदेवता । द्वादशाक्षरा यजुर्जगती । शिरःप्रोर्णने विनियोगः ।

इन्द्रस्य सुमत्याः कृष्णविषाणा ॥

इन्द्रस्य योनिः सुम याइत्यनयोः कृष्णविषाणा देवता । इन्द्रस्येति सप्ताक्षरा दैवीजगती । ललाटोपस्पर्शने विनयोगः । सुसस्याः षड क्षरा यजुर्गायत्री । दैवीत्रिष्टुब्वा । भूम्युल्लेखने विनियोगः ॥

उच्छ्रयस्व दण्डः ॥

उच्छ्रयस्व वनस्पतइत्यस्य दण्डो देवता : दण्डोच्छ्रयणे विनियोगः द्वाविंशत्यक्षरा साम त्रिष्टुप् ॥

व्रतं यज्ञः ॥

व्रतं कृणुतेत्यस्य यज्ञो देवता । व्रतकरणप्रैषे विनियोगः, ब्यूहेन चतुर्विंशत्यक्षरा प्राजापत्यापङ्क्तिः ॥

दैवीं धीः ॥

दैवीं धियमित्यस्य धीर्देवता । द्वात्रिंशदक्षरा प्राजापत्या जगती।

[illegible] विनियोगः ॥

ये देवा वाक्प्राणोदानौ चक्षुः श्रोत्रमध्यात्ममग्निर्मित्रावरुणावादित्यो विश्वेदेवा अधिदैवतम् ॥

ये देवा मनोजाता इत्यस्य मन्त्रस्याध्यात्ममात्मानमधिकृत्यात्मनि विषये स्वशरीरे वा प्राणोदानौ चक्षुः श्रोत्रं देवता । तथाधिदैवतं देवतास्वधिकृत्य देवतासु मध्येऽग्निर्मित्रावरुणावादित्यो विश्वेदेवा देवताः । तथा च श्रुतिः "इमे वै प्राणा मनोजाता मनोयुजो दक्षक्रतवो वागेवाग्निः प्राणोदानौ मित्रावरुणौ चक्षुरादित्यः श्रोत्रं विश्वेदेवा एतासु हैवास्यैतद्देवतासु हुतं भवतीति" इयमष्टाविंशत्यक्षरा प्राजापत्या त्रिष्टुब्ग्रहणे विनियोगः ॥

श्वात्रा आपो जगती ॥

श्वात्राः पीता इत्यृक् आपोऽब्देवता जगतीछन्दस्का । अस्याश्चत्वारः पादा द्वादशाक्षराः सा अष्टाचत्वारिंशदक्षरा जगती । भाष्यकृन्मते त्रिष्टुप् । अत्र तु प्रथमद्वितीयावेकादशकौ । ततो द्वौ सप्तकौ । एको वा चतुर्दशकः । तत एको द्वादशक इति । जगती वा । पादानामनियताक्षरत्वात् । छन्दस्सु नियमाभावात् ।

इयं ते लोष्ठम् ॥

इयं ते यज्ञियेत्यस्य लोष्ठं देवता । अष्टाक्षरा यजुरनुष्टुप् । कृष्णविषाणया लोष्ठादाने विनियोगः ॥

अपो मूत्रम् ॥

अपो मुञ्चामीत्यस्य मूत्रं देवता । मेहने विनियोगः ।

इयं चतुर्विंशत्यक्षरा

तेनैकाधिका साम्नीत्रिष्टुप् । एकोनार्षी । गायत्री वा ॥

पृथिव्या लौष्टम् ॥

पृथिव्या सधस्थेत्यस्य लोष्टं देवता । षडक्षरा दैवी त्रिष्टुप् । यजुर्गायत्री वा । गृहीतस्य लोष्टस्य मलिम्लचेषु विनियोगः ॥

अग्ने त्वमाग्नेय्यनुष्टुप् ॥

अग्ने त्वं सुजागृहीतीयम् आग्नेयी अग्निदेवत्याऽनुष्टुप्छन्दस्का । अत्र प्रथमामृचौ समाचरेत् । तेन ट्यूना । स्वापप्रातर्भूषातर्थि विनियुक्ता ॥

पुनर्मनस्याग्नेयम् ॥

पुनर्मनस्त्वेत्याग्नेयम् । अग्निदेवत [illegible] विमुच्यमानायने विनियुक्तम् । इयं चत् पञ्चाशदक्षरा ब्राह्मी बृहती ॥

त्वमग्ने वत्स आग्नेयीं गायत्रीम् ॥

त्वमग्ने व्रतपा इत्यामृचमग्निर्देवता गायत्रीछन्दस्का वत्सऋषिः पश्यत् । अत्र प्रथमोऽष्टकः द्वितीयः षट्कः स तु गणेन सप्तकः । तृतीयोऽपि व्यूहेन षट्कः तेनेयं प्रतिष्ठा सञ्ज्ञा गायत्री भवति । विपरीता प्रतिष्ठेत्युक्ते । दीक्षितस्य मांधाप्रत्यभाषणयोः प्रायश्चित्ताज्यहोमे विनियोगः ॥

यास्ते य त्सौम्यम् ॥

यास्ते यज्ञियेत्यस्य सोमदेवतं । सौम्यमिति सोमाख्यम् । द्वाविंशत्यक्षरा साम्नीत्रिष्टुप् । सम्प्रयाणकाले विनियोगः ॥

एषा ते हिरण्याज्यदैवतम् ॥

एषा ते शुक्र तनूरित्येतद्यजुर्हिरण्याज्यदैवतं । अत्र चतुर्विंशत्यक्षरा साम्नी त्रिष्टुप् । बर्हिस्तृणबद्धस्य हिरण्यस्याज्यमध्ये निधाने विनियोगः ॥

जुरसि वाग्दैवतम् ॥

जूरसीत्येतत् वाग्देवता । चतुर्विंशत्यक्षरा वा त्रिष्टुप् वाग्जपे विनियोगः ॥

शुक्रमसि हिरण्यम् ॥

शुक्रमसीत्यस्य हिरण्यं देवता षडक्षरा प्राजापत्या गायत्री साम्नी बृहती वा । हिरण्यस्पर्शने विनियोगः ॥

चिदसि गौः सोमक्रयणी वाग्रूपाध्यारोपकल्पनया ॥

चिदसि मनासीत्यस्य यजुषः सोमक्रयणी गौर्देवता । कया बुद्ध्या वाग्रूपाध्यारोपकल्पनया । वाग्रूपस्य सोमक्रयण्यां या अध्यारोपकल्पना आरोपबुद्धिस्तया । वाग्रूपेवेयं सोमक्रयणीति बुद्धेरित्यर्थः । "वाग्वै सोमक्रयणीति दर्शनेनेति श्रुतेः" । इयम् व्यूहेनाष्टाक्षरा ब्राह्मी पङ्क्तिः । आर्षी शक्करी वा सोमक्रयण्यभिमन्त्रणे विनियोगः ॥ १७ ॥

वस्व्यस्यनुष्टुब्बृहती वा सोमक्रयण्याः स्तुतिः ॥

वस्व्यस्यदितिरसीत्येषा अनुष्टुप्छन्दस्का । बृहती छन्दस्का वा चतुस्त्रिंशदक्षरत्वाद्विकल्पः । द्वाभ्यामधिकाऽनुष्टुब्वा । द्वाभ्यामूना बृहती वेति । सोमक्रयण्याः स्तुतिः । अतः सोमक्रयण्येवात्र देवतेत्यर्थः । या यत्र स्तूयते सा तत्र देवता भवतीति प्रागुक्तम् । सोमक्रयण्या अनुगमने विनियोगः ॥

अदित्या ऽआज्यम् ॥

अदित्यास्त्वा मूर्द्धन्नित्यस्याज्यम् देवता । विंशदक्षरा याजुषी पङ्क्तिः सोमक्रयणीपदे चतुर्गृहीतहोमे विनियोगः ॥

अस्मे षण्णाम् लिङ्गोक्ता देवताः ॥

अस्मे रमस्वेत्यादीनाम् षण्णाम् यजुषाम् लिङ्गेनैव देवता उक्ताः ।

तथाऽऽर्षे इदमहमित्यस्य यज्ञम् पांसवश्च देवताः । षडक्षरा दैवीपङ्क्तिश्छन्दः । पांसुपरिलेखने विनियोगः । यज्ञे ते बन्धुरित्यस्य यज्ञम् देवता । पञ्चाक्षरा दैवीपङ्क्तिः यज्ञस्य आत्मावेक्षणे विनियोगः । त्वे रायो मे रायइत्यस्य यजमानो देवता त्र्यक्षरा दैव्यनुष्टुप्छन्दः । यजमानस्य पशुप्रतिग्रहणे विनियोगः । मा वयमित्याग्नीर्देवता । एकादशाक्षरा यजुस्त्रिष्टुप् । आत्मालम्भे विनियोगः । तोतो रायइत्यस्य पत्नी देवता। चतुरक्षरा दैवी बृहती । पत्नीवाचने विनियोगः ॥

समख्ये पत्न्याशीरास्तारपङ्क्तिः ॥

समख्ये देव्येतीयमृक् आस्तारपङ्क्तिछन्दस्का । पत्न्याशीर्देवता । पत्नीवाचने विनियोगः, यस्या आद्यौ द्वौ पादावष्टाक्षरौ । तृतीयचतुर्थौ द्वादशाक्षरौ सा आस्तारपङ्क्तिः । "अन्त्यौ चेदास्तारपङ्क्तिरिवृतेः" ॥

एष ते लिङ्गोक्तदेवतम् ॥

एष ते गायत्रो भागइत्येतद्यजुर्लिङ्गोक्तदेवतम् । व्यूहेन षट्पञ्चाशदक्षरत्वाद्ब्राह्मी त्रिष्टुप् ॥ लिङ्गादध्वर्युदेवता । हे अध्वर्यो त्वम् मम इत्येवम् सोमाय ब्रूतादिति सम्बोध्यमानत्वेन प्राधान्यात् । सोमो वा देवता । तस्य स्तूयमानत्वात् । वाचने विनियोगः ॥

अस्माकोसि सौम्यम् ।

अस्माकोऽसीत्येतत्सौम्यं देवतम् व्यूहेनाष्टादशाक्षरा आर्ची गायत्री साम्नी बृहती वा सोमालम्भे विनियोगः ॥

अभित्यं० सावित्र्यष्टिः ।

अभित्यमितीयमृक्सावित्री सवितृदेवत्या अस्याः अष्टिःछन्दः

(१) शुक्रन्दस्वा इत्यस्य स्थाने चन्द्रन्दस्वा इति काण्वशाखीयपाठः ॥

"चतुःषष्ट्यक्षरा अदितिस्त्वेत्यत्र यजुषामन्तिमिति, प्रजास्त्वा, अनु प्राणन्त्वित्यनुव्यूहद्वयेन पूरणम् सोममाने विनियोगः ॥

प्रजाभ्यस्त्वा प्राणास्त्वा शुक्रन्त्वा सौम्यानि ।

प्रजाभ्यस्त्वा, प्राणास्त्वानु । शुक्रन्त्वा शुक्रेऽइत्येतानि यजूंषि सोमदेवत्यानि । प्रजाभ्यस्त्वा चतुरक्षरा दैवी बृहती । उपांशुसवने विनियोगः । प्रजाभ्यस्त्वा । पञ्चदशाक्षरा आसुरी गायत्री अनुत्वा मध्ये विहरणे विनियोगः । शुक्रन् त्वा विंशत्यक्षरा प्राजापत्या बृहती वाचने विनियोगः ॥

सँऽस्मे लिङ्गोक्ते ॥(१)

सम्मि ते, अस्मे ते इत्येते द्वे लिङ्गोक्तदेवते । सोमविक्रयिदेवते इत्यर्थः । तस्य सम्बन्धत्वात् । सम्मि चतुरक्षरा दैवी बृहती । हिरण्येन सोमविक्रयिहस्तग्रहणशिथिलीकरणे विनियोगः । अस्मे ते षडक्षरा यजुर्गायत्री । दैवी त्रिष्टुब्वा । यजमानसहितनिधाने विनियोगः ॥

तपसो हूँऽजा ।

तपसस्तनूरित्यस्य यजुषोऽर्द्धे प्रथमे भागे अजा देवता ॥

अर्द्धं सोमः ।

अस्यैव यजुषो द्वितीयेऽर्द्धे परमेण पशुनेत्यस्मिन् । द्वितीये भागे सोमो देवता । समस्ताया एकत्रिंशदक्षरत्वादेकाधिका ककुप्पङ्क्तिः । एकोना प्राजापत्या जगती वा । द्वयोरप्यर्द्धयोर्वाचने विनियोगः ॥

मित्रो नऽइन्द्रश्च सौम्ये ।

मित्रो नऽएहि, इन्द्रस्योरुमित्येते द्वे सौम्ये सोमदेवते मित्रो न

(१) देवते इत्यधिकम् क पुस्तकपाठः ।

इत्यस्य नवाक्षरा यजुर्बृहती ब्राह्मणार्थे सोमादाने विनियोगः । इन्द्रपीतम् । व्यूहेन विंशत्यक्षरा प्राजापत्या बृहती साम्नपङ्क्ति-र्वा सोमो देवता । अस्मे सोमे निधाने विनियोगः ॥

स्वानादीनि धिष्ण्यनामानि ।

स्वान भ्राजेत्यस्य मन्त्रस्य स्वान भ्राजेत्यादीनि धिष्ण्यनामानि देवताः । "एतानि वै धिष्ण्यानां नामानीति श्रुतेः" ।(१) स्वानाद्-यश्चाष्ट देवता । द्वात्रिंशदक्षरा प्राजापत्या जगती अस्य विनियोगः ।

परि माऽग्ने यो पुरस्ताद्बृहती ।

परि माऽग्न इत्येषाऽग्निदेवता पुरस्ताद्बृहतीच्छन्दस्का वाचने विनियुक्ता । यस्या आद्यः पादो द्वादशाक्षरः । अन्ये त्रयोऽष्टाक्षराः सा पुरस्ताद्बृहती "आद्यश्चेत्पुरस्ताद्बृहतीत्युक्तेः" अत्र प्रथमतृतीयपादयोर्व्यूहेन पूरणम् । तृतीयचतुर्थपादसन्धौ व्यूहेन छन्दःपूरणम् ॥

प्रतिपन्थामनुष्टुप् पथिदेवत्या ।

प्रतिपन्थामपद्महीतीयमृक् अनुष्टुप् पथिदेवत्या । पन्था अस्या देवतेत्यर्थः । अत्रापि स्वस्ति गामिति व्यूहेन पूरणम् अग्नः प्रतिगमने विनियोगः ॥

अदित्याः कृष्णाजिनम् ।

अदित्यास्त्वगित्यस्य कृष्णाजिनं देवता । अष्टाक्षरा यजुरनुष्टुप् प्राजापत्या गायत्री वा । कृष्णाजिनास्तरणे विनियोगोऽस्य यजुषः ॥

अदित्यै सौम्यम् ।

---

१ इयं श्रुतिः शतपथब्राह्मणस्य तृतीयकाण्डान्तर्गत द्वितीयप्रपाठकस्य पञ्चम-ब्राह्मणस्यैकादशखण्डस्य च ज्ञेयेति ॥

अदित्यै रास्नासीत्येतद्यजुरनुष्टुप्छन्दस्कम् वामी देवता । अस्य योक्तविधाने विनियोगः ॥

अस्तभ्नात्त्रिष्टुभौ वारुण्यौ ।

अस्तभ्नाद्याम् । वनेषु व्यन्तरिक्षमिति द्वे ऋचौ त्रिष्टुप्छन्दसी वारुण्यौ वरुणदैवत्ये अस्तभ्नाद्वित्यस्य वाचने विनियोगः । वनेषु वीत्यस्य सोमपर्याणहनेन परिस्तरणे विनियोगः । अत्र प्रथमऋतीय पादयोर्यथादेशव्यूहेन पूरणम् ॥

सूर्यस्यानुष्टुप्कृष्णाजिनम् ।

सूर्यस्य चक्षुरित्यनुष्टुप्छन्दः कृष्णाजिनम्देवता । कृष्णाजिनस्य पुरस्तादास्तरणे विनियोगः ॥

उस्राऽऊर्ध्वबृहत्यानडुही ।

उस्रावेतमित्यृगेषा आनडुही । अनडुहावस्या देवतेऽस्याः ऊर्ध्वबृहतीछन्द । यस्यास्त्रयः पादा द्वादशाक्षराः । “सोर्ध्वबृहती त्रिजगत्यूर्ध्वबृहतीत्युक्तेः” । एकोनेयम् । अत्र प्रथमे पादे द्व्याक्षरो विपरीतम् वा । अनुदर्शने विनियोगः ।

भद्रो मे सौम्यम् ।

भद्रो मेऽसीत्येतत्सोमदैवतम् । एकं नसप्तत्यक्षरत्वादेकाक्षराधिका अत्यष्टिश्छन्दो वाचने विनियोगः ॥

नमो मित्रस्याभितपनः सूर्य्यः सौरीं जगतीम् ।

नमो मित्रस्येतीमामृचम् सौरीं सूर्यदेवताम् जगतीछन्दस्काम-भितपनः सूर्यस्य परपश्यन् । अभितः सर्वतस्तपतीत्यभितपनः । अग्रमासागोपरिदृश्यमानस्त्वथः । अष्टाचत्वारिंशदक्षरा जगती वाचने विनियोगः ॥

वरुणस्य पञ्च वारुणानि ।

वरुणस्योत्तम्भनमसीत्यादीनि पञ्च यजूंषि वरुणदैवतानि । आद्यस्य नवाक्षरा यजुर्बृहतीछन्दः उत्तम्भनेनाऽनडुत्सम्भने विनियोगः द्वितीयस्य दशाक्षरा यजुःपङ्क्तिः । चात्वालभिमर्शने विनियोगः । चतुर्थस्य एकादशाक्षरा यजुस्त्रिष्टुप् । कृष्णाजिनास्तरणे विनियोगः । पञ्चमस्य द्वादशाक्षरा यजुर्जगती । आसन्द्यां सोमनिधाने विनियोगः ॥

या ते सौमी त्रिष्टुभम् गोतमः ।

या ते धामानीत्येताम् सोमदेवता त्रिष्टुप्छन्दस्काम् गोतमऋषिरपश्यत् । वासनेऽस्य विनियोगः । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् ॥ व्यूहेन पूरणम् ॥ १८ ॥

अग्नेस्तनूरसि पञ्च वैष्णवानि ।

अग्नेस्तनूरसीत्यादीनि पञ्च यजूंषि विष्णुदेवतानि हविर्ग्रहणे विनियुक्तानि । अग्नेस्तनूः दशाक्षरं यजुः, सोमस्य एकादशाक्षरा यजुस्त्रिष्टुप् । अतिथेः द्वादशाक्षरा यजुर्जगती ॥ श्येनाय त्वा । यजुर्जगत्येव । अग्नये त्वा । नवाक्षरा आसुर्यनुष्टुप् ॥

अग्नेः शकलम् ।

अग्नेस्तनूरसीत्यस्य शकलम् देवता षडक्षरा यजुर्गायत्री । दैवी त्रिष्टुब्वा । शकलादाने विनियोगः ॥

वृषणौ (१) दर्भतरुणके ।

वृषणौ स्थ इत्यस्य दर्भतरुणे देवता । चतुरक्षरा दैवीबृहती दर्भतरुणयोर्निधाने विनियोगः ॥

उर्वश्यसि त्रयाणाम् लिङ्गोक्ता देवताः ।

उर्वश्यसीत्यादित्रयाणाम् यजुषाम् देवता लिङ्गेनोक्ताः । तयो-

(१) वृषणौ स्थो इति काण्वशाखापाठः ।

वैश्वानरीत्यक्षरार्षिर्देवता । चतुरक्षरा दैवी बृहती । अक्षरपङ्क्तिरभि-
धाने विनियोगः । आयुरित्यस्य घृतम् देवता । दैवी बृहती । आ-
ज्यस्थालीसंमर्शने विनियोगः । पुनरित्यस्यर्त्तेरर्षिर्देवता । ष-
डक्षरा यजुर्गायत्री । अक्षरत्रयपरि समन्त्राभिधाने विनियोगः ॥

गायत्रेण त्रीण्याग्नेयानि ।

गायत्रेण त्वा, त्रैष्टुभेन त्वा, जागतेन त्वा, एतान्यग्निदेवतानि । मन्त्रे विनियुक्तानि । त्रयाणामप्येकादशाक्षरा यजुस्त्रिष्टुप् ॥

भवतं नः पङ्क्तिः ।

भवतम् न इत्यस्याः पङ्क्तिश्छन्दः । पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिः । अत्र तु तृतीयः षडक्षरः । चतुर्थो दशाक्षरः । अन्येऽष्टाक्षराः । तेनेयमार्षी पङ्क्तिरिति युक्तम् । पादानामनियताक्षरत्वात् ॥

अग्नावग्निर्विराट् ।(१)

अग्नावग्निरित्यस्य विराट्पङ्क्तिश्छन्दः । यद्यप्यत्र विराडिति पाठः । दशाक्षरैश्चतुर्भिः पादैर्विराड्भवति "विराड्दशकादश्युक्ते": । अत्र तु द्वितीयचतुर्थावेकादशाक्षरौ । तेन द्वाभ्यामक्षराभ्यामूना त्रिष्टुबपि विराडित्युच्यते । "द्वाभ्याम् विराड्स्वराजाविव्युक्ते" । तेनेयम् विराट्त्रिष्टुप् । न तु विराटपङ्क्तिरिति ॥

एतयोर्निर्मथ्याहवनीयावग्नी देवते ।

एतयोर्भवतम् नः । अग्नावग्निरित्येतयोर्निर्मथ्याहवनीयावग्नी देवते । निर्मथ्यश्चाहवनीयश्च निर्मथ्याहवनीयौ एतौ द्वावग्नी देवते इत्यर्थः ,भवतम् न इत्यस्याग्न्यावाग्निमासने विनियोगः । अग्नावग्निरित्यस्याग्नहोमे विनियोगः ।

(१) अग्नाऽअग्निरिति काण्वशाखापाठः ॥

आपतये वायव्यम् ।

आपतय इत्येतद्यजुर्वायुदेवतम् । अष्टाविंशत्यक्षरा प्राजापत्या त्रिष्टुप् । [illegible] समवदाने विनियोगः ॥

अनाधृष्टमाज्यम् ।

अनाधृष्टमसीत्यस्याज्यम् देवता व्यूहेन द्वाचत्वारिंशदक्षरा ब्रा-ह्मी उष्णिक् । तानूनप्त्रसंमर्शने विनियोगः ॥

अग्ने व्रतपाऽआग्नेयम् ।

अग्ने व्रतपा इत्येतद्यजुरग्निदैवतम् [illegible] विनियुक्तम् । अष्टापञ्चाशदक्षरत्वाद्द्वाभ्यामधिका शक्वरी वा । द्वाभ्यामूना अति शक्वरी वा ब्राह्मी पङ्क्तिर्वा ॥

अंशुरंशुः प्रकृतिश्चतुरवसाना सौमी । (१)

अंशु० रंशु० ष्ट इति इयमृक्चतुरवसाना प्रकृतिच्छन्दस्का च-त्वार्यवसानानि विरामस्थानानि यस्याम् सा तथा । सौमी सोम-देवता । सोमाप्यायने विनियुक्ता । चतुरशीत्यक्षरा प्रकृतिः । अन्त्यो-ऽर्धर्चो लिङ्गोक्तदेवत । अनुश्वरंशुष्ट इत्यस्या अन्त्योऽर्धर्चः ॥

एष्टारायऽइत्यर्धं (२) लिङ्गोक्तदेवतः ।

अग्निर्देवतेति माधवाचार्याः । अन्येषाम् तु रायः क्षतम्, द्या-वापृथिव्यौ वा । प्रस्तरनिह्नवेऽस्य विनियोगः ॥

या ते (३) त्रीण्याग्नेयानि ।

या ते अग्न इत्यादीनि त्रीणि यजूंष्यग्निदैवतानि उपसत्सु स्रुवे-णाज्यहोमे विनियुक्तानि प्रत्येकम् क्रमेण प्रथमा [illegible] त्रिष्टुप् । [illegible]

---

(१) प्रकृतिः षडवसाना इति काण्वशाखीयपाठः ॥

(२) अन्त्योऽर्धर्चो इति काण्वीयसर्वानुक्रमे विशेषः पाठो बोध्यः ॥

(३) अग्ने इति पदमधिकं काण्वसर्वानुक्रमे ॥

त्रिंशदक्षरत्वात्। हरिश्यया, रजःशया, अपि एकादशाक्षिके ऋची त्रिष्टुभावेव।

तप्तायनी चत्वारि पार्थिवानि।

तप्तायनी मेऽसीत्यादीनि चत्वारि यजूंषि पार्थिवानि पृथिवीदेवतानि चतुर्णामपि चात्वालपरिलेखने विनियोगः। तप्तायनी षडक्षरा यजुर्गायत्री, वित्तायनी च तथैव। तृतीयचतुर्थ्यौ सप्ताक्षरे दैव्यौ जगत्यौ यजुरुष्णिहौ वा॥

विदेदाग्नेयम्।

विदेदग्निरित्येतद्यजुरग्निदेवतम्। चात्वाले प्रहरणे विनियुक्तम्। अष्टाक्षरा ऋग्गायत्री॥

अग्नेऽअङ्गिरो योऽस्यामनुत्वा लिङ्गोक्तानि।

एतानि त्रीणि यजूंषि लिङ्गोक्तदेवतानि। तत्र अग्नेऽङ्गिरः। अग्निर्देवता। एकादशाक्षरा यजुस्त्रिष्टुप्। पुरीषहरणे विनियोगः। योऽस्याम्। अग्निरेव देवता। द्वाविंशत्यक्षरा साम्नित्रिष्टुप्। पुरीषनिवापे विनियोगः। अनुत्वा। अत्र उत्तरवेदिम् प्रति नीयमानो अग्निचयो देवता। अष्टाक्षरा प्राजापत्या गायत्री। पुरीषहरणे विनियोगः। यो द्वितीयस्याम्। यस्तृतीयस्यामित्यनयोरप्यग्निर्देवता। "(१)स उ एव अग्नीनामेव नामानि गृह्णन्हरति यान्वा अमून् देवा अग्रेऽग्नीन्होत्राय प्रावृणत ते प्राधन्वंस्तऽइमा एव पृथिवीरुपासर्पन्निमामहैव द्वे अस्याः परे इतिश्रुतेः"। परे अन्तरिक्षम् द्यौश्च। द्वितीया पृथिव्यन्तरिक्षम् तृतीया पृथिवी द्यौरिति॥

सिंᳬ हासि त्रयाणाम् वेदिः

सिंᳬ हासि सपत्नसाहीत्यादीनाम् त्रयाणाम् उत्तरवेदिर्देव-

(१) इयमपि शतपथीयाध्वरकाण्डस्य श्रुतिर्बोध्येति॥

नरः । प्रथमस्य उत्तरवेदिव्यूहने विनियोगः । द्वितीयस्य प्रोक्षणे । तृतीयस्य सिकतापकिरणे । त्रयाणामपि पञ्चदशाक्षरा आसुरी गायत्री छन्दः ॥

इन्द्रघोषस्त्वा वसुभिश्चतुर्णामुत्तरवेदिः ।

इन्द्रघोषस्त्वा । प्रचेतास्त्वा । मनो जवास्त्वा, विश्वकर्मा त्वा, इत्येतेषाम् चतुर्णां यजुषाम् उत्तरवेदिर्देवता । उत्तरवेदिप्रोक्षणे विनियोगः । तत्र प्रथमचतुर्थयोस्तयोर्दशाक्षरा आसुरी त्रिष्टुप् । द्वितीयस्य दशाक्षरा याजुषी पङ्क्तिः । तृतीयस्य चतुर्दशाक्षरा आसुर्युष्णिक् सामो ऽपरवा ॥

इदमहमापम् ।

इदमहन् तप्तम् वारित्यस्यापो देवताः । षोडशाक्षरा प्राजापत्यानुष्टुप् । प्रोक्षणीशेषस्य निनयने विनियोगः ॥

सिꣳहासि पञ्चानाम् वाक् ।

सिꣳहासि स्वाहेत्यादीनाम् पञ्चानाम् यजुषाम् वाग्देवता । नाभिस्थाघारणे विनियोगः । प्रथमस्य दैवीपङ्क्तिश्छन्दः । द्वितीया नवाक्षरा यजुर्बृहती । तृतीया त्रयोदशाक्षरा आसुर्यनुष्टुप् । चतुर्थी षोडशाक्षरा सामानुष्टुप् । पञ्चमी चतुर्दशाक्षरा साम्युष्णिक् ॥

भूतेभ्यः स्रुक् ।

भूतेभ्यस्त्वेत्यस्य स्रुग्देवता चतुरक्षरा दैवीबृहती स्रुगुद्यमने विनियोगः ।

ध्रुवोऽसि परिधयस्त्रयाणाम् ।

ध्रुवोऽसि, ध्रुवक्षिदसि, अच्युतक्षिदसीत्येतेषाम् त्रयाणाम् परिधयो देवताः पैतुदारवपरिधिपरिधाने विनियोगः । ध्रुवोऽसि ।

षडक्षरा प्राजापत्या गायत्री । द्वितीयतृतीययोर्दशाक्षरा यजुः पङ्क्तिः ॥

अग्नेः (१)सम्भारा गुल्गुल्वादयः ।

अग्नेः पुरीषमसीत्यस्य गुग्गुलुसुगन्धितेजनवृष्णीस्तुकाः सम्भारा देवताः । सप्ताक्षरा दैवी जगती : सम्भारनिर्वपणे विनियोगः ॥१८॥

युञ्जते श्यावाश्वः सावित्रम् (२)जगतीम् ।

युञ्जते मन इतीमाम् सावित्रीम् सवितृदेवताम् । जगतीच्छन्दस्काम् श्यावाश्व ऋषिरपश्यत् । अष्टाचत्वारिंशदक्षरा जगती चतुष्पादा । स्वाहा पृथग्यजुः आश्वावार्ये चतुर्ग्रहीतहोमेऽस्य विनियोगः ॥

इदम् विष्णुर्मेधातिथिर्वैष्णवीम् गायत्रीम् ।

इदम् विष्णुरितीमामृचम् विष्णुदेवताम् गायत्री छन्दस्काम् मेधातिथिऋषिरपश्यत् । दक्षिणस्यानसो दक्षिणे वर्त्मनि हिरण्यस्थो परिहोमे विनियोगः । अस्याः द्वितीयः पादः सप्ताक्षरः तेनैकोना ॥

इरावती वसिष्ठस्त्रिष्टुभम् ।

इरावती धेनुमती इतीमामृचम् विष्णुदेवताम् त्रिष्टुपछन्दस्काम् वसिष्ठऋषिरपश्यत् । अत्रैव वैष्णवीमित्यनुवर्त्तते । उत्तरस्यानसो दक्षिणवर्त्मनि हिरण्यस्योपरिहोमे विनियोगः । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । तृतीयपादोऽत्र दशाक्षरः अन्त्यो द्वादशाक्षरः । आर्षीत्रिष्टुब्वा पादानामनियताक्षरत्वात् ॥

देवश्रुतावन्त्यरो ।

---

(१) अस्य सम्भारा इति कात्यायनसर्वानुक्रमणिकासंहितायामपि अस्मास्वपीरिति पाठो बोध्यः ॥

(२) सावित्रीमिति तत्र पाठः ॥

देवश्रुतावित्यस्याऽऽवश्रुतौ देवते । आवश्रुतोस्समे विनियोगः दशाक्षरा यजुःपङ्क्तिः ॥

प्राची स्वङ्गाऽऽमत्र(१) हविर्धानी ।

प्राची प्रेतम् । स्वङ्गौष्ठम् । अत्र रमेथामित्येषाम् त्रयाणाम् यजुषाम् हविर्धाने देवते । प्राची प्रेतम् त्रयोविंशत्यक्षरत्वादेकाऽधिका साम्नत्रिष्टुप् एकोना आर्षी गायत्री वाचने विनियोगः । स्वङ्गौष्ठम् पञ्चविंशत्यक्षरत्वादेकाधिकाऽक्षराऽनुष्टुप् स्वर्गमनमिति वाचने विनियोगः । अत्र रमेथाम् । दशाक्षरा यजुःपङ्क्तिः । अनस्तोऽभिमन्त्रणे विनियोगः ॥

विष्णोर्नु तिस्रो वैष्णव्यस्त्रिष्टुभ आद्ये यजुरन्ते ।

विष्णोर्नु कम् । दिवो वा । प्रतद्विष्णुरित्येतास्तिस्रऋचो विष्णुदेवत्यास्त्रिष्टुप्छन्दस्काः । अत्र विष्णोर्नुकमितदशाक्षरः पादः । तेनैकोना । चतुर्थस्य व्यूहेन पूरणम् । प्रतदित्ययमपि दशाक्षरएव । तेनेयमप्येकोना । तासाम् मध्ये आद्ये प्रथमद्वितीये ऋचौ, विष्णोर्नु कम्, दिवो वा विष्णो, इत्येते द्वे ऋचौ यजुरन्ते । द्वयोरप्यन्ते विष्णवे त्वेति यजुरस्तीत्यर्थः । विष्णोर्नुकमित्यस्य दक्षिणस्यानस उपस्तम्भने विष्णवे त्वेत्यस्य च स्थूणानिखनने विनियोगः । दिवो वेत्युत्तरस्यानसउपस्तम्भने (२)विष्णवे त्वेत्यस्य च स्थूणानिखनने विनियोगः । चतुरक्षरा दैवी बृहतीछन्द, प्रतदित्यस्य च वाचने विनियोगः ॥

विष्णोर्नु प्रतद्दीर्घतमा औतथ्यः ।

विष्णोर्नु कम् । प्रतद्विष्णुरित्येतयोरुतथ्यस्यापत्यम् दीर्घतमा

(१) रमेथामिति पदमधिकं तत्र सर्वानुक्रमे । हविर्धानीरमेथामित्यधिकः पाठो बोध्यः ।

(२) उत्तरहविर्धानस्योपस्तम्भन इति पाठः ॥

सप्त ब्रह्मर्षिः ॥

विष्णोरराटम् पञ्च वैष्णवानि ।

विष्णोरराटमित्यादीनि पञ्च विष्णुदेवतानि । प्रथमस्य सप्ताक्षरा दैवी जगती [illegible] विनियोगः । द्वितीयस्य पञ्चाक्षरा दैवीपङ्क्तिः [illegible] विनियोगः । विष्णोः स्यूः दैवीपङ्क्तिः । सीवने विनियोगः । विष्णोर्ध्रुवोऽसि दैवीपङ्क्तिः । ग्रन्थिकरणे विनियोगः । वैष्णवमसि दैवीपङ्क्तिः । हविर्धानाभिमर्शने विनियोगः ॥

आददेऽभ्रिः ।

आददे नार्यसीत्यस्या अभ्रिर्देवता । षडक्षरा यजुर्गायत्री । अभ्र्यादाने विनियोगः ॥

इदमहꣳ रक्षोघ्नम् ।

इदमहमित्येतद्रक्षोघ्नम् यजुः । चतुर्दशाक्षरा साम्न्युष्णिक् । उपरवपरिलेखने विनियोगः । अथवा रक्षोघ्नम् देवता ।

बृहन्नौपरवम् ।

बृहन्नसीत्यौपरवम् उपरवदैवतम् उपरवखनने विनियोगः । अष्टादशाक्षरा साम्नी बृहती ॥

इदमहम् पञ्च लिङ्गोक्तानि ।

इदमहन्तम् वलगमित्यादीन्युत्कृत्यां किरामीत्यन्तानि पञ्च यजूꣳषि लिङ्गोक्तदेवतानि । । वलगदेवतानीत्यर्थः । पञ्चमस्य उत्कृत्यदेवतेति विशेषः । कृत्यादेवत्या इति कण्वसंहिताभाष्ये । पञ्चानामपि पांसूहापे विनियोगः । आद्या चतुर्विंशत्यक्षरा आर्षी । अनुष्टुप् द्वितीया षड्विंशत्यक्षरा द्वाभ्यामधिका आर्षी अनुष्टुप् । एकेषाम् जगद्बृहती वा । तृतीयाचतुर्थ्यावप्येवम् । पञ्चमी यजुर्गायत्री दैवीत्रिष्टुब् ॥

स्वराडस्युपरवाणि चत्वारि ।

स्वराडसि सपत्नहेत्यादीनि चत्वारि यजूंष्युपरवाणि उपरवा एषाम् देवता इत्यर्थः । उपरवाभिमर्शने विनियोगः । तत्र प्रथमतृतीयचतुर्थानाम् अष्टाक्षरा प्राजापत्या गायत्री । द्वितीयस्य यजुर्बृहती ॥

रक्षोहणो वः सप्त वैष्णवानि ।

रक्षोहणो वो वलगहन इत्यादीनि वैष्णवा स्थेत्यन्तानि सप्त यजूंषि विष्णुदेवतानि प्रथमस्य षोडशाक्षरा प्राजापत्यानुष्टुप् । उपरवखनने विनियोगः । द्वितीयस्य व्यूनेनाष्टादशाक्षरा ब्राह्मी गायत्री । प्रोक्षणीशेषासिञ्चने विनियोगः । तृतीयस्य ब्राह्मी गायत्री । बर्हिरास्तरणे विनियोगः । चतुर्थस्याष्टादशाक्षरा ब्राह्मी गायत्री । अधिषवणफलकोपधाने विनियोगः । पञ्चमस्य सप्तदशाक्षरत्वादेकोना ब्राह्मी गायत्री एकाधिका साम्न्यनुष्टुब्वा पर्यूहणे विनियोगः । षष्ठस्य दैवी पङ्क्तिः अधिषवणचर्मास्तरणे विनियोगः । सप्तमस्य चतुरक्षरा दैवी बृहती । ग्राव्णाम् निधाने विनियोगः ॥

यवोऽसि यवः ।

यवोऽसीत्यस्य यवो देवता । चतुर्दशाक्षरा साम्न्युष्णिग्वा यवावपने विनियोगः ।

दिवे त्वौदुम्बरी ।

दिवे त्वादीनाम् । त्रयाणाम् । यजुषामौदुम्बरी देवता । औदुम्बरीप्रोक्षणे विनियोगः । प्रथमा दैव्यनुष्टुप् त्र्यक्षरा । द्वितीया षडक्षरा यजुर्गायत्री । तृतीया चतुरक्षरा दैवी बृहती ॥ (१)

---

(१) औदुम्बर्या अग्रप्रोक्षणे वि० । अन्तरिक्षे त्वा प्रजापति ऋ० औदुम्बरी देवता यजुर्गायत्री छन्दः. औदुम्बर्या मध्यप्रोक्षणे वि० । पृथिव्यै त्वा औदुम्बरी देवता दैवी बृहती छन्दः. औदुम्बर्या मूलप्रोक्षणे वि०

शुन्धन्ताम् पित्र्ये ।

शुन्धन्तामिति द्वे यजुषी पितृदेवत्ये । दशाक्षरा यजुः पङ्क्तिः प्रथमा । शेषावनयने विनियोगः । द्वितीया सप्ताक्षरा दैवी जगती । बर्हिषाम् आसने विनियोगः । पितृत्वात् उदकस्पर्शः ॥ (१)

उद्दिवम् पञ्चानामौदुम्बरी ।

उद्दिवꣳ स्तभानेत्यादि ध्रुवासीत्यन्तानाम् पञ्चानाम् यजुषामौदुम्बरीदेवता । औदुम्बर्युच्छ्रयणे विनियोगः । प्रथमस्य व्यूहेनाष्टादशाक्षरा ऋग्गायत्री ।

द्युतानस्त्वा ।

एकविंशत्यक्षरत्वादेकाधिका ऋगनुष्णिक् औदुम्बर्यामवटमध्ये प्रवेशे वि० । ब्रह्मवनि त्वा इत्यस्य ऋग्गायत्री एकोना सामपङ्क्तिर्वा । पांसुभिः पर्यूहणे विनियोगः । ब्रह्म दृꣳह पञ्चदशाक्षरा आसुरी गायत्री पर्युक्षणे विनियोगः । ध्रुवासि व्यूहने चतुर्विंशत्यक्षरा सामजगती । बाधने विनियोगः ॥ (२)

घृतेन द्यावापृथिवी ।

घृतेनेत्येतद्यजुर्द्यावापृथिवीदेवतम् । एकादशाक्षरा यजुस्त्रिष्टुप् विशाखे होमे विनियोगः ॥

इन्द्रस्यैन्द्रम् ॥

इन्द्रस्य छदिरित्येतदिन्द्रदैवतं । सामोष्णिक् । छदिरारोपणे विनियोगः ।

---

(१) शुन्धन्तां प्रजा० पितरो देवता यजुः पङ्क्तिश्छन्दः शेषावनयने वि० । पितृषदनाः प्रजा० पितरो दे० बर्हिषां प्रासने वि० । ईदृशः पद्धति पाठो बोध्यः ॥

(२) द्युतानस्त्वा औदुम्बरी दे० ऋगनुष्णिक् औदुम्बर्या अवटमध्ये प्रवेशे वि० । ब्रह्मवनि त्वा प्र० ऋ० औदुम्बरी दे० ऋग्गायत्री पांसुभिः पर्यूहणे वि० । अग्नेः पर्युक्षणे वि० इति पद्धतिपाठः ॥

परि त्वा मधुच्छन्दा अग्निरुक्तामैन्द्रीमनुष्टुभम् ॥

परि त्वा गिर्वणइतीमामृचमग्निरुक्तां मध्ये इन्द्रपदप्रयोगशून्यामि-
न्द्रीं त्वामनुष्टुभं मधुच्छन्दा ऋषिरपश्यत् । परिधारणे विनियोगः ॥

इन्द्रस्यैन्द्राणि त्रीणि ॥

इन्द्रस्य स्यूरसीत्यादीनि त्रीण्यैन्द्राणि इन्द्रदेवत्यानि । प्रथमा दै-
वीपङ्क्तिः सीवने विनियोगः । द्वितीया यजुर्गायत्री । ग्रन्थिकरणे
विनियोगः । ऐन्द्रमसि । दैवीबृहती । निहिताभिमर्शने विनियो-
गः ॥

चतुर्थं वैश्वदेवम् ॥

चतुर्थं वैश्वदेवमसीत्येतद्यजुर्विश्वेदेवदेवतं । यजुर्गायत्री आज्यो-
पाभिमर्शने विनियोगः ॥ २० ॥

विभूरस्यष्टानां धिष्ण्या अग्नयः ॥ (१)

विभूरसि प्रवाहणइत्यादिशुन्ध्यूरसीत्यन्तानामष्टानां यजुषां धि-
ष्ण्या अग्नयो देवताः । विभूः प्राजापत्या गायत्री आग्नीध्रीये पुरी-
षनिवापे विनियोगः । वह्निः यजुर्बृहती होत्रधिष्ण्ये पुरीषनिवापे
विनियोगः । श्वात्रोऽसि । यजुर्गायत्री । तुथोऽसि दैवीजगती । उ-
शिगसि यजुर्गायत्री । अङ्घारिः । प्राजापत्या गायत्री । अवस्युर्गाय-
त्र्येव । शुन्ध्यूः गायत्री । सर्वेषां पुरीषनिवापे विनियोगः ॥

सम्राडाहवनीयः ॥

सम्राडसीत्यस्याहवनीयो देवता । दैवीजगती । आहवनीयस्थाने
विनियोगः ॥

---

(१) एतस्य सूत्रस्य खण्डद्वयात्मके काण्वसर्वानुक्रमे "ऋतधामौदुम्बरी समुद्रोऽसि-ब्रह्मासनमोजोऽसि शाखाद्वारोऽसि प्राजहितः" । अयं पाठो माध्यन्दिनसर्वानुक्रमे-सूत्रखण्डचतुष्टयात्मके पूर्वापरीभावेन वर्त्तते ॥

परिधयो बर्हिष्पवमानदेश: ॥

परिधयोऽसीत्यस्य बर्हिष्पवमानदेशो देवता । यजुर्बृहतीच्छन्दः । बर्हिष्पवमानदेशावेक्षणे विनियोग: ॥

नभोऽसि चात्वाल: ॥

नभोऽसि मन्त्रस्य चात्वालो देवता । यजुर्गायत्री । चात्वालेक्षणे विनियोग: ।

मृष्टोऽसि शामित्र: ॥ (१)

मृष्टोऽसीत्यस्य शामित्रो देवता । प्राजापत्या गायत्री । शामित्रेक्षणे विनियोग: ॥

ऋतधामास्यौदुम्बरी ॥

ऋतधामासीत्यस्यौदुम्बरी देवता । प्राजापत्या गायत्री । औदुम्बरीक्षणे विनियोग: ॥

समुद्रोऽसि ब्रह्मासनम् ॥

समुद्रोऽसीत्यस्य ब्रह्मासनन्देवता । प्राजापत्या गायत्री । ब्रह्मासनेक्षणे विनियोग: ॥

अजोऽसि शालाद्वार्य: ॥

अजोऽस्येकपादित्यस्य शालाद्वार्यो देवता । दैवीपङ्क्ति: शालाद्वार्येक्षणे विनियोग: ॥

अहिरसि प्राजहित: ॥

अहिरसीत्यस्य प्राजहितो देवता । यजुर्गायत्री प्राजहितेक्षणे विनियोग: । समुद्रोऽसि विश्ववेदा इति सूक्तस्य ऋग्गायत्रीछन्द:

(१) समुद्रोऽस्युत्तर: । इति काण्वसर्वानुक्रमेऽधिक: पाठो मन्त्रस्य च "समुद्रोऽसि विश्ववेदा ... प्रतिष्ठ" भाष्ये ... ॥

...री देवता ...विनियोगः ॥

भागसि सद्‌ः ॥

भागसीत्यस्य सदो देवता । यजुर्बृहती ...भिमर्शने विनियोगः ॥

ऋतस्य द्वार्ये ॥

ऋतस्य द्वारावित्यस्य द्वार्ये देवता । यजुः पङ्क्तिः । १० द्वार्योरभिमर्शने विनियोगः ॥

अध्वनाᳬ सूर्यः ॥

अध्वनामित्यस्य सूर्यो देवता । सूर्याभिमन्त्रणे विनियोगः ॥

व्यूहेन सप्तजगती ॥ २४ ॥

मित्रस्यर्त्विजः ॥

मित्रस्य मेत्यस्यर्त्विजो देवता यजुर्बृहती ॥ ८ ॥ ...भिमन्त्रणे विनियोगः ॥ २१ ॥

ज्योतिरसि वैश्वदेवम् ॥

ज्योतिरसि विश्वरूपमित्येतद्यजुर्विश्वदेवदैवतं । प्राजापत्यानुष्टुप् ॥ १६ ॥

पृषदाज्यग्रहणे विनियोगः ॥

त्वᳬ सोमक्रतुर्भार्गवः सौमीं गायत्रीमनवसानाम् ।

त्वᳬ सोमेत्येतामृचं सोमदैवत्यां गायत्रीछन्दस्कामनवसानां अवसानरहितां भृगोः पुनः क्रतुः सञ्ज्ञकर्षिरपश्यत् । पशोरभ्योपविशने विनियोगः । अत्र प्रथमः पादः सप्ताक्षरः द्वितीयो व्यूहेनाष्टाक्षर इत्येकोना । स्वाहाकारस्तु पृथग्यजुः ॥

अपाणोऽप्सुदेवत्यैकपदा विराड्यजुरन्ता ।

सुधाचो यत् इत्येषा विराडेकपदा । स्वाहाकारैकपदेत्यर्थः । स्वाहान्ते यस्याः सा यजुरन्ता । अस्याः अन्ते स्वाहाकारो यजुः इत्यर्थः । द्वितीयाहुतिहोमे विनियोगः ॥

अग्ने नयागस्त्य आग्नेयीं त्रिष्टुभम् ॥

अग्ने नय सुपथेतीमामृचं अग्निदेवतां त्रिष्टुभं अगस्त्यऋषिरपश्यत् । अत्र तृतीयपादे व्यूहेनैकादशाक्षरपूरणं । [illegible] विनियोगः ॥

अयं नस्त्रिष्टुब्यजुरन्ताग्नेयी ॥

अयं नो अग्निरित्येषा त्रिष्टुबग्निदेवता । आग्नीध्रीये वैसर्जनहोमे विनियोगः, स्वाहाकारान्तं यजुः । व्यूहेन छन्दः पूर्तिः ।

उरु विष्णो वैष्णव्यनुष्टुब्यजुरन्ता ।

उरु विष्णो इत्यस्य विष्णुर्देवता अनुष्टुप्छन्दः । यजुरन्ता । स्वाहाकारान्ता । आहवनीये वैसर्जनहोमे विनियोगः । व्यूहेन छन्दः पूरणम् ॥

देव सवितः सावित्रम् ॥

देव सवितरेषते सोम इत्येतद्यजुः सवितृदेवतं [illegible]छन्दः । हविर्धाने सोमनिधाने विनियोगः ॥

एतत्त्वꣳ सौम्यम् ।

एतत्त्वं सोमेत्येतद्यजुः । सोमो देवता प्राजापत्या त्रिष्टुप् । [illegible]पस्थाने विनियोगः ॥

स्वाहा निर्लिङ्गोक्तदेवतम् ।

स्वाहा निर्वरुणस्येत्येतल्लिङ्गोक्तदेवतम् । यजुस्त्रिष्टुप् [illegible] विनियोगः ।

अग्ने व्रतपा आग्नेयम् ।

अग्ने व्रतपा इत्येतद्यजुरग्निदैवतम् । अग्निर्वृत्राणीति विनियुक्तम् । व्यूहेन षडक्षरा प्राजापत्या त्रिष्टुप् ।

अत्यन्याँ वनस्पतिः ।

अत्यन्याँ । २ ॥ अगामित्यस्य वनस्पतेर्देवता । व्यूहेनातिजगती । यूपाभिमर्शने यूपाभिमन्त्रणे वा विनियोगः ।

ओषधे कुशतरुणम् ॥

ओषधे त्रायस्वेत्यस्य कुशतरुणं देवता । आसुर्यनुष्टुप् । कुशतरुणान्तर्धाने विनियोगः ।

स्वधिते परशुः ।

स्वधितइत्यस्य परशुर्देवता । दैवी जगती । प्रहरणे विनियोगः ।

द्यामाऽतस्त्वँ वनस्पतिः । (१)

द्यां मा लेखीरतस्त्वं देवएतयोर्वनस्पतिर्देवता द्यां मेत्यस्य एकोना आर्षी पङ्क्तिः । वृक्षाभिमन्त्रणे विनियोगः । अतस्त्वं । ऋग् बृहती । स्थाणौ होमे विनियोगः । २२ ।

अग्रे णीः शकलम् ।

अग्रेणीरसीत्यस्य शकलं देवता । एकाधिका साम्नी त्रिष्टुप् । प्रथमशकलस्यावटे प्रासने विनियोगः ।

देवस्त्वा यूपः ।

देवस्त्वा सवितेत्यस्य यूपो देवता । यूपाञ्जने विनियोगः । यजुः पङ्क्तिः ।

सुपिप्पलाभ्यश्चषालम् ।

सुपिप्पलाभ्यइत्यस्य चषालं देवता । याजुषी बृहती चषालप्रमोचने विनियोगः ।

---

(१) दिवम्मा इति काण्वसर्वानुक्रमपाठो बोध्यः ॥

द्यामग्रेण यूपः । (१)

द्यामग्रेणेत्यस्य यूपो देवता व्यूहेनसामजगती यूपोच्छ्रयणे विनियोगः ।

या ते धामानि यूपदैवत्यां त्रिष्टुभम् ॥ 3

या ते धामान्युश्मसीति मामृचं यूपदैवत्यां त्रिष्टुप्छन्दस्कां दीर्घतमा ऋषिरपश्यत् । अत्र प्रथमपादस्य व्यूहेन पूरणम् । पशुबन्धवट-सक्थे प्रक्षेपे विनियोगोऽस्याः ।

ब्रह्मवनि ब्रह्म दृंह यूपदैवत्ये ।

अनयोर्यूपो देवता । ब्रह्मवनि त्वा एकोनविंशत्यक्षरत्वादेकाधिका ऋग्गायत्री एकोना साम्नी यजुषी । पांसुभिः पर्यूहणे विनियुक्ता । ब्रह्म दृंह । आसुरी गायत्री पर्यूहणे विनियोगः ।

विष्णोः कर्माणि द्वे मेधातिथिर्वैष्णव्यौ गायत्र्यौ । ४

विष्णोः कर्माणि तद्विष्णोरिति द्वे ऋचौ विष्णुदेवते गायत्र्यौ मेधातिथिऋषिरपश्यत् । वाचने उभयोर्विनियोगः । प्रथमायामन्त्य. समाहारः । तेनैकोना ।

परिवीर्यूपः । ६

परिवीरित्यस्य यजुषो यूपो देवता । प्राजापत्या त्रिष्टुप् । परिव्ययणे विनियोगः ।

दिवः स्रुवः ।

दिवः सूनुरित्यस्य स्रुवो देवता यजुर्गायत्री । स्रुवमूले विनियोगः ।

एष ते यूपः ।

एष ते पृथिव्यामित्यस्य यूपो देवता । साम्नी बृहती ॥ यूपैकादशि-

(१) दिवमग्रेण इत्यपि काण्वसर्वानुक्रमपाठः ॥

न्यां द्वादशमो पशुपसन्नकबूपस्य वर्षिष्ठा हविष्मतो भूमो विधा-
नेऽभिविनियोगः ।

उपावीरित्यूचम् ।

उपावीरसीत्यस्य तृणं देवता दैवीपङ्क्तिः तृणादाने विनियोगः ।

उपदेवाँ लिङ्गोक्तम् ।

उपदेवां दैवीरित्येतद्यजुर्लिङ्गोक्तदेवतम् । पशवोदेवताः । त्वष्टा-
चेत्यर्थः । एकोनत्रिंशदक्षरत्वादेकाधिका आर्षी पङ्क्तिः । एकोना
प्राजापत्या जगती वा तृणेन पशुस्पर्शने विनियोगः ।

ऋतस्य त्वा पशुः ।

ऋतस्य त्वा देवहविरित्यस्य पशुर्देवता । आर्ष्युष्णिक् । पशोरन्त-
राशृङ्गबन्धने विनियोगः । (१)

अग्नीषोमाभ्यां लिङ्गोक्तम् ।

अग्नीषोमाभ्यां जुष्टमित्येतद्यजुर्लिङ्गोक्तदेवतम् । अग्नीषोमदेवत-
मित्यर्थः । यजुस्त्रिष्टुप् यूपे पशुबन्धने विनियोगः ।

० अद्भ्योऽपां पशुः ।

अद्भ्यस्त्वौषधीभ्यः, अपां पेरुरित्यनयोः पशुर्देवता । अद्भ्यः आ-
र्षी पङ्क्तिः पशुप्रोक्षणे विनियोगः । अपां पेरुः प्राजापत्या बृहती ।
आप्योपाकरणे विनियो[गः] ।

आपो देवीरापम् ॥

आपो देवीः स्वदन्त्वित्येतदब्देवतं । पशोरधस्तादुपोक्षणे विनियोगः ।
आसुरी गायत्री ।

अन्ते पशुः ।

(१) देवस्य त्वेत्यस्य प्रजापतिः सवितादेवता प्राजापत्या बृहती छन्दः पशोर्यू-
पे बन्धने विनियोगः इति पद्धत्या, पाठोऽधिको बोध्यः ॥

सक्ते प्राणस्त्वादीनां मन्त्राणां पशुर्देवता । पशुसमञ्जने विनियोगः । तत्र संते प्राणः । यजुः पङ्क्तिः पशुललाटाद्यञ्जने, समष्टा-नि । दैवीजगती । पश्वंसयोरञ्जने । सँव्यज्ञपतिः प्राजापत्या गायत्री पशुश्रोण्यञ्जने ।

६ –

घृते न स्वरुशासौ ।

घृतेनाक्तौ पशूनित्यस्य स्वरुशासौ देवते यजुर्बृहती । अभि स्वरु-भ्यां पशुललाटोपस्पर्शने विनियोगः ।

रेवति वाक् ।

रेवति यजमान इत्यस्य वाग्देवता । ब्राह्मी उष्णिक् । यजमानवाचने विनियोगः ।

वर्षो तृणम् ।

वर्षो वर्षीयसीत्यस्य तृणं देवता । आसुर्यनुष्टुप् । शामित्रस्य पश्चा-स्तृणस्थापने विनियोगः ।

स्वाहा देवे । –

स्वाहा देवेभ्यो देवेभ्यः स्वाहेत्येते यजुषी देवे देवदेवत्ये । दैवीप-ङ्क्तिः । परिपश्व्याहुतिहोमे विनियोगः ॥ २३ ॥

६ –

माऽहिर्भू रज्जुः ।

माऽहिर्भूरित्यस्य रज्जुर्देवता । दैवीजगती । पशुनियोजन्याश्चात्वा-ले प्रासने विनियोगः ॥

नमस्त यज्ञः ।

नमस्त आतानेत्यस्य यज्ञो देवता पत्नीवाचने विनियोगः । सा-मजगती ॥

देवीरापोऽद्धंमापमद्धंमाम्भीः । ६ – १

देवीराप इत्यस्य पूर्वार्धस्य मन्त्रस्यापो देवताः उत्तरार्धस्याग्नीर्देवताः एकावसाना पङ्क्तिः पशुप्रक्षालने विनियोगः ।

१४ वाचन्ते मनस्ते पशुः ।

वाचं ते शुन्धामि इत्यादीनां मनस्त आप्यायतामित्यादीनां च पशुर्देवता । पशोः प्राणमर्शने विनियोगः । आद्याः सप्त यजुर्गायत्र्यः अष्टमी यजुरुष्णिक् । मनस्ते यजुरुष्णिक् । वाचो यजुर्गायत्री । प्राणस्त इति तिस्रो यजुरुष्णिहः, यत् क्रूरं साम्नी त्रिष्टुप्, मनस्त इत्यादीनामध्वर्युयजमानयोरनुमर्शने विनियोगः ।

शं लिङ्गोक्तम् । (१)

शमद्भ्य इत्येतल्लिङ्गोक्तदैवतं । सुखन्देवता । दैवी बृहती । पांसि-जनीशेषस्य पशोः पृच्छदेशे निनयने विनियोगः

ओषधे त्रायम् ।

ओषधे त्रायस्वेत्यस्य तृणं देवता । कुशतरुणान्तर्धाने विनियोगः । यजुर्गायत्री ।

स्वधितेऽसिः ।

स्वधिते मैनमित्यस्या असिर्देवता दैवीजगती । असिनिधाने विनियोगः ।

रक्षसां लिङ्गोक्तम् ।

रक्षसामित्येतल्लिङ्गोक्तं । रक्षोदैवतमित्यर्थः । यजुर्गायत्री । लोहितेन तृणाञ्जने विनियोगः ।

निरस्तमिदमहं रक्षोघ्नी ।

निरस्तं० रक्ष इदमहं रक्ष इत्येते द्वे यजुषी रक्षोघ्नी । रक्षसो

(१) शं महोभ्यो लिङ्गोक्तमिति काण्वसर्वानुक्रमपाठः ॥

[illegible]र्वा । रक्षोदैवते । निरस्तं दैवीपङ्क्तिः । [illegible]
[illegible] विनियोगः । इदमहं । व्यूहेन प्राजापत्या जगती ।
[illegible] तृणाभिसिञ्चने विनियोगः ।

घृतेन द्यावापृथिव्यम् ।

घृतेन द्यावापृथिवीत्येतद्द्यावापृथिवीदैवतं । प्रोर्णने विनियुक्तं । यजुर्जगती ।

वायो वायव्यम् ॥

वायो वेरित्येतद्यजुर्वायुदैवत्यं । यजुर्गायत्री । आहवनीये तृणप्रासने विनियोगः ।

अग्निराज्यस्याग्नेयम् ।

अग्निराज्यस्येत्येतदग्निदैवतं यजुर्बृहती । वपाभिघारणे विनियोगः ।

स्वाहाकृते वपाश्रपण्यौ ।

स्वाहाकृते ऊर्ध्वनभसमित्यस्य वपाश्रपण्यौ देवते । आसुरीगायत्री । वपाश्रपण्योरनुप्रासने विनियोगः ।

इदमापःप्रापी महापङ्क्तिः त्र्यवसाना । (१) [१]

इदमापः प्रवहतेतीयमृगापी अब्देवत्या । त्र्यवसाना त्रिषु स्थानेष्ववसानं यस्याः सा त्र्यवसाना यस्या महापङ्क्तिश्छन्दः यस्याः अष्टाक्षरा षड्द्वादशापि महापङ्क्तिः, "षडष्टका वा महापङ्क्तिरित्युक्तत्वात् ॥ पावमानशाक्यः पादः, इदमापइत्यस्याः अन्त्यः पादः पावमानसञ्ज्ञकः पवमानश्च मुञ्चन्त्वित्ययं मार्जने विनियोगादिदमापइत्यस्याः ।

सन्ते हृदयम् ।

---

१ काण्वसर्वानुक्रमेऽयं पाठो नास्ति चास्माभिः प्रक्षिप्यते ॥

[illegible] मनस्त्वेत्यस्य हृदयं देवता। प्राजापत्यानुष्टुप्। [illegible]-
[illegible] विनियोगः।

रेडसि वसा।

रेडस्यग्निरित्यस्य वपादेवता। आर्ची पङ्क्तिः। वपाहवने विनियोगः।

प्रयुतं लिङ्गोक्तम्।

प्रयुतं द्वेष इत्येतद्यजुर्लिङ्गोक्तदेवतं। द्वेष एव देवतेत्यर्थः। दैवीपङ्क्तिः। घृतवसयोर्मिश्रणे विनियोगः॥

घृतं वैश्वदेवम्।

घृतं घृतपावान इत्येतद्विश्वदेवदेवतं॥ आर्ची पङ्क्तिः। वपाहोमे विनियोगः॥

दिशः पञ्च दिश्यानि।

दिशः प्रदिश इत्यादीनि षड्यजूंषि दिशो देवत्यानि। दिग्व्याघारणे विनियुक्तानि। स्वाहाकारः सर्वत्र साकाङ्क्षत्वादिति प्रत्येकं स्वाहाकारस्यानुषङ्गात्॥ प्रथमषष्ठे दैवीबृहती। अन्येषां चतुर्णां दैवीपङ्क्तिः।

ऐन्द्रः प्राणः पञ्च प्राणदानं लिङ्गोक्तम्॥

ऐन्द्रः प्राण इत्येतद्यजुः पञ्चकं प्राणदायकं। लिङ्गोक्तदेवतं। प्राणदानदेवतम्। एकाधिका साम्नी त्रिष्टुप्। पशुसंस्पर्शने विनियोगः।

देव त्वाष्ट्री त्रिष्टुप्॥२४॥

देव त्वष्टरिति इयमृक् त्वष्टृदेवता त्रिष्टुप्छन्दस्का। पशुसंस्पर्शने च विनियुक्ता॥ २५॥

समुद्रं लिङ्गोक्तानि(१) द्वादश।

(१) लिङ्गोक्तदेवतानि इति काण्वसर्वानुक्रमपाठः॥

[illegible] कार्त्स्न्यात्मनो मनो मे तर्पय पञ्चदशानि [illegible]
[illegible] विशोकदेवतानि । समुद्रान्तरिक्षादिदेवतानि । तेषां [illegible]
र्भावुकत्वात् । [illegible] विनियोगः । मनो-
[illegible] विमार्जने । समुद्रं दैवीजगती । अन्तरिक्षं प्राजापत्या-
गायत्री । देवं यजुः पङ्क्तिः, मित्रावरुणौ यजुर्बृहती । अहोरात्रे
प्राजापत्यागायत्री, छन्दांसि दैवीजगती । द्यावा । यजुर्बृहती ।
यज्ञं । यजुर्गायत्री । सोमं । यजुर्गायत्री, दिव्यं । प्राजापत्या गाय-
त्री । अग्निं । यजुः पङ्क्तिः ।

मनो मे । दैवीजगती ।

दिवन्ते स्वकः ।

दिवं ते धूमस्तस्य अवदेवता । यजुरुष्णिक् । [illegible] विनि
योगः ।

माऽपो हृदयशूलम् ।

माऽपो मौषधीरित्यस्य हृदयशूलं देवता यजुरुष्णिक्" । शीतमूलो-
ऽयमा युर्गासि तमभिशोचे मोऽस्माद्वेष्टि यं च वयं द्विष्म"इत्यस्याः ।
हृदयशूलदेवता । शुष्कार्द्रसन्धौ हृदयशूलोपगूहने विनियोगः ।

धाम्नोधाम्नो वारुणम् ।

साम्नबृहतीछन्दः धाम्नोधाम्नस्येतद्यजुर्वरुणदेवतम् । साम्नी-
ष्णिक् । हृदयशूलोपगूहन एव विनियोगः ।

यदाऽऽहुर्वारुणी गायत्र्यनवसाना ।

यदाहुरघ्न्या इतीयमृक् । वरुणदेवत्या गायत्रीछन्दस्का अनव-
साना । अवसानवर्जिता । अत्र प्रथमः समाचारः तृतीयमेकाना । हृ-
दयशूलोपगूहन एव विनियोगः ।

सुमित्रिया नऽआपम् ।(१)

सुमित्रिया नऽइत्यग्निरब्देवतं । भासुर्यनुष्टुप् । अपामुपस्पर्शने-ऽभिमन्त्रणे वा विनियुक्ता ।

हविष्मतीर्लिङ्गोक्तदेवताऽनुष्टुप् ।

हविष्मतीरिमाऽइतीयमृक् लिङ्गोक्तदेवता अबादिदेवतेत्यर्थः । अस्या अनुष्टुप्छन्दः । वसतीवरीणां ग्रहणे विनियोगः ।

अग्नेर्वैश्चत्वार्यार्षाणि ।

अग्नेर्वोऽपन्नइत्यादीनि चत्वारि यजूंष्यब्देवतानि अग्ने र्वोऽपन्नगृ-हस्य आसुरीगायत्री वसतीवरीणां शालाद्वार्यमपरेण निधाने विनि-योग , इन्द्राग्न्योः प्राजापत्यागायत्री । इन्द्राग्न्योर्भागधेयीस्थेति नि धाने विनियोग , उत्तरस्मिन्वा । मित्रावरुणयोर्यजुस्त्रिष्टुप् । उत्त-रस्यामुत्तरवेदिश्रोण्यां वसतीवरीनिधाने विनियोगः विश्वेषां यजुस्त्रिष्टुप् । आग्नीध्रे वसतीवरीनिधाने विनियोग ।

अमूर्यागायत्रीं मेधातिथिः ।

अमूर्याइतीमामब्देवतां गायत्रीछन्दस्कां मेधातिथिऋषिरपश्य-त् । एषा पादनिचृद्गायत्री । त्रयाणामपि पादानां सप्ताक्षरत्वात् । "नव सप्तकाः पादनिचृदिति वचनात्" । आग्नीध्रे वसतीवरीनिधा-नएव विनियोगः ॥

हृदे सौम्यनुष्टुप् ॥

हृदे त्वा मनसे त्वेतीयमृक् सोमदेवत्यानुष्टुप् । अक्षरेण छन्दः पूर्तिः सोमोपावहरणे विनियोगः ।

सोम राजन्त्सौम्ये ।(१)

---

(१)इदमापऽआर्ष्यनुष्टु । इति काण्वसर्वानुक्रमेऽधिकः पाठः ॥

(१(हृदे त्वा सोम राजन्विश्वास्त्वा प्रजा सौम्यानि इति काण्वसर्वानुक्रमपाठः ॥

सोम राजन्विश्वास्त्वं, विश्वास्त्वां प्रजा इत्येते यजुषी सोमदेवत्ये । सोम राजन् साम्नोऽभिषवं सोमोपावहरणे विनियोगः । विश्वास्त्वां । यजुस्त्रिष्टुप् । विमुक्तोपस्थाने विनियोगः ।

शृणोतु लिङ्गोक्तदेवता त्रिष्टुप् ।

शृणोत्वग्निरिति द्वितीयमृक् लिङ्गोक्तदेवता अग्न्यादिधिषणापर्यन्तदेवमभिषदेवतेत्यर्थः । अस्यास्त्रिष्टुप्छन्दः । चतुर्गृहीतहोमे विनियोगः । व्यूहेन प्रथमद्वितीयपादयोरेकादशाक्षरत्वम् ।

देवीरापऽआपी पङ्क्तिः । (२)

देवीरापोऽपां नपादिति द्वितीयमृगप्देवता । पङ्क्तिछन्दस्का । चत्वारिंशदक्षरा पञ्चपदा पङ्क्तिः । अत्र द्वितीयः सप्ताक्षरः पादः प्रथमतृतीयावष्टाक्षरौ चतुर्थपञ्चमौ नवाक्षरौ तेनैकाधिका ।

इयमार्ष्यपि पङ्क्तिरेव वा ।

पादानामनियताक्षरत्वात् । स्वाहाकारः पृथग्यजुः । अस्याश्चतुर्गृहीतहोमे विनियोगः ।

कार्षिराज्यमनुष्टुप्समुद्रस्य समापऽआपे ।

कार्षिरसीत्यस्यामनुष्टुभि कार्षिरसीत्यस्यामक्षरचतुष्टयस्याज्यं देवता ततः समुद्रस्य त्वाक्षित्या उन्नयामीत्यस्य समापइत्यस्य चापो देवताः ॥ कार्षिरसीत्यादीनां त्रयाणां मिलितानामनुष्टुप्छन्दः । आद्यार्धर्चस्य व्यूहेन पूर्तिः । कार्षिरसीत्यस्य मैत्रावरुणचमसेनाज्यापोहने विनियोगः, समुद्रस्य त्वेत्यस्य ग्रहणे । समापइति मैत्रावरुणचमसवसतीवर्योः परस्परव्यत्यसने । इतरेतरनिनयने वा ।

यदग्ने मधुच्छन्दा आग्नेयीं गायत्रीम् । (१)

(१) चतुर्गृहीतानामाज्यानां । इत्यधिकः पाठः कण्वसर्वानुक्रमे ॥

समस्ते पश्चिमस्योत्तरां अग्निदेवत्यां गायत्रीं मधुच्छन्दा अपश्यत् । अन्तर्धीसंस्रवहोमे तदभावे चतुर्गृहीतस्याग्नौ विनियोगोऽस्मिन् होमे । उरु विष्णो प्रथमपरिध्यालम्भे । ध्रुवासीति स्वराट्प्रातरेव । चात्वाले छेदनालम्भे । अन्त्यः पादः । समाक्षरः । तत्रैकोना ।

आददे ग्रावा ।

आददे ग्रावासीत्यस्य ग्रावा देवता । ग्राव्णाम् आदाने विनियोग आर्षी पङ्क्तिः ।

निग्राभ्यास्ताऽऽपम् ।

निग्राभ्यास्थेत्येतद्यजुरापः । अब्देवतं । व्यूहेन प्रकृतिश्छन्दः । निग्राभ्यासु आदाने विनियोगः ।

इन्द्राय त्वा पञ्च सौम्यानि ।

इन्द्राय त्वा वसुमत इत्यादीनि पञ्च यजूंषि सोमदेवत्यानि । सोममाने विनियुक्तानि । इन्द्राय त्वा यजुर्जगती । द्वितीया यजुरनुष्टुप् । तृतीया च सैव चतुर्थी यजुरनुष्टुप् । पञ्चमी यजुर्बृहती ।

यत्ते सौमी विपरीता बृहती ।

यत्ते सोम दिवि ज्योतिरित्यृक् सोमदेवत्या । विपरीता बृहतीत्यस्याः प्रथमतृतीयौ पादावष्टाक्षरौ द्वितीयचतुर्थौ द्वादशाक्षरौ सा विपरीता बृहती । यत्नो वै विपरीतेत्यन्ये, मितासन्याने विनियोगः । व्यूहेनाक्षरयोर्द्वादशाक्षरपूर्त्तिं । तस्मै यजमानायेति तृतीयः पादः । उरुरायस्पोषाय चतुर्थो द्वादशाक्षरः ।

श्वात्राः पथ्या बृहती ।

श्वात्राः पीता भवत इत्यस्याः पथ्याबृहतीछन्दो निग्राभ्या देवताः

---

(१) यजुरन्तानि यजिक. पाठ. काण्वसर्वानुक्रमे ॥

[illegible] विनियोगः । यस्यास्तृतीयः पादो द्वादशाक्षरः अन्ये त्रयोऽष्टाक्षराः सा पथ्याबृहती, पथ्यापूर्वश्चेत्तृतीयश्चतुष्कः, द्रष्टव्यम- भिधेयम् ।

माभेः सौम्यमर्द्धं द्यावापृथिव्यमर्द्धम् ।

मा भेर्मा सं विक्था इत्यर्द्धं सोमदेवत्यं । अर्द्धं द्यावापृथिवीदेवतं [illegible] विनियोगः । ऋचां त्रिष्टुप् ।

प्रागपाक् सौम्युष्णिक् ।

प्रागपागित्येषा ऋक् सौमी सोमदेवत्या उष्णिक्छन्दस्का [illegible] विनियोगः । षष्ठाविंशत्यक्षरैषमार्षी उष्णिक्पादाना मनियताक्षरत्वात् ।

त्वमङ्ग गोतमऽऐन्द्रीं पथ्याबृहतीम् ॥२५॥

पथ्यापूर्वश्चेत्तृतीय इति । अत्र प्रथमद्वितीयौ समाक्षरौ तृतीयो द्वादशाक्षरः चतुर्थोऽष्टाक्षरः । तेन द्वाभ्यामूना बृहती ॥ [illegible] विनियोगः ॥ २५ ॥

वाचस्पतये प्राणदेवत्या विराट् ॥ (१)

वाचस्पतय इत्येषा प्राणदेवत्या विराट्छन्दस्का । नव वैराजस्यो- इत्येवं षट्रूपेत्येषा षट्रूपा विराट् । अत्र प्रथमः पादोऽष्टाक्षरः द्वि- तीयो दशाक्षरः । तृतीयस्त्रयोदशाक्षर इति । तेन एकादशा उपांशु- [illegible] प्रथमद्वितीये ग्रहणे पूर्वोत्तरार्द्धयोः क्रमेण विनियोगः ॥

मधुमती लिङ्गोक्तम् ।

मधुमतीरित्येतल्लिङ्गोक्तदेवतं । पूर्वोक्तः प्राणएवोपांशुग्रहरूपोऽ स्य देवता । „प्राणो ह वा अस्योपांशुरिति श्रुतेः" । अत्र देवतमिति [illegible] । यजुर्बृहती । उपांशुग्रहस्य तृतीये ग्रहणे विनियो-

(१) प्राणदेवत्ये एतावानेव काण्वसर्वानुक्रमपाठः ॥

गः ।

ऋतते सौम्यम् ।

ऋते सामाद्यामित्येतत्सोमदैवतं । परउष्णिक् ॥ [illegible] मां सोमे यज्ञे विनियोगः ।

स्वाङ्कृत यजुषी लिङ्गोक्ते ।

स्वाहेति,उवन्तरिक्षमितीमे । यजुषी लिङ्गोक्तदैवते स्वाहाकार-स्याग्नेरिति वक्ष्यमाणत्वात्स्वाहाकारस्याग्निर्देवता । उर्वन्तरिक्ष-मिति रक्षोदैवतमिति प्रागुक्तं । स्वाहेत्यध्यायाकृदैवौ उपांशौ विनियोगः ॥ उर्वन्तरिक्षमित्यस्य प्राजापत्यागायत्री [illegible] विनियोगः ।

स्वाङ्कृतोऽस्युपांशुः ।

स्वाङ्कृतोसीत्यस्योपांशुर्देवता । व्यूहेन द्वाविंशत्यक्षरा प्राजा-पत्याजगती । उपांशुग्रहे होमे विनियोगः ।

देवेभ्यस्त्वा दैवम् ।

देवेभ्यस्त्वा मरीचिपेभ्य इत्येतद्देवदैवतं पात्रीकपराजने विनियु-क्तम् । यजुर्बृहती ।

देवांशो लिङ्गोक्तमाभिचारिकम् ।

देवांशो यस्मै त्वेडेत इत्येतल्लिङ्गोक्तदैवतं । सोमांशुदैवतमि-त्यर्थः । तथा आभिचारिकं । अभिचारसाधकमिदं यजुः सामविष्टुप्, प्रावामउपरावाहुषु श्लिष्टानां सोमांशूनां होमे विनियोगः ।

प्राणाय ग्रहः ।

प्राणाय त्वेत्यस्य ग्रहोदेवता । दैवीबृहती । उपांशुपात्रासादने विनियोगः ।

व्यानायोपांशुसवनः ।

प्राणाय त्वेत्युपांशुसवनो देवता। दैवी बृहती उपांशुसवनासादने विनियोगः।

उपयामगृहीतोऽस्यन्तरैन्द्रम्।

उपयामगृहीतोऽस्यन्तर्यच्छ मघवन्नित्येतदैन्द्रमिन्द्रदेवतं। प्राजापत्या त्रिष्टुप्। अन्तर्यामग्रहणे विनियोगः।

अन्तस्ते मघवद्देवत्या। त्रिष्टुबुदानाय ग्रहः।

अन्तस्ते द्यावापृथिवीतीयमृक् मघवद्देवत्या त्रिष्टुप्छन्दस्का अन्तर्यामग्रहणे एव विनियोगः द्वितीयपादे व्यूहेनाक्षरपूरणं। उदानाय ग्रहः। उदानाय त्वेत्यस्य ग्रहो देवता दैवी पङ्क्तिः अन्तर्यामग्रहासादने विनियोगः।

आवायो वसिष्ठो वायव्यां त्रिष्टुभम्।

आवायो भूषेतीमामृचं वायुदेवत्यां त्रिष्टुभं वसिष्ठोऽपश्यत्। ऐन्द्रवायवग्रहणे विनियोगः।

तृतीयो द्व्यक्षरः। तन्नैकोना। वायवे त्वेति यजुः दैवी बृहती। ऐन्द्रवायवग्रहणे एव विनियोगः।

इन्द्रवायू मधुच्छन्दा ऐन्द्रवायवीं गायत्रीम्।

इन्द्रवायू इमे इतीमामृचं इन्द्रवायुदेवत्यां गायत्रीछन्दस्कां मधुच्छन्दा ऋषिरपश्यत्। उपयामगृहीतऽसीति यजुः व्यूहेन ब्राह्मी गायत्री। अपगृह्य पुनरैन्द्रवायवग्रहणे विनियोगः। अयान्ते एष ते योनिरिति यजुः पङ्क्तिः। ग्रहसादने विनियोगः।

अयं वां गृत्समदो मैत्रावरुणीम्।

गायत्रीमित्यत्रानुवर्त्तते। अयं वां मित्रावरुणेतीमामृचं मित्रावरुणदेवतां गायत्रीछन्दस्कां गृत्समदऋषिरपश्यत् अन्ते यजुरासुरी गायत्री। मैत्रावरुणग्रहणे विनियोगः॥

ग्रावा वयन् अनडुत्त्रिष्टुभम् ॥

ग्रावा ऽयमितीमामृचं त्रिष्टुभम् अनड्वानृषिरपश्यत् । मैत्रावरु- णीमित्यत्रानुवर्त्तते । पञ्चता गृहस्य अयनी विनियोगः । अवत । पत्ते एषते योनिरिति यजुः । यजुः पङ्क्तेः सादने विनियोगः ॥

या वां मेधातिथिराश्विनीं गायत्रीम् ॥

या वां कशा इतीमामृचं आश्विनीं अश्विदेवत्यां गायत्रीछन्द- स्कां मेधातिथिराश्विनीं गायत्रीं । या वां कशामेधातिथिरपश्यत् उपया- म । यजुस्त्रिष्टुप् । आश्विनग्रहणे विनियोगः । एष त इति यजु- र्ग्रहस्य सादने विनियोगः । अत्र यजुषां प्रजापतिरेव साधारण- ऋषिः ऋषिविशेषस्य अनाम्नानेनैवोक्तत्वात् ॥

तम् प्रत्नथा वत्सारः काश्यपो वैश्वदेवीं जागती- म् ॥

तं प्रत्नथेतीमामृचं विश्वेदेवदेवतां जगतीं काश्यपस्य पुत्रो वत्सा- रऋषिरपश्यत् । अष्टाचत्वारिंशदक्षरा द्वादशाक्षरचतुष्पादा जगती शुक्रग्रहणे ऽस्या विनियोगः द्वितीयपादे व्यूहः । एकोना वा । उप- यामितीमामस्य आर्षी यजुर्जगती वा (१) एष त इति यजुः पङ्क्तेः सादने विनियोगः अत्र शुक्रामन्थिप्रचारकालीनमन्त्राणां सदैव देव- तादिकं संहितापाठक्रममुल्लङ्घ्य अपवृष्टः मन्द इत्याद्यभिधानम- सौम्यानामनुपरान्तरा परित्यज्याच्छिन्नपत्रेत्यादीनामाह ।

अच्छिन्नस्य सौम्यम् ॥

अच्छिन्नस्य त इत्येतत्सोमदेवतं यजमानस्य जपे विनियुक्तं सा- मजगती ॥

---

(१) उपयामेति प्रजापतिर्ऋषिः शुक्रो देवता सामगायत्री ग्रहणे विनियोगः इति- पद्धतिपाठः ॥

सा प्रथमैन्द्री त्रिष्टुप् ॥

सा प्रथमा संस्कृतिरितीयमृगिन्द्रदेवत्या त्रिष्टुप् । कुमारस्योत्थापने विनियुक्ता ।

इमम्पञ्चयाजुषाण्यग्नीध्रहोत्रे ॥

इमम्पंतु सोमाःपयाजुष्मीत्येते यजुषी विशेषदेवते । प्रथमस्य होता देवता । द्वितीयस्य होता । तं प्रति वचनात् । तृतीयं यजुःप्राजापत्यानुष्टुप् । अस्य विनियोगः ॥

पयाउद्देवी बृहती ॥

होतुरग्ने स्थापने विनियोगः ॥ २६ ॥

अयंवेनो वेनस्य त्रिष्टुप् सोमस्तुतिरधिदैवतमधियज्ञं च ॥

अयं वेनहतीयमृक् त्रिष्टुप्वेनस्य वेनो वेनतेः कान्तिकर्मणइतिया-स्कोक्तेर्वेनोऽत्र चन्द्रः सोमः । स वेनोऽस्या ऋषो देवता: । कीदृशी इयमृक् । अधिदैवतं अधियज्ञं च सोमस्तुतिः अनया त्रिष्टुभा अयं वेन इत्यनया अधिदैवतमधियज्ञं चावस्थितः सोमः स्तूयते । अधिदैवं तावच्चन्द्रात्मना स्तूयते । अधियज्ञं च यागसाधनभूतसोमात्मना तृतीयः पादोऽत्र द्रष्टव्यः तेनैवोभयात्मिकयज्ञे विनियोगः शुक्रपक्षेऽपि विकल्पेन विनियोगोऽस्ति अयं वेन इत्येकाहि ॥

मनो न त्रिष्टुप्सोमस्तुतिरधियज्ञानुवादिनी ॥

मनो न येष्वितीयमृक् त्रिष्टुप् । कीदृशी । अधियज्ञानुवादिनी यज्ञामन्त्रिप्रदानाधियज्ञानुवादिनी । सोमस्तुतिसोमोऽस्य देवताइत्यर्थः सम्भुमिर्मन्थियपक्षे विनियोगः ॥

अग्नष्टः पञ्चोऽपष्टो मर्कः पाभिचारिके ॥

इमे यजुषी [illegible] । [illegible] : [illegible]-
[illegible] विनियोगः ॥

देवास्त्वा शुक्रामन्थिनौ ॥

देवास्त्वा शुक्रपा, देवास्त्वा मन्थिपा इत्यनयोः क्रमेण शुक्रामन्थिनौ-
देवते । [illegible] विनियोगः यजुः पङ्क्तिः ॥

अनाधृष्टाऽसि दक्षिणोत्तरवेदिश्रोण्यौ ॥

अनाधृष्टासीत्यनयोर्दक्षिणोत्तरे उत्तरवेदिश्रोण्यौ देवते । उत्त-
रवेदिश्रोण्योर्व्यासादने विनियोगः ॥

सुवीरः सुप्रजा इत्यनयोः शुक्रामन्थिनौ ॥

यथाक्रमं देवते । सुवीर इत्यस्य शुक्रो देवतासाम्नित्रिष्टुप् । [illegible]
दक्षिणं यूपदेशं प्रतिगमने विनियोगः । सुप्रजा इत्यस्य मन्थी देवता ।
साम्नित्रिष्टुप् । प्रतिप्रस्थातुरुत्तरं यूपदेशं प्रतिगमने विनियोगः ॥

निरस्तो द्वे आभिचारिके ॥

निरस्तः शण्डो निरस्तो मर्क इतीमे यजुषी आभिचारिके
अभिचारप्रयोजने दैवीपङ्क्तिः । [illegible]नि-
रसने विनियोगः ॥

शुक्रस्य मन्थिनः शकल(१)म् ॥

शुक्रस्याधिष्ठानमसि मन्थिनोधिष्ठानमसीत्यनयोः शकलं देवता ।
प्राजापत्या गायत्री । प्राचितयूपशकलयोराहवनीये प्रासने वि-
नियोगः ॥

ये देवासः पञ्चर्चो वैश्वदेवीन् त्रिष्टुभम् ॥

ये देवास इत्यादीमामृच विश्वदेवदेवतां त्रिष्टुप्छन्दस्कां पञ्च-
र्चो परुच्छेप अपश्यत् ॥

---

(१) "शुक्रस्य मन्थिनो द्वयोः शकल"मिति काण्वशाखीयसर्वानुक्रमसूत्रपाठः ॥

आग्रयणोऽसि लिङ्गोक्तदेवतम् ॥

आग्रयणदेवतमित्यर्थः । व्यूहेन ब्राह्मी अनुष्टुप् । आग्रयणग्रहग्रहणे विनियोगः ॥ २७ ॥(१)

सोमः पवते वैश्वदेवम् ॥

सोमः पवत इत्येतद्विश्वदेवदेवतं । अत्यष्टिछन्दः । [illegible]ग्रहणमुपगम्य [illegible] पवमानग्रहणे विनियोगः । एष त इत यजुर्जगती । सादने विनियोगः ॥

इन्द्राय त्वा लिङ्गोक्तानि ॥

इन्द्राय त्वा बृहद्वत इत्यादीनि इन्द्राविष्णुभ्यामित्येतत्पर्यन्तानि सर्वाणि यजूंषि लिङ्गोक्तदेवतानि । गृह्यमाणग्रहदेवतानीत्यर्थः । तत्रेन्द्राय त्वेति याजुषी पङ्क्तिः उक्थ्यग्रहणे विनियोगः । एष त इति यजुर्बृहती सादने विनियोगः । यज्ञो देवता । देवेभ्यस्त्वेति यज्ञोदेवता । आसुरी गायत्री । प्रातः सवने उक्थ्यविग्रहणे विनियोगः मित्रावरुणाभ्यां त्वा । ऋग्गायत्री मैत्रावरुणस्योक्थ्यविग्रहणे विनियोगः । इन्द्राय त्वा । आसुरी गायत्री । ब्राह्मणाच्छंसिन उक्थ्यविग्रहणे विनियोगः इन्द्राग्निभ्यां त्वा । प्राजापत्यानुष्टुप् । अच्छावाकोक्थ्यविग्रहणे विनियोगः इन्द्रावरुणाभ्यां । साम्नी गायत्री । इन्द्राबृहस्पतिभ्यां त्वा । एकाधिका साम्नी गायत्री । इन्द्राविष्णुभ्यां त्वा एकोना साम्नी गायत्री । तृतीयसवने उक्थ्यविग्रहणे प्रातः सवनोक्तक्रमेण विनियोगः ॥

मूर्द्धानं भरद्वाजो वैश्वानरीं त्रिष्टुभम् ॥

मूर्द्धानं दिव इतीमामृचं वैश्वानरदेवतां त्रिष्टुप्छन्दस्कां भरद्वाजऋषिरपश्यत् । ध्रुवग्रहग्रहणे विनियोगः ॥

---

(१) त्वाग्रयण इत्येतद्यजुरित्येतत्क्वचिन्मूलीयपाठः सटीकपुस्तके ॥

ध्रुवोऽसि ध्रुवः ॥

ध्रुवोऽसि ध्रुवक्षितिरित्यस्या । ध्रुवो देवता । एकाधिका पङ्क्तिः । ध्रुवग्रहस्थापने विनियोगः ॥

ध्रुवं ध्रुवेण बृहती पूर्वोऽर्धर्चो ध्रौव उत्तर ऐन्द्रः ॥

ध्रुवं ध्रुवेणेत्यस्या बृहतीछन्दः । तत्र ध्रुवं ध्रुवेणेत्ययं पूर्वोऽर्धर्चो ध्रौवः ध्रुवदैवतः । यथानऽइत्ययमुत्तरोऽर्धर्च ऐन्द्रदैवतः । ध्रुवस्य होतृचमसेऽवनयने विनियोगः । (१)अत्र प्रथमतृतीयावष्टाक्षरौ पादौ । द्वितीयचतुर्थौ दशाक्षरौ । षट्त्रिंशदक्षरत्वाद्बृहती "वैराजो गायत्री चेति पिङ्गलोक्तः" । अत्र पादक्रमनियमो न भवति यदि नोर्मध्ये दशकौ विष्टारबृहतीत्येतल्लक्षणमिह नास्ति ॥(२)

यस्ते देवश्रवाः सोमो त्रिष्टुभं यजुरन्त्याम् ॥

यस्ते द्रप्सइतीमां त्रिष्टुभं सोमदेवतां यजुरन्त्यां देवश्रवाऋषिरपश्यत् । यजुषोऽपि देवश्रवाऋषिरित्यर्थः । स्वाहेत्येतद्यजुश्चतुर्थः पादो द्वादशाक्षरः तेनैकाधिका । विप्रुड्ढोमेऽस्या विनियोगः ॥

देवानां चात्वालदैवतम् ॥

देवानामसीत्येतद्यजुश्चात्वालदैवतं । यजुर्बृहती । [illegible] चात्वाले प्रक्षेपे विनियोगः ॥

प्राणाय मे लिङ्गोक्तदेवतान्येकादश ॥

प्राणाय मे वर्चोदा इत्यादीनि विभाज्यो मन्त्रास्त्येकादश यजूंषि लिङ्गोक्तदेवतानि । उपांशुसवनादय एषां देवता इत्यर्थः । सर्वेषां वाचने विनियोगः । तत्र प्राणाय मे इत्यस्योपांशुर्देवता आसुर्यनुष्टुप्-

---

(१) उ० ध्रुवोऽसिप० ध्रुवोदे० ऋक्पाङ्क्तः ध्रुवग्रहण एवं वि० एष ते प्र० महोदे० यजुस्त्रिष्टुप्सादने वि० ।

(२) ध्रुवसेके विनि० इत्युभयोः पद्धतिपाठः ॥

ग्रहणे विनियोगः, व्यानाय मे । उपांशुसवनो देवता आसुर्यनुष्टुप् । उदानाय मे अन्तर्यामो देवता साम्न्युष्णिक् । वाचे म ऐन्द्रवायवो देवता । साम्नीगायत्री, क्रतूदक्षाभ्यां । मैत्रावरुणग्रहो देवता आसुरीगायत्री । श्रोत्राय मे आसुर्यनुष्टुप् आश्विनग्रहो देवता । चक्षुर्भ्यां मे शुक्रामन्थिनौ देवते । साम्न्युष्णिक् । आत्मने मे । आग्रयणो देवता । आसुर्यनुष्टुप् । ओजसे मे । उक्थ्यो देवता । आसुर्यनुष्टुप् । आयुषे मे । ध्रुवो देवता आसुर्यनुष्टुप् । विश्वाभ्यो मे । एकोना गायत्री । एकाधिका वा प्राजापत्यानुष्टुप् । पूतभृदाधवनीयौ देवते । सर्वेषां ग्रहणे विनियोगः ॥

कोऽसि प्राजापत्योष्णिग्वर्द्धमाना ॥

कोऽसिकतमोऽसीत्येषां प्राजापतिर्देवता । मध्यमप्रजातिरूपो द्रोणकलशोऽत्र देवतेत्यर्थः, अस्या वर्द्धमानोष्णिक्छन्दः यस्याः प्रथमः पादः षडक्षरः । द्वितीयः सप्ताक्षरः । तृतीयोऽष्टाक्षरः । सा विंशत्यक्षरत्वात् द्वाभ्यामधिकत्वात् । वर्द्धमानोष्णिगित्युच्यते । अवकाशनकाले विनियोगः । भूर्भुवः स्वरिति ऋगुष्णिक् यजमानस्य जपे विनियोगः ॥

मधवे त्वा लिङ्गोक्तदेवतानि त्रयोदश ॥

मधवे त्वेत्यादीनि अंहसस्पतये त्वेत्यंतानि त्रयोदश यजूंषि लिङ्गोक्तदेवतानि गृह्यगृह्यमाणग्रहदेवतानीत्यर्थः । ऋतुग्रहग्रहणे सर्वेषां विनियोगः । मधवे त्वा यजुर्जगती । माधवाय । आसुर्यनुष्टुप् । शुक्राय शुचये । नभसे त्वा । यजुर्जगत्यः, नभस्याय आसुर्यनुष्टुप् । इषे त्वा । ऊर्जे त्वा यजुः पङ्क्तिः । सहसे त्वा तपसे त्वा यजुर्जगत्यौ, सहस्याय त्वा तपस्याय त्वा आसुर्यनुष्टुभौ । अंहसः साम्न्युष्णिक् ॥ २७ ॥

इन्द्राग्नी विश्वामित्र ऐन्द्राग्नीं गायत्रीम् ॥

इन्द्राग्नी आगतमित्येतामृचं इन्द्राग्नीदेवत्यां गायत्रीछन्दस्कां विश्वामित्रऋषिरपश्यत् । ऐन्द्राग्नग्रहणेऽस्य विनियोगः पञ्च प्रथमद्वितीयावष्टाक्षरौ पादौ द्वितीयः सप्ताक्षरः । तेनैकोना उपयामिति सा-माम्निक,एष त इति यजुःपङ्क्तिः । ग्रहणे सादने च क्रमेण विनियो-गः ॥

आघ विश्वोक आग्नेन्द्रीम् ॥

गायत्रीमित्यनुवर्त्तते । आघा ये इतीमां गायत्रीमाग्नेन्द्रीम-ग्नीन्द्रदेवत्यां विश्वोकऋषिरपश्यत् । अस्या विनियोगश्चात्रास्ति । यजुषोः पूर्वमूक्तवत् ॥

ओमासो मधुच्छन्दा वैश्वदेवीम् ॥

गायत्रीमित्यनुवर्त्तते । ओमासश्चर्षणीधृत इतीमामृचं विश्वेदेव-देवतां गायत्रीच्छन्दस्कां मधुच्छन्दा ऋषिरपश्यत् । वैश्वदेवग्रहग्रहणे विनियोगः ॥

विश्वेदेवासो गृत्समदः ॥

वैश्वदेवीं गायत्रीमिति चानुवर्त्तते विश्वेदेवास आगतेतीमामृचं विश्वेदेवदेवतां गायत्रीछन्दस्कां गृत्समदऋषिरपश्यत् । विश्वदेवग्रहे-वचहणएव विनियोगः । उभयमूक्ते उपयामेति । आसुरी गायत्री । एष तइति यजुर्जगती । ग्रहणे सादने च क्रमेण विनियोगः ॥

इन्द्र मरुत्वस्तिस्रो विश्वामित्र ऐन्द्रामारुतीस्त्रिष्टु-भः ॥(१)

इन्द्रमरुत्व, मरुत्वन्तं वृषभं । सजोषा इन्द्र मरुत्वाँ । इन्द्रेत्येता ए-तस्य इन्द्रमरुत्वद्देवता त्रिष्टुप्छन्दस्का विश्वामित्रऋषिरपश्यत् । इन्द्र-मरुत्व इत्यस्याः प्रथममरुत्वतीयग्रहणे विनियोगः । मरुत्वन्तमिति स-

(१) इन्द्रमरुत्वस्तिस्र इति काण्वसर्वानुक्रमपाठः ॥

ग्रहमरुत्वतीयग्रहणे । अथ द्वितीयो दशाक्षरः व्यूहेन पूर्त्तिर्वा एकोनो वा । उपयामेति आसुरी गायत्री, एष तइत्यासुर्यनुष्टुप् । एवं अतस्त्वपि । तृतीयचतुर्थीरपि द्वितीयमरुत्वतीयग्रहणएव विनियोगो वाचस्तोमे ॥

मरुतां त्वा यजुर्मरुत्वतीयम् ॥

मरुतां त्वौजस इति यजुर्मरुत्वतीयं मरुत्वानस्य देवतेत्यर्थः, द्यावापृथिवी मरुत्वदग्नीषोमेति रूपत्वम्. अथ सामोष्णिक् । तृतीयमरुत्वतीयस्य ग्रहणे विनियोगः ॥

महां २ ॥ इन्द्रो भरद्वाजो माहेन्द्रीं त्रिष्टुभम् ॥

महां २ ॥ इन्द्रो नृवदितीमामृचं माहेन्द्रग्रहदेवतां त्रिष्टुप्छन्दस्कां भरद्वाजऋषिरपश्यत् । माहेन्द्रग्रहग्रहणे विनियोगः । अथ तृतीयो नवाक्षरः । तेन ह्यूनः ॥

यऽओजसा वत्सो गायत्रीम् ॥

माहेन्द्रीमित्यनुवर्त्तते । महां २ ॥ इन्द्रो यऽओजसेतीमामृचं महेन्द्रदेवतां गायत्रछन्दस्कां वत्सऋषिरपश्यत् । अस्यापि माहेन्द्रग्रहणएव क्वचिद् विनियोग लिङ्गात् । अनयोर्मन्त्रयोरुपयामेत्यासुर्यनुष्टुप् । एष तइति यजुः पङ्क्तिः ग्रहणासादनयोर्विनियोगः ॥

उदुत्यं प्रस्कण्वः सौरीं गायत्रीम् ॥

उदुत्यमितीमां सूर्यदेवतां गायत्रीछन्दस्कां प्रस्कण्वऋषिरपश्यत् । दाक्षिणहोमे विनियोगः अथ तृतीयः समाक्षरः तेनैकोनः ॥

चित्रं कुत्स आङ्गिरसस्त्रिष्टुभम् ॥

सौरीमित्यनुवर्त्तते । चित्रं देवानामितीमामृचं सूर्यदेवतां त्रिष्टुप्छन्दस्कामाङ्गिरसः पुत्रः कुत्सऋषिरपश्यत् । दाक्षिणहोमेऽस्या

विनियोगः ॥(१)

रूपेण वो दक्षिणा चतुर्णाम् ॥

रूपेण वो रूपमित्यादीनां चतुर्णां यजुषां दक्षिणादेवताः । तत्र रूपेण वः प्राजापत्या जगती नष्टरूपानुष्टुप् । [illegible] विनियोगः, वि स्वः दैवी जगती सदोगमने विनियोगः, वातस्य यजुर्गायत्री सदस्य प्रेक्षणे । अत्र चतस्य पथा प्रेतेति द्वितीयं यजुः पृथक् । चतुर्णामित्युक्तत्वात् ॥

ब्राह्मणमद्य लिङ्गोक्तदेवतान्यष्टौ ॥

ब्राह्मणमद्य विदेयमित्यादीन्यष्टौ यजूंषि लिङ्गोक्तदेवतानि ब्राह्मणो देवता ब्राह्मणं इति एकोनाक्षरबृहती [illegible] प्रतिगमने विनियोगः अस्मद्राताद इत दक्षिणादेवताः । [illegible] दक्षिणादाने विनियोगः ॥

अग्नये त्वा हिरण्यं देवता ॥

ऋचां त्रिष्टुब् हिरण्यप्रतिग्रहे विनियोगः ॥

रुद्राय त्वा गौर्देवता ॥

एकाधिका ऋचां त्रिष्टुप् गोः प्रतिग्रहे विनियोगः । बृहस्पतये त्वा एकोना ब्राह्मी गायत्री वासो देवता वासः प्रतिग्रहणे विनियोगः ॥

यमाय त्वा ॥

अश्वो देवता एकाधिका ऋचां त्रिष्टुप् । अश्वप्रतिग्रहणे विनियोगः ॥

कोदादिति कामो देवता ॥

(१) अत्र अग्नेनयाचन्नहति द्वयोर्ऋचोरगस्त्य ऋषिः त्रिष्टुप्छन्दसी आग्नीध्रेयेऽग्नौ हुताहुतिद्वयहोमे विनियोगः इति पद्धतिपाठः ॥

प्राजापत्या त्रिष्टुप् हिरण्यगर्भोपासोऽग्नेभ्योऽन्यस्य उक्थिनामनु-चमस सम्भोक्तमादेः प्रतिकृते विनियोगः । औदादित्यस्य द्वे यदूर्ध्वे प्रथमयजुषी अभिप्रेत्य त्रिष्टुभादेवत्यापिष्टायित्युक्तं । अन्यया सप्तवैः मानि गायत्रौ ॥ २८ ॥

विष्णो वैष्णवम् ॥

विष्णऽउरुगायैषत इत्येतद्यजुर्वैष्णवं विष्णुर्देवता आर्षीगायत्री । आदित्यस्थाल्यामासिक्तानां द्विदेवत्यानुलोमसंस्रवाणामादित्यपात्रे-च पिधाने विनियोगः । अथ प्रथममध्यायादौ उपयामगृहीतोऽसीति प्रथमं यजुः । प्राजापत्या गायत्री । द्विदेवत्यैः सह सोमार्थं प्रतिप्रस्थातुरादित्यपात्रेण द्रोणकलशादुपग्रहणे विनियोगः ॥

वृष्णमायाः सोमो देवता ॥

अथ आदित्येभ्यस्त्वेति द्वितीयं यजुः आदित्यस्थाल्यां संस्रावाक्षेपे विनियुक्तं । तस्यामिंषमाणः सोमो देवता दैवीपङ्क्तिश्छन्दः संस्रावक्षेपे विनियोगः । ततस्तृतीयं विष्णऽउरुगायैष त ॥

कदा चनादित्यदैवत्ये बृहत्यौ ॥

कदा चन स्तरीः, कदा चन प्रयुच्छसीतीमे ऋचौ आदित्यदेवते बृहतीछन्दस्के आदित्यग्रहणे विनियुक्ते द्वे अपि यजुरन्ते । आदित्येभ्यस्त्वेति इत्यारभ्यन्ते यजुः । तस्य दैवीपङ्क्तिश्छन्दः पूर्वं हि वाक्समीपस्थाने मध्ये कदाच नेन्द्रदेवत्योक्ता । इह त्वादित्यदेवत्या यजुरन्ता चेति विशेषः द्वितीयायां व्यूहेन छन्दः पूर्त्ति ॥

यज्ञो देवानां कुत्सस्त्रिष्टुभम् ॥

यज्ञो देवानामितीयमादित्यदैवत्यां त्रिष्टुभं कुत्सऋषिरपश्यत् । आदित्यग्रहस्य ग्रहणे विनियोगः । अत्र प्रथमतृतीयौ पादौ द्वादशाक्षरौ । ततश्च तयोर्व्यूहेन पूरणम् ।

त्रिवत्स्यजुः ॥

आदित्यदेवत्यमित्यनुवर्तते । त्रिवृदस्यादित्येत्येतद्यजुरादित्यदेव-
तम् । इष्टिकोपधाने विनियुक्तम् । प्राजापत्यानुष्टुप् ॥

अदस्मै जगत्याशीः ॥

अदस्मै नरइत्येषा जगतीछन्दस्का आशीर्देवता । नरो देवता वा
तेषां सम्बोध्यत्वेनातु प्राधान्यात् । [illegible] विनियुक्ता
व्यूहेन पूर्त्तिः ॥

वाममद्य भरद्वाजो बार्हस्पत्यः सावित्री त्रिष्टुभम् ॥

वाममद्येतीमामृचं सवितृदेवत्यां त्रिष्टुप्छन्दस्कां बृहस्पतेरपत्य-
भरद्वाजऋषिरपश्यत् । अत्र चतुर्थी दशाक्षरः । तेनैकोना ॥

सावित्रोऽसि सावित्रम् ।

सावित्रोऽसीत्येतद्यजुः सवितृदेवतम् । सावित्रग्रहणएव विनियुक्त-
म् । ताभ्यामधिका आर्षीत्रिष्टुप् द्व्यूनार्षी जगती वा ॥

सुशर्मासि वैश्वदेवम् ॥

सुशर्मासि सुप्रतिष्ठान इत्येतद्यजुर्विश्वेदेवदेवतम् । व्यूहेन प्राजा-
पत्या जगती । वैश्वदेवग्रहणे विनियोगः ॥

बृहस्पतिसुतस्य लिङ्गोक्तम् ॥

बृहस्पतिसुतस्येत्येतल्लिङ्गोक्तदैवतम् । सोमदैवतमित्यर्थः । आर्षीगा-
यत्री पात्नीवतग्रहग्रहणे विनियोगः ।

अहम् (१)प्रजापतिरूपेणात्मादेवता त्रिष्टुप् ॥

अहम् परस्तादित्यस्याऋचः प्रजापतिरूपेण आत्मादेवता त्रिष्टु-
प्छन्दः । पात्नीवतग्रहस्य [illegible] विनियोगः ।

---

(१) परस्तादित्यादिकः पाठः काण्वसर्वानुक्रमे बोध्यः ॥

अत् पत्नी द्यावरस्तनेष्टा ॥

अग्ना ३ इ पत्नीवन्नाग्नेयम् ॥

अग्ना ३ इ पत्नीवन्नित्येतद्यजुरग्निदैवतम् । एकाधिकाऽऽसुरी एकोना साम्नी पङ्क्तिर्वा पात्नीवतग्रहहोमे विनियोगः ॥ (१)

प्रजापतिः प्राजापत्यम् ॥

प्रजापतिर्वृषासीत्येतद्यजुः प्रजापतिदैवतम् । आर्षी त्रिष्टुप् । प्र-त्याजनाय समीक्षणे विनियोगः ॥

हरिरस्यृक्सामे ॥

हरिरसि हारियोजन इत्यस्य यजुष ऋक्सामे देवते । "ऋक्सामे वै हरी ऋक्सामाभ्यां ह्येनं गृह्णातीति श्रुतेः" ॥ आर्च्युष्णिक् । हारियोजनग्रहणे विनियोगः । अत्र मघवे त्वा इन्द्राय त्वेति, मरुतां त्वा यजुः, सावित्रोऽसि सावित्रम् सुगममपि वेदनेदं हरिरस्यृक्सामे इत्यादिषु पयाम्नगृहीतोऽसीत्येतत्सर्वत्रादौ विज्ञेयम् । तेनानेन सर्वेष यजुषोऽक्षराणि गणयित्वा छन्दो विचार्य लिखितव्यम् । यथा यःपौज-सा वक्षा गायत्रीमित्यत्र महेन्द्रमित्येतत् ॥

हर्योर्यस्ते लिङ्गोक्ते ॥

हर्योर्धानास्थ, यस्ते अश्वसनिरित्येते यजुषी लिङ्गोक्तदैवते । हर्योरित्यस्य धाना देवताः साम्नी गायत्री । धानाभिर्हारियोजनभक्षणे विनियोगः । यस्ते अश्वसनीयस्य द्रव्यं देवता आर्षी पङ्क्तिः । धानानां प्राश भक्षणे विनियोगः ॥

देवकृतस्याग्नेयानि षट् ॥

देवकृतस्यैनस इत्यादीनि षड्यजूंषि अग्निदैवतानि । साम्न्या-

(१) अग्ने वाजस्य गोमत इत्यधिकः काण्वसर्वानुक्रमपाठः । मन्त्रनिर्देशोऽपि यथा अग्ने वाक्पत्नि सजूर्देवेन त्वष्ट्रा । सोमम्पिब स्वाहा ॥ ३ ॥

स्थाने विनियुक्तानि ॥

देवकृतस्याऽऽसुर्यनुष्टुप् ॥

मनुष्यकृतस्य साम्न्युष्णिक् । पितृकृतस्याऽऽसुर्यनुष्टुप् । आत्मकृतस्याऽऽसुर्यनुष्टुप् ॥

एनसो यजुर्जगती ॥

यच्चाहमेनः । व्यूहेन प्राजापत्या त्रिष्टुप् ॥

संवर्चसेत्यस्य त्वष्टादेवता त्रिष्टुप् ॥

उदकं पूर्वयमभावभृथे विनियोगः । छन्दोदेवतयोः प्रागुक्तत्वादिह नोक्तम् ॥ २० ॥

समिन्द्रा वैश्वदेवीं त्रिष्टुभम् ॥

समिन्द्र ण इति मनसेतीमामृचं विश्वदेवदेवतां त्रिष्टुप्छन्दस्कां वसिष्ठऋषिरपश्यत् । समिष्टयजुर्होमे विनियोगः । संवर्चसेत्यस्योक्तमेव प्रजापतिर्ऋषिः समिष्टयजुर्होमे विनियोगः ॥

धाता लिङ्गोक्तबहुदेवत्या ॥

त्रिष्टुप्पदमनुवर्त्तते । धाता रातिरित्येषा त्रिष्टुप् लिङ्गोक्तबहुदेवत्या लिङ्गोक्ता लिङ्गेनैव मन्त्रान्तरेणोक्ता बह्व्यो देवता यस्याः सा तथा धातृसवितृप्रजापतिदेवाग्नित्वष्टृविष्णुदेवतेत्यर्थः । समिष्टयजुर्होमे विनियोगः ॥

सुगा वो देवाः ॥

सुगा वो देवा इतीयमृग्दैवी देवता । अत्रापि त्रिष्टुबित्यनुवर्त्तते । समिष्टयजुर्होमे विनियोगः । अत्र चतुर्थी दशाक्षरस्तेनैकाना ॥

यां । २८ ॥ आवहो नवमाग्नेय्यौ ॥

त्रिष्टुभावित्यत्र सम्बध्यते । यां २ ॥ आवह उशतः, वषट्० हि त्वा प्रतीतमे ऋचौ आग्नेय्यौ अग्निदेवते त्रिष्टुप्छन्दस्के । समिष्ट-

सूक्तीभि विनियुक्तो देवा गातुविद्‌ इत्यत्र तु सर्वं प्रागुक्तम् । अत्र पुनः पाठ। प्रजापतिर्वा ऋषिरिति विशेषः ॥

यज्ञ यज्ञमेषते लिङ्गोक्ते यजुषी ॥

यज्ञ यज्ञं गच्छ, एष ते यज्ञ इतीमे यजुषी लिङ्गोक्ते प्रथमं यज्ञदैवतं एकाधिका साम्नी गायत्री । द्वितीयं यज्ञपतिदैवतं । एकाधिका साम्नी जगती । समिष्टयजुर्होमे द्वयोर्विनियोगः ॥

उरुꣳ हि शुनः शेपो वारुणी त्रिष्टुभम् ॥

उरुꣳ हि राजेमामृचं वरुणदेवताम् । त्रिष्टुप्छन्दस्कां शुनःशेप ऋषिरपश्यत् । वारुणे विनियोगः । द्वितीयपादस्य व्यूहेन पूरणम् ॥

नमो वारुणम् ॥

नमो वरुणायेत्येतद्यजुर्वारुणं वरुणदेवतं अपोऽवभृथमवैवारुणे विनियोगः ॥

अग्नेरनीकमाग्नेयी त्रिष्टुप् ॥

आसुरी गायत्री ॥

अग्नेरनीकमित्येषा ऋगग्निर्देवता त्रिष्टुप्छन्दस्का अप्सु चतुर्गृहीताहुतौ विनियुक्ता । तृतीयस्यात्र व्यूहेन पूरणम् ॥

समुद्रे ते सौमी विराट् ॥

समुद्रे ते हृदयमित्येषा ऋक् सौमी सोमदेवत्या विराट्छन्दस्का । यस्या दशाक्षराश्चत्वारः पादाः सा विराट् । वैराजैर्विराडिति वचनात् । ऋजीषकुम्भप्लावने विनियोगः ॥

देवीराप: पङ्क्तिर्बृहती वा पूर्वार्धं चापउत्तर: ॥

देवीराप एष वो गर्भ इतीयमृक्पङ्क्तिछन्दस्का बृहतीछन्दस्का वा अष्टाविंशद्वर्णत्वाद्विकल्पः । अस्याः पूर्वार्धः अब्दैवतः उत्तरो-

यां देव सोमैतत इत्यस्य सोमदेवताः । यजमानकुम्भस्य विप्रुषो भक्षणे विनियोगः ॥

देवानामाग्नेयम् ॥

देवानाम् समिदसीत्येतद्यजुरग्निदेवतं । समिदाधाने विनियुक्तम् । दैवीजगती ॥

एजतु त्र्यवसाना महापङ्क्तिः ॥

एजतु दशमास्य इतीयमृक् त्र्यवसाना अवसानत्रयोपेता महापङ्क्तिछन्दस्का । गर्भो देवता । मन्त्रलिङ्गात् । यस्या अष्टाक्षराः षट्पादाः सा महापङ्क्तिः "षडष्टका वा महापङ्क्तिरित्युक्तेः" अमूर्व्याया गर्भस्य निःसरणमाणस्याभिमन्त्रणे विनियोगः ॥

यस्यै ते वशा ॥

यस्यै ते यज्ञिय इत्यस्या ऋचः वशादेवता । अनुष्टुप्छन्दः । मेषहोमे विनियोगः ॥

पुरुदस्मो गर्भः ॥

पुरुदस्मो विषुरूप इत्यस्या गर्भो देवता । ब्राह्मी अनुष्टुप् । गर्भमेतस्य निष्क्रमणमनुमन्त्रणे विनियोगः ॥

मरुतो यस्य गोतमो मारुतीं गायत्रीम् ॥

मरुतो यस्येतीमामृचं मरुद्देवत्यां गायत्रीं गोतमऋषिरपश्यत् । आसिच्यमानो गर्भहोमे विनियोगः ॥

मही द्यौर्मेधातिथिर्द्यावापृथिव्याम् ॥

गायत्रीमित्यनुवर्तते । मही द्यौरितीमामृचं गायत्रीछन्दस्कां

(१) निःसरमाणस्य गर्भस्य गर्भस्याभिमन्त्रणे विनियोगः । इति पद्धत्याः पाठो बोध्यः ॥

द्यावापृथिवीदेवत्यां मेधातिथिऋषिरपश्यत् । महाव्रताख्यकर्मणि विनियोगः । इत्यग्निष्टोमः । इतिशब्दः समाप्तौ । अग्निष्टोमः समाप्तस्त्वर्थः ॥ २१ ॥

अथ षोडशी व्याख्यास्यतइति शेषः । षोडशिनामसंस्था लक्ष्यन्ते । तत्सम्बन्धं षोडशिमन्त्राणामृषादिकं व्याख्यास्यत इत्यर्थः ॥

आतिष्ठ गोतम ऐन्द्रीमनुष्टुभम् ॥

आतिष्ठ वृत्रहन्नित्येतामृचं इन्द्रदेवत्यामनुष्टुप्छन्दस्कां गोतमऋषिरपश्यत् । अर्थापयामित्यासुरीगायत्री । षोडशीग्रहणे विनियोगः एष तद्व्यासुर्यनुष्टुप् । सादने विनियोगः ॥

युक्ष्वा हि मधुच्छन्दाः ॥

ऐन्द्रीमनुष्टुभमित्यनुवर्त्तते । युक्ष्वा हि केशिनेतीमामृचं इन्द्रदेवत्यां अनुष्टुप्छन्दस्कां मधुच्छन्दाः ऋषिरपश्यत् । विकल्पेनवा युक्ष्वा हि केशिनेतीमामृचमिन्द्रदेवत्यामनुष्टुप्छन्दस्कां मधुच्छन्दाऋषिरपश्यत् । विकल्पेन षोडशीग्रहणएवविनियोगः अथ द्वितीयः पर्ययः । तेन द्वाभ्यूना । यजुषः पूर्ववत् ॥

इन्द्रमिद्गोतमः ॥

ऐन्द्रीमनुष्टुभमित्यनुवर्त्तते । इन्द्रमिद्धरी वहत इतीमामृचमिन्द्रदेवत्यामनुष्टुभमित्यनुवर्त्तते । इन्द्रमिद्धरी वहतइतीमामृचमिन्द्रदेवत्यामनुष्टुप्छन्दस्कां गोतमऋषिरपश्यत् । अस्या अपि षोडशीग्रहणएव विकल्पेन विनियोगः । यजुषः पूर्ववत् । अथ चतुर्थः समाप्यपरः । तेनैकोना ॥

यस्मान्नैन्द्री त्रिष्टुप्परब्रह्मरूपेण षोडशिनः स्तुतिः ॥

यस्मान्न जातइत्यस्यर्क्इन्द्रदेवत्या त्रिष्टुप्छन्दस्का परब्रह्मरूपेण षोडशिनः स्तुतिरियं । अथ षोडशी परब्रह्मरूपेण स्तूयते । अतएव

षोडशिन उपस्थाने विनियोगः अथ विवस्वानेव ऋषिः । अतिच्छन्दो-ऽस्य समाप्तत्वात् । अन्यस्य चानुक्तत्वात् । गौतमदृष्टेरस्य तु संबन्ध-स्य प्राप्तेरिति । ऐन्द्रीति प्रथमया निर्देशात् । षोडशिन उपस्थाने विनियोगोऽस्याः । अथ चतुर्थो द्वादशाक्षरः । तेनैकाधिका ॥

इन्द्रश्चैन्द्र । वारुणी षोडशीदेवत्या वा यजुरन्ता ॥

त्रिष्टुबित्यनुवर्तते ॥ इन्द्रश्च सम्राडित्येषा ऋक् त्रिष्टुप् इन्द्र-वरुणदेवत्या षोडशिदेवत्या वा यजुरन्ता । अस्या अन्ते अद्य वा इति-होतयजुरस्तीत्यर्थः । ऋषिर्विवस्वानेव । तृतीयचतुर्थौ पादौ द्वाद-शाक्षरौ । तेन द्व्यधिका त्रिष्टुप् षोडशिग्रहभक्षे विनियोगः षोडशी-समाप्तः अथ द्वादशाहान्तर्गतमन्त्राणामुच्यते ॥

अग्ने पवस्व वैखानस आग्नेयीं गायत्रीम् ॥(१)

अग्ने पवस्वेत्येतामृचमग्निदेवतां गायत्रीं वैखानसऋषिरप-श्यत् । अतिग्राह्यग्रहणे विनियोगः अस्याः द्वितीयो सप्ताक्षरो । तस्याश्-च स्वपा इति व्यूहेन पूरणम् । द्वितीये तु व्यूहस्थानं नास्ति । तेनैकोना ॥

उत्तिष्ठन् कुरुस्तुतिरैन्द्रीम् ॥

गायत्रीमित्यनुवर्तते । उत्तिष्ठन्नोजसेत्येतामृचं इन्द्रदेवत्यां गायत्रीं कुरुस्तुतिऋषिरपश्यत् । अतिग्राह्यग्रहणे विनियोगः ॥

अदृश्रम् प्रस्कण्वः सौरीम् ॥

अदृश्रमित्येतामृचं गायत्रीं सौरीं सूर्यदेवत्यां प्रस्कण्व ऋषिर-पश्यत् । अतिग्राह्यग्रहणे विनियोगः ॥

तिस्रोऽपि यजुरन्ताः ॥

अग्ने पवस्वोत्तिष्ठन्नदृश्रमित्येतास्तिस्रोऽपि यजुरन्ताः । उ-पयामेति सामीप्यात् ॥

---

(१) अग्न आयूंषि ३ वैखानस आग्नेयी । इति काण्वसर्वानुक्रमपाठः ॥

एष ते साम्नगायत्री भवति द्वितीये उपयामगृहीतोऽस्यनुष्टुप् ।

एष ते यजुस्त्रिष्टुप् । तृतीये उपयाम आसुरीगायत्री । एष ते साम्नगायत्री सर्वेषां मध्ये क्रमेण द्वे द्वे यजुषी भवतः ततः याजुषी साम्नी च ऋचैव विनियुक्ते । यजुरन्तास्यनेन तेषां यजुषामपि सर्व एव ऋषिरिति प्राप्यते । अग्ने पवस्वेत्यस्यां अग्ने अर्चिषि विभितिति यजुः एकाधिका सामजगती अग्निर्देवता आग्नेयग्रहग्रहणे विनियोगः । उत्तिष्ठन्नोजसेत्यस्यामन्ते इन्द्रौजिष्ठेति यजुः अनुष्टुप् इन्द्रो देवता ऐन्द्रग्रहग्रहणे विनियोगः । अदृश्रन्नस्येत्यस्यामन्ते सूर्यभ्राजिष्ठेति यजुः सामजगती । सूर्यो देवता आग्रयणग्रहग्रहणे विनियोगः ॥

उदुत्यन् देवानामार्षम् ॥(१)

उदुत्यं जातवेदसमित्येषा ऋक् देवानामार्षं देवा अस्या ऋषय इत्यर्थः । सूर्यो देवता । गायत्री छन्द इति तु प्रागुक्तमेव । तत्र तु प्रस्कण्व ऋषिरिह तु देवा इति विशेषः अथ वा अदृश्रं प्रस्कण्वः सौरीमित्यतः सौरीं गायत्रीमित्येतत्पदद्वयमनुवर्तते । अथाग्रयणे विभुवान् ग्रहोऽग्निहवन ग्रहग्रहणे विनियोगः । अग्ने पत्नीवन्निति आसुरीगायत्री । ग्रहणे विनियोगः । एष त इति सामगायत्री सादने विनियोगः ॥

आजिघ्रेडे कुसुरुबिन्दुर्गव्ये महापङ्क्तिप्रस्तारपङ्क्ती ॥

आजिघ्र, कलशं, इडे रन्त इतीमे ऋचौ महापङ्क्तिप्रस्तारपङ्क्ती गव्ये गोदैवते कुसुरुबिन्दुऋषिरपश्यत् । तत्राजिघ्रेति महापङ्क्तिः । "अष्टका वा महापङ्क्तिरिति भाषणात्" । अस्यां चाष्टाक्षराः षट्पदाः सन्ति । तत्र द्वितीयस्य व्यूहेन पूरणम् । चतुर्थः समाप्तरेव ।

---

(१) आ चित्रं कुत्सोऽङ्गिरसोऽपश्यन् । इति काण्वसर्वानुक्रमेऽधिकः पाठः ॥

तेनैकोना । इडे रन्ते इति प्रस्तारपङ्क्तिः यस्याः प्रथमद्वितीयौ पा-
दौ द्वादशाक्षरौ तृतीयचतुर्थावष्टाक्षरौ सा प्रस्तारपङ्क्तिरित्युच्य-
ते । आद्यौ चेत्प्रस्तारपङ्क्तिः इति वचनात् । अत्र चतुर्थो नवाक्षरस्ते-
नैकाधिका । सहस्रदक्षिणे गर्भत्रिरात्राद्यावश्योर्ने विसृष्टे साहस्या
गोर्दक्षिणकालमायापथे आग्निध्रेणास्या विनियोगः इडे रन्त इत्यस्या
कुसुरुविन्दु ऋषिर्गौरुर्दैवता दक्षिणे कर्णे यजमानकर्तृके जपे विनि-
योगः ॥

विनः शासो भारद्वाजऐन्द्रीमनुष्टुभम् ॥

वि न इन्द्र मृधइतीमामृचं इन्द्रदेवतामनुष्टुभं भरद्वाजस्यापत्यं शा-
स ऋषिरपश्यत् गवामयने महाव्रतसञ्ज्ञकेऽहनि मरुत्वतीयग्रहस्य विनि-
योगः । उपयामेति सामोष्णिक् । एष तइति सामगायत्री । सर्वेषो-
पयामेत्यस्य विनियोगएष तइत्यस्य सादने इति शेषः । व्यूहेन छ-
न्दः पूर्तिः ॥

वाचस्पतिंवैश्वकर्मणीं त्रिष्टुभम् ॥

शासो भारद्वाज इत्यनुवर्त्तते वैश्वकर्मणीमिति द्वितीयान्तनिर्देशा-
त् । वाचस्पतिं विश्वकर्माणमितीमामृचं विश्वकर्मदेवतां त्रिष्टुभं
भारद्वाजः । शास ऋषिरपश्यत् । महाव्रतएव पूर्ववद्विकल्पेन ग्र-
हणस्य विनियोगः आद्यपादो द्वादशकः । तेनैकाधिका । उपयाम
सामत्रिष्टुप् । एष ते सामोष्णिक ॥

विश्वकर्मन्नैन्द्रीं वैश्वकर्मणीम् ॥(१)

शासोभारद्वाजस्त्रिष्टुभं इत्येताव्यनुवर्त्तते विश्वकर्मन्हविषेती-
मामृचं त्रिष्टुभं ऐन्द्रीं इन्द्रदेवत्यां विश्वकर्मदेवत्यां च भरद्वाजपुत्रः शा-
स ऋषिरपश्यत् । यजुषोः पूर्वमन्त्यवत् । अत्र चतुर्थस्य व्यूहेन पूर-

(१) ऐन्द्री वैश्वकर्मण्यौ इति काण्वसर्वानुक्रमपाठः ॥

चम् । अतस्पूर्वे तथैव अनुवचनीये विनियोगः । तथा च सूत्रम् । गृहं गृह्णाति वि मऽइन्द्र चावत्तितं विश्वकर्मणीति चातिग्राह्यानिति ॥

अग्नये त्वा देवान्यदाभ्यदेवत्यानि ॥

अग्नये त्वा गायत्रच्छन्दसमित्यादीनि चत्वारि यजूंषि दैवानि देवा एषां ऋषय इत्यर्थः । तथा अदाभ्यदेवत्यानि । अदाभ्यसंज्ञा अंशु-एषां देवतेत्यर्थः । तत्र सोपयामस्याग्नये त्वेत्यस्य प्राजापत्या बृहती तथाविधस्यैवेन्द्राय त्वेत्यस्य व्यूहेन प्राजापत्या बृहती । सोपयामस्य विश्वेभ्य इत्यस्यैकोना साम जगती । अंशुग्रहे मिश्राख्या चानिष्ट तथांशुग्रहावधानि कर्मणि चतुर्णां विनियोगः अत्र प्रत्येकमुपयामे-त्येतदेयं, उपयामः सर्वत्राविशेषादित्युक्तेः । अनुष्टुबित्यस्य दैवीजगती उभयत्र विनियोग ॥

श्रेणीनां त्वा सौम्यानि ॥

अत्र देवाग्नीत्यनुवर्तते । प्रस्तावात् योग्यत्वाच्च । श्रेणीनामित्यादीनि विश्वेषां देवानामित्यन्तानि सोमदेवत्यानि । देवार्षाणि च भवन्ति । तत्र तस्मै त्वा यज्ञामीत्यन्तानामाधवने विनियोगा-स्तस्मै तत्स्वकाभ्यहामि । उशिगसि कविमित्यादीनां अंशूनां सोममध्ये प्र-तिप्रक्षेपे । श्रेणीनां । यजुःपङ्क्तिः । कुकूननानां साम गायत्री । भ-न्दनानां । यजुस्त्रिष्टुप् । मदिन्तमानां मधुन्तमानां सामगायत्र्यौ शुक्रं त्वा ऋग्गायत्री ककुभं रूपं ऋग्बृहती । एतत्पर्यन्तानामा-धवने विनियोगः । तस्मै ते यजुःपङ्क्तिः । अदाभ्यग्रहे विनियोगः उशिक्त्वम् । साम्न्युष्णिक् । वशी त्वं । आसुरी गायत्री । अध्वात्सखा आर्च्युष्णिक् । एतेषामंशूनां प्रतिप्रक्षेपे विनियोगः ॥ ३१ ॥

समीत्यानन्दशानामार्षम् ॥

यथोक्तस्थानमन्त्रेणाथ तथान्या वध्यन्ते । सर्वेषां यथोक्तानमन्त्रा- णां देवा यथावदुक्तः ॥

इह रतिः पशुदैवतम् ॥

इह रतिरिह रमध्वमित्येतद्यजुः पशुदैवतम् । प्राजापत्या बृहती माध्याह्ने पात्न्यावृत्तिहोमे विनियोगः ॥

उपसृजन् नुष्णिगाग्नेयी ॥

उपसृजं धरुणमित्येषा उष्णिगार्षी छन्दस्का । अग्निर्देवता । प्रथमो ऽष्टाक्षरः पादः स्वाहाकारेण स द्वादशाक्षरः । द्वितीयोऽष्टाक्ष- रस्तेनैकाधिका । पात्न्यावृत्तिहोमएव विनियोगः ॥

सप्तस्य बृहती यजमानानामात्मस्तुतिः ॥

संसर्य बर्हिर्धरमीत्येषा बृहतीछन्दस्का यजमानानामात्मस्तुतिः । अनया हि यजमाना आत्मानमास्तुवते अमृता अभूमेत्यादिना । अत्र प्रथमः सप्तकः तृतीयपादोऽष्टकः । तृतीयो द्वादशकस्तुर्यो ऽष्ट- कः । इयं षट्त्रिंशदक्षरत्वाद्बृहती । आर्षी बृहती । तत्र पादाक्षर- नियमाभावात् । समस्तमंत्राणां विनियोगः ॥

युवन्तं पञ्चर्च ऐन्द्रीमत्यष्टिं त्र्यवसानाम् ॥

युवन्तमिन्द्रस्येतां इन्द्रदेवत्यां अत्यष्टिछन्दस्कां त्र्यवसानामयमुक्तं पञ्चर्चेनर्षिरपश्यत् । दक्षिणस्य हविर्धानस्याधोऽर्धं पार्श्वमनक्तमिति विनियोगः । अष्टषष्ट्यक्षरा अत्यष्टिः । अत्र अष्टषष्ट्यक्षराणि तेन दृश्यन्ते ॥

याज्योऽर्धर्च ऐन्द्रापार्वतः ॥

युवन्तमित्यस्या याज्योऽर्धर्चो ऐन्द्रापार्वतः इन्द्रापर्वतदेवता । अ- ध्यायः समाप्तः । अथ सोमयागे नैमित्तिकान्युच्यन्ते ॥

परमेष्ठी नैमित्तिकान्याध्यायात् ॥

परमेष्ठ्यभिधीतइत्यादीनि आ अध्यायात् अध्यायसमाप्तिपर्यन्तानि नैमित्तिकानि । सोमयागे अवभृथ्यासु मासावस्थासु यज्ञाङ्गे विनाशे प्रायश्चित्तानीत्यर्थः । अथ तेषां साधारणविनियोगः ॥

वसिष्ठस्यार्षम् ॥

तेषां सर्वेषां परमेष्ठ्यभिधीतइत्याद्यध्यायसमाप्तिपर्यन्तानां वसिष्ठ ऋषिरित्यर्थः ॥

लिङ्गोक्तदेवतानि चतुस्त्रिंशत् ॥

तेषां नैमित्तिकानां मध्ये आद्यानि परमेष्ठ्यभिधीतइत्यादिरिक्तः प्रभृतइत्यन्तानि चतुस्त्रिंशत्सङ्ख्यानि लिङ्गोक्तदेवतानि नैमित्तिकानि इमानि चतुस्त्रिंशद्ब्राह्मणवाक्यानि चतुस्त्रिंशत्सु सोमावस्थासु यज्ञाङ्गविनाशनिमित्तासु नैमित्तिकाहुतिषु चतुस्त्रिंशदेवाभिधायीनि । तत्तदवस्थापन्नस्य सोमस्य तत्तद्देवताकत्वोपचाराच्च । नत्वेते मन्त्राः तेनात्र छन्दः कल्पनेन प्रयुज्यते अतएव "प्राणपत्ये संपद्येते मनसाभिध्यात" इत्यादयः सर्वासु कण्डिकासु परमेष्ठिने स्वाहेति श्रुत्या परमेष्ठी हि स तर्हि भवति प्रजापतिर्हि स तर्हि भवति यस्यां हि स तर्हि भवत्येवं सोमस्य तत्र तत्तदवस्थापन्नस्य तत्तद्देवतारूपता श्रूयते । अतः परमेष्ठिने स्वाहेत्येवमाद्यास्ते मन्त्राः तेषां वसिष्ठ ऋषिर्लिङ्गोक्ता देवताः । तदक्षरगणनया च दैवीजगत्यादिकं छन्दः कल्पनीयमिति भावः ॥

ययोर्वैष्णववारुणी त्रिष्टुप् ॥

ययोरोजसेत्येषा त्रिष्टुप् वैष्णववारुणी विष्णुवरुणदेवत्या देवते इत्यर्थः अत्र द्वितीयः पादो दशाक्षरः । तेनैकोना । सोमस्य रथस्थस्य अनसो वा इन्धनस्य भंगे चोपद्रवोपघातने विनियोगः ॥

देवां दिवमागाद्यीर्लिङ्गोक्तदेवता ॥

देवां दिवमगन्नितीदं यजुर्यजमानाशीः यजमानस्याशीः प्रार्थनारूपं लिङ्गोक्तदेवता। तत्तदेवदेवतेत्यर्थः। यज्ञरूपस्य सोमस्य यजमानस्यात्मनश्चाभिमर्शने विनियोगः। इमानि चत्वारि यजूंषि। तत्र देवान्। साम्नानुष्टुप्। मनुष्यान् एकाधिका ब्रह्मगायत्री। पितॄन्। एकाधिका साम्नानुष्टुप्। यं कं च साम्नानुष्टुप्। अथ वा समस्तेयं चत्यष्टिरेका। न तु चत्वारि ॥

चतुस्त्रिंशद्घर्मदेवत्या पङ्क्तिस्त्रिष्टुब्वा ॥

चतुस्त्रिंश० यस्तन्वत्येषा घर्मदेवत्या पङ्क्तिच्छन्दस्का त्रिष्टुप्छन्दस्का वा। द्वाचत्वारिंशदक्षरत्वाद्विकल्पः। द्व्यूना त्रिष्टुप्। द्व्यधिका पङ्क्तिर्वा। अतएव प्रापकात्यसूत्रोक्तेऽपि छन्दःसु उक्तसङ्ख्याक्षरच्छन्दसोरन्तराले पतिताक्षरस्य यजुश्छन्दो विकल्पो ज्ञेयः। अधिकाक्षरं पूर्वं छन्द ऊनाक्षरं चोत्तरमिति। शाखान्तरे महावीरभेदे प्राज्याहुतिहोमे ऽस्या विनियोगउक्तोऽस्ति ॥

यज्ञस्य यज्ञदेवत्या त्रिष्टुप् ॥

यज्ञस्य दोहइतीयं यज्ञदेवत्या त्रिष्टुप्छन्दस्का। काष्ठाहुतिहोमोऽनन्तरं यजमानवाचने विनियुक्ता ॥

आपवस्व सौमीं गायत्रीं नैध्रुविः काश्यपः ॥

आपवस्वेतीमामृचं सौमीं सोमदेवत्यां निध्रुवस्य पुत्रः काश्यपऋषिरपश्यत्। अत्र नैध्रुविः काश्यपइत्येव पाठः यतएवं प्रवरेऽगिरसः काश्यपः "कश्यपो नैध्रुवे काश्यपोनैध्रुविर्वाचतीति"। सूपकोवरि काकारोहवि उद्गातृकर्तृके होमे विनियोगः इति प्रायश्चित्तानि समाप्तानि ॥ २३ ॥ (१)

---

(१) प्राणाय मेऽइत्यारभ्य द्यावापृथिव्यम्। इत्यन्त काण्वसर्वानुक्रमे नवम्याः कण्डिकाया अत्र पाठः, स पाठः पूर्वोक्तत्वादत्र न लिखितः ॥

अथ वाजपेयः ॥

अथ वाजपेयसम्बन्धेन मन्त्राः उच्यन्ते । वाजपेयमन्त्राणामृष्या-दिर्वक्तव्य इत्यर्थः । तत्र प्रथमं सर्वमन्त्राणामार्षमुपदिशन्नाह ॥

बृहस्पतेरार्षमिन्द्रस्य च ॥

वाजपेयमन्त्राणां सर्वेषां बृहस्पतिऋषिः इन्द्रश्च । उभावपि ऋ-षिती ऋषी भवतः स बृहस्पतिः सवितारमेवेति तेनेन्द्रो यजते-त्युभयोः श्रवणात् । इन्द्रस्य वेति संहिताभाष्ये पाठः । तत्पक्षे ऋषिर्विकल्पः ॥

देव सवितः सावित्री त्रिष्टुप् ॥

देव सवितः प्रसुवेत्येषा ऋक् सवितृदेवत्या त्रिष्टुप् सर्वेषां कर्म-णां पुरस्तादाहुतिहोमे विनियोगः । इयमार्षी त्रिष्टुप् । नि-यताक्षरपादयुक्तत्वात् । आर्षीत्येतत्तु पूर्ववदेव ॥

ध्रुवसदैन्द्राणि त्रीणि ॥

ध्रुवसदमित्यादीनि त्रीणि यजूंषि इन्द्रदेवत्यानि । तत्र ध्रुवसदं । प्राजापत्या त्रिष्टुप् । अप्सुषदं त्वा । व्यूहेन ऋचां पङ्क्तिः, पृथिवि-षदं । व्यूहने आर्षी पङ्क्तिः । एष त इत्यासुर्यनुष्टुप् । यथाम्नाय-न्ते । ग्रहाणामैन्द्राणां सोमग्रहाणां ग्रहणे क्रमेण विनियोगः ॥

अपाꣳ रसदेवत्याऽनुष्टुप् ॥

अपाꣳरसमित्येषा रसदेवत्याऽनुष्टुप् । चतुर्थैन्द्रग्रहस्य ग्रहणे विनियोगः उपयामेति साम्न्यनुष्टुप् । एष ते आसुर्यनुष्टुप् ॥

ग्रहा लिङ्गोक्तदेवताऽनुष्टुप् ॥

ग्रहा ऊर्जाहुतयो इत्येषा लिङ्गोक्तदेवता अनुष्टुप् । ग्रहा ग्रहा देवतेत्यर्थः । पञ्चमस्य इन्द्रग्रहस्य ग्रहणे विनियोगः । यजुषोः पूर्व-वत् ॥

सम्पृचौ यजुषी ॥

सम्पृचः स्थेत्यादीभे यजुषी लिङ्गोक्तदैवते इति शेषः अत्र संपृचौ लिङ्गोक्ते इति वा पाठः सोमपयसुरापात्रग्रहणयोर्देवते इत्यर्थः, अथ वा लिङ्गोक्तदेवता इत्यनुवर्तते तद्वचनग्राहकं विपरिणम्य सम्बध्यते । सम्पृचाविति ग्रहयोः सत्त्वाद्वये । यजुष्टिष्टुभौ एते ॥

इन्द्रस्य रथः ॥

इन्द्रस्य वज्रोऽसीत्यत्र रथो देवता । रथादानग्रहणे विनियोगः; आसुरीगायत्री ॥

वाजस्य पार्थिव्यतिजगती ॥

वाजस्य नु प्रसवइतीयमृक् । पृथिवीदैवत्यातिजगतीछन्दस्का पूर्वोक्तस्य रथस्य वेदिमध्ये नयने विनियोगः । द्वापञ्चाशदक्षरा अतिजगतीत्युच्यते । इयं तु द्व्यूना ॥

अन्त्यः पादः सावित्रः ॥

अस्या अन्त्यः अन्ते भवः पादस्तस्यां नो देवः सवितेत्ययं सावित्रः सवितृदेवतः ॥

अप्स्वन्तरश्वदैवत्याऽनवसाना पुरउष्णिक् ॥

अप्स्वन्तरमृतमित्येषाश्वदेवत्या अनवसानम् हित्वा पुरउष्णिक्छन्दस्का । अश्वप्रोक्षणे विनियोगः । यस्याः आद्यपादो द्वादशाक्षरः । द्वितीयावष्टाक्षरौ सा पुरउष्णिक् इत्युच्यते । आद्यश्चेत्पुरउष्णिगिति वचनात् । अत्र अप्स्वन्तरित्येवं व्यूहेनाद्यपादे द्वादशाक्षरपूरणं । द्वितीयतृतीयौ तु पूर्णावेव । मध्येऽवसानं नास्ति । देवीराप इति कण्डिकेयं सामजगती आपोदेवताः । अश्वप्रोक्षणे समुच्चयेन विकल्पेन विनियोगः ॥

वातो वा तिस्रोऽश्वस्तुतय उष्णिक्त्रिष्टुब्जगत्यः ॥

षट्को वा, सप्तको वा, नागरठं॰वा, यथा, वसवस्तेनाक्रियुक्ताः; अ-मेयाः चित्रविष्टुप्प्रयत्नोऽनुष्टुप् च । यथा चाभिः स्तुवते । यथर्द्धे चत्वाः एताः स्तुतिभाजो देवता भवन्तीत्युक्तत्वात् । याते वैश्वविश्वव-मे [illegible] विनियोगः । याते वैतीयमेकाधिका याजी- उष्णिक् पादानामक्षरसङ्ख्यानियमेऽप्यक्षरसङ्ख्यया तथात्वात् । त-दुक्तम् । अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् । वृत्यादिप्रतिपत्तीनां पादसंख्याक्षरैर्वा यामिति, नागरठं॰वा । इत्यत्र प्रथमद्वितीयौ द्वादशकौ । द्वितीयो व्यूहेनैकादशकः चतुर्थश्च स्वतोऽप्येकादशक इति । तथाप्य त्रिष्टुबेव कृतः । द्वौ तु जागतौ यथा: "जाजागते जगती वैष्टुभे त्रिष्टुब्वित्युक्तत्वात्" । अथो य इत्याद्यो द्वादशकः । द्वितीयतृतीया-वेकादशकौ चतुर्थस्त्रयोदशक इति । तेनाष्टाचत्वारिंशदक्षरत्वाज्ज-गती । अनियताक्षरपादत्वे पादाक्षरैस्तथात्वात् ॥

वाजिनोऽश्वाः ॥

वाजिनो वाजजित इत्यश्वदैवताः । साम्नजगती [illegible]-बार्हस्पत्यचर्ववघ्राणे विनियोगः ॥

देवस्याद्यं लिङ्गोक्तानि ॥

देवस्याहठं॰सवितुरित्यादीनि इन्द्रस्याग्नेर्वाजिनो वाजं जेषमित्यन्ता-नि लिङ्गोक्तदेवतानि । आद्यस्य देवस्याहं इत्यस्य व्यूहेन पङ्क्तिर्जगती ब्रह्मकर्तृके वाजपेये मन्त्रयो रथचक्रारोहणे विनियोगः । द्विती-यस्य साम्नजगती यजमानकर्तृके वाजपेये मन्त्रयो रथचक्रारोहणे वि-नियोगः । तृतीयस्य व्यूहेन प्राजापत्या त्रिष्टुप् । ब्रह्मकर्तृके वाजपेये मन्त्रयो रथचक्रावरोहणे विनियोगः । चतुर्थस्य एकाधिका साम-जगती । यजमानस्य रथचक्रावरोहणे विनियोगः । बृहस्पते वाज-

प्राजापत्या त्रिष्टुप् । वाजपेये दुन्दुभिवादने विनियोगः । इन्द्रं वाजं साम्नी पङ्क्तिः । अभिषेचने दुन्दुभिवादने विनियोगः । यथा वः प्रा- चीरुद्भिनत् । वाजपेये अश्वाभिमन्त्रणे विनियोगः । देव- स्याहं । व्यूहेन प्राजापत्या त्रिष्टुप् । यजमानस्य रथारोहणे विनियोगः ॥

वाजिनोऽश्वाः ॥

वाजिनो वाजजितस्त्वश्वा देवताः । साम्नी जगती यजमानवाचने विनियोगः ॥

एष स्य ह दधिक्रावा वामदेव्योऽश्वदेवत्ये जगत्यौ ॥

एष स्य वाजी । उत स्मास्य । इतीमे द्वे ऋचौ जगत्यौ अश्वदेवत्ये दधिक्रावा वामदेव्योऽपश्यत् । धावत्स्वाज्याहुतिहोमे विनियोगः । अनु संपदे वा प्रथमायाश्चतुर्थः पादो द्व्यक्षरः तस्य व्यूहाभ्यां पूरणं । द्वितीयायाश्चतुर्थस्य व्यूहेन पूरणं । स्वाहेति यजुः पृथक् ॥

अप्सो वसिष्ठो विराजम् ॥

अश्वदेवत्यामित्यनुवर्तते अप्स्वन्तरितीमां विराट्छन्दस्कां वसिष्ठ- ऋषिरपश्यत् । अश्वा अप्यश्वा एव देवताः । होमेऽनुमन्त्रणे वा (१) विनि- योगः । यत्र दशाक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिः, वैराजैर्वि- राडित्युक्तेः । अत्र तु प्रथमपाद एकादशाक्षरः तेनैकाधिका ॥

तेनो नाभानेदिष्ठो जगती ॥

अश्वदेवत्यामित्यनुवर्तते ते नोऽर्वन्त इतीमामश्वदेवत्यां जगतीं ना- भानेदिष्ठऋषिरपश्यत् होमेऽनुमन्त्रणे वा विनियोगः ॥

वाजेवाजे वसिष्ठस्त्रिष्टुभम् ॥

वाजेवाजेऽवत इतीमामश्वदेवत्यां त्रिष्टुभम् वसिष्ठोऽपश्यत् । य-

(१) होमे वाचने वा विनियोगः । इति पद्धतिपाठः ॥

यदेव वाजिनमित्यनुवर्तते । [illegible] विनियोगः । [illegible] वाद्य[illegible] सूत्रेण ॥

आमा प्राजापत्याम् ॥

वसिष्ठस्त्रिष्टुभमित्यनुवर्तते । आ मा वाजस्येतीमामृचं प्रजापतिदेवत्यां वसिष्ठऋषिरपश्यत् । यजमानस्य नैवारचर्वालम्भे विनियोगः ॥

वाजिनोऽश्वाः ॥

वाजिनो वाजजित इत्यस्य यजुषोऽश्वा देवताः आर्षी उष्णिक् । [illegible] विनियोगः ॥ २४ ॥

आपयेऽप्यायुर्यज्ञेन प्राजापत्यानि ॥

आपये स्वाहेत्यादीनि द्वादश यजूंषि । आयुर्यज्ञेनेत्यादीनि च षड्यजूंषि प्रजापतिदेवत्यानि [illegible] विनियुक्तानि । प्रथमद्वितीययोर्दैवी पङ्क्तिः तृतीयस्य यजुर्गायत्री । [illegible] दैवीपङ्क्तिः । पञ्चमे दैवपङ्क्तिः षष्ठपर्यन्ते । दैवीजगती, सप्तमे दैवीजगती । [illegible] यजुः पङ्क्तिः, विराट् [illegible] । यजुस्त्रिष्टुप् । [illegible] । यजुर्बृहती । [illegible] । यजुर्बृहती । [illegible] दैवीजगती [illegible] प्राजापत्या गायत्रीछन्दः ॥

प्रजापतेः स्वरमृता यजमानः ॥

प्रजापतेः प्रजाः स्वर्देवाः । अमृता अभूमेति तेषां यजमानो देवताः । प्रजापतेर्बृहती यूपारोहणे विनियोगः । स्वर्देवा यजुर्गायत्री [illegible] विनियोगः । अमृता यजुर्गायत्री [illegible] विनियोगः ॥

अस्मे दिशः ॥

अस्मे वो [illegible] दिशो देवताः । [illegible] दिशामी-

के विनियोगः ॥

नमः पृथिवी ॥

नमो मात्र इत्यस्य पृथिवी देवता साम्नोपविष्टयजमानोत्थापने विनियोगः । व्यूहेन सामजगती । द्विपदोष्णिग्वा ॥

इयमासन्दी ॥

इयं ते राडित्यासन्दी देवता । दैवीबृहती आसन्द्यां यजमानोपवेशने विनियोगः ॥

यन्ता सुन्वन् ॥

यन्ताऽसि यमन इत्यस्य सुन्वन्देवता । यजमानस्योपवेशने विनियोगः । व्यूहेन ऋग्बृहती ॥

वाजस्य प्राजापत्यं तृचं त्रैष्टुभम् ॥

वाजस्येमं प्रसवः । वाजस्येमां । वाजस्य नु प्रसव इतीदं तृचं प्रजापतिदेवतं त्रिष्टुप्छन्दस्कं । सप्तान्नस्य सर्वान्नपयस्य होमे विनियुक्तम् । वाजस्येममित्यस्य द्वितीयपादो व्यूहेन पूरणीयः प्रथमाया द्वितीयायाश्च चतुर्थो द्वादशाक्षरः । तृतीयायास्त्रीण्येव । तेन सर्वा विकल्पनीयाः ॥

सोमन्तृचं तापसः ॥

सोमं राजानं । अर्यमणं, अग्ने अच्छेतीदं तृचं तापसऋषिरपश्यत् । सर्वान्नहोमएव विनियुक्तम् ॥

आद्या वैश्वदेव्यनिरुक्ताऽनुष्टुप् ॥

अस्य तृचस्याद्या सोमं राजानमित्येषा ऋक् विश्वदेवदेवताऽनिरुक्ता मध्ये विश्वदेवपदप्रयोगाभावात् । अनुष्टुप्छन्दस्का । अत्र तृतीयः समक । तस्य होमः । अथ वा बहुदेवतत्वाद्वैश्वदेवीत्युक्तं । तथा च ब्राह्मणं "यत्र क्वचिन्नानादैवतं तद्वैश्वदेवानां रूपमिति" । तेना-

च सोमाग्न्यादिभ्यो विष्णुसूर्यबृहस्पत्यो देवतात्वार्थः । अत एव सं-
हिताभाष्ये । सोमं राजानमनुष्टुप् लिङ्गोक्तदेवतेत्युक्तं । अत एव संहिता-
भाष्येऽपि लिङ्गोक्तदेवत्यानुष्टुबिति ॥

द्वितीया लिङ्गोक्तदेवता ।

अनुष्टुबित्यनुवर्तते । अस्य अध्यायस्य द्वितीया अर्यमणमित्येषाऽनुष्टुप् ।
लिङ्गोक्तदेवताः । अर्यमबृहस्पतीन्द्रवायुविष्णुसरस्वतीदेवतेत्यर्थः ॥

तृतीयाऽग्नेयी ॥

अनुष्टुबित्यनुवर्तते अस्य अध्यायस्य तृतीया अग्नेऽअच्छेत्येषाऽनु-
ष्टुबग्निदेवत्या ॥

प्रनो लिङ्गोक्ता गायत्री ॥

प्रनो यच्छत्वित्येषा लिङ्गोक्तदेवता अर्यमपूषबृहस्पतिवाग्देवते-
त्यर्थः । गायत्रीछन्दः । सर्वासामेव होमे विनियोगः अत्र प्रथमस्य
सूक्तेन पूर्तिः ॥

सरस्वत्यै सुनन्वन् ॥

सरस्वत्यै वाचइत्यस्य सुनन्देवता । प्राजापत्यात्रिष्टुप् । देवस्य त्वे-
त्यस्य तृतम् । होमशेषेण यजमानाभिषेके विनियोगः ॥

अग्निःसप्तदश लिङ्गोक्तदेवतानि ।

अग्निरेकाक्षरेणेत्यादीनि प्रजापतिः सप्तदशाक्षरेणेत्यन्तानि
लिङ्गोक्तदेवतानि अग्न्यश्विविष्णुसोमादिदेवतानीत्यर्थः । होमे वा-
जपेये वा एषां विनियोगः । तत्राग्निरेकाक्षरेणएकोना आर्च्यगायत्री ।
अग्निर्देवता । अश्विनौ देवता । साम्नीत्रिष्टुप् । विष्णुः । एकोना-
आर्च्यगायत्री । विष्णुर्देवता । सोमः सोमो देवता । साम्नीत्रिष्टुप् ।
पूषा । पूषादेवता । एकाधिकाआर्च्यगायत्री सवितादेवता गाय-
त्री । मरुतः मरुतोदेवता आर्च्युष्णिक् । बृहस्पतिः बृहस्पति-

देवता: एकाधिका ऋग्गायत्री । मित्रः मित्रो देवता सामपङ्क्तिः । वरुणः वरुणो देवता । ऋग्गायत्री । इन्द्रः इन्द्रो देवता । एकाधिका ऋग्गायत्री । विश्वे देवाः । विश्वेदेवताः सामपङ्क्तिः । वसवः । वसवो देवताः सामजगती । रुद्राः । रुद्रा देवताः । एकोना सामजगती । आदित्याः आदित्या देवता । एकोना साम जगती । अदितिः अदितिर्देवता । सामत्रिष्टुप् । प्रजापतिः । प्रजापतिर्देवता एकाधिका सामजगती । इति वाजपेयः समाप्तः ॥ २५ ॥

अथ राजसूयः ॥

भवतइतिशेषः । राजसूयपदेन तन्मन्त्रा उच्यन्ते ॥

वरुणस्यार्षम् ॥

राजसूयमन्त्राणां सर्वेषां वरुण ऋषिरित्यर्थः ॥

एष ते पार्थिवम् ॥

एष ते निर्ऋत इत्येतद्यजुः पृथिवीदैवतं । सामोष्णिक् । अभिषव-होमे विनियुक्तम् ॥

अग्निनेत्रेभ्यो देवार्षमाद्यायात्पञ्चाद्यानि दैवानि ।

अग्निनेत्रेभ्य इत्यादीनि दश यजूंषि दैवानि देवदेवत्यानि । पञ्च-वातीयहोमे विनियुक्तानि । अग्निनेत्रेभ्यः सामोष्णिक् । यमनेत्रेभ्यः आसुरीगायत्री विश्वदेवनेत्रेभ्यः सामानुष्टुप् । मित्रावरुणनेत्रेभ्यो देवेभ्यस्त्वभिप्रायो ऋग्गायत्री । मरुन्नेत्रेभ्यो देवेभ्यस्त्वभिप्रायो तु । आसुरीगायत्री । सोमनेत्रेभ्य । एकाधिका ऋग्गायत्री । ये देवा अग्निः आसुरीगायत्री, ये देवा यमनेत्राः । सामानुष्टुप् । ये देवा विश्वदेवनेत्राः । एकाधिका सामानुष्टुप् । ये देवा मित्रावरुणनेत्रा उत्तरासदस्त्वभिप्रायो । एकाधिका ऋग्गायत्री । ये देवा मरुन्नेत्रा उत्तरासदस्त्वभिप्रायो सामानुष्टुप् । ये देवाः सोमनेत्राः । साम-

मश्विनः ॥

अग्ने सहस्र देवश्रवा देववातश्च भारतावाग्नेयीमनुष्टुभम् ॥

भरतपुत्रौ देवश्रवा देववातश्चेति द्वावृषी अपश्यतां इष्टकत्वोऽनुकाशे विनियोगोऽस्याः । अत्र द्वितीयः सप्ताक्षरस्तेनैकोना ॥

उपांशुग्रहाणि रक्षोघ्नानि ॥

उपांशु ग्रावेत्यादीनि त्रीणि यजूंषि रक्षोघ्नानि ॥ रक्षोघ्न देवता । उपांशु ग्रावेत्यस्य आसुरी गायत्री । होमे विनियोगः । रक्षसां त्वा । यजुरनुष्टुप् रक्षसां निरसने विनियोगः । अवधिष्म यजुर्गायत्री आसने विनियोगः अवधिषामु । दैवीपङ्क्तिः, असौ हतो यजुर्बृहती । अनयोर्मन्त्रयोः अभिचारे विनियोगः तथा-मुमनाविन्नमः पार्श्वो स्थाने यद्यासीद् इत्यम् ॥

सविता द्वे यजमानः ॥

सविता त्वा, इम देवा इत्यनयोर्यजमानो देवता यजमानस्य हविषं आज्यं गृहीत्वा जपे विनियोगः । सविता त्वा अतिजगती । इमन्देवा अत्यष्टिः ॥ २६ ॥

अपो देवा अपो त्रिष्टुप् ॥

अपो देवा मधुमतीरितीयमृक् । आपो आपोऽस्या देवता इत्यं त्रिष्टुप्छन्दः । द्वितीयो दध्याङ्ङाथर्वणः । तेनैवाना । सारस्वतीना मपां ग्रहणे विनियोगः ॥

इष्णाऽऊर्मिर्लिङ्गोक्ता ॥(१)

अथ इष्णऽऊर्मिरित्यादीनां स्वाहाकारान्तानां पूर्वपूर्वमन्त्राणां गृहीतमाज्यमग्नौ जुहुयात् होमे विनियोगः, उत्तरोत्तर

(१) काण्वसर्वानुक्रमे देवतानीत्यधिकः पाठो बोध्यः ॥

अन्वाधानमपां पृष्ठे त्व इत्यजाभिः । साम्न्यनुष्टुभौ । इयत्यग्र इति आसुरीगायत्र्यौ । पर्वतस्य साम्न्युष्णिहौ । ... । आसुरीगायत्र्यौ । आपः परि । साम्नीगायत्र्यौ । अपां पतिः साम्न्यनुष्टुभौ । अपां गर्भः आसुरीगायत्र्यौ । सूर्यत्वचसः स्थ साम्न्यनुष्टुभौ । सूर्यवर्चसस्थ । साम्न्यनुष्टुभौ मांदा स्थ आसुर्यनुष्टुभौ । व्रजक्षितस्थ आसुरीगायत्र्यौ । वाशा स्थ आसुर्यनुष्टुभौ । शक्वरीस्थ । साम्न्युष्णिहौ । जनभृतस्थ आसुरीगायत्र्यौ । विश्वभृतस्थ आसुरीगायत्र्यौ । आपः स्वराजस्थ । साम्न्यनुष्टुप् । मरीचीनां सर्वासामपां संग्रहणे विनियोगः ॥

मधुमतीरनाधृष्टाऽपापे ॥

मधुमतीर्मधुमतीरनाधृष्टाः सीदतेत्येते यजुषी आपे अनयोरापो देवतास्त्वर्थः मधुमतीरित्यस्य एकोनासामजगती । अष्टादशसंख्यानामपामौदुम्बरे पात्रे समावेशे विनियोगः । अनाधृष्टास्तस्य साम्नित्रिष्टुप् । समाहितानामपां मैत्रावरुणधिष्ण्यस्य पुरस्तादवस्थाने विनियोगः ॥

सोमस्य वर्म ॥

सोमस्य त्विषिरसीत्यस्य वर्म देवता । आसुरीगायत्री । व्याघ्रलोमस्तरणे विनियोगः ॥

अग्नये लिङ्गोक्तानि ॥

अग्नये स्वाहेत्यादीनि द्वादश यजूंषि लिङ्गोक्तदेवतानि पार्थहोमे विनियुक्तानि । आद्यानां दैवीपङ्क्तिः सरस्वत्यै । यजुर्गायत्री । पूष्णे दैवीबृहती । । बृहस्पतये । दैवीजगती । इन्द्रायेत्याद्याः षट् दैवीपङ्क्तयः पवित्रे स्वरत्यस्य तूक्तम् ॥

अनिभृष्टमापम् ॥

अनिभृष्टमसीत्येतद्देवतं । एकाधिका सामजगती । अपां, उ-

आनयने विनियोगः ॥

सधमादो वारुणी त्रिष्टुप् ॥

सधमादो द्युम्निनीरित्येतद्वरुणदेवत्या त्रिष्टुप्छन्दः अत्र द्वितीयचतुर्थयोर्व्यूहेन पूरणम् । अभिषेचनीयेषु पात्रेष्वपां आनयने विनियोगः ॥

क्षत्रस्य चतुर्णां तार्प्यपाण्ड्वाधीवासोष्णीषाणि ॥

क्षत्रस्योल्बमित्यादीनां चतुर्णां यजुषां क्रमेण तार्प्यपाण्ड्वाधीवासोष्णीषाणि देवताः क्षत्रस्योल्बं तार्प्यदेवता । यजुर्गायत्री । तार्प्यपरिधाने विनियोगः, क्षत्रस्य जराय्वसीत्यस्य पाण्ड्वदेवता । दैवीजगती । पाण्ड्वपरिधाने विनियोगः, क्षत्रस्य योनिरित्यस्याधीवासोदेवता । दैवीजगती । अधिवासप्रतिमोके विनियोगः । क्षत्रस्य नाभिरसीत्यस्योष्णीषं देवता । दैवीजगती । उष्णीषस्य संवेष्ट्य शिरोनिगूहने विनियोगः । नाभिदेशे परिहरणे वा विनियोगः ॥(१)

इन्द्रस्य धनुः ॥

इन्द्रस्य वार्त्रघ्नमसीत्यस्य धनुर्देवता । धनुरुपादाने विनियोगः । प्राजापत्या जगती ॥

मित्रस्य बाहू ।

मित्रस्यासीत्यस्य बाहू देवते । यजुर्बृहती । धनुःकोट्योर्मार्जने विनियोगः ॥

त्वया धनुः ॥

त्वयाऽयं वृत्रमित्यस्य धनुर्देवता दैवीजगती । यजमानाय धनुःसमर्पणे विनियोगः ॥

---

(१) तार्प्यं नाम क्षौमं वल्कलं घृताक्तवस्त्रं वा, पाण्ड्वं रक्तकम्बलं, अधीवासं कञ्चुक इत्येतेऽर्थाः सम्यक् महीधराचार्येण प्रतिपादिताः ॥

इषा पञ्चामिषव: ॥

इषासीत्यादीनां दिग्भ्य: पातेत्यन्तानां पञ्चानां यजुषां इषवो देवता: । इषाऽसि, ऊर्जाऽसि, युमाऽसीति पञ्चानां देव्यनुष्टुप्छन्दांसि- ... आमादाने क्रमेण विनियोग: । पातेमं प्राचं । देवीपङ्क्ति: पातेमं प्रत्यञ्चं यजुर्गायत्री । दिग्भ्य: देवीबृहती । क्रमेण ... निरूप्य समर्पणे विनियोग: ॥

आवि: प्राजापत्यम् ॥

आविर्मर्या इत्येतत्प्रजापतिदेवतं । देवीबृहती । वाचने विनियोग: समानम् ॥

पराणि लिङ्गोक्तानि ॥

अस्मात्पूर्वोक्तादाविर्मर्या इत्येतस्मात्पराणि परे पठ्यमानानि वा- वित्तोऽग्निरित्यादीनि लिङ्गोक्तदेवतानि । अग्नीन्द्रादिलिङ्गोक्तदे- वतानि । आवित्तोऽग्निर्यजुर्बृहती । आविन्ने । आसुर्यनुष्टुप् । आवि- त्ता । यजुर्बृहती । सर्वेषां वाचने विनियोग: ॥ १७ ॥

अवेष्टा दन्दशूका इत्येतद्यजुर्मृत्युनामकं । देवीजगती केशवाप्ये लो- हायसप्रक्षेपे विनियोग:, प्राजापत्यं यजु: मृत्युनामकं ... संहिताभाष्ये ।

प्राची पञ्चानां यजमान: ॥

प्राचीमारोहेत्यादीनां वर्चो द्रविणमित्यन्तानां पञ्चानां यजुषां यज- मानो देवता । वाचने विनियोग: । प्राची व्यूहेन प्राजापत्या जगती । दक्षिणा । बृहती पङ्क्ति:, प्रतीची । व्यूहेन प्राजापत्या जगती । उदीची । बृहती पङ्क्ति:, । ऊर्ध्वा । आर्च्युष्णिक् ॥

प्रत्यस्तं मारुतम् ॥

प्रत्यस्तमनुवेरित्येतद्रक्षोदेवतं ॥ प्राजापत्यागायत्री । पादेन वीक्षणे विनियोगः ॥

स्वत्योरोगोऽसि यजुः ॥

स्वत्योः पादि । योगोऽसि, सङ्गोऽसीत्यनयोर्यज्ञो रक्षोदेवता । म- न्त्रोरितस्य दैवीबृहती यजुस्याथः पदं करणे विनियोगः योगोऽसी त्यस्य यजुः पङ्क्तिः रक्षस्य शिरसि करणे विनियोगः ॥

हिरण्यरूपौ मैत्रावरुणी त्रिष्टुब्यजुरन्ता ॥

हिरण्यरूपा उषसद्वत्येषा ऋक् मित्रावरुणदेवत्या त्रिष्टुप् । अ- थ द्वितीयो दैव्यास्ते नैकोना यजुरन्ता । अध्याकन्ते निर्योऽसीत्येत- द्यजु तस्य देवा जगती छन्दः । वाङ्गावदृषभे विकल्पेनयजुषयो- र्विनियोगः ॥

सोमस्य मुञ्चन् ॥

सोमस्य त्विषा तावार्थं ब्राह्मणानां राजेत्यन्तानां मुञ्चनयजमानो देवता । अभिषेके विनियोगः । अथाभिषिञ्चामि अथायां अथप ते- देवीत्यनयोश्चतुर्थापि मन्त्रस्यानुषङ्गः । अनुषङ्गस्य च वैदिकत्वात्सन्धा- नरमध्ये गणनं कार्यं तत्र सोमस्य त्वा द्युम्नेन स्वराड्बृहती । अग्ने- र्भ्राजसा ब्राह्मेण सामजगती । सूर्यस्य वर्चसा सामजगती । इन्द्र- स्येन्द्रियेण सामजगती । इमन्देवा इत्यस्य तु प्रागुक्तं । अभिषेके वि- नियोगइति विशेषः ॥

प्रपर्वतस्यापो त्रिष्टुप् ॥

प्रपर्वतस्येत्येषा ऋक् अब्देवत्या त्रिष्टुप् । कल्पूतयन्याभिषेकेन प्रक्षिप्यते विनियोगः ॥(१)

विष्णोस्त्वौषि लिङ्गोक्तानि ॥

---

(१) प्रक्षेपणे इति पदपाठः ॥

विष्णोर्विक्रमणमसीत्यादीनि वीणि यजूंषि विष्णोकानि । अक्रमणदेवतानीत्यर्थः । आद्यस्य प्राजापत्याऽऽर्षी । ततो दैवीजगती । ततो दैवीत्रिष्टुप् यजमानस्य चरमेषु त्रिषु क्रमणे विनियोगः । चकाराणां क्रमेण ॥

प्रजापते न त्वदेतान्यन्यो विश्वा रूपाणि परि ता बभूव । यत्कामास्ते जुहुमस्तन्नो अस्तु । अयममुष्य पितासावस्य पिता वयं स्याम पतयो रयीणाम् ॥ स्वाहा ॥

प्रजापते न त्वदित्येषा त्रिष्टुप् । प्रजापतिर्देवता तथा यजुर्मध्ये चत्वारिंशत्प्रभृति मध्येवतीयचतुर्थपादयोरन्तराले यजुरस्तीत्यर्थः । कि-न्तु यजुरित्यपेक्षायामाह । अयममुष्य यजुः अयममुष्य पिता सावस्य पितेत्येतावदेव तद्यजुर्मध्ये वर्ततइत्यर्थः । अत्र प्रजापते न इति त्रि-ष्टुभि प्रथमः पादो व्यूहेन पूरणीयः । चतुर्थस्तु इन्द्रावरः । तमेको-ना । प्राजाहार्यहोमे विनियोगः ॥

रुद्र यत्ते क्रिवि परं नाम तस्मिन्हुतमस्यमेष्टमसि स्वाहा ॥

रुद्र यत्त इत्येतद्रुद्रदैवतं । साम्नित्रिष्टुप् अभिषेकोदकशेषाप्राशना-त्तीथीये होमे विनियोगः ॥ १८ ॥

इन्द्रस्य लिङ्गोक्तानि ॥

इन्द्रस्य वज्रोऽसीत्यादीनि समिन्द्रियेणेत्यन्तानि लिङ्गोक्तदेवतानि । तत्र इन्द्रस्य वज्रोऽसि रथोदेवता । यजुर्गायत्री । यथायथावतारणे विनियोगः । मित्रावरुणयोस्त्वेत्यस्य रथोदेवता । साम्न्युष्णिक् । रथयोजने विनियोगः । अव्यथायै त्वा । साम्न्युष्णिक् । रथो देवता । यजमानस्य रथारोहणे विनियोगः । मरुतां । ध्रुवोदेवता । यजुर्बृह-ती । दुन्दुभिघर्षप्राजने विनियोगः । आपाम यजमानोदेवता । य-जुर्गायत्री । गवां मध्ये रथस्थापने विनियोगः । समिन्द्रियेण । य-जमानोदेवता । दैवीपङ्क्तिः यजमानस्य अनुरातस्थो गोचरणोर्ध्वे

विनियोगः ॥

मा ते संवरणः प्राजापत्य ऐन्द्रीं त्रिष्टुभम् ॥

मा तस्मन्नृह ते इत्येतामृचमिन्द्रदेवतां त्रिष्टुप्छन्दस्कां प्रजापतेरपत्यं संवरणऋषिरपश्यत् । अत्र प्रथमो दशकः । द्वितीयो द्वादशकः । तृतीय एकादशकः ॥ चतुर्थो व्यूहेनैकादशक इति । रथस्यान्तःपात्यदेशे स्थापने विनियोगः ॥

अग्नये लिङ्गोक्तानि ॥

अग्नये गृहपतये स्वाहेत्यादीनि चत्वारि यजूंषि लिङ्गोक्तदेवतानि हविर्मोचनीयहोमे विनियुक्तानि । अग्नये । सोमाय यजुः पङ्क्तिः मरुतां, इन्द्रस्येति, प्राजापत्ये गायत्र्यौ ॥

पृथिवि मातर्भूमिः ॥

पृथिवि मातरित्यस्य भूमिर्देवता । भूम्यवेक्षणे विनियोगः आनुष्टुप् ॥

हꣳसो वामदेवः सौरीं सप्रपञ्चपरब्रह्माभिधायिनीमतिजगतीम् ॥

हꣳसः शुचिषदितीमामृचं सूर्यदेवतां सप्रपञ्चस्य परस्य ब्रह्मणोऽभिधायिनीमभिधायीमतिजगतीछन्दस्कां वामदेवऋषिरपश्यत् । रथादवरोहणेऽस्या विनियोगः अत्र प्रथमद्वितीयौ द्वादशकौ । तृतीय एकादशकः । चतुर्थश्चतुर्दशक इति । तेन जगतीमतिक्रान्तातिजगती । एकाक्षराधिका जगत्यर्थः । न तु द्वापञ्चाशदक्षरा ॥

इयच्छतमानौ ॥

इयदसीत्यस्य युङ्ङसीत्यस्य च शतमानौ देवते । शतमानयोरुपयमने विनियोगः । इयदसीति द्वे यजुषी द्वादशाक्षरे साम्नी गायत्र्यौ । शतमानयोरवधाने विनियुक्ते ॥

ऊर्गसि प्राणा ॥

ऊर्जं पूर्णमित्यस्य प्राणा देवता। प्राजापत्या गायत्री। प्राणोपस्पर्शने विनियोगः ॥

इन्द्रस्य बाहू ॥

इन्द्रस्य बाहूरित्यस्य बाहू देवते। ब्राह्मी गायत्री। पश्चाद्वां यजमानबाहुग्रहणे विनियोगः ॥

स्योनाऽस्यासन्दी ॥

स्योनाऽसीत्यस्याऽऽसन्दी देवता। दैवी जगती आसन्दीनिधाने विनियोगः ॥

क्षत्रस्याधीवासम् ॥

क्षत्रस्य योनिरसीत्यधीवासो देवता। अधीवासस्यास्तरणे विनियोगः दैवी जगती ॥

स्योनाᳫ सुम्नम् ॥

स्योनामासीदेत्यस्य सुम्नं देवता। एकाधिकाऽनुगायत्री। यजमानस्यासन्द्यामुपवेशने विनियोगः ॥

निषसाद शुनःशेपो वारुणीं गायत्रीम् ॥

निषसादेतीमामृचं वरुणदेवतां गायत्रीं शुनःशेप ऋषिरपश्यत्। अत्र प्रथमोऽष्टकः द्वितीयः षट्कः। तृतीयः सप्तकः। तेनेयं वर्धमाना गायत्री। यस्यास्तु षट्सप्तकाष्टकाः सा वर्धमानेति वचनात्। अथ वा ककुम्मती सञ्ज्ञा गायत्री। यस्या एकः पादः षडक्षरः सा ककुम्मतीत्युच्यते। षट्केककुम्मतीति पिङ्गलोक्तेः।" यजमानस्योरुपालम्भने विनियोगः ॥

अभिभूरस्येता यजमानो वा ॥

अभिभूरसीत्यस्य यजुषो अक्षा देवता यजमानो वा। सामीचि-

क्। अथायां यजमानस्ते थापि विनियोगः॥

ब्रह्मांस्त्वमामन्त्रणानि पञ्चलिङ्गोक्तानि॥

ब्रह्मंस्त्वं ब्रह्मासीत्यादीनि पञ्चसङ्ख्यान्यामन्त्रणानि लिङ्गोक्तदेवतानि। ब्रह्मन्निति ब्रह्मदेवतात्वं ब्रह्मासीति प्रतिवचनानि यजमानदेवतानीत्यर्थः प्रश्नप्रतिवचनेविनियुक्तानीत्यर्थः तत्र ब्रह्मन्नित्यस्य ब्रह्मा देवता दैव्युष्णिक्छन्दः। ब्रह्मामन्त्रणे विनियोगः। त्वं ब्रह्माऽसि सवितासीत्यस्य यजमानो देवता। आसुर्यनुष्टुप्। त्वं ब्रह्माऽसि वरुणोऽसि यजुस्त्रिष्टुप्। त्वं ब्रह्मासीन्द्रोऽसि यजुर्बृहती। त्वं ब्रह्माऽसि रुद्रोऽसि। यजुःपङ्क्तिः। त्वं ब्रह्माऽसीत्येतावदेव पञ्चमे प्रतिवचनं। तत्र दैवी बृहती। सर्वेषां यजमानो देवता। ब्राह्मणप्रतिवचने विनियोगः॥

इन्द्रस्य स्फ्यः॥

इन्द्रस्य। वज्रोऽसि तेन मे इत्यस्य स्फ्यो देवता। यजुस्त्रिष्टुप्। यजमानादीनां स्फ्यसमर्पणे विनियोगः॥

अग्निः पृथुराग्नेयम्॥

अग्निः पृथुराग्नेयं। अग्निः पृथुरित्येतद्यजुरग्निदैवतं। धूतभूमौ हिरण्यस्योपरि चतुर्गृहीतहोमे विनियुक्तं प्राजापत्यात्रिष्टुप्॥

स्वाहाकृता अव्याः॥

स्वाहाकृताः सूर्यस्येत्यस्यापोदेवताः सामत्रिष्टुप्। अपनिनयने विनियोगः॥

सविता लिङ्गोक्तदैवतम्॥

सविता प्रसवितेत्येतल्लिङ्गोक्तदैवतं। सवित्रादिदैवतमित्यर्थः। स्वराडेकान्त्याष्टिछन्दः। इष्टपिये शतसङ्ख्यानां ब्राह्मणानां समर्पणात्प्राग्याचके विनियोगः॥ ३८॥

अथ चरकसौत्रामणी ॥

अथातइतिशेषः अतःपरं राजसूयैकदेशभूतचरकसौत्रामणी वक्ष्यते। सौत्रामण्याः तन्त्रमुच्यते। चरकसौत्रामणीमन्त्राणामाम्नायिकमभिधीयतइत्यर्थः राजसूयान्ते विहितसौत्रामण्याश्चरकसौत्रामणीति संज्ञा ॥

अश्विनोरार्षम् ॥

अस्याम्नायमश्विनावृषी इत्यर्थः ॥

अश्विभ्यां त्रीणि लिङ्गोक्तानि ॥

अश्विभ्यां पच्यस्वेत्यादीनि त्रीणि यजूंषि लिङ्गोक्तदेवतानि। सुरादेवतानीत्यर्थः ओदनस्य विरूढचूर्णानां च संसर्गे विनियुक्तानि। अश्विभ्यां। यजुर्गायत्री, सरस्वत्यै यजुरुष्णिक् इन्द्राय। यजुर्बृहती॥

वायुः सौमी गायत्री ॥

वायुः पूतइत्येषा सोमदेवत्या गायत्री। अत्र तृतीयः सप्तकस्तेनैकोना। यकारव्यूहेन पूरणमिति केचित्। कुशैः परिस्रुत्यावने विनियोगः ॥

कुवित्तृचं सुकीर्तिः काक्षीवतः ॥

कुविदङ्गेत्येतत्तृचं कक्षीवतोऽपत्यं सुकीर्तिरपश्यत् ॥

आद्या सौम्यनिरुक्ता त्रिष्टुप् ॥

अस्मिन् तृचे आद्या कुविदङ्गेत्येषा त्रिष्टुप् अनिरुक्ता सोमदेवत्या। मध्ये सोमपदप्रयोगरहितेत्यर्थः ग्रहणेऽस्या विनियोगः अत्र द्वितीयस्य व्यूहेन पूरणं। अत्रोपयामेति यजुः। तस्य ग्रहा देवताः एकग्रहणपक्षे द्वाविंशत्यक्षरा साम्नीत्रिष्टुप्। ग्रहणे विनियोगः। नानानां ग्रहाणां ग्रहणपक्षे तु त्रीण्येतानि यजूंषि सोपयामानि। तत्र प्रथमस्य यजुस्त्रिष्टुप्। द्वितीयस्यानुष्टुप्। तृतीयस्य साम्नी-

ष्णिक् । ययाणां यज्ञानां पञ्चमे क्रमेण विनियोगः ॥

युवमनुष्टुप् ॥

युवं सुराममित्येषाऽनुष्टुप्छन्दस्का यज्ञस्य पुरोनुवाक्यात्वेन विनियुक्ता । अथ चतुर्थ्या व्यूहेन पूरणम् ॥

पुत्रमिव त्रिष्टुप् ॥

पुत्रमिव पितरावित्येषा त्रिष्टुप् । यज्ञयागे याज्यात्वेन विनियुक्ता । अथ द्वितीयो दशकस्तृतीयस्य व्यूहेन पूरणम् ॥

अश्विसरस्वतीन्द्रदेवत्येऽश्विसरस्वतीन्द्रदेवत्ये ॥

युवं सुरामं, पुत्रमिवेतीमे द्वे ऋचौ याज्यपुरोऽनुवाक्ये अश्विसरस्वतीन्द्रदेवताइत्यर्थः । अस्य सूत्रस्य द्वि. पाठोऽध्यायसमाप्तिसूचनार्थः ॥ ५०

इति श्रीश्रीनिरग्निचित्सम्राटस्थपति...संवत् क्रतुकाहायाज्ञिकश्री-श्रीप्रजापतिसुतयाज्ञिकश्रीदेवकृते सर्वानुक्रमणिकाव्याख्याने प्रथमोऽध्याय. समाप्तः ॥ इति राजसूयः समाप्तः । (१)श्रीगणेशाय नमः ॥ अथ

(१) अत्र केषु चित्काण्वशाखीयसर्वानुक्रमपुस्तकेषु संहितापुस्तकेषु च दशमाध्यायसमाप्तावनुवाकसूत्राणि न तु प्रत्यध्यायेऽतः कण्वान्मयाऽत्र दशमाध्यायान्तेऽनुवाकसूत्राणि लिख्यन्ते । प्रथमाध्यायमारभ्य तुर्याध्यायपर्यन्तमनुवाकसूत्राणि लिखितानि, इदानीं च तुर्याध्यायाद्दशमाध्यायपर्यन्तानि लिख्यन्ते । एदन्तिस्त्रोमहीनामवयवास्तत्र ऽआकूत्यै द्वे ऋक्सामयोश्चतस्रो व्रतं कृणुत नवैषा ते पञ्च वस्व्यै षट् ते गायत्रमनुष्टुभौ चन्द्रमस्यै षड् दिवस्त्वष्ट्रौ चतुर्थे दशकोनपञ्चाशत् । ४ । १० । ४९ । अग्नेस्तनूरसि त्रयस्त्रिंशदाऽतिथ्ये त्वाऽष्टौ तप्तायनी द्वे इन्द्रघोषस्त्वा युञ्जते मनो नव देवस्य त्वा पञ्च देवस्य त्वा षड् विभूरसि पञ्चकयोस्तेरसि सप्त इदं विष्णो पञ्च दशानुवाके पञ्च पञ्चाशत् । ५ । १० । ५५ । देवस्य त्वा सप्तापवीरस्यष्टौ नमस्ते सप्त सन्ते नमः समुद्रं गच्छ पञ्चकौ हविष्मतीरिमास्तिस्रो हृदे त्वा सप्त देवस्य त्वाऽष्टौ वट्ऽष्टौ पञ्चाशत् । ६ । ८ । ५० । वाचस्पतये तिस्रोऽयं वेनः पञ्च ये देवास्त्रयऽइन्द्राय त्वा द्वे मूर्द्धानं दिवस्तिस्रो यस्ते मघवऽइन्द्राग्नीऽआगत माया व ऽओमासश्चर्षणीधृतो विश्वे देवासऽइन्द्र मरुत्वो मरुत्वन्तं मरुत्वाँसे स जोषाऽइन्द्र महाँऽइन्द्रो महाँऽइन्द्र एक. सप्त मेद्धा विद्वे० शतिवत्स रिर्ठ० शत् । ७ ।

सर्वेषां यजुर्मन्त्राणां साधारणमृषिमाह ॥

अथाग्निं प्रजापतिरपश्यत् ॥

अथानन्तरं प्रजापतिऋषिरग्निं अग्निसम्बन्धकम् कर्मापश्यत् । अ-ग्न्याग्निपदेन तन्मन्त्रा लक्ष्यन्ते । तेन युञ्जानः प्रथममारभ्याष्टौ अध्याया अग्निमन्त्राः । तेषां सर्वेषां प्रजापतिऋषिरित्यर्थः अत्र अन्ये दर्शपूर्ण-मासाग्निष्टोमादिपदैस्तन्मन्त्रा लक्ष्यन्त इति कात्यायनाभिमतं । अतः तत एतं परमेष्ठी प्राजापत्यो यज्ञमपश्यद्दर्शपूर्णमासाविति श्रुतेः सति प-रमेष्ठी प्राजापत्यो दर्शपूर्णमासमन्त्राणां ऋषिरिति दर्शपूर्णमासपदस्य तन्मन्त्रपरतां सूचितवान् । अतः सर्वत्र कर्मपदैस्तन्मन्त्रा लक्ष्यन्ते ।

साध्या वाऽपश्यन् ॥

अग्निमित्यनुवर्त्तते । अथ वा साध्या ऋषयः प्रजापतेः प्राणभूता अ-ग्निमपश्यन् । दृष्टवन्तः अतो विकल्पः अग्निमन्त्राणां प्रजापतिऋषिः साध्या वा ऋषय इति प्रतिचिति ऋषिभेदं वक्ष्यन् पञ्चचितिकत्व-माह ॥

सोऽग्निः पञ्चचितिकः ॥

---

२२ । ४० । कदाचननिरम प्रदस्मै वामम्रद्य सनित्रोऽसि मन्त्राणांऽसीत्येकैका बृहस्प-तिसुतस्य चतस्रो हरिरसि द्वे युक्ष्वा मातेन्द्रामादित्येकैका यस्माद्द्वे ऽग्नऽआयूंषि पवस्वोति तद्ग्लोजसा ऽअदृश्रमस्यो दृत्य चित्रं देवानां विश्वा वाचस्पति विश्वकर्मन्हविषा वावृधानो विश्वकर्मन्हविषा मर्द्धन्नेकैका ऽअग्नये त्वा चतस्रोऽष्टमे द्वाविंश-तिर्द्वात्रिं० शत । प्राणाय मे पञ्चोदुत्यत्रय समिन्द्र णोऽ मा हि बतम्रऽएजतु दश-मास्यः पञ्चाजिघ्र षट्परमेष्ठिनव नवमे सप्त षट्चत्वारिं० शत । ९ । ७ । ४६ । देव सवितः षडिन्द्रस्य वज्रः सप्त देवस्य त्रय त्रयोदशाग्नये १५च वाजस्येममग्निरे-काक्षरेण चतस्रो दशमे षट्त्रयश्चत्वारिं० शत । १० । ४३ । एषतऽअग्ने देवाश्चतु-ष्कौ सविता त्वा तिस्रः सोमस्य त्विषिः षड्वेद्याः सप्त सोमस्य त्वा षडिन्द्रस्य वज्रः पञ्च स्योना सि षट् सावित्रा द्वे ऽअश्विभ्यां चतस्रय ऽएकादशमे दश सप्त चत्वारिंश-त् । ११ । १० । ४७ । इत्यनुवाकसूत्राणि ॥

अयमग्निः प्रजापतिर्दृष्टवान् आध्यायादृष्टवन्तः सोऽग्निपञ्चचितिको वर्त्तते । पञ्च चितयो यस्यासौ पञ्चचितिकः अथ प्रतिचित्यृषीनिदमाह ॥

प्रथमा चितिः प्रजापतेः ॥

प्रथमचितिमन्त्राः प्रजापतेरार्षमिति शेषः । "प्रजापतिः प्रथमां चितिमपश्यत्प्रजापतिरेव तस्या आर्षेयमिति श्रुतिः" ॥

द्वितीया देवानाम् ॥

आर्ष द्वितीयचितिमन्त्राणां देवा ऋषय इत्यर्थः । देवा द्वितीयां चितिमपश्यन्नित्यादिश्रुतेः ॥

तृतीयेन्द्राग्न्योर्विश्वकर्मणः ॥

आर्षमिति शेषः । तृतीयचितिमन्त्राणां इन्द्राग्नी विश्वकर्मा चेत्येते त्रय ऋषय इत्यर्थः इन्द्राग्नी च विश्वकर्मा च तृतीयां चितिमपश्यन्नित्यादिश्रुतेः ॥

चतुर्थ्यृषीणाम् ॥

आर्षमितिशेषः । चतुर्थचितिमन्त्राणां च ऋषय एवर्षयः "ऋषयश्चतुर्थीं चितिमपश्यन्नित्यादिश्रुतेः ॥

पञ्चमी परमेष्ठिनः ॥

आर्षमिति शेषः । पञ्चमचितिमन्त्राणां परमेष्ठी ऋषिरित्यर्थः । "परमेष्ठी पञ्चमीं चितिमपश्यदित्यादिश्रुतेः" ॥

अथ प्रतिकर्मदर्शिनः ॥

अथ साधारणर्ष्यभिधानानन्तरं प्रतिकर्म कर्मकर्म प्रति ये दर्शिनो द्रष्टारः सन्ति तेतान् सावित्राण्यपश्यदित्यादिकाः । प्रातिस्विकमन्त्राणामृषयस्तेऽभिधीयन्त इति शेषः ॥

युञ्जानोऽष्टौ सावित्राणि सविताऽपश्यत् ॥

युञ्जानः प्रथममित्यादीन्यष्टौ यजूंषि अष्टौ कण्डिकाः सावित्राणि सवितृदेवत्यानि सवितैवापश्यत्। दृष्टवान् "सवितैतानि सावित्राण्यपश्यदिति श्रुतेः"। उखासम्भरणस्यादौ अष्टगृहीतमेतेषां विनियोगः। सावित्राणीति नपुंसकनिर्देशोऽष्टाभिर्यजुर्भिर्जुहोतीति श्रुतौ यजुष्ट्वाभिप्रायेण ॥

आद्या तृतीया चाऽनुष्टुप् ॥

युञ्जान इत्यष्टानां मध्ये आद्या युञ्जान इत्येषा तृतीया, युक्त्वाय सवितेत्येषा चानुष्टुप् आद्यायां तृतीयः समाक्षरः चतुर्थस्य व्यूहेन पूरणं तृतीयायां द्वितीयः समाक्षरः तत्रैकोने द्वे अपि ॥

चतुर्थीषष्ठ्यौ जगत्यौ ॥

युञ्जते इतीयं चतुर्थी यस्य द्वितीयः समाक्षरः तत्रैकोने द्वे अपि चतुर्थीषष्ठ्यौ जगत्यौ। युञ्जते इतीयं चतुर्थी, यस्य प्रयाणमिति षष्ठी, एते द्वे जगत्यौ षष्ठ्याः प्रथमस्य व्यूहेन पूरणं। द्वितीया गायत्री, युक्तेन मनसेतीयं द्वितीया गायत्री। अत्र तृतीयः पञ्चाक्षरः तेनेयं शङ्कुमती गायत्री मन्त्रा भवति पञ्चकैरपञ्चके छन्दः शङ्कुमती भवती पञ्चमी त्रिष्टुप्, युजे वामितीयं पञ्चमी त्रिष्टुप्। अत्राद्यद्वितीयचतुर्थानां व्यूहेन पूरणं। सप्तम्यास्तु प्रागुक्तम् ॥

इमं नो यजुरन्ते गायत्र्यनवसाना ॥

इमं नो देव सवितरित्येतदवसानान्तं यजुः व्यूहेन प्राजापत्या जगती। अस्य यजुषोऽन्ते, ऋचा स्तोममित्येषा गायत्री अनवसाना अवसानरहिता। साऽपि यजुरन्ता अस्या अन्ते स्वाहेति पृथक् यजुः। अत्र देवस्य त्वेत्यस्य प्रजापतिसाध्या वा ऋषयः अभ्र्यादाने विनियोग इति विशेषः ॥

आददेऽग्निः ॥

षाड्ढे गायत्रेति त्र्यक्षाग्निर्देवता धृतिः कृतिश्छन्दः । ७६ । अश्वमेधाऽऽह्वाने विनियोगः ॥

हस्तेऽनुष्टुब्यजुरन्ता ॥

हस्त आधायेत्ययमनुष्टुप् यजुरन्ता । अस्या अन्ते आनुष्टुभेनेति यजुः । तस्य यजुस्त्रिष्टुप्छन्दः ॥ ११ ॥ हस्त इत्यस्यास्तृतीयचतुर्थयोर्व्यूहेन पूरणं । (अभ्यभिमन्त्रणे विनियोगः)। अस्या अप्यग्निरेव देवता । अग्निरित्यस्य पूर्वसूत्रादनुवृत्तेः ॥ १ ॥

प्रतूर्त्तन्नाभानेदिष्ठ आश्वीमास्तारपङ्क्तिः ॥ — ११-

प्रतूर्त्तं वाजिन्नितीमामृचं अश्वदेवत्यां आस्तारपङ्क्तिच्छन्दस्कां नाभानेदिष्ठ ऋषिरपश्यत् । यस्यामन्त्यौ पादौ द्वादशकौ आद्यद्वितीयावष्टकौ साऽऽस्तारपङ्क्तिः । "अन्त्यौ चेदास्तारपङ्क्तिरित्युक्तेः." अश्वाभिमन्त्रणे विनियोगः ॥

युञ्जाथां कुश्रिर्गार्दभीं गायत्रीम् ॥ ११-१

युञ्जाथाᳪ रासभमित्येषा ऋचं गर्दभदेवतां गायत्रीं कुश्रिर्ऋषिरपश्यत् । गर्दभाऽभिमन्त्रणे विनियोग ॥

योगेयोगे शुनःशेपोऽजाम् ॥ ११-१४

गायत्रीमित्यत्रानुवर्त्तते । योगेयोग इतीमामृचं अजदेवत्यां गायत्रीछन्दस्कां शुनःशेप ऋषिरपश्यत् अजाभिमन्त्रणे विनियोगः ॥

प्रतूर्वंस्त्रिष्टुब्विराड्रूपा यजुर्गर्भा ॥ ११-१५

प्रतूर्वन्नवक्रामन्नितीयं विराड्रूपा त्रिष्टुप् यजुर्गर्भा । यजुर्मध्ये पदर्धयोरन्तराले यस्याः सा यजुर्गर्भा । यस्या ऋचस्त्रयः पादा एकादशाक्षरा एकोऽष्टाक्षरः । सा विराड्रूपा एकादशिनस्त्रयोऽष्टकश्च विराड्रूपेत्युक्तेः । अत्र द्वितीयो द्वादशाक्षरः तेनैकाधिकाः अस्याः पूर्वार्द्धस्य अश्वस्य प्रागुत्क्रमणे विनियोग. यजुर्गर्भेत्युक्तं किं तद्यजुरि-

अपैवायामात् । अत यजुः उर्वन्तरिक्षं वीहीत्येतावत्परिमाणमत्र मध्ये यजुरित्यर्थः । स भोत्क्रमणेऽस्य विनियोगः दैवी जगती ॥

१६ पृथिव्यास्त्वोष्याग्नेयानि ॥

पृथिव्याः सधस्थादित्यादीनि चीण्यग्निदेवत्यानि यजूंषि । पृथिव्याः आसुरीगायत्री । अजस्य प्रागुत्क्रमणे विनियोगः, अग्निं पुरीष्यमङ्गिरस्वद्धरिष्याम इत्यस्य सामगायत्री । पिंडं प्रति गमने विनियोगः । अग्निं भरिष्याम इत्यासुर्यनुष्टुप् । अनड्वापुरुषेक्षणे विनियोगः ॥

१७ अन्वग्निरग्नेयी त्रिष्टुभं पुरोधसः ॥

अन्वग्निरुषसामित्येतामृचमग्निदेवत्यां त्रिष्टुभं पुरोधस‍ऋषयोऽपश्यन् । वल्मीकवपाच्छिद्रेण पिंडेक्षणे विनियोगः । अत्र प्रथमपादस्य व्यूहेन पूरणम् ॥

१८ आगत्य मयोभुव आश्वीमनुष्टुभम् ॥

आगत्य वाजीत्येतामृचमश्वदेवतामनुष्टुभं मयोभुव‍ऋषयोऽपश्यन् । अश्वाभिमन्त्रणेऽस्या विनियोगः अत्रापि प्रथमस्य व्यूहेन पूरणम् ॥

१९ आक्रम्यानुष्टुप् ॥

आक्रम्य वाजिन्नित्येषाऽनुष्टुप् । अश्वदेवत्या आर्षी पदानुवृत्तेः । अश्वपादेन पिंडस्याधिष्ठापने विनियोगः ॥

२० द्यौस्ते बृहती ॥

द्यौस्ते पृष्ठमित्येषा बृहती । अश्वदेवत्या । अश्वस्योपरि पाणिं धारयतश्चारणे विनियोगः । द्यौस्ते पृष्ठमित्येषा आर्षी बृहती । पादानामनियताक्षरत्वेऽपि षट्त्रिंशदक्षरत्वात् । व्यूहेन छन्दः पूर्तिः ॥

२१ उत्क्राम विराट् ॥

अतोऽन्याश्चाग्नीत्यनुवर्तते उदुत्क्राम सुक्रतुस्त्वेमा अग्निदेवत्या विरा-
ट्छन्दस्का । अस्या दशाक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिः, "वैरा-
जे विराडित्युक्तेः" अत्र द्वितीयपाद एकादशकः । तेनैकाधिका अग्न्यो-
त्क्रमणे विनियोगः ॥ ११-२२

उदक्रमीत्त्रिष्टुप् ॥

आग्नीत्यनुवर्तते । उदक्रमीद्द्रविणोदा इतीयमृगग्निदेवत्या त्रिष्टु-
प् अग्न्यभिमन्त्रणे विनियोगः ॥ ११-२३

आ त्वा द्वे गृत्समद आग्नेय्यौ ॥

आ त्वा जिघर्मि आ विश्वत इतीमे द्वे ऋचौ अग्निदेवत्ये गृत्समद-
ऋषिरपश्यत् । आ त्वेत्यस्यास्त्रिष्टुप्छन्दः आ विश्वत इत्यस्या अपि
त्रिष्टुप्छन्दः त्रिष्टुप्पादावृत्तेः अथ "यत्त्रिष्टुभो तेनेन्द्र इति श्रुतेश्च" ।
अग्निना छन्दः पूरणं द्वितीयस्याः प्रथमपदे ऊर्ध्वमृक्त्रयस्योपरि आज्या-
हुतिहोमे विनियोग उभयोः ॥

परि सोमको गायत्रीम् ॥

आग्नेयीपदमनुवर्तते । परि वाजपतिरितीमामृचमग्निदेवत्यां
गायत्रीछन्दस्कां सोमकऋषिरपश्यत् । (अस्याः पिण्डपरिलेखने वि-
नियोगः) अत्र द्वितीये व्यूहः ॥

परि त्वा पायुरनुष्टुभम् ॥ ११-२४

आग्नेयीपदमनुवर्तते परि त्वाग्ने पुरमितीमामृचमग्निदेवता-
मनुष्टुप्छन्दस्कां पायुऋषिरपश्यत् । पिण्डपरिलेखने विनियोगः ॥

त्वमग्ने गृत्समदस्त्रिष्टुभम् ॥ ११-२५

आग्नेयीत्यनुवर्तते । त्वमग्ने द्युभिरितीमामृचमग्निदेवत्यां
त्रिष्टुप्छन्दस्कां । गृत्समदऋषिरपश्यत् । अत्र प्रथमान्त्यौ एकादशा-
क्षरौ द्वितीयतृतीयौ नवाक्षरौ । एवं चत्वारिंशदक्षरा इयं पङ्

भवेत् । यदा च तृतीयचतुर्थौ द्व्यक्षरौ क्रियेते तदैवं विराट्स्थाना त्रिष्टुब् भवति । द्वौ वा वैराजौ यत्रैकस्त्रैष्टुभ एव विराट्स्थानेत्युक्तत्वात् । तत्र च यजुःसंहितायां स्वामत्र्य एतिमजदश्वाम्नेषौ त्रिष्टुबू- ति । सर्वं जगतीमित्यपि पाठोऽस्त्येव । अन्ये त्वानुक्रमण्यामपीदं जगत्येवोक्तमिति । तदा त्वस्यां सप्त सप्ताक्षराः षड्भिः तुपमस्त्वेवं सप्तभिश्चैकः । सप्ताक्षराणि संपद्यन्ते । ततश्च द्विपुभिरित्येको न्यूनः एवं जगती सम्पद्यते । तथा च छन्दोगानां । त्र्यक्षरेण त्रिष्टुभः पूरयन्ति । तद्वत्सप्तमे न्यूनमहो जगतीमित्यपि पाठो भवत्येव । पिण्डपरिलेखनेऽस्य अपि विनियोगः ॥ २ ॥

पृथिव्याऽग्नेयम् ॥

देवस्य त्वेत्यस्य प्रागुक्तः । अत्र प्रजापतिर्ऋषिः पिण्डखनने विनियोग इति विशेषः पृथिव्याः सधस्थादित्येतद्यजुरग्निदैवतम् । न्यूनेनानुष्टुप्छन्दः । अस्य पिण्डखनने विनियोगः ॥

९ अपां पुष्करपर्णं स्वराट्पङ्क्तिः ॥

अपां पृष्ठमसीत्यस्याः पुष्करपर्णं देवता । स्वराट्पङ्क्तिश्छन्दः । द्व्यक्षराधिकं सर्वं छन्दः स्वराडित्युच्यते "द्वाभ्यां विराट्स्वराजाविस्युक्ते: । "आद्यौ पादौ द्वयष्टौ । अन्त्यावेकादशकाविति पङ्क्तेर्द्व्यक्षराधिक्यात्स्वराट्त्वं युक्तं । तथा च छन्दोगानां द्व्यधिका स्वराडिति । अस्याः कृष्णाजिनस्योपरि पुष्करपर्णास्तरणे अधायां पादानां विनियोगः । द्वितीयपादस्यैतस्य चतुर्थपादस्य विकल्पने ॥

० शर्म च स्थो अनुष्टुभौ कृष्णाजिनपुष्करपर्णे ॥

शर्म च स्थः, संवसाथामितीमे द्वे अपायनुष्टुभौ अनयोः कृष्णाजिनपुष्करपर्णे देवते । कृष्णाजिनपुष्करपर्णयोरभिमर्शने विनियोग उभयोः । आद्या चतुर्थस्य द्वितीयायाः पादस्य च न्यूनेन पूरणम् ॥

हुतोऽग्निः ॥ २२-

हुतोऽग्निरिति निवमदा एकस्याग्निदैवता पिण्डपितृयज्ञे विनियोगोऽस्य । सूक्तं गतिछन्दसकम् । अथ षष्ठोऽष्टकः द्वितीयः अष्टकस्तोत्र वर्णकः । "षष्ठो ग्रन्थकाण्डेति गतिरिति विंशकः" । कात्यायनोऽपि । अथास्तु षड्गणकाण्डकाः स्युः अर्धमाना विपरिणामविकृतिः । छन्दांसानीव । षट्गणपङ्क्तिरिति प्रतिष्ठेति ॥

त्वामग्ने तृचं भरद्वाजमाग्नेयम् गायत्रम् ॥ २२-३

त्वामग्ने पुष्करात्, तमु त्वा दध्यङ्, तमु त्वा पाथ्य, इत्येतत्तृचमग्निदैवतम् गायत्रीछन्दस्कं भरद्वाजऋषिदृष्टम् । पिण्डपितृयज्ञे विनियुक्तं । तमु त्वा दध्यङ्ङस्य सूक्तेन पूरणम् । तमु त्वा पाथ्यस्यापि ॥

सीद होतर्देवश्रवा देववातश्च त्रिष्टुभम् ॥ २२-

आग्नेयपदमनुवर्तते । तदाग्नेयीमिति विपरिणम्य सम्बध्यते ॥

सीद होतः स्वऽउलोकेतीमामृचमग्निदेवत्यां त्रिष्टुभम् ॥

देवश्रवा देववातश्चेतीमौ द्वावृषी पश्यताम् ॥

निहोता गृत्समदः ॥ २२-३

त्रिष्टुभमाग्नेयामिति चानुवर्तते । निहोता होतृषदन इतीमामृचं अग्निदेवत्यां त्रिष्टुप्छन्दस्कां गृत्समदऋषिरपश्यत् ॥

सठं० सीदस्व प्रस्कण्वो बृहतीम् ॥ २२-३

सठं० सीदस्वेतीमामृचं अग्निदेवत्यां बृहतीं प्रस्कण्वऋषिरपश्यत् । अथाग्नेयपदमनुवर्तते । अकारविकर्षेण तृतीये द्वादशाक्षरपूर्तिः । त्वामग्नेत्यादिकं तृचं पुष्करपर्णे पिण्डनिधाने विनियोगमर्हति केचित् ॥ १ ॥

३८ अपो देवीः सिंधुद्वीपऽआपी न्यङ्कुसारिणीम्॥

अपो देवीरित्यस्या न्यङ्कुसारिणीबृहतीछन्दः अपो देवता सिन्धुद्वीप ऋषिरपश्यत्। अस्या द्वितीयपादो द्वादशाक्षरः तस्य व्यूहेन पूरणम्। तृतीयो नवाक्षरः यज्ञे अपामवनयनेऽस्या विनियोगः॥

९। अग्ने त्रिष्टुप्पार्थिवोऽर्धो वायव्योऽर्धः॥

अग्ने वायुरित्यस्यास्त्रिष्टुप्छन्दः। अस्या अर्धोऽर्धः पार्थिवः पृथिवीदेवतः अपरोऽर्धो वायव्यः वायुदेवतः अवटमध्ये वायुप्रक्षेपे विनियोगः। अत्र चतुर्थ एकादशकः। तस्य व्यूहेन पूरणं वा एकोना वा॥

सुजातोऽनुष्टुबाग्नेयी॥

सुजातो ज्योतिषेतीयमनुष्टुबग्निदेवत्या कृष्णाजिनपुष्करपर्णयोरन्ते यज्ञे विनियुक्ता। अत्र द्वितीयोऽष्टकस्तेनैकाधिका॥

१ उदु तिष्ठ विश्वमनाः पथ्याबृहतीम्॥

आग्नेयीमनुवर्तमानं आग्नेयीमिति विपरिणमते अर्थवशाद्विभक्तिविपरिणाम इति न्यायात्। एवं सर्वत्र ज्ञेयं। उदु तिष्ठ स्वध्वरेतीमामग्निदेवत्यां पथ्याबृहतीछन्दस्कां विश्वमना ऋषिरपश्यत्। चतुर्थं बृहती तृतीयो द्वादशक इति बृहत्येव पथ्याबृहतीत्युच्यते। पथ्या पूर्वश्चेत्तृतीय इति पथ्यालक्षणत्वात्। पिण्डमादायोत्थापने विनियोगः। अत्राद्यो व्यूहेन पूरणम्॥

२ ऊर्ध्वः कण्व उपरिष्टाद्बृहतीम्॥

आग्नेयीमिति वर्तते ऊर्ध्व ऊ षु ण इमामग्निदेवतामुपरिष्टाद्बृहतीमुच्यते। अन्त्यश्चेदुपरिष्टाद्बृहत्युच्यते। "अन्त्यश्चेदुपरिष्टाद्बृहतीत्युक्तेः"। पिण्डस्य प्राक्प्रक्षेपेऽस्या विनियोगः॥

३ स जातस्त्रितस्त्रिष्टुभम्॥

स जातो गर्भ इतीमामग्निदेवत्यां त्रिष्टुभं त्रित ऋषिरपश्यत्।

अश्वाभिमन्त्रणे विनियोगः अत्राप्याग्नेयीत्वमनुवर्तते एव ज्ञात्वाऽ-
नीकस्य हेतुर्वै । अत्र प्रथमतृतीययोर्व्यूहेन पूरणम् ॥

स्थिरो रासभेष्वनुष्टुबाग्नेयी ॥ ११-४४

स्थिरो भवेतीयमृक् रासभदेवत्या अनुष्टुप् आग्नेयी । त्रिंशदक्षरत्वाद्विकल्पः । अत्राद्ययोः पादयोरेकादशाक्षरत्वेऽपि तैः कल्पितं दृष्ट्वा एकाक्षराधिक्यमाह । अतएव आर्षम् । व्यूहेन पूरणे सम्भवत्यपि एकद्व्यधिकन्यूनत्वादिना छन्दोऽन्तरं विकल्पेन कल्पयन्त्विति । रासभाभिमन्त्रणेऽस्य विनियोगः ॥

शिवो भवाग्नेयी पथ्याबृहती ॥ ११-४५

शिवो भव प्रजाभ्य इतीयमग्निदेवत्या पथ्याबृहतीछन्दस्का । अत्र प्रथमः सप्तकः । द्वितीयोऽष्टकः । तृतीयो द्वादशकः । चतुर्थोऽपि व्यूहेन द्वादशक इति । अनुष्टुब्बृहतीवेति संहिताभाष्यम् । अजाभिमन्त्रणे विनियोगः ॥

प्रैतु लिङ्गोक्ता महापङ्क्तिस्त्र्यवसाना ॥ ११-४६

प्रैतु वाजी त्रिधा लिङ्गोक्तदेवता महापङ्क्तिछन्दस्का । त्र्यवसाना अवसानत्रयोपेता । आद्याश्ववाजिदेवत्या । तृतीया रासभदेवतेति लिङ्गोक्तशब्दार्थः । अत्र तृतीयचतुर्थौ व्यूहेन पूरणीयौ । एवं षडपि पादा अष्टाक्षराः सन्ति अतो महापङ्क्तिरियं । "षडष्टका महापङ्क्तिरित्युक्तेः" आद्यद्वयोरश्वोपरि पिण्डधारणे विनियोगः तृतीयाभिमन्त्रणस्य खरस्योपरि पिण्डधारणे विनियोगः ॥

अग्ने गायत्र्येकपदाग्नेयी ॥ ११-४७

अग्न आयाहीतीयमेकपदा गायत्री अग्निदेवत्या । खरात्पिण्डस्य प्रत्याहरणे विनियुक्ता ॥

ऋतमग्निमाग्नेये ॥

ऋतं० सत्यं । अग्निं पुरीष्यमित्येते यजुषी प्राजापत्ये अग्नि-
दैवते । ऋतमिति प्राजापत्या गायत्री । अनयोरुपरि पिण्डधारणे
विनियुक्ता । अग्निं पुरीष्यं । साम्नगायत्रीपक्षाग्रुपधेयके विनियो-
गः ॥

ओषधयस्त्रिष्टुबनुष्टुभावोषधिदैवत्ये ॥

ओषधयः प्रतिमोदध्वं, ओषधयः प्रतिगृभ्णीतेत्येते ऋचौ क्रमेण
त्रिष्टुबनुष्टुप्छन्दस्के ओषधिदैवत्ये । परिवृतमध्ये पिण्डनिधानेऽनयो-
र्योः तत्र प्रथमाया द्वितीयो द्वादशकः तृतीयो दशकः प्रथमान्त्यावेका-
दशकौ । तेन पूर्वैव त्रिष्टुप् । द्वितीयो द्वादशकः तृतीयो दशकः
प्रथमान्त्यावेकादशकौ । तेन पूर्वैव त्रिष्टुप् । द्वितीयायाः पञ्चमो नव-
कः अन्ये अष्टका तेनैकाधिका । परिश्रितमध्ये पिण्डनिधाने विनि-
योगः उभयोः ॥

व्यस्यन्नाग्नेयोऽर्द्धर्चः ॥

व्यस्यन्विश्वा इत्ययमर्धर्चोऽग्निदैवतः ॥

त्रिपाजसोत्कीलः कात्य आग्नेयीं त्रिष्टुभम् ॥

विपाजसा पृथुनेतीमामृचमग्निदेवत्यां त्रिष्टुप्छन्दस्कां कात्यः
कतस्य पुत्रउत्कीलो ऋषिरपश्यत् । योकृषायस्य पिण्डस्य विमोचने
विनियोगः ॥ ४ ॥

आपो ह्या ष्ठा० सिन्धुद्वीपस्तृचं गायत्रम् ॥

आपो हि ष्ठेतीदं तृचं अब्देवतं गायत्रीछन्दस्कं सिन्धुद्वीपऋषिर-
पश्यत् पर्णकषायपक्वोदकस्य पिण्डस्योपर्यासेके विनियुक्तम् ॥

मित्र उपरिष्टाद्बृहती मैत्री ॥

मित्रः संसृज्येति मित्रदेवता उपरिष्टाद्बृहतीछन्दः [illegible]

पिण्डस्य संसर्जने विनियोगोऽस्याः अत्र चतुर्थः समकः । तेनैको-
ना यकारव्यूहो वा ॥

रुद्राऽनुष्टुम्गौष्ठी ॥

रुद्राः सं॰ सृज्येतीयमनुष्टुप्छन्दस्का रुद्रदेवत्याः शर्करापोरसा-
मसृवैः पिण्डस्य संसर्जने विनियुक्ता ॥

सं॰सृष्टां द्वे सिनीवालीदैवत्ये ॥

सं॰सृष्टामिति द्वे ऋचौ सिनीवालीदैवत्ये अनुष्टुप्छन्दस्केऽनुष्टु-
भावनुवर्तते । पिण्डसंवपने विनियोग उभयोः संसृष्टामित्यत्र द्विती-
यतृतीयौ समाक्षरौ । अन्त्याष्टकौ । तेनैकोना । व्यूहो वा । सिनी-
वाल्यास्त्र द्वितीयस्य व्यूहेन पूर्त्तिः, उखामादित्या । अनुष्टुबित्यनुव-
र्तते । उखां कृणोत्वितीयमनुष्टबादित्या अदितिदेवता । पिण्डसंव-
पन एव विनियुक्ता । अत्रापि प्रथमः समकः तेनैकोना । यकारव्यूहो
वा ॥

मखस्य मृत्पिण्डः ॥

मखस्य शिरोऽसीत्यस्य मृत्पिण्डो देवता । यजुर्यायनी मृदादाने
विनियोगः ॥

वसवस्त्वा लिङ्गोक्तानि सर्वत्र ॥

वसवस्त्वा कृण्वन्त्वित्यादीनि लिङ्गोक्तदेवतानि उखादेवतानीत्यर्थः
नहि केवलमत्र किं तु सर्वत्र वसवस्त्वेत्यादीनि लिङ्गोक्तदेवतानीत्यर्थः
वसवस्त्वा धूपयन्तु वसवस्त्वाच्छृन्दन्त्वित्यादौ । तत्र वसवस्त्वा । एका-
धिका ब्राह्मी अनुष्टुप् । उखातलप्रथमने विनियोगः । रुद्रास्त्वेत्य-
स्यापि ब्राह्म्यनुष्टुप् । एकाधिका । प्रथमधात्ववधाने विनियोगः, आ-
दित्यास्त्वा ब्राह्मी अनुष्टुप् । उत्तरधात्ववधाने विनियोगः विश्वेत्वा
एकाधिका ब्राह्मी बृहती । परीकरणे विनियोगः ॥

अदित्यै रास्ना ॥

अदित्यै रास्ना देवता: । यजुर्गायत्री । वलिकरणे विनियोग: ॥

अदितिरौखम् ॥

अदितिष्टे बिलमित्यस्य उखादेवता यजुर्बृहती । उखाया बिलस्यालंभे विनियोग: ॥

कृत्वायादित्योष्णिगुष्णिगनुष्टुब्वा ॥

कृत्वाय सा महीमित्यृक् अदितिदेवत्या उष्णिक्छन्दस्का । निष्पन्नाया उखायां भूमौ निधाने विनियोग: । अत्र तृतीयचतुर्थपादक: । तेन कृष्णिकोष्णिक् । अनुष्टुब्वा तदा च पुरेभ्य: प्राग्च्छत्रिंशत्तमीय: पादो व्यूहेन पूरणीय: उष्णिगनुष्टुब्वेति संहिताभाष्ययो: पाठोऽस्ति । अथ वसवस्त्वा धूपयन्त्वित्यादीनि सप्त यजूंषि उखाया धूपने विनियुक्तानि । तेषां देवतास्ता उक्ता । छन्दांस्युच्यन्ते वसवस्त्वा ऋग्गायत्री । रुद्रास्त्वा । व्यूहेन ऋग्गायत्री । आदित्या ऋग्गायत्री । विश्वे त्वा । व्यूहेन सामजगती । इन्द्रस्त्वा यजुरुष्णिक् । वरुणस्त्वा यजुरनुष्टुप् । विष्णुस्त्वा । यजुरुष्णिक् ॥

अदितिरावटम् ॥

अदितिष्ट्वा देवीत्येतद्यजुरवटदैवतम् । व्यूहेन प्राजापत्या त्रिष्टुप् अवटखनने विनियोग: ॥

देवानां पत्न्यौखानि ॥

देवानां त्वा पत्नीरित्यादीनि पञ्चौखानि । एषामुखादेवतात्वं । तत्र देवानां त्वा । प्राजापत्या त्रिष्टुप् । उखाधाने विनियोग: । धिषणास्त्वा । प्राजापत्या त्रिष्टुप् उखाया आदीपने विनियोग: । वरूत्री: ऋग्बृहती, ग्नास्त्वा । सामजगती । जनयस्त्वा ऋक् । पङ्क्ति: वरूत्रीरित्यादीनां त्रयाणामुखामीक्षमाणस्य जपे विनियोग: ॥

मित्रस्य विश्वामित्रो गायत्रीम् ॥

मित्रस्य चर्षणीधृतइतीमामृचं मित्रदेवत्यां गायत्रीं विश्वामित्रऋषिरपश्यत्। पुनः पुनः अपयप्रक्षेपे विनियोगः ॥

देवस्त्वा सावित्री बृहती ॥

देवस्त्वा सवितेत्येषा सवितृदेवत्या बृहतीछन्दस्का। अपयोद्वापेऽस्या विनियोगः। अध्यवमानेत्यस्योखाया उत्तानत्वकरणे। एकाधिका आर्षीबृहती इयं। पादानामनियताक्षरत्वेऽप्यक्षराणां तावत्संख्याकत्वात् ॥

उत्थाय पूर्वोर्धर्चोऽप्योख्योऽउत्तरो मैत्रः ॥

बृहतीत्यनुवर्तते। उत्थाय बृहती भवेतीयं बृहतीछन्दस्का। अस्या पूर्वार्धर्चमौख्यः। उखादेवतः। उखोद्यमने विनियुक्तः। मित्रैतामित्ययमुत्तरोऽर्धर्चो मैत्रः मित्रदेवतः। कस्मिंश्चित्पाठे उखायाः स्थापने विनियोगः। अत्र प्रथमोऽष्टकः। द्वितीयसप्तकः तृतीयो व्यूहेनाष्टकः। तृतीयो व्यूहेन द्वादशकः चतुर्थोऽष्टकइतिपूर्वं बृहती। वसवस्त्वाऽऽच्छृन्दन्त्वित्यादीनि चत्वारि यजूंषि उखादेवतानि अजापयसोऽवसेके विनियुक्तानि। वसवस्त्वा। ऋग्गायत्री। रुद्रास्त्वा। प्राजापत्याऽनुष्टुप्। आदित्यास्त्वा ऋग्गायत्री। विश्वे त्वा साम्नजगती ॥ ५ ॥

आकूतिं लिङ्गोक्तान्यौदुम्बरभस्मानि ॥

आकूतिमग्निं प्रयुजमित्यादीनि यजूंषिलिङ्गोक्तदेवतानि। अग्न्यादिमन्त्रोक्तदेवतानीत्यर्थः। तथा औदुम्बरसञ्ज्ञानि। आग्निकौदुम्बरहोमे विनियुक्तानि। आकूतिं यजुः पङ्क्तिः। मनो मेधा। यजुस्त्रिष्टुप्। चित्तं। यजुर्जगती। प्रजापतये। यजुः पङ्क्तिः विश्वो देवस्येत्यस्य तु प्रागुक्तं सर्वा अग्निप्रकरणे पुनः पाठाद्-

गुन्निकाएव प्रजापत्यादिकर्षिः शौद्रपभस्मदोमे विनियोगइतिवि-
शेषः ॥

मासौष्यौ मायत्रीत्रिष्टुभौ ॥

मा सु भित्था । द्रृंहं० इत्त देवि दृत्येते ऋचौ शौष्यौ इत्यादेवत्योक्रमे-
ण गायत्रीत्रिष्टुप्छन्दस्कौ ॥

अग्निश्च पादमाग्नेयः ॥

मा भिन्नित्यस्यामृचिवग्निरेवं करिष्यदृत्ययं पादोऽग्निदेवतः । मा सु
भित्थादृतिद्वयोवस्त्राधिश्रयणे विनियोगः ॥

द्रुन्नः सोमाहुतिराग्नेयीं गायत्रीम् ॥

द्रुन्नः सर्पिरितीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां सोमाहुति-
र्ऋषिरपश्यत् । कार्मुकसमिदाधानेऽस्या विनियोगः । अचाद्ययोर्व्यू-
हेन पूरणम् ॥

परस्या विरूपऽआङ्गिरसः ॥

गायत्रीमित्यनुवर्तते । परस्याऽअधीतीमामृचमग्निदेवत्यां गायत्री-
छन्दस्कां अङ्गिरसोऽपत्यंविरूपऋषिरपश्यत् । वैकंकतसमिदाधाने-
ऽस्या विनियोगः द्वितीयस्य व्यूहेन पूरणम् ॥

परमस्याऽआरुणिरनुष्टुभम् ॥

परमस्यादृतीमामृचंअग्निदेवतामनुष्टुप्छन्दस्कामारुणिऋषिरप-
श्यत्औदुम्बरसमिदाधाने विनियोगः ॥

यदग्ने द्वे जमदग्निः ॥

अनुष्टुभमित्यनुवर्तते, यदग्ने, यदत्तीत्यृग्द्वयमग्निदेवत्यं अनुष्टुप्-
छन्दस्कं जमदग्निऋषिरपश्यत् । यदग्नऽइत्यस्या पलाशकसमि-
दाधाने विनियोगः । अथ चतुर्थः समाचारः तत्र व्यूहो वा एकोना
वा, यदत्त्युपेत्य साधःशयसमिदाधाने विनियोगः । तत्र प्रथमचतुर्थयोः

ऊहेन पूरणम् ॥

अहरहर्नाभानेदिष्टस्त्रिष्टुभौ ॥

अहरहरप्रयावं, नाभा पृथिव्या इतीमे ऋचौ त्रिष्टुप्छन्दसे अग्नि-देवत्ये नेदिष्टऋषिरपश्यत्। अथवा नाभानेदिष्ट इत्येवं पाठान्तरमृ-षिनाम। प्रतूर्त्तं नाभानेदिष्टस्यैव तथा दर्शनात्। ऋत्विक्त्वं तु त्रिष्टुभाविति द्विवचनाल्लभ्यते। पलाशसमिदाधानेऽनयोर्विनियोगः नाभा पृथिव्या इत्यस्यां द्वितीयतुर्यौ पादौ जागतौ। तथाप्येषा त्रिष्टु-बेव। जगती द्वौ तु जागतौ यस्याः सा जागतजगतीत्रिष्टुभि त्रिष्टुबि-तिपरिभाषणात् ॥

याः सेनाऽनुष्टुभः ॥

तत्र याः सेना इत्याद्याः सर्वा ऋचोऽनुष्टुप्छन्दस्काः। सर्वा आग्नेय्यः पर-स्यामधीत्याद्याः सर्वाः समिदाधानकारणमन्त्ररूपा ऋचोऽग्निदेवत्याः तत्र याः सेना इत्यस्यां प्रथमः सप्तकः। द्वितीयचतुर्थौ नवकौ तृतीयो ऽष्टकः। दंष्ट्राभ्यां। तत्र प्रथमः षट्कः द्वितीयः सप्तकः। अत्र व्यूहो वा। अन्त्यावष्टकौ। इत्यूना। ये जनेषु। तृतीये व्यूहः, सठ्ग्रथितः। आद्यः षट्कः। द्वितीयतृतीयौ सप्तकौ। चतुर्थो नवकः। उदेषां। द्वि-तीयचतुर्थौ सप्तकौ। इत्यूना। पूर्वं याः सेना अनुष्टुभ इत्युक्तं, तत्रान्त्या-या विशेषमाह ॥

अन्त्योपरिष्टाद्बृहती ॥

याः सेना इत्यादीनामन्ते भवा अन्त्या अथवा अध्यायस्यान्त्या अ-वपतेऽवसृष्टेत्येषोपरिष्टाद्बृहती, अस्या अन्त्यः पादो द्वादशकः आ-द्यास्त्रयोऽष्टकाः सोपरिष्टाद्बृहती। "अन्त्यश्चेदुपरिष्टाद्बृहती"त्यु-क्तेः,, इत्यासमिदाधानेऽस्या विनियोगः। न त्वनुष्टुप्। याः सेना इत्या-दीनां ऋषिरग्निकण्वाख्यानुक्तत्वात् ॥ ६ ॥

दृशानो वत्सप्रीस्त्रिष्टुभं रौक्मीम् ॥

दृशानो रुक्मइतीमामृचं त्रिष्टुप्छन्दस्कां रौक्मीं रुक्मदेवतां वत्सप्रीऋषिरपश्यत्। रुक्मप्रतिमोचने विनियोगोऽस्याः। अत्र प्रथमस्य व्यूहद्वयेन पूरणम्। द्वितीयो द्व्यक्षरः तेनैकोना ॥

नक्तोषासा कुत्सोऽग्नेयीम् ॥

त्रिष्टुभमित्यनुवर्त्तते। नक्तोषासा समनसेतीमामृचमग्निदेवत्यां त्रिष्टुप्छन्दस्कां कुत्सऋषिरपश्यत्। नक्तोषासेत्यर्द्धर्चेनोखामुखापरिग्रहणे विनियोगः, द्यावाक्षामेत्यस्य पादस्योखाहरणे। देवा अग्निमित्यस्य पादस्यासन्द्यामुखानिधाने ॥

विश्वा श्यावाश्वः सावित्रीं जगतीम् ॥

विश्वा रूपाणीतीमामृचं सवितृदेवत्यां जगतीछन्दस्कां श्यावाश्वऋषिरपश्यत्। तृतीयपादे व्यूहः। अस्याः शिक्यपाशप्रतिमोके विनियोगः ॥

सुपर्णः कृतिश्चतुरवसाना गारुत्मी विषमी ॥

सुपर्णोऽसि गरुत्मानितीयमृक् कृतिछन्दस्का चतुरवसाना अवसानचतुष्कयुता गारुत्मी गरुत्मद्देवता। विषमी विषमर्णी विषमपदयमकर्णी। अशीत्यक्षरा कृतिः। अत्र त्रिसप्तत्यक्षराणि सन्ति। षड्व्यूहस्थानानि सन्ति। तैश्च कृतेरेकोनाशीत्यक्षरेयं संपद्यते। अस्याः शिक्यस्याग्नेः प्राक्प्रग्रहणे विनियोगः ॥

विष्णोस्त्रिक्रोक्तानि ॥

विष्णोः क्रमोऽसि सपत्नहेत्यादीनि दिशोऽनुविक्रमस्वेत्यन्तानि यजूंषि विष्णुदेवतानि। उखाग्निदेवतानीत्यर्थः। "यः स विष्णुर्यज्ञः स यः स यज्ञोऽयमेव स योऽयमग्निरुखायामिति" श्रुतेः। विष्णुक्रमेष्वेषां विनियोगः। अथाद्यानां सर्वेषां व्यूहेन ककुब्बृहतीछन्दः। चतुर्णां

प्राजापत्याबृहती । द्विधेत्विति यजुरन्त्यम् । द्विधाकरणे विनियोगः ॥

अक्रन्ददत्वत्सप्रीराग्नेयीं त्रिष्टुभम् ॥

अक्रन्ददग्निरितीमामृचमग्निदेवत्यां त्रिष्टुभम् वत्सप्रीऋषिरपश्यत् । अग्नेः शिक्यपाशमुक्तप्रवहणे विनियोगः । चतुर्थस्य व्यूहेन पूरणम् ॥

अग्नेऽभ्यूर्ध्वबृहती ॥

अग्नेऽभ्यावर्तिन्नित्यस्या ऊर्ध्वबृहती छन्दः यस्यास्त्रयः पादा द्वादशकाः सोर्ध्वबृहतीत्युच्यते । "त्रिजागतोर्ध्वबृहतीत्युक्तेः" । अत्र तृतीयो द्व्यक्षरस्तस्य व्यूहद्वयेन पूरणम् इयमग्निदेवत्या आग्नेयीत्यनुवृत्तेः । अग्नेरवहरणे विनियोगः ॥

अग्ने महाबृहती ॥

आग्नेयीत्यनुवर्त्तते । अग्नेऽङ्गिर इतीयमृक् । अग्निदेवत्या महाबृहतीछन्दस्का । यस्या एकः पादो द्वादशाक्षरः । अन्ये चत्वारोऽष्टाक्षराः सा महाबृहती त्रिष्टुबुच्यते । "चत्वारोऽष्टका जागतश्च महाबृहतीत्युक्तेः" अत्राग्नेऽङ्गिर इत्याद्यपादस्य व्यूहेन द्वादशाक्षरपूरणं । अग्नेरवहरणेऽस्या विनियोगः ॥

पुनर्गायत्र्यौ ॥

पुनरूर्जा सह रय्येतीमे ऋचौ गायत्रीछन्दस्के । अग्निदेवते । आग्नेयी पदानुवृत्तेः । अग्नेरवहरण एव विनियोगः । पुनरित्यस्याः अन्त्यस्य व्यूहेन पूरणम् ॥

आत्वा ध्रुवोऽनुष्टुभम् ॥

आग्नेयमित्यनुवर्त्तते । आत्वा हार्षमितीमामृचमनुष्टुभमग्निदेवतां ध्रुवऋषिरपश्यत् । अभिमन्त्रणेऽस्या विनियोगः ॥

उदुत्तमं शुनःशेपो वारुणीं त्रिष्टुभम् ॥

उदुत्तममितीमामृचं वरुणदेवतां त्रिष्टुप्छन्दस्कां शुनःशेपऋषि-रपश्यत् । पाशमोचने विनियोगः चतुर्थस्य व्यूहेन पूर्तिः ॥

अग्ने त्रितऽआग्नेयीम् ॥

त्रिष्टुभमित्यनुवर्त्तते । अग्ने बृहन्नितीमामृचं अग्निदेवत्यां त्रि-ष्टुभं त्रितऋषिरपश्यत् । अग्नेः प्रागुदञ्चाप्रपहणेऽस्या विनियोगः आद्यान्त्ययोर्व्यूहेन पूरणम् ॥

हꣳ॰सऽउक्ता जगतीह यजुरन्ता ॥

इहाग्निप्रकरणे हंसः शुचिषदितीयं पृथग्जगतीछन्दस्का शुना उक्ता । कीदृशी । यजुरन्ते यस्याः सा तथा । राजसूयप्रकरणे त्वियम-तिजगत्युक्ता न तत्र यजुरन्ता । कुतः । एतामतिछन्दः संपद्यते-ति श्रुतेर्बृहदित्यस्यावयवस्यापृथग्यजुरभावात् । अत्र तु "अथैनमुपावहर-तीति प्रत्यक्षजगत्या जगतीमांल्लोकानमुतोऽवाचीव्यश्नुते" हꣳ॰ सः शुचिषदिति श्रूयते । बृहदिति निधानीयस्यावयवस्यापृथग्विनियो-गश्च श्रूयते । तेनात्र जगती यजुरन्तेति युक्तमेवोक्तं । तृतीयस्य व्यूहेन पूरणम् कॢप्तयजुरित्यपेक्षायामाह ॥

अन्ते बृहद्यजुः ॥

हंसः शुचिषदित्यस्याऽन्ते बृहदित्येतावद्यजुः । हꣳ॰सइत्यस्या अग्नेरवहरणे विनियोगः बृहदित्यासन्द्यां निधाने ॥

सीद त्वमाग्नेयी त्रिष्टुप् ॥

सीद त्वं मातुरित्येषा अग्निदेवत्या त्रिष्टुप् । उपस्थाने विनियो-गः आद्यपादयोर्व्यूहेन पूर्तिः ॥

अन्तरग्नेऽनुष्टुभौ ॥

आग्नेयीपदमनुवर्त्तते । अन्तरग्ने रुचा, शिवो भूत्वेतीमे ऋचौ अ-ग्निदेवते अनुष्टुभौ । उभे अग्नेरुपस्थाने विनियुक्ते । अन्तरित्यस्या आ

यौ व्यूहेन पूरणीयौ । त्रिष्टुभस्य द्वितीयचतुर्थौ च ॥ ७ ॥

दिवस्पर्य्याग्नेयं त्रैष्टुभम् द्वादशर्चं वत्सप्रीर्भालन्दनः ॥

दिवस्परि प्रथममित्येतद् द्वादशर्चं अग्निदैवतं त्रिष्टुप्छन्दस्कं भलन्दनस्य पुत्रो वत्सप्रीर्ऋषिरपश्यत् । उख्याग्नेरुपस्थानेऽस्य द्वादशर्चस्य विनियोगः, इन्धानऽएनमित्यस्य व्यूहेन पूरणम् । विश्वानऽइति द्व्याचरः, समुद्रे त्वा व्यूहः, आरोदसी भानुनेत्यत्र च । विभात्यर्थे । मर्त्तेष्वग्निः द्व्याचरः, समुद्रे त्वा व्यूहः आरोदसी भानुनेत्यत्र । विभात्यर्थे । मर्त्तेष्वग्निः । दृशानो रुक्मः, अत्र द्वितीयो यो द्व्यकः, आतंभज, त्वामग्ने हयोः । अस्तावीति व्यूहेन कृतेऽपि द्व्यकः । एतेषु पादेषु व्यूहः ॥

समिधाग्निं विरूपाक्षऽआङ्गिरसऽआग्नेयं गायत्रीम् ॥

इतिसूत्रमिहकेचिन्न पठन्ति समिधाग्निमित्यस्याकर्षादेः प्रागुक्तत्वात् । तस्मिंश्चाग्नौऽसमिदाधानेऽस्या विनियोगो वनीवाहने । अत्र विरूपाक्षस्थाने विरूपऽइति नामभेदात्पुनः पाठ इत्यपरे ॥

उदुत्वा तापसोऽनुष्टुभम् ॥

उदुत्वा विश्वे देवा इतीमामृचमग्निदेवतामनुष्टुभम् तापसऋषिरपश्यत् । आसंदीकल्पोस्याग्नेरुपगमने विनियोगः अत्र द्वितीयतृतीययोर्व्यूहः ॥

प्रेदनुष्टुप् ॥

प्रेदग्नऽइत्यस्या अनुष्टुप्छन्दः । अग्निर्देवता प्राग्गमने विनियोगः अत्रापि द्वितीयचतुर्थयोर्व्यूहः ॥

प्रप्रायमाग्नेयीं वासिष्ठस्त्रिष्टुभम् ॥

प्रप्रायमग्निरितीमामृचमग्निदेवतां त्रिष्टुप्छन्दस्कां वसिष्ठऋषि-

रपश्यत् । समिदाधानेऽस्या विनियोगः ॥

आपो देवीरापो ॥

त्रिष्टुप्पदमनुवर्त्तते । आपो देवीरित्येषा आपो मद्देवता । त्रिष्टुप् भस्मनोऽप्सु प्रक्षेपे विनियुक्ता । प्रथमो द्वादशाक्षरः ॥

अत्स्वग्ने विरूपमाग्नेयीं गायत्रीम् ॥

अप्स्वग्नइतीमामृचं अग्निदेवतां गायत्रीछन्दस्कां विरूपऋषिरपश्यत् । भस्मनोऽप्सु प्रक्षेपे विनियोगोऽस्याः । अत्र प्रथमे व्यूहः ॥

गर्भोऽअसि तिस्रोऽनुष्टुभः ॥

गर्भो अस्योषधीनामित्याद्यास्तिस्रऋचोऽनुष्टुप्छन्दस्काः । अग्नि देवताः । आग्नेयीपदानुवृत्तेः । गर्भइत्यस्याप्सु भस्मप्रक्षेपे विनियोगः । प्रसद्येत्यनयोरनामिकया भस्मादाने विनियोगः । गर्भइत्याद्ये व्यूहः द्वितीयः समकः पुनरूर्ज्जा सहरय्येत्यनयोः प्रागुक्तम् ॥

बोधा मे दीर्घतमास्त्रिष्टुभम् ॥

बोधामइतीमामृचं त्रिष्टुभं दीर्घतमाऋषिरपश्यत् । उपस्थानेऽस्या विनियोगः । चतुर्थे व्यूहः ॥

स बोधि सोमाहुतिराग्नेयीं यजुरन्तां गायत्रीम् ॥

स बोधि सूरिरितीमामृचं अग्निदेवत्यां यजुरन्तां गायत्रीछन्दस्कां सोमाहुतिऋषिरपश्यत् । उपस्थाने विनियोगः तृतीये व्यूहः ॥

यजुर्वैश्वकर्मणाम् ॥

सबोधीत्यस्यामन्ते विश्वकर्मणे स्वाहेत्येतद्यजुर्विश्वकर्मदैवतम् । प्रायश्चित्तहोमे विनियुक्तं । दैवीजगती ॥

पुनस्त्वा त्रिष्टुबाग्नेयीम् ॥

पुनस्त्वाऽऽदित्या इतीयमृक् त्रिष्टुप्छन्दस्का अग्निदेवता । समिदाधाने विनियुक्ता । अत्राद्यश्चतुर्दशकः । द्वितीयएकादशकः । चतुः

मैयकादयकः । दृष्यधिका ॥ ८ ॥

अपेत लिङ्गोक्तबहुदेवत्या ॥

त्रिष्टुबित्यनुवर्त्तते । अपेत वीतेतीयमृक् त्रिष्टुप्छन्दस्का । लिङ्गोक्ता बहवो देवता यस्याः सा लिङ्गोक्तबहुदेवत्या गार्हपत्यव्यूहने विनियुक्ता तृतीये व्यूहे ॥

सञ्ज्ञानमूषदेवत्यम् ॥

सञ्ज्ञानमित्यूषदेवत्यं यजुः । प्राजापत्याबृहती । ऊषनिवापेऽस्य विनियोगः ॥

अग्नेः सिकता ॥

अग्नेर्भस्मासीत्यस्य सिकतादेवता यजुस्त्रिष्टुप् । सिकतानिवापे विनियोगः ॥

चितः परिश्रितः ॥

चितस्थ परिश्रितइत्यस्य परिश्रितोदेवताः साम्नीत्रिक् । परिश्रितां परिश्रयणे विनियोगः ॥

अयꣳ० सः पञ्चर्चमाग्नेयं त्रैष्टुभं विश्वामित्रः ॥

अयꣳसो अग्नि, अग्ने यत्ते दिवि, अग्ने दिवोऽर्णं, पुरीष्यासः, इडामग्नइत्येतत्पञ्चर्चमग्निदेवत्यां त्रिष्टुप्छन्दस्कां विश्वामित्रऋषिरपश्यत् । आद्यानां चतसृणामर्द्धबृहतीनामुपधाने विनियोगः, इडामग्नइत्यस्यास्तिरश्चुपधाने विनियोगः, यदोषधीष्विति नवाक्षरो ऽयूहद्वयेनपूरणीयः । येनांतरिक्षमितिचैकेन । अच्छादेवानिति च, या रोचने, याश्चावस्तादिति च ॥

चतुर्थ्यनुष्टुप् ॥

अग्निपञ्चर्चे चतुर्थी पुरीष्यासइत्येषाऽनुष्टुभोऽपवादः । अत्र पञ्चमी व्यूहः इडामग्नइत्यत्र तृतीयचतुर्थयोर्व्यूहः ॥

२१

अयं तेऽनुष्टुप् ॥

अयं तइत्येषाऽग्निदेवत्याऽनुष्टुप्छन्दस्का । शिरस्युपधानेऽस्य विनियोगः । आग्नेयपदमनुवर्त्तते । इदमपि पुनरुक्तं सूक्तं । अयं ते इत्येतस्याः पूर्वमुक्तत्वात् ॥

चिदष्टके ॥

चिदसि, परिचिदसीत्येते यजुषी ऐष्टके इष्टके देवते । पूर्वयोश्शिरस्योपधाने विनियोगः चिदसि प्राजापत्यानुष्टुप् । परिचिदग्निर्गायत्री ॥

लोकं लिङ्गोक्तानुष्टुप् ॥

लोकं पृणेतीयमृक्लिङ्गोक्तदेवता अनुष्टुप् । लोकंपृणेत्यादिवतेत्यर्थः । द्वितीये त्वंशब्दे व्यूहः । लोकंपृणाभिमन्त्रणे विनियुक्ता ॥

ताऽअस्यार्षी प्रियमेधऽऐन्द्रः ॥

अनुष्टुबित्यनुवर्तते । ताऽअस्य सूददोहसऽइतीमामृचमब्देवतामनुष्टुभं ऐन्द्रः इन्द्रपुत्रः प्रियमेधसंज्ञऋषिरपश्यत् । सूददोहसाभिवदने विनियोगोऽस्याः ॥

इन्द्रं जेता माधुच्छन्दसऽऐन्द्रः ॥

अनुष्टुभमित्यनुवर्त्तते । इन्द्रं विश्वाऽइतीमामृचं इन्द्रदेवत्यामनुष्टुभं मधुच्छन्दसोऽपत्यं जेताऽपश्यत पुरीषनिवापेऽस्या विनियोगः ॥

समितं पतस्रो द्व्यग्निदेवत्या उष्णिगुपरिष्टाद्बृहत्युष्णिक्पङ्क्तयः ॥

समितं संकल्पेथां । संवां । अग्ने त्वं पुरीष्यो, भवतन्नऽइत्येताश्चत-

स्र ऋचो द्व्यग्निदेवताः द्वावग्नी देवते यासां ता द्व्यग्निदेवताः। यथाक्रममुष्णिगुपरिष्टाद्बृहत्युष्णिक्पङ्क्तयः। अग्निमेत्यस्या उष्णिक्छन्दः एकाधिकाप्युष्णिक्। अनियताक्षरपादत्वेऽप्यक्षराणामष्टाविंशतिसंख्यत्वात्। सर्वानित्यस्या उपरिष्टाद्बृहती। अथ द्वितीयसप्तकः तृतीयो नवक. चतुर्थश्चयोदशकइत्येकाधिका। अग्ने त्वं उष्णिक्। इयं एकाधिका। अप्युष्णिक् अनियताक्षरपादत्वेऽप्यक्षरैस्तथात्वात्। भवतं नः पङ्क्तिः। इयमाद्याऽऽर्षीपङ्क्तिः अनियताक्षरपादत्वेऽप्यक्षरैस्तथात्वात्। उक्ता आग्नेगार्हपत्यचितौ स्थापने चतसृणां विनियोगः॥

मातेवोरवास्तुतिस्त्रिष्टुप्॥

मातेव पुत्रमितीयमृगुखायाः स्तुतिः उखेव देवतेत्यर्थः त्रिष्टुप्। उखायाः। शिक्यादिमोचने विनियोगः। अथ द्वितीयो नवकः। चतुर्थो द्वादशकः॥ १॥

असुन्वन्तं नैर्ऋतं तृचं त्रैष्टुभम्॥

असुन्वन्तमयजमानं, नमः सूते। यस्यास्ते घोरमित्येतत्तृचं निर्ऋतिदेवत्यं त्रिष्टुप्छन्दस्कं नैर्ऋतीनामुपधाने विनियुक्तं। प्रथमायास्तृतीयो दशकः द्वितीयायाश्च। तृतीयो दशकः तृतीयायाः प्रथमो दशकः तृतीयचतुर्थौ द्वादशकौ॥

यन्ते यजमानदेवत्या॥

त्रिष्टुप्पदमत्रानुवर्त्तते। यन्ते देवीरितीयं यजमानदेवत्या त्रिष्टुप्। शिक्यरुक्मपाशीखवाऽऽसन्दीनां निरसने विनियुक्ता, अत्र द्वितीयाद्विपादत्वयं व्यूहेनैव पूर्यम्॥

नमो विराड्भूतिदेवत्यैकपदा॥

नमो भूत्यै इत्येकपदा विराड्भूतिदेवत्या दशाक्षरा हि विरा-

छिन्धुपति । एतेन व्यूहेन पूर्वोत्थाने विनियोगः ॥

निवेशनऐन्द्रीं त्रिष्टुभं विश्वावसुर्देवगन्धर्वः ॥

निवेशनः सङ्गमनइतीमामृचं इन्द्रदेवत्यां त्रिष्टुभं विश्वावसुदेवगन्धर्वोऽपश्यत् । मातादारि भवत्य गार्हपत्यचितिरूपस्याग्नेरुपस्थाने विनियोगः । द्वितीये व्यूहः ॥

सीरा द्वे सीरदेवत्ये बुधसौम्यो गायत्रीत्रिष्टुभौ ॥

सीरा युञ्जति, युनक्त सीरा इतीमे ऋचौ सीरदेवत्यौ क्रमेण गायत्री त्रिष्टुभौ सोमपुत्रो बुधऋषिरपश्यत् । युज्यमानस्य सीरस्याभिमन्त्रणे विनियुक्ते । युनक्त सीरेत्यत्र द्वितीयचतुर्थयोर्व्यूहः ॥

शुनं चतस्रः सीतादेवत्याः कुमारहारितो द्वे त्रिष्टुभौ तृतीयापङ्क्तिश्चतुर्थ्यनुष्टुप् ॥

शुनं सुफाला, घृतेन सीता, लाङ्गल, कामं कामदुघे । एताश्चतस्रः सीतादेवत्याः कुमारहारितऋषिरपश्यत् । आसु चतसृषु शुनं सुफाला, घृतेन सीता एते द्वे त्रिष्टुप्छन्दस्के । तृतीया लाङ्गलमित्येषा पङ्क्तिछन्दस्का । चतुर्थी कामं कामदुघे इत्येषा अनुष्टुप्छन्दस्का । सर्वासां कर्षणे विनियोगः, घृतेन सीते ते द्वादशाक्षरः । तेनैकाधिका । लाङ्गलम् सप्तकः । तेनैकोना पञ्चमे व्यूहः । इन्द्राग्निभ्यां व्यूहः । प्रजाभ्यः सप्तकस्तेनैकोना ॥

विमुच्यध्वमानडुही गायत्री ॥

विमुच्यध्वमित्येषा अनडुद्देवता गायत्री । अनडुद्विमोके विनियुक्ता एकाधिका आर्षीगायत्री । पादानामनियताक्षरत्वेऽपि चतुर्विंशत्यक्षरत्वात् ॥

यजूलिङ्गोक्तदेवतम् ॥

यजूरन्द्र इत्येतद्यजुर्लिङ्गोक्तदेवतम् । कुशस्तम्बे चतुर्गृहीतहोमे वि-

नियुक्तं । ब्राह्मीअनुष्टुप् । अन्त्यः पञ्चा अश्विनौ सूरी मेधामन्त्रेति लिङ्गोक्ता देवताः ॥ १० ॥

याओषधीः सप्तविंᳪ॰शतिमनुष्टुभओषधिस्तुतिमाथ-र्वणो भिषक् ॥

याऽओषधीः पूर्वाजाताइत्याद्या, योऽअस्मां अभिदासतीत्यन्ताः सप्तविंशतिसंख्या अनुष्टुप्छन्दस्का ओषधिस्तुतिमोषधिदैवत्या अथर्वणः पुत्रो भिषक्संज्ञकऋषिरपश्यत् । अनुष्टुभइतिद्वितीयाबहुवचनम् । तद्विशेषणम् तु सप्तविंशतिमिति द्वितीयैकवचनं "विंशत्याद्याःसदैकत्वइतिवचनात्" । वीरुधः पारयिष्णवः, इष्कृता, धनं सनिष्यन्तीनां । अतिविश्वाः स्तेनइवेति, नवक. ओषधीः प्रातुष्यवुर्यत्किञ्च, साकं यक्ष्म, साकं वातस्य । बृहस्पतिप्रसूतानां मुञ्चन्तु, एते सप्तमाक्षराः एतेषु व्यूहः । असंभवेएकोनं छन्दः । आद्याः पञ्चदश सर्वौषधवपने विनियुक्ताः अवशिष्टानां द्वादशानां मुञ्चन्तु मा शपथ्यादित्यादीनां क्वापि विनियोगो नास्तीत्याह ॥

मुञ्चन्तु षड्द्वादशानारभ्याधीताः ॥

मुञ्चन्तु मा शपथ्यादित्याद्या द्वादशर्चोऽनारभ्याधीताः बन्धुऋषिरपश्यत् । कस्मिन कर्म विशेषमनारभ्याधीता, अनारभ्याधीताः । अनारभ्याधीता अनारभ्याधीताः आसां क्वापि विनियोगो नास्तीत्यर्थः, मुञ्चन्तु मा । अथो वरुण्यात् । बृहस्पतीति सप्तकः । अवसं द्वे । मा वः । सर्वमस्तु । उपभयइतिनवकः । सोमेनेति सप्तकः । अशसइति नवकः, त्वांगन्धर्वाः । सहस्व । सहस्वपाप्मा, दीर्घायुस्ते, दशकः तेन हृध्यधिका । स्वमुत्तमा । अत्र एतेषु पादेषु यथासंभवं व्यूहः । तदसंभवे छन्दसो न्यूनता ॥

मा मा हिरण्यगर्भः कायीं त्रिष्टुभम् ॥

सा माञ्चि पृथ्वी द्वितीयाद्यर्चं कार्षीं कायदेवत्यां त्रिष्टुभम् हिरण्यगर्भऋषिरपश्यत् । द्वितीये व्यूहः पुरस्ताल्लोगेष्टकोपधाने विनियोगोऽस्याः ॥

अभ्यावर्त्तस्वोष्णिगाग्नेयी ॥

अभ्यावर्त्तस्वेतीयमृक् उष्णिक् अग्निदेवत्या । अत्र चैकादशकस्तेनैकोना । दक्षिणतो लोगेष्टकोपधाने विनियुक्ता ॥

अग्ने यद्गायत्री ॥

आग्नेयीत्यनुवर्त्तते । अग्ने यत्ते शुक्रमितीयमृक् अग्निदेवत्या गायत्रीछन्दस्का पश्चाल्लोगेष्टकोपधाने विनियुक्ता । अत्र प्रथमो नवकः तेनैकाधिका ॥

इषं त्रिष्टुप् ॥

इषमूर्जमित्यस्यास्त्रिष्टुप्छन्दः आशीर्देवता । पात्वत्रस्योत्तरतो लोगेष्टकोपधाने विनियोगः चतुर्थस्य सिकतापातने । अत्र प्रथमतृतीययोर्व्यूहः ॥

अग्ने तव पावकोऽग्निराग्नेयं षडृचम् ॥

अग्ने तवेति षडृचम् अग्निदेवतम् पावकाग्निऋषिरपश्यत् सिकतावापे विनियोगोऽस्य षडृचस्य ॥

प्रथमे विष्टारपङ्क्तिः ॥

यस्या द्वितीयतृतीयौ पादौ द्वादशकौ आद्यतुरीयावष्टकौ । सा विष्टारपङ्क्तिः । "मध्यमौ चेद्विष्टारपङ्क्ति" रितिवचनात् । बृहद्भानो । अत्र व्यूहेन पूरणम् । पावकवर्चा इत्ययं नवकस्तेनैकाधिका ॥

तिस्रः सतोबृहत्यः ॥

ऊर्जो नपात् । इरज्यन्नग्ने, इष्कर्त्तारं इत्येतास्तिस्र ऋचः सतोबृहत्यः । यस्याः प्रथमतृतीयौ द्वादशकौ इतरावष्टकौ सा सतोबृहती-

"ककुभो जगती ततोबृहतीत्युक्तेः" स्तेऽस्य इत्यत्र व्यूहः। वक्षे दाये। भूत्वा च ॥

उपरिष्टाज्ज्योतिःषष्ठी ॥

अग्निमूर्धेव यद्देवषष्ठी ऋताचामजिह्वेमा ऋगुपरिष्टाज्ज्योतिश्छन्दस्का। यस्या ऋचस्त्रयः पादा द्वादशाक्षराश्चतुर्थोऽष्टाक्षरः। सोपरिष्टाज्ज्योति" र्यतोऽष्टकस्ततो ज्योतिरित्युक्तेः" अत्र युगृकर्षं देवं मानुषदृत्वमयोर्व्यूहेनपूरणम् ॥

आप्यायस्व गोतमः सौमीर्गायत्रीत्रिष्टुबुष्णिहः ॥

आप्यायस्व समेतु। सन्ते पयांसि। आप्यायस्व मदिन्तमेत्येतास्तिस्र ऋचः सौमीः सोमदेवताः। क्रमेण गायत्रीत्रिष्टुबुष्णिक्छन्दस्का गोतमऋषिरपश्यत्। आद्ययोराप्यायस्व, सन्ते पयांसीत्येतयोः सिकतानामाप्यायने विनियोगः, तृतीयस्या विनियोगस्तत्रो नास्ति। विश्वतः सोमेत्यत्र व्यूहः। संवृत्त्यानीत्यत्र द्वौ व्यूहौ। दिवीत्यत्र च ॥

आतेऽ वत्सारः ॥

आते वत्सो मनइत्येतामवत्सारऋषिरपश्यत् ॥

तुभ्यंता द्वे विरूपः ॥

तुभ्यंता, अग्निः प्रियेष्वितीमे द्वे ऋचौ विरूपऋषिरपश्यत्। तिस्रो गायत्र्य आग्नेय्यः, आते वत्सस्तुभ्यंता, अग्निः, प्रियेष्वितीमास्तिस्र ऋचोऽग्नि देवता गायत्रीछन्दस्काः। तिसृणामपि चयने अग्निभ्यः प्रणीयमानेभ्योऽनुब्रूहीति प्रेषितस्य होतुरनुवाचने विनियोगः। परमाचित्। अयं समकः। तनेकोना ॥ ११ ॥

मयि ककुबाग्नेयी ॥

मयि गृह्णामीतीयमृक्ककुप्छन्दस्का अग्निदेवता। यस्यास्त्रिपदा मध्यमो द्वादशकः। प्रथमतृतीयावष्टकौ। सा ककुबुष्णिगुच्यते।

"मध्यमचेत्ककुबिति" वचनात् । अत्र तु मध्यमचतुर्दशकत्वेन दृद्ध्यधिका यजमानजपेऽस्या विनियोगः ॥

मह्यादित्यदेवता त्रिष्टुप् ॥

मह्यमद्यायमित्येषा त्रिष्टुप्छन्दस्का । आदित्यदेवता च । तृतीये व्यूहः । एकोनता वा । रुक्मोपधाने विनियोगः ॥

हिरण्यगर्भो हिरण्यगर्भः कायं त्रिष्टुभम् ॥

हिरण्यगर्भः समवर्त्ततेतीमामृचं कायदेवतां त्रिष्टुभं हिरण्यगर्भः ऋषिरपश्यत् । हिरण्यपुरुषोपधानेऽस्या विनियोगः । चतुर्थे व्यूहः ॥

नमोऽस्तुसार्पं तृचमानुष्टुभम् ॥

नमोऽस्तु सर्पेभ्यइतीदं तृचं सर्पदैवतमनुष्टुप्छन्दस्कं । यजमानस्योपस्थाने विनियुक्तं । नमोऽस्त्वित्ययं षडक्षरः व्यूहेन सप्ताक्षरः । तेनैकोना । सर्पेभ्यइत्यत्र पुनर्यकारव्यूहो वा, याऽइषवइति नवकस्तेनैकाधिका ॥

कृणुष्व पञ्च प्रतिसरा राक्षोघ्न्यो दैवानामार्षम् ॥

कृणुष्व पाजइत्याद्याः पञ्चऋच. प्रतिसरा राक्षोघ्नाः राक्षसानभिस्वरूपेण सरन्तीति प्रतिसराः अतएव रक्षोहननसम्बन्धात् राक्षोघ्न्यइत्यासां संज्ञाः । दैवानामार्षं । देवा आसामृषयइत्यर्थः । "एतद्वै देवा अबिभयुरिति देवाग्प्रकृत्य तएता राक्षोघ्नाःप्रतिसरा अपश्यन् कृणुष्वपाजइत्यादिश्रवणात्" ॥

सर्वास्त्रिष्टुभ आग्नेयी वामदेवश्चापश्यत् ॥

कृणुष्वपाज इत्याद्याः सर्वाः पञ्चापि त्रिष्टुप्छन्दस्का अग्निदेवताः वामदेवश्च ऋषिरपश्यत् । चकारः पूर्वोक्तैर्देवैऋषिभिः समुच्चयार्थः पुरुषे पञ्चगृहीतहोमे सर्वासां विनियोगः । याऽइव राजेव । तृतीयो चतुर्थो व्यूहः । तपूंष्यग्ने द्वौ व्यूहौ उदग्ने षष्ठिमान् । प्रत्यो

र्मूर्द्धः । नीचा तं । ऊर्द्ध्वो भवेत्यत्र च । आविरित्यत्र द्वौ ॥

अग्नेष्ट्वा यजुराग्नेयम् ॥

अग्नेष्ट्वा इत्येतदग्निदैवतम् यजुःपङ्क्तिः काश्मर्यमयीस्रुगुपधाने विनियोगः । अग्निर्मूर्द्धेत्यस्याः प्रागुक्तं सर्वम् ॥

इन्द्रस्यैन्द्रम् ॥

इन्द्रस्य त्वौजसेति यजुरिन्द्रदैवतम् । यजुःपङ्क्तिः । औदुम्बरस्रुगुपधाने विनियोगः ॥

भुवस्त्रिशिरा आग्नेयी त्रिष्टुभम् ॥

भुवो यज्ञस्येतीमामृचं अग्निर्देवतां त्रिष्टुभम् त्रिशिराश्चाऽपश्यत् । औदुम्बर्याः स्रुच उपधान एवास्या अपि विनियोगः ॥ १२ ॥

ध्रुवास्यूर्द्ध्वबृहती ॥

ध्रुवाऽसि धरुणेतीयमृक् ऊर्द्ध्वबृहती, यस्यास्त्रयः पादा द्वादशकाः । सोर्द्ध्वबृहती । "त्रिजागतोर्द्ध्वबृहतीत्युक्तेः" । अत्र प्रथमस्त्रयोदशकः द्वितीयो द्वादशकः । तृतीयो दशक इति । व्यूहेन छन्दः पूर्त्तिः ॥

प्रजापतिरनुष्टुप् ॥

प्रजापतिष्ट्वेतीयमनुष्टुप् । आद्यौ नवकौ । चतुर्थः सप्तकः ॥

भूरसि प्रस्तारपङ्क्तिः ॥

भूरसीत्यस्याः प्रस्तारपङ्क्तिश्छन्दः । यस्या आद्यौ द्वादशकौ । पश्चात्त्यावष्टकौ सा प्रस्तारपङ्क्तिः । "आद्यौ चेत्प्रस्तारपङ्क्तिरित्युक्तेः" अत्र आद्य एकादशकः द्वितीयस्त्रयोदशकः तृतीयचतुर्थौ पञ्चमषष्ठवदिति एवं चत्वारिंशदक्षरैषा ॥

आसाए स्वयमातृण्णादेवता विश्वस्मा एतस्य च यजुषः ॥

आसां ध्रुवासीत्यादितसृणामृचां विश्वस्मै प्राणायेत्येतस्य यजुषश्च स्वयमातृण्णादेवता । स्वयमातृण्णोपधाने सर्वेषां विनियोगः । त्रि-

स्व एकादशिकात्मने चार्षी अनुष्टुप् ॥

काण्डात्काण्डादानुष्टुभं द्व्यृचमग्निना दृष्टम् दूर्वेष्टकादैवतम् ॥

काण्डात्काण्डात्, या शतेनेत्येतद्व्यृचद्वयं दूर्वेष्टकादैवतमग्निना दृष्टं अग्निरस्यर्षिरित्यर्थः । तस्मादेतं द्व्यृच व्यूहः । दूर्वेष्टकोपधाने विनियोगः ॥

यास्तेऽग्न आग्नेयं द्व्यृचमानुष्टुभमिन्द्राग्निभ्यां दृष्टम् ॥

यास्ते अग्ने, या वो देवा इत्येतद्व्यृचं आग्नेयं अनुष्टुप्छन्दस्कमिन्द्राग्निभ्यां दृष्टं । इन्द्राग्नी अस्य ऋषी इत्यर्थः । अत्र दिवमातन्वतीति नवकः । तेनैकाधिका । गोष्वग्नेष्वित्यत्र व्यूहः । द्विजुषदुपधाने विनियोगः ॥

विराडयं लोकः ॥

विराड्ज्योतिरित्यस्यायं लोको देवता । यजुरनुष्टुप् । रेतःसिगुपधाने विनियोगः ॥

स्वराडसौ लोकः ॥

स्वराड्ज्योतिरित्यस्यासौ लोको देवता । यजुरनुष्टुप् । रेतःसिगुपधाने विनियोगः ॥

प्रजापतिदृष्टा वैश्वज्योतिषम् ॥

प्रजापतिष्ट्वेत्येतद्यजुर्वैश्वज्योतिषम् । विश्वज्योतिरस्य देवतेत्यर्थः । व्यूहः शक्वरीछन्दः । विश्वज्योतिष उपधाने विनियोगः ॥

मधुश्चर्तुदैवतम् ॥

मधुश्चर्तुदैवतं । मधुश्च माधवश्चेत्येतद्यजुर्ऋतुदैवतं अत्र षट्त्रिंशदक्षराणि सन्ति तेनानियताक्षरत्वाच्छन्दसोऽभावः । ऋतव्योपधानेऽस्य विनियोगः ॥

अषाढाऽसि सवितापश्यत् । द्वे वाऽपस्याग्निष्टका- दैवतम् ॥(१)

अषाढासि इतीयमृक् इष्टकादैवतं विराडनुष्टुप्छन्दस्का स- वितारुषिरपश्यत् ॥

अत्राद्यौ एकादशाक्षरौ तृतीयोऽपि व्यूहेनैकादशकः । तेनेयं विराडनुष्टुप् । "दशकास्त्रयो विराड्ढेकादशका वेति" वचनात् । अषा- ढोपधानेऽस्या विनियोगः ॥ १३ ॥

मधु वाता वैश्वदेवं तृचं गायत्रं गौतमः ॥

मधु वाता इत्येतत्तृचं विश्वदेवतं गायत्रीछन्दस्कं गौतमऋषिरप- श्यत् । दधिमधुघृतैः कूर्माऽभ्यञ्जनेऽस्य विनियोगः । अत्र माध्वीर्नः इत्यत्र व्यूहः । मधुमान्नस्तु सप्तकः । तेनैकोना ॥

अपां गंभन्पङ्क्तिः ॥

अपां गंभन्नित्यस्याः पङ्क्तिः छन्दः अत्र तृतीयो द्वादशकः अन्ये दशकाः । तेन द्व्यधिका स्वराट्पङ्क्तिरियं कूर्मोपधाने विनियोगः ॥

त्रीन्त्समुद्रांस्त्रिष्टुप् ॥

त्रीन्त्समुद्रानित्यस्यास्त्रिष्टुप्छन्दः । अत्र प्रथमो दशकः तृतीयो द्वा- दशकः अन्यौ एकादशकौ ॥

कौर्म्यं द्व्यृचम् ॥

अपां गंभन् त्रीन्त्समुद्रानित्येतत् ऋग्द्वयं कौर्म्यं कूर्मदैवतम् कूर्मश्च "प्रजापतिरादित्यो वेति संहिताभाष्ये" त्रीन्त्समुद्रानित्यस्य कू- र्मपाते विनियोगः । तृतीयाऽत्र मह्यौ द्यौरिति कूर्मोपधाने विनियु- क्ता । तथा कल्पादि प्रागुक्तम् ॥

ध्रुवाऽसि त्रिष्टुप् ॥

---

(१) अषाढासि हे सवितापश्यद्वा वाऽपस्याग्निष्टकादैवते विराडनुष्टुभाविति. काण्वशाखीय सर्वानुक्रमपाठो बोध्यः ॥

ध्रुवाऽसि धरुणेत्यस्यास्त्रिष्टुप्छन्दः उखोपधानेऽस्या विनियोगः । प्रथमो द्व्यक्षरस्तेनैकाधिका ॥

इषे बृहती ॥

इषे रायस्त्वेत्यस्या बृहतीछन्दः उखोपधान एव विनियोगः । प्रथमो द्व्यक्षरः । अन्त्योऽपि व्यूहेन द्व्यक्षरः द्वादशकौ । तेनैषमार्षीबृहती पादाक्षरनियमाभावेऽपि ॥

औखं द्व्यृचम् ॥

ध्रुवाऽसि, इषे रायस्त्वेतद्व्यृचमौखं उखादेवताम् ॥

अग्ने युक्ष्वाग्नेयं द्व्यृचङ्गायत्रम् ॥

अग्ने युक्ष्वाहीत्येतद्व्यृचमग्निदेवतम् गायत्रीछन्दस्कं । उखायां स्रुवाहुतिहोमे उपस्थाने वा विनियुक्तम् ॥

आद्यायां भरद्वाजः ॥

आद्यायाः अग्ने युक्ष्वाहीत्यस्याः भरद्वाजऋषिः ॥

द्वितीयस्या विरूपः ॥

द्वितीयस्या युक्ष्वाहीत्यस्याः विरूपऋषिः । अथ तृतीये व्यूहः ॥

सम्यक्त्रिष्टुब्लिङ्गोक्तदेवता ॥

सम्यक्स्रवन्तीत्यस्य त्रिष्टुप्छन्दस्का लिङ्गोक्तदेवतामुखे हिरण्यशकलप्रासने विनियुक्ता ॥

ऋचे त्वा बृहती ॥

ऋचे त्वा रुचे त्वेतीयं लिङ्गोक्तदेवता हिरण्यशकलदेवतेत्यर्थः । बृहतीछन्दस्का । व्यूहेनैषमार्षीबृहती । पादानामक्षरनियमाभावात् । अयमृचः षट्स्थानेषु हिरण्यशकलप्रासने विनियुक्ता । ऋचे त्वेत्यस्य दक्षिणनासिकायाम् । रुचे त्वेति सव्यायां । भासे त्वा दक्षिणचक्षुषि अभूदिदं । दक्षिणश्रोत्रे ॥

अग्निर्ज्योतिरित्यौष्णिक् ॥

त्रिष्टुबग्निदेवतीत्यनुवर्त्तते । अग्निर्ज्योतिरितीयमृगुष्णिक्छन्दस्का । आद्यस्याईकोत्तरत्वेऽपि हिरण्मयकल्पासने विनियोगः, सहस्रदा इत्य-स्य पुरुषशिरस उदुपधाने । द्वावाद्यावष्टकौ । तृतीयस्य व्यूहेन पादमापर-पूरणम् ॥

आदित्यं गर्भं पञ्चर्चमाग्नेयं त्रैष्टुभम् ॥

आदित्यं गर्भं पयसा । वातस्य जूतिम् । अजस्रमिन्दुम् । वरूत्रीं त्व-ष्टु, योऽअग्निरग्नेरित्येतत्पञ्चर्चं अग्निदेवतं त्रिष्टुप्छन्दस्कं । आदित्यं गर्भमित्यस्याः पुरुषशिरस उपधाने विनियोगः, वातस्य जूतिमित्यस्य अश्वशिरस उपधाने । अजस्रमिन्दुमित्यस्या गोः शिरस उपधाने । वरू-त्रीमित्यस्या अविशिरस उपधाने । योऽअग्निरित्यजशिरस उपधाने विनियोगः । अत्र पञ्चर्चं अग्ने माहिᳬसीः । अजस्रमिन्दुं अनयोर्व्यू-हः । मा माहिᳬसीः इत्यूहः, योऽअग्निः व्यूहः । ओंकारादिरादितकः, त्रिष्टुप्रैवमानमित्यस्यास्तु कल्पादि प्रागुक्तं । (१)अथाईचैव स्रुवाहु-त्योर्होमे विनियोग इति विशेषः ॥

इमं मा पञ्चर्चमाग्नेयं त्रैष्टुभमेव द्वे चान्ते यजुषी ॥

इमं माहिᳬसीः । इमं मा हिᳬसीर्द्विपादं । इमᳬसाहस्रम । इम-मूर्णायुं । अजो ह्यग्नेरित्येतत्पञ्चर्चमग्निदेवतं त्रिष्टुप्छन्दस्कमेव मनु मयुक्ते युक्तक्षत्विन्नाशीनामक्षराणि मध्ये गणयित्वाधिकछन्दोऽन्तर-गंका काव्यैत्यैकाराव. । पञ्चानामप्यृचामन्ते प्रत्येकं द्वे यजुषी । म-युक्ते युक् । संहितस्तंतइत्यादिके । उपधानमेव पुरुषादिशिरसामुप-धाने क्रमेण पञ्चानामृचां सयजुष्कानां विनियोगः । इमं मा हिᳬसी-र्द्विपादं । इत्यूहः, नैन चिन्वानः व्यूहः । मयुक्ते । दैवीजगती । य.न्हि

---

(१) अदृष्टैवंशः स्रुवहुत्योर्होमे विनियोग इति पञ्चान्तपाठः ॥

षः यजुर्बृहती । गौरन्ते दैवी जगती । गवयान्ते यजुरनुष्टुप् । उष्ट्रान्ते । दैवी जगती । शरभान्ते यजुरनुष्टुप् अन्विष्टमिति यजुर्बृहत्येव सर्वं च । व्यचमानं । अजो ह्यग्नेः व्यूहः । सोऽपरस्मात् । इमं साहस्रमित्यासु तिसृषु अवसानद्वयात्पराणि त्रीणि यजूंषि । गवयमारण्य, उष्ट्रमारण्यं । शरभमारण्यमित्यादीनि, गवयं, शरभं । इमे साम्न्यनुष्टुभौ । उष्ट्रं त्वगुष्णिक ॥

त्वं यविष्ठोऽग्निनाः काव्य आग्नेयीमनिरुक्तां गायत्रीम् ॥

त्वं यविष्ठेतीमामृचं अग्निदेवतामनिरुक्तां मध्येऽग्निपदमिति निरुक्तिरहिता गायत्रीं कुबेरपत्यमुशन । ऋषिरपश्यत्, प्रथमे व्यूहः, चित्यापत्यानेऽस्या विनियोगः ॥

अपां त्वा विंशतिरैष्टकानि ॥

अपां त्वेमन्नित्यादीनि पाङ्क्तेन त्वा छन्दसेत्यन्तानि विंशतियजूंषि इष्टकादेवतानि । अपस्यानामुपधाने विनियुक्तानि । अपां त्वेमन् । १ । अपां त्वोद्मन् । २ । यजुरनुष्टुभौ । अपां त्वा भस्मन् । यजुर्बृहती ॥ ३ ॥ ज्योतिषि । यजुः पङ्क्तिः ॥ ४ ॥ अयने । यजुर्बृहती ॥ ५ ॥ अर्णवे ॥ ६ ॥ समुद्रे ॥ ७ ॥ सरिरे ॥ ८ ॥ यजुषस्त्रिष्टुभः । क्षये । यजुर्बृहती ॥ ९ ॥ सधिषि ॥ १० ॥ सदने ॥ ११ ॥ सधस्थे ॥ १२ ॥ यजुः पङ्क्तयः । योनौ ॥ १३ ॥ यजुर्बृहती । पुरीषे ॥ १४ ॥ पाथसि ॥ १५ ॥ यजुःपङ्क्ती । गायत्रेण ॥ १६ ॥ त्रैष्टुभेन ॥ १७ ॥ जागतेन ॥ १८ ॥ यजुर्गायत्र्यः । आनुष्टुभेन ॥ १९ ॥ आसुर्यनुष्टुप् । पाङ्क्तेन त्वा ॥ २० ॥ यजुस्त्रिष्टुप् ॥

अयं पुरः पञ्चाशत्प्राणभृद्देवत्यानि ॥

अयंपुरोभुवइत्यादीनि वाचं त्वष्टानि प्रजाभ्य इत्यन्तानि पञ्चाशद्यजूंषि प्राणभृतामुपधाने विनियुक्तानि । एषां छन्दांस्युच्यन्ते । अ-

र्बन्धुरः । यजुर्गायत्री ॥ १ ॥ तस्य प्राणः । यजुरनुष्टुप् ॥ २ ॥ वसन्तः यजुरुष्णिक् ॥ ३ ॥ गायत्री । वासन्ती ॥ ४ ॥ गायत्र्यै ॥ ५ ॥ गायत्रात् ॥ ६ ॥ देव्यस्त्रिष्टुभः, उपांशुर्गो देवीपङ्क्तिः ॥ ७ ॥ त्रिवृतः । देवीजगती ॥ ८ ॥ वसिष्ठः देवीपङ्क्तिः ॥ ९ ॥ प्रजापतिर्ऋग्गायत्री ॥ १० ॥ अयं दक्षिणा । यजुर्बृहती । १ ॥ तस्य मनो । यजुर्बृहती ॥ २ ॥ ग्रीष्मो देवीपङ्क्तिः, । ३ । त्रिष्टुप् । देवीबृहती ॥ ४ ॥ त्रिष्टुभः देवीपङ्क्तिः ॥ ५ ॥ स्वारात् यजुर्गायत्री ॥ ६ ॥ अन्तर्यामात् यजुरनुष्टुप् ॥ ७ ॥ पञ्चदशात्यजुर्गायत्री ॥ ८ ॥ भरद्वाजो यजुर्गायत्री ॥ ९ ॥ प्रजा० ऋग्गायत्री ॥ १० ॥ अयं पश्चात् । यजुर्बृहती ॥ १ ॥ तस्य चक्षुः । यजुर्बृहती । २ । वर्षाः देवीपङ्क्तिः ३ जगती देवीपङ्क्तिः ४ जगत्याऽऋक्सम । यजुर्गायत्री । ५ । ऋक्समात् देवीपङ्क्तिः । ६ । शुक्रात् । देवीत्रिष्टुप् । ७ । सप्तदशात् । देवीजगती । ८ । जमदग्निः, यजुर्गायत्री । ९ । प्रजापतिः । ऋगायत्री । १० । इदमुत्तरात्स्वः । यजुर्गायत्री । १ । तस्य श्रोत्रं यजुर्गायत्री । २ । शरच्छ्रौत्री । यजुर्बृहती । ३ । अनुष्टुप् । यजुर्गायत्री । ४ अनुष्टुभऽऐडम् । यजुर्गायत्री । ५ । ऐडात् । देवीबृहती । ६ । मन्थिनो देवीजगती । ७ । एकविंशमात् । देवीजगती । ८ । विश्वा । देवीत्रिष्टुप् । ९ । प्रजापतिः, ऋग्गायत्री ॥ १० ॥ इयमुपरि । देवीजगती । १ । तस्यै । देवीपङ्क्तिः । २ । हेमन्तो । देवीपङ्क्तिः । ३ । पङ्क्तिर्हैमन्तीर्देवी पङ्क्तिः । ४ । पङ्क्त्यै । यजुर्गायत्री । ५ । निधनवतः । यजुर्बृहती । ६ आग्रयणात् । यजुस्त्रिष्टुप् । ७ । त्रिणवात् । साम्नीष्णिक् । ८ । विश्वकर्म ऋषिः । यजुर्गायत्री । ९ । प्रजापतिर्ऋग्गायत्री । १० ।

लोकं ताऽइन्द्रं तिस्रः प्रतीकोक्ताः ॥(१)

---

(१) लोकम्पृण ताऽअस्येन्द्रंविश्वाइतिस्रः प्रतीकोक्ताः इति काण्वपाठः ॥

लोकं पृण छिद्रं पृण । ताऽअस्य सूददोहसः, इन्द्रं विश्वा इत्येतास्तिस्रस्त्वचो ऽत्र प्रतीकोक्ताः । प्रतीकेनादिमात्रेणोक्ताः सम्यः सकलाः प्रयोगकाले ज्ञेयाः, लोकं पृणेत्यस्याः । लोकंपृणाभिमर्शने विनियोगः । ताऽअस्येत्यस्याः सूददोहसाभिवदने । इन्द्रं विश्वाइत्यस्याः पुरीषनिवपने ॥ (१)

एवर्ठ॰ सर्वत्र ॥

अत्र लोकं ता इन्द्रमित्येवं संहितायां पठ्यते । अनन्त्वान्वयइत्यस्यां कं छिन्नायां । यन्नीराजित्यस्यां । नवविंश॰ग्रत्या स्तुवतेत्यस्यामाम्नाते तत्र सर्वत्र । एतास्तिस्रस्त्वचः प्रतीकोक्ताः सकला ज्ञेयाः ॥ २४ ॥

इति प्रथमा चितिः समाप्ता । अथ द्वितीया चितिः ॥

अभिधीयतइतिशेषः द्वितीया देवानामित्यस्य विषयोऽत्र प्रदर्शनार्थमिदमुक्तम् ॥

ध्रुवचितिः पञ्चाश्विन्यः ॥

ध्रुवचितिर्ध्रुवयोनिः । कुलायिनी । स्वैर्दक्षैः । पृथिव्याः पुरीषं । अदित्यास्त्वापृष्ठेइत्येताः पञ्चऋचआश्विन्यः अश्विदेवत्याः आश्विनीनामुपधाने क्रमेणविनियुक्ताः । आसां छन्दांस्याह ॥

तासां प्रथमा विराट्चतस्त्रस्त्रिष्टुभो यजुरन्ताः ॥

तासां पञ्चानां प्रथमा ध्रुवचितिरित्येषा विराडनुष्टुप् । "दशकास्त्रयो विराडेकादशकाविष्टुभे" । कुलायिनीत्याद्याश्चतस्रस्त्रिष्टुभः । अत्रापि यजुरन्ताः । अश्विनाध्वर्यूइत्येतद्यजुरन्ते यासां स्थाः । अस्य यजुषः । सामगायत्रीछन्दः ध्रुवचितिः आद्यतृतीयावेकादशकौ । द्वितीयो दशकः । योने सीद स्वैर्दक्षैः । आवेशा ।

---

(१) निवापे विनियोग इतिपद्धतिपाठः ॥

एष व्यूहः, अदित्यास्त्वा आर्चीत्रिष्टुप् एकाधिका। पादानामनियतावत्त्वेप्यऽक्षरैस्तथात्वात्

युङ्क्षर्त्तव्यम् ॥

युङ्क्ष्व युक्षिवेत्येतद्यजुर्ऋर्त्तव्यं। ऋतुदेवतम्। "वायुहतुमिमुषसीव त्" ऋतव्ययोरुपधाने विनियुक्तः,अत्र द्व्यधिकं शतद्वयमक्षराणि सन्ति अतो नवद्वये व्यूहः कर्त्तव्यः। तथाचेयम्प्रकृतिः संपद्यते ॥

सजूः पञ्च विश्वेषां देवानामार्षम् ॥

सजूर्ऋतुभिरित्यादीनि पञ्च यजूंषि विश्वेषां देवानामार्षं विश्वेदेवा एषां ऋषयइत्यर्थः ॥

ताएव देवताः ॥

विश्वेदेवा एवैषां यजुषांदेवता इत्यर्थः। वैश्वदेवीनामुपधाने क्रमेण पञ्चानां विनियोगः। पञ्चानामपि ब्राह्मीउष्णिक्छन्दः। अधिका ॥

प्राणम् मे पञ्च वायव्यानि ॥

प्राणम् मे पाहीत्यादीनि पञ्चयजूंषि वायुदेवतानि। प्राणभृतामुपधाने क्रमेण विनियुक्तानि, प्राणम् मे। दैवीपङ्क्तिः,। १। अपानं दैवीत्रिष्टुप्। । व्यानं दैवीपङ्क्तिः, । ३। चक्षुर्मे। यजुरनुष्टुप्। श्रोत्रं यजुर्गायत्री ॥ ५ ॥

अपः पञ्चापानि ॥

अपः पिन्वेत्यादीनि पञ्चापानि अब्देवतानि अपस्यानामुपधाने क्रमेण विनियुक्तानि। अपः पिन्व। दैवीबृहती। १। ओषधीः दैवीपङ्क्तिः। २। द्विपात्दैवीबृहती। ३। चतुष्पात्। दैवीपङ्क्तिः। ४। दिवो। दैवीजगती ॥ ५ ॥

मूर्द्धा वयएकोनविंशतिर्लिङ्गोक्तदेवतानि ॥ १५ ॥

वयस्यानामुपधाने क्रमेण विनियुक्तानि। मूर्द्धा वयः। यजुःपङ्-

क्तिः, । १ । अयं । यजुर्बृहती । २ । त्रिवत्सोयजुः पङ्क्तिः, । ३ । विश्वकर्मा । ४ । यजुर्जगती, । ५ । वृष्णिः । यजुर्बृहती । ६ । पुरवती । यजुर्बृहती । ७ । आप्या यजुर्बृहती । ८ । सिंहश्री यजुरनुष्टुप् । ९ । पष्ठवाट् यजुः पङ्क्तिः, । १० । उक्षा यजुरनुष्टुप् । ११ । ऋषभो यजुर्जगती । १२ । अनड्वान् । १३ । धेनुः । यजुर्बृहत्यौ, । १४ । अविः यजुरनुष्टुप् । १५ । दित्यवाड् यजुर्बृहती । १६ । पञ्चाविः यजुः पङ्क्तिः । १७ । त्रिवत्सो । १८ । तुर्यवाट् । यजुर्बृहत्यौ । १९ । लोकंपृण, ताऽअस्य । इन्द्रं विश्वा इति तिस्रो ऋचोऽन्ताः प्रतीकोपात्ताः पूर्ववत् ॥

इति द्वितीया चितिः समाप्ता ॥ १५ ॥

अथ तृतीया चितिः ॥

अ॥ ॥ ॥ ीयत इति शेषः तृतीयेन्द्राग्न्योर्विश्वकर्मणश्चेत्यत्र त्रिवचोपदर्शनार्थमिदमुक्तम् ॥

इन्द्राग्नी अनुष्टुप्पूर्वोर्द्धर्चः ॥

ऐन्द्राग्नऽउत्तरः ॥

इन्द्राग्नीदेवता: पूर्वोऽर्धः ऋच्यर्थं द्वितीयोऽर्द्धर्चः ॥

स्वयमातृण्णा देवताः ॥

स्वयमातृण्णोपधानेऽस्याः समंत्रस्य विनियोगः । चतुर्थी नवकः । तेषामेकाऽधिका ॥

विश्वकर्मा वायव्यम् ॥

विश्वकर्मेत्येतद्यजुर्वायुदेवतम् । अत्रापि स्वयमातृण्णोपधानएव विनियोगः, एकाक्षरा विकृतिछन्दः ॥

राज्ञ्यसि पञ्च दिग्देवत्यानि ॥

राज्ञ्यसि प्राचीत्यादीनि पञ्च यजूंषि दिश्यानामुपधाने क्रमेण विनियुक्तानि । राज्ञ्यसि । यजुर्गायत्री । १ । विराडसि यजुरनुष्टुप् । २ । संम्राडसि यजुरनुष्टुप् । ३ । स्वराट् । दैवीजगती । ४ । अधिपत्नी ।

यजुर्बृहती ॥

विश्वकर्मा वायव्यम् ॥

विश्वकर्मेत्येतद्यजुर्वायुदेवतं । विश्वज्योतिष उपधाने विनियुक्तं । …रीछन्दः ॥

नभश्चेषश्चर्तव्ये ॥

नभश्च नभस्यश्च, इषश्चोर्जश्चेत्येते यजुषी ऋतुदेवते । ऋतव्याना-मुपधाने विनियुक्ते । नभश्च एकाधिका उत्कृतिः, इषश्चेति पूर्वोक्तोत्-कृतिः ॥

आयुर्मे दश लिङ्गोक्तदेवतानि ॥

आयुर्मे पाहीत्यादीनि दश यजूंषि लिङ्गोक्तदेवतानि । प्राणभृता-मुपधाने विनियुक्तानि । आयुर्मे, ।१। प्राणं मे, दैवीपङ्क्ती ।२। अ-पानं यजुर्गायत्री ।३। व्यानं मे, ।४। चक्षुर्मे, ।५। श्रोत्रं मे ।६। वाचं मे ।७। मनो मे । दैव्यः पङ्क्तयः ।८। आत्मानं । दैवीत्रिष्टुप् ।९। ज्योतिर्मे यच्छ दैवीपङ्क्तिः ॥ १० ॥

मा छन्दश्च षड्विंशत् ॥

चकारेण लिङ्गोक्तदेवतानीत्याकृष्यते । मा छन्द इत्यादीनि षड्विं-शतिसङ्ख्यानि यजूंषि चकारात् लिङ्गोक्तदेवतानि । छन्दस्यानामुपधाने विनियुक्तानि । अत्र त्र्यक्षराणां दैव्यनुष्टुप् । चतुरक्षराणां दैवीबृह-ती, पञ्चाक्षराणां । दैवीपङ्क्तिः, षडक्षराणां दैवीत्रिष्टुप् । सप्ताक्ष-राणां दैवीजगतीति ॥

मूर्द्धाऽनुष्टुप् ॥

मूर्द्धाऽसि राडित्येषाऽनुष्टुप्छन्दस्का । आर्च्यनुष्टुप् । व्यूह्य ॥

यन्त्री परोष्णिक् ॥

यन्त्री राडित्येषा परोष्णिक् । यस्यास्त्रिपदायास्तृतीयो द्वादशकः । आद्यावष्टकौ सा परोष्णिक् "परोष्णिक्परतश्चेत्" ॥

चतुर्दश यजूंषि प्राणदेवत्यानि ॥

मूर्द्धासि राडित्यन्तो राडित्यनयोः प्रागुक्तयोरनुष्टुप्परोष्णिहोः प्रत्येकं स-सप्तविभागेन चतुर्दश यजूंषि भवन्ति । तानि च प्राणदेवतानि । "प्राणा वै वालखिल्या इति श्रुते" र्वालखिल्येष्टकादेवत्यानीत्यर्थः । वाल-खिल्यानामुपधाने विनियुक्तानि । अथवा अत्र विकल्पो गम्यते क्लृप्तकत्वा-ख्यद्ध्योरेकत्रायोगात् । तेनायमर्थः । इमानि चतुर्दश यजूंषि । नानु-ष्टुप्परोष्णिहौ । कुतः खण्डश एव पृथक्पृथग्विनियोगात् । तदा च त्र्यक्षराणां दैव्यनुष्टुप्, चतुरक्षराणां दैवी बृहती । षडक्षराणां पङ्क्ति-रिति । लोकं पृण, ता अस्य, इन्द्रं विश्वा इति तिस्रो ऽत्र प्रतीकोपात्ताः तासां प्रथमावद्विनियोगादि ॥

इति तृतीया चितिः ॥ १६ ॥

अथ चतुर्थी ॥

चितिरभिधीयत इति शेषः । चतुर्थीत्युपधानमित्यस्य विषयोपप्रद-र्शनायैतदुक्तम् ॥

आशुरष्टादश ॥

आशुस्त्रिवृदित्यादीन्यष्टादश यजूंषि । आशुरित्यस्य दैवीपङ्क्तिः । १ । भान्तः । दैवी त्रिष्टुप् । २ । व्योम । दैवी त्रिष्टुप् । ३ । धरुणः दैवीज-गती । ४ । चतुर्णां मृत्युमोक्षेष्टकोपधाने विनियोगः । प्रतूर्त्तिः । ५ । तर्पः दै-वीजगती । ६ । तयो दैवी त्रिष्टुप् । अभीवर्त्तः । दैवीजगती । वर्चो दैवी-पङ्क्तिः । ८ । संभरणः । यजुरनुष्टुप् । ९ । योनिर्दैवीजगती । १० । गर्भाः । दैवी त्रिष्टुप् । ११ । ओजस्त्रिणवः । दैवीपङ्क्तिः । १२ । क्रतुः दैवी त्रिष्टुप् । १३ । प्रतिष्ठा दैवीजगती । १४ । तद्ब्रध्नः । य-जुःपङ्क्तिः । १५ । नाकः दैवीपङ्क्तिः । १६ । विवर्त्तः । १७ । यजु-र्बृहती, धर्त्रं । यजुर्गायत्री । १८ । प्रतूर्त्तिरष्टादशइत्यादीनां चतुर्द-शानां उपधाने विनियोगः ॥

अग्नेर्दश ॥

अग्नेर्दश अग्नेर्भागोऽसीत्यादीनि दशयजूंषि । अग्नेर्भागः । प्राजापत्याबृहती । १ । इन्द्रस्य । सामत्रिष्टुप् । २ । नृचक्षसां । सामजगती । ३ । मित्रस्य । ऋग्बृहती । ४ । अग्नेरित्यादीनां चतुर्णां मृत्युमोहिन्युपधाने विनियोगः । वसूनां भागः । ५ । आदित्यानां । सामजगत्यौ । ६ । अदित्यै प्राजापत्याबृहती । ७ । देवस्य ऋचां पङ्क्तिः, । ८ । यवानां । व्यूहो । ऋग्बृहती । ९ । ऋभूणां व्यूहः । ऋग्बृहती । १० वसूनामित्यादिषण्णां षट्पद्योपधाने विनियोगः ॥

एकया सप्तदश ॥

एयाऽस्तुवतेत्यादीनि सप्तदशयजूंषि सप्तदशसृष्टीनामुपधाने विनियुक्तानि ॥

सर्वाणि लिङ्गोक्तदेवतानि ॥

सर्वाणीति आशुरित्यादीन्यष्टादश, अग्नेरित्यादीनि दश, एकयेत्यादीनि सप्तदशैतानि, । लिङ्गोक्तदेवतानि । आशुरित्यादीनां त्रिवृत्स्तोमाद्या देवता । अग्नेरित्यादीनां च अथवा सर्वेषामुपधीयमाना इष्टका एव देवताः ॥

सहश्चत्वार्यम् ॥

सहश्च सहस्यश्चेत्यतद्गाद्यं । ऋतुदेवतं पञ्च चाष्टोत्तरं शतमक्षराणि । एतावत्परिमाणस्य छन्दसोऽभावादेव छन्दो नास्ति । तदुक्तं । यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यत इति । एकयाऽस्तुवतेत्यादीनां छन्दांस्युच्यन्ते । एकया । सामत्रिष्टुप् । १ तिसृभिः । व्यूहेन सामजगती २ । पञ्चभिः । सामजगती ३ । सप्तभिः । सामत्रिष्टुप् । ४ नवभिः । प्राजापत्याबृहती ५ । एकादशभिः । सामजगती ६ । त्रयोदशभिः सामजगती ७ । पञ्चदशभिरुष्णिक् । ८ । सप्तदशभिः । ऋग्बृह

ती ८ । नवदशभिः । व्यूहेनच्छन्बृहती १० । एकविंशत्या । सामजगती । ११ । त्रयोविंशत्या सामजगती । १२ । पञ्चविंशत्या सामजगती । १३ । सप्तविंशत्या ब्राह्मीबृहती । १४ । नवविंशत्या । व्यूहेन सामजगती, । ५ । एकत्रिंशत्या व्यूहेन छन्बृहती । १६ । त्रयस्त्रिंशत्या । व्यूहेन छन्बृहती । १७ । लोकं ता, इन्द्रमिति प्रथमावत् ॥

इति चतुर्थीचितिः ॥ १७ ॥

अथ पञ्चमी ॥

चितिरभिधीयते पञ्चमी परमेष्ठिनइत्यस्य विषयोपदर्शनार्थमिदमुक्तम् ॥

अग्ने जातानाग्नेय्यौ त्रिष्टुभौ ॥

अग्ने जातान्, सहसा जातानित्येते ऋचौ अग्निदेवत्ये त्रिष्टुभौ । पुरस्तात्पश्चाच्च क्रमेणासपत्नोपधाने विनियुक्ते । अग्नेइत्यस्य द्वितीये व्यूहः चतुर्थो द्वादशकः । सहसा जातान् द्वादशकः ॥

षोडशी चतुश्चत्वारिंशो लिङ्गोक्ते ॥

षोडशी स्तोमश्चतुश्चत्वारिंशस्तोमइतीमे यजुषी लिङ्गोक्तदेवते । उपधीयमानेष्टकदेवते । षोडशी यजुः पङ्क्तिः । चतुश्चत्वारिंशः आसुर्यनुष्टुप् । दक्षिणतउत्तरतश्च क्रमेणासपत्नोपधाने विनियुक्ते ॥

अग्नेस्त्रिष्टुप् ॥

अग्नेः पुरीषमित्यस्यास्त्रिष्टुप्छन्द इष्टकादेवता पञ्चम्या असपत्नाया उपधाने विनियोगः । प्रथमे व्यूहः ॥

एवश्चत्वारिंशत् ॥

एवश्छन्दइत्यादीनि चत्वारिंशद्यजूंषि विराजाख्युपधाने विनियुक्तानि तत्र चतुरक्षराणां यजुषां दैवीबृहतीछन्दः पञ्चाक्षराणां दैवीपङ्क्तिः, षडक्षराणां दैवीत्रिष्टुप् । सप्ताक्षराणां दैवीजगतीति ॥

रश्मिनैकान्नत्रिंशत् ॥

रश्मिना सत्यायेत्यादीन्येकान्नत्रिंशद्यजूंषि सोमभागानामुपधाने विनियुक्तानि। तत्र। रश्मिना १ प्रेतिना।२। यजुः पङ्क्ती, धर्म्मेत्या यजुर्बृहती।३। सन्धिना। ४ प्रतिधिना।५। यजुर्जगत्यौ। विष्टम्भेन यजुः पङ्क्तिः, ६ प्रवया दैवीजगती, ७ अनुया। यजुर्बृहती। ८ उशिजा यजुः। पङ्क्तिः ९ प्रकेतेन। यजुर्जगती। १०। तन्तुना। साम्नीत्रिष्टुप्, ११ संसर्पेण। यजुस्त्रिष्टुप् १२ ऐडेन। यजुस्त्रिष्टुप्। १३। उत्तमेन। यजुस्त्रिष्टुप् १४ वयोधसा। १५। अभिजिता। १६। यजुस्त्रिष्टुभौ, प्रतिपदसि १७ यजुः पङ्क्तिः,। अनुपदसि १८ यजुर्बृहती। संपदसि १९ यजुरनुष्टुप्। तेजोऽसि। २०। दैवीजगती,। त्रिवृदसि २१ प्रवृदसि। २२। विवृदसि २३। सवृदसि। २४। आक्रमोऽसि। २५। यजुरनुष्टुभः, सङ्क्रमोऽसि। २६। यजुर्बृहती। उत्क्रमोऽसि। २७। उत्क्रान्तिरसि। २८। यजुरनुष्टुभौ। अधिपतिना। २९। यजुर्बृहती ॥

राज्ञ्यसि पञ्च ॥

राज्ञ्यसीत्यादीनि पञ्चयजूंषि। नाकसदामुपधाने विनियुक्तानि। तत्र राज्ञ्यसीत्यस्याः पश्चाद्योत्तरं शतमक्षराणि। विराडसि। अत्र वा त्रिंशच्छतमक्षराणि। सम्राडसि। अत्र सप्तविंशच्छतमक्षराणि। स्वराडसि। अत्र चतुर्विंशच्छतमक्षराणि। अधिपत्न्यसि। अत्र अष्टाविंशच्छतमक्षराणि। एतेषु राज्ञ्यसीत्यादिषु पञ्चसु छन्दोनास्ति एतावत्परिमाणस्य छन्दसोऽभावात्। तदुक्तं यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यतइति ॥

अयं पुरःपञ्च ॥

अयं पुरो हरिकेश इत्यादीनि पञ्चयजूंषि। पञ्चचूडानामुपधाने विनियुक्तानि। तत्रायं पुरः इयं दश अक्षराणि विकृतिः, अयं दक्षिणा

इयं व्यूहेन चतुरशीत्यक्षराप्रकृतिः, अयं पश्चात् । इयमशीत्यक्षराकृतिः । अयमुत्तरात् । इयं सप्तसप्तत्यक्षरा तेनैकाधिका अतिधृतिः । अयमुपरि । इयं व्यूहेनाशीत्यक्षराकृतिः । एतानि सर्वाणि लिङ्गोक्तदेवतानि एवञ्छन्दस्त्वारभ्यायमुपर्यशीयस्त्विस्त्यन्तानि एतानि सर्वाणि यजूंषि लिङ्गोक्तदेवतानि । उपधीयमानेष्टकैव एतेषां देवतात्वमर्थः ॥१८॥

अग्निर्मूर्द्धाग्नेयोऽनुवाकः ॥

अग्निर्मूर्द्धा दिवः ककुदित्ययमनुवाकस्तन्त्वा शोचिष्ठदीदिवइत्यन्तः आग्नेयः अग्निर्देवत अत्रैव क्रमेण छन्दांस्याह ॥

प्रथमस्तृचो गायत्रः ॥

गायत्रीछन्दस्कः । गायत्रीणामुपधाने विनियुक्तः, अत्र पतिः पृथिव्या इत्यस्य व्यूहे चरणः ॥

द्वितीयस्त्रिष्टुभो भुवः ॥

अस्मिन्नेवानुवाके, भुवो यज्ञस्य रजसाश्च नेताग्निः । अबोधाम कवयइत्ययं द्वितीयस्तृच त्रिष्टुप्छन्दस्कः त्रिष्टुभामुपधाने विनियुक्तः । दिवि मूर्द्धानं । अबोध्यग्निः, अबोचाम एषु व्यूहः ॥

तृतीयो जागतोऽयमिह ॥

अस्मिन्नेवानुवाके अयमिह, जनस्य गोपा, त्वामग्ने अङ्गिरस-इत्ययं तृतीयस्तृचो जगतीछन्दस्क । जगतीनामुपधाने विनियुक्तः होता यजिष्ठः, जनेषु चित्रं, द्युमद्विभाति । त्वामग्ने अङ्गिरसः । त्वमाहुः । एषु व्यूहः ॥

चतुर्थ आनुष्टुभः ॥

सखायः, सं सः समित्, । त्वां चित्रश्रवस्तमेत्ययं चतुर्थस्तृच आनुष्टुभः अनुष्टुप्छन्दस्कः । अनुष्टुभामुपधाने विनियुक्तः ॥

सखायः सम् ॥(१)

अथ सखायः सम्। इय एकाशीमं,धनयोर्व्यूहः। वर्षिष्ठाय। समह,, अग्ने विश्वानि। सगो वसूनि धनयोर्व्यूहः॥

पञ्चमः प्रगाथ एना वः॥

अस्मिन्ननुवाके एना वइत्ययं पञ्चमस्तृचः प्रगाथसंज्ञः। द्वयोर्ऋचोः। प्राग्गृह्यपठनेन ऋतुत्रयसम्पादनं प्रगाथइत्युच्यते। तत्प्रकारमाह॥

तत्र पूर्वा बृहती सतोबृहत्युत्तरा ताभ्यां तिस्रो बृहत्यः सम्पादिताः॥

तत्र एना व इत्यत्र तृचे पूर्वा एनावइति। उत्तरा सयोजतइती यं सतोबृहती। यस्यास्तृतीयः पादो द्वादशाक्षरः सा बृहती "तृतीयो द्वादशकइत्यक्ते:"। यस्याश्च प्रथमतृतीयौ पादौ द्वादशाक्षरौ। द्वितीयचतुर्थावष्टाक्षरौ। सतोबृहती। "अयुजौ जागतौ सतोबृहतीत्युक्ते." ताभ्यां बृहती सतोबृहती। ताभ्यां तिस्रो बृहत्यः बृहतीछन्दस्का ऋचः संहिता पाठएव संपादिताः कृताः। तत्रायं प्रकारः। एना वो अग्निं नमसोर्जो न पातमाहुवे। प्रियं चेतिष्ठमरतिए स्वध्वरं विश्वस्य दूतममृतमितीयं बृहती,सयोजते अरुषा विश्वभोजसा सदुद्रवत्स्वाहुतः। सुब्रह्मा यज्ञः सुशमी वसूनां देवएं राधो जनानामिति सतोबृहती, तत्र एनावइतीयमेका सतोबृहती। विश्वस्य दूतममृतमिति सतोबृहती,एषामन्त्यं अष्टाक्षरं पादं द्विः पठित्वा, सयोजते अरुषेति तृतीयो द्वादशाक्षरः सदुद्रवदित्यष्टाक्षरश्चतुर्थः पठितः। एवं द्वितीयाबृहती संपादिता। ततः पुनः सदुद्रवदितीममष्टाक्षरं पादं द्विः पठित्वा सुब्रह्मा यज्ञइतितृतीयो द्वादशाक्षरो देवं-

(१) स्वा विमश्रवस्तम वैकल्पिकीम्। इत्यधिकः काण्वपाठः॥

राथइत्ययमष्टाक्षरस्त्वतुर्थः पठितः एवमृचोः परस्परं प्रगथनात्प्र-गाथइत्युच्यते। अस्य तृचस्य बृहतीनामुपधाने विनियोगः। अत्र प्रियं-चेतिष्ठेत्यत्र व्यूहः। सदुद्रवदित्यत्र च। सुब्रह्मा अयमेकादशकः। इयं राथइत्ययमष्टकः। तेन द्व्यूना॥

षष्ठ औष्णिहोऽग्ने वाजस्य॥

अस्मिन्नेवानुवाके अग्नेवाजस्य सद्धानः, अमोराजनित्ययं षष्ठस्तृ-च औष्णिहः। उष्णिक्छन्दस्कः। उष्णिहामुपधाने विनियुक्तः अग्नि-रीडेस्यः समकः। अत्र व्यूहः न्यूनता वा॥

सप्तमः पुनः काकुभः प्रगाथो भद्रो नः॥

अस्मिन्ननुवाके भद्रो नो अग्निरित्ययं सप्तमस्तृचः पुनः काकुभः प्रगाथः ककुप्छन्दस्कः प्रगाथइत्यर्थः ककुभामुपधाने विनियुक्तः। नवमे प्रगाथमाह॥

तत्र पूर्वा ककुप् सतोबृहत्युत्तरा ताभ्यां तिस्रः ककु-भः सम्पादिताः॥

तत्र भद्रो न इत्यस्मिन्सप्तमे तृचे पूर्वा भद्रो न इत्येषा ककुप्छन्दस्का। उत्तरा भद्रं मनः कृणुष्वेत्येषा सतोबृहती य-स्यास्त्रिपदाया मध्यमः पादो द्वादशाक्षरःअन्त्यावष्टकौ सा ककुप्। "मध्यमश्चेत्ककुबित्युक्तेः" यस्याश्च प्रथमतृतीयौ द्वादशकौ अन्त्यावष्टकौ सा सतोबृहती। "अयुजौ जागतौ सतोबृहतीत्युक्तेः"। ताभ्यां ककुप्-सतोबृहतीभ्यां तिस्रः ककुभः ककुप्छन्दस्का ऋचः संपादिताः। तत्रायंप्रकारः। भद्रो नो अग्निराहुतो भद्रारातिः सुभगभद्रोऽध्व-रः। भद्राऽउत प्रशस्तयः। इत्येषा ककुप्, भद्रंमनः कृणुष्व वृत्रतूर्ये। येना समत्सु सासहः, अवस्थिरा तनुहि भूरि शर्धतां, वनेमाते अभि-ष्टिभिरिति, सतोबृहती, तत्र भद्रोनो अग्निराहुतइतीयमेका स्वत

एव ककुप् । अस्याएवांत्यं भद्रा उत प्रशस्तयइतीयमष्टाक्षरं पादं पुनः पठित्वा भद्रं मनइति द्वादशाक्षरो द्वितीयः पठितः । ततो येना समरित्वत्ययं तृतीयोऽष्टाक्षरः पठितः एवं ककुप्द्वितीया संपादिता । अथ तृतीया । येनासमत्स्वितीममेवाष्टाक्षरं पादं पुनः पठित्वा अवस्थिरा तनुहीत्ययं द्वादशाक्षरो द्वितीयः पठितः । वनेमातइत्ययमष्टाक्षरस्तृतीयः पठितः । एवंतृतीया ककुप्संपादिता, एकः पूर्वं प्रगाथ उक्त, अयं द्वितीयः प्रगाथइति, पुनः शब्दप्रयोगः अत्रभद्रम् मनः अयमेकादशकः । तेनैकोनता वा व्यूहेन पूरणम् वा, षट्पाङ्क्तो नवमीऽग्ने तं । अस्मिन्नेवानुवाके अग्नेतमद्य, अधाह्यग्ने, एभिर्नो अर्कैरित्ययं नवमस्तृचः ॥

अष्टमः पाङ्क्तोऽग्निं तं षट्पाङ्क्तो नवमोऽग्ने तम् ॥

षट्पङ्क्तिः छन्दस्कः, यस्याः पञ्चाक्षराश्चत्वारः पादाः षडक्षरः सा षट्पङ्क्तिः । अथवा यस्यास्त्रयः पञ्चाक्षराः । चतुर्थश्चतुरः । पञ्चमः षडक्षरः । सापि षट्पङ्क्ति, पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा षट्पङ्क्तिरित्युभयथोक्तिः" । षट्पङ्क्तीनामुपधाने अस्य तृचस्य विनियोगः । तत्राग्नेतमद्येत्यत्र चतुर्थश्चतुष्कोपेतषट्पङ्क्तिः, अधाह्यग्ने । व्यूह. स्वर्णज्योतिरित्ययमपि चतुष्क, अत्रापि व्यूह्यो वा ॥

अग्निरꣳ होतारमतिच्छन्दास्त्र्यवसाना ॥

त्र्यवसाना अवसा नत्रययुक्ता । अतिछन्दास्त्र्यवसा ना । ८ । अग्निरꣳ होतारमितीयमृक् अतिच्छन्दा । छन्दांस्यतिक्रान्ता अतिच्छन्दाछन्दसउपधाने विनियुक्ता । इयं चतुःषष्ट्यक्षरा तेनाष्टिछन्दस्का । अत्यष्टिरितिषट्कृचाः । तत्र व्यूह्याः "अष्टिरत्यष्टिर्वेतिसंहिताभाष्ये" अत्र च "अथैतासां ककुभां चत्वारि चत्वार्यक्षराण्यादायातिछन्दांस्युपदधतीतिश्रुत्या" भद्राराति:, अत्र तूर्णे अवस्थिराग्निरꣳहोतारमित्येता-

नि द्वादशाक्षराणि प्रयोगकाले अधिकानि संविहितानि सन्ति तेन तस्येयमतिधृतिश्छन्दस्का ॥

अग्ने त्वं द्वैपदस्तृचः ॥

अग्निर्वाग्नेये अनुवाके अग्ने त्वं नो अन्तमः, वसुरग्निः । तन्त्वा शोचिष्ठेत्ययं द्वैपदः । द्विपदाश्छन्दस्काः द्विपदानामुपधाने विनियुक्ताः । १८ ।

अथाग्निरग्नेवाग्निर्मूर्द्धेत्यनुवाके मन्त्राणामृषीनाह ॥

अयमग्निर्विरूपः ॥(१)

अयमग्निः सहस्रिण इत्यस्या विरूपऋषिः ॥

अबोधि बुधगविष्ठिरौ ॥

अबोध्यग्निरित्यस्या बुधगविष्ठिरावृषी ॥

जनस्य सुतम्भरः ॥

जनस्य गोपा इत्यस्याः सुतंभरऋषिः ॥

सखायऽइषः ॥

सखायः सँवइत्यस्य इषऋषिः ॥

सꣳ समित् सँव्वननः ॥

सꣳ समिदित्यस्याः सँव्वननऋषिः ॥

त्वां प्रस्कण्वः ॥

त्वां चित्रश्रवस्तमेत्यस्याः प्रस्कण्वऋषिः ॥

एनावो वसिष्ठः ॥

एनावो अग्निमित्यस्या वसिष्ठऋषिः ॥

अग्ने वाजस्य गोतमः ॥

अग्ने वाजस्येत्यस्या गोतमः । अग्निर्ऋषिः ॥

भद्रो नः सौभरिः ॥

---

(१) अथैषामृषयः । इति काण्वसर्वानुक्रमेऽधिकः पाठो बोध्यः ॥

भद्रो नो अग्निरित्यस्याः सौभरिर्ऋषिः ॥

अग्निं तं कुमारवृषौ ॥

अग्निं तं कुमारवृषौ । अग्निं तं मन्य इत्यस्याः कुमारवृषावृषी । अनुक्तानां साधारणः परमेष्ठीऋषिः ॥

येनाष्टावाग्नेय्यः षड्त्रिष्टुभो द्वे अनुष्टुभौ ॥

येनऋषय इत्याद्या अष्टौऋचोऽग्निदेवताः । तासां मध्ये आद्याः षड्त्रिष्टुप्छन्दस्का । येन वहसि । अयं ते योनिरितीमे द्वे ऋचावनुष्टुप्छन्दस्के । पुनश्चित्युपधाने विनियोगोऽष्टानामपि ॥

तपश्चर्तव्यम् ॥

तपश्च तपस्यश्चेत्येतदृतुदेवतं ऋतव्योपधाने विनियुक्तम् द्व्यधिकोत्कृतिः छन्दः ॥

परमेष्ठी सौरम् ॥

परमेष्ठीत्वेतीदं यजुः सूर्यदेवतं विश्वज्योतिषउपधाने विनियुक्तम् । व्यूहो । शक्वरीछन्दः ॥

प्रोथदश्वो वसिष्ठस्त्रिष्टुभमाग्नेयीम् ॥

प्रोथदश्वइतीमामृचं त्रिष्टुप्छन्दस्कामग्निदेवत्यां वसिष्ठऋषिरपश्यत् । विकर्ष्युपधानेऽस्या विनियोगः । आद्ययोर्व्यूहः ॥

आयोर्हे स्वयमातृण्णादेवते ॥

आयोष्ट्वा । परमेष्ठीत्वेत्येते द्वे यजुषी स्वयमातृण्णादेवते । स्वयमातृण्णोपधाने विनियुक्ते । आयोरिति ब्राह्मी उष्णिक्, परमेष्ठीत्वा । आकृतिछन्दः ॥

सहस्रस्य पञ्चाग्नेयानि ॥

सहस्रस्य प्रमासीत्यादीनि पञ्च यजूंष्यग्निदेवतानि हिरण्यशकलैरग्नेः प्रोक्षणे विनियुक्तानि । प्रमासि । दैवीजगती । प्रतिमा-

सि । प्राजापत्यागायत्री । उग्रासि । दैवीत्रिष्टुप् । साह्वस्रोसि । दैवीबृहती सहस्रायत्वा । दैवीपङ्क्तिः ॥ २० ॥

रौद्रोऽध्यायः परमेष्ठिन आर्षं देवानां वा प्रजापतेर्वा ॥

नमस्ते रुद्र मन्यवइत्ययं रुद्रदैवत्योऽध्यायः परमेष्ठिनआर्षं । अस्याध्यायस्य परमेष्ठीऋषिरित्यर्थः ॥

देवानां वा आर्षम् ॥

अथवाऽस्याध्यायस्य देवाऋषयः प्रजापतेर्वार्षं । अथवाऽस्याध्यायस्य प्रजापतिऋषिरित्यर्थः ॥

आद्योऽनुवाकः षोडशर्च एकरुद्रदैवत्यः ॥

अस्मिन्नध्याये आद्यः षोडशर्चोऽनुवाकोरुद्रदैवत्यः । एको रुद्रो देवता यस्य एकरुद्रदैवतः ॥

प्रथमा गायत्री ॥

अस्मिन्नाद्येऽनुवाके प्रथमा नमस्ते रुद्रमन्यवइत्येषा गायत्रीछन्दस्का ॥

तिस्रोऽनुष्टुभः ॥

ततो या ते रुद्र । यामिषुं । शिवेन वचसा, इत्येतास्तिस्रोऽनुष्टुप्छन्दस्काः । यामिषुमित्यस्यास्तृतीयचतुर्थौ नवकौ । तेन द्व्यधिका । यामिषुं । सप्तकः । हस्तेइत्यत्र व्यूहः । एकोना । शिवेन । व्यूहः ॥

तिस्रः पङ्क्तयः ॥

पञ्चम्याद्या अध्यवोचत् । असौ यस्ताम्रः । असौ यो व इत्येतास्तिस्रः पङ्क्तिच्छन्दस्काः । अत्र प्रथमो दैव्यः । अहीँश्चेति सप्तकः सर्वाश्चेति व्यूहः । असौ यो वेति व्यूह, अदृश्रन् सप्तकः ॥

सप्तानुष्टुभः ॥

ततोऽष्टम्यायाः सप्तऋचो नमोऽस्तु नीलग्रीवाय, प्रमुञ्च । विज्यं । याते । परिते धन्वनो । अवतत्य । नमस्तऽआयुधायेत्येता: अनुष्टुप्छन्दस्काः ॥

द्वे जगत्यौ ॥

ततः षष्ठेऽनुवाके पञ्चदशीषोडश्यौ मानो महान्तं । मानस्तोक इति द्वे ऋचौ जगत्यौजगतीछन्दस्के । मा नः प्रियाइत्यत्र व्यूहः । मा नो वीरानित्येकादशकः ॥

मा नो द्वे कुत्सः ॥

मा नो हान्तं, मानस्तोकइतीमे द्वेऋचौ कुत्सऋषिरपश्यत् ॥ २१ ॥

अन्त्यानुवाके सप्तैकरुद्रस्तुतिः ॥

अन्त्यानुवाके द्रापेऽअन्धसइत्यस्मिन्नित्नमे अनुवाके सप्तऋचएकस्य रुद्रस्य स्तुतिः । आसां सप्तानामृचामेको रुद्रो देवताइत्यर्थः ॥

आद्योपरिष्टाद्बृहती ॥

तासां सप्तानामाद्या प्रथमा द्रापेअन्धसइत्येषा उपरिष्टाद्बृहतीछन्दस्का अत्राद्यः सप्तकः द्वितीयोऽष्टकः । तृतीयो दशकः । चतुर्थो द्वादशकइतिनैकान्तेऽधिका ॥

द्वितीया जगती कुत्सस्य ॥

द्वितीया इमा रुद्रायेतीयं जगतीछन्दस्का कुत्सस्य आर्षः कुत्सोऽस्या ऋषिरित्यर्थः ॥

तृतीयाऽनुष्टुप् ॥

तृतीया याते रुद्रेत्येषाऽनुष्टुप्छन्दस्का ॥

द्वे त्रिष्टुभौ ॥

परिणो रुद्रस्य मीढुष्टमेत्येते द्वे ऋचौ त्रिष्टुभौ । मीढुष्टमेत्यस्यां तृतीयएकादशः । प्रथमद्वितीयचतुर्थपञ्चमा अष्टाक्षराः । एवमेकोना

अक्षरबहुत्वा निचृत् ॥

द्वेऽनुष्टुभौ ॥

विकिरिद्र, सहस्राणीत्येते द्वे ऋचौ अनुष्टुप्छन्दस्के । वाशब्द-
वीति सप्तकः अत्र विकारविकर्षौ जनता वा ॥

असङ्ख्याता बहुरुद्रदैवत्या दशानुष्टुभो मन्त्रा अ-
वतानसञ्ज्ञकाः ॥

असङ्ख्यातासहस्राणीत्याद्या यऽएतावन्तश्चेत्यन्ताश्च मन्त्रा बहु
रुद्रदेवत्या अनुष्टुप्छन्दस्का अवतानसञ्ज्ञकाः । बहवो रुद्रा देवता या
सां ता बहुरुद्रदेवत्याः सञ्ज्ञाकरणमवतानां जुहोतीत्यादौ संव्य-
वहारार्थं । अत्र । ये रुद्राः । अस्मिन् । अनयोर्यकारव्यूहेन पूरणं ।
ये भूतानामिति नवकः । येऽन्नेषु । यकारव्यूहः । यऽएतावन्तश्चेति द-
शकः । तेन त्र्यधिका ॥

ततोऽन्त्यानि त्रीणि यजूꣳषि बहुरुद्रदैवत्यानि प्र
त्यवरोहसञ्ज्ञका मन्त्राः ॥ २२ ॥

तत्र त्वसङ्ख्यातेत्यादिदशकानन्तरं अन्त्यानि अध्यायान्ते पठ्यमा-
नानि नमोऽस्तुरुद्रेभ्यो ये दिवीत्यादीनि त्रीणि यजूंषि बहुरुद्रदेवत्या-
नि । एते मन्त्राः प्रत्यवरोहसञ्ज्ञका भवन्ति । सञ्ज्ञाकरणमथप्रत्य-
वरोहाञ्जुहोतीत्यादौ संव्यवहारार्थं । त्रयाणामपि यजुषां धृतिश्छ-
न्दः । आद्यस्य नमोऽस्त्वित्येकाक्षरीभाव नमाऽअस्त्वित्येवं पृथक्कृत्य पू-
रणम् ॥ २२ ॥

मध्ये सर्वाणि यजूꣳषि हिरण्यबाहवइति तिस्रो-
ऽशीतयो रुद्राणाम् ॥

मध्येऽत्राद्यन्तानुवाकान्ते । अनयोर्मध्ये नमो हिरण्यबाह-
वइत्यादीनि नमऽआनिर्हतेभ्यइत्यन्तानि सर्वाणि यजूꣳषि । एषां

यजुषां रुद्राणां तिस्रोऽशीतयो देवताः ॥

तेषामुभयतो नमस्कारा अन्ये ॥

तेषां रुद्राणां मध्ये अन्ये केचिद्रुद्रा उभयतो नमस्काराः । नमो हिरण्यबाहवे सेनान्ये दिशां च पतये नमइत्यादि, नमः श्वभ्यः श्वपतिभ्यश्च वो नमइत्यन्ताः ॥

अन्यतरतो नमस्कारा अपरे ॥

अपरे केचन रुद्रा अन्यतरतो नमस्काराः अन्यतरतः आदावेव नमस्कारो येषां तेऽन्यतरतो नमस्काराः । नमो भवाय चेत्यादयो नमऽआखिदते च प्रखिदते चेत्यन्ताः । नमऽइषुकृद्भ्यो धनुष्कृद्भ्यश्च वो नमइत्येतेषूभयतो नमस्काराः ॥

जातानामरुद्राः सभाभ्यइत्यादयः ॥

नमः सभाभ्य इत्यादयो जातानामरुद्राः जातसंज्ञका रुद्राइत्यर्थः । संज्ञाकरण"अथजातेभ्यो जुहोतीत्यत्र" संव्यवहारार्थः । तदेवमत्र तिस्रोऽशीतयो रुद्राः पूर्णाः, अथ नमो वः किरिकेभ्यइत्यादीनां चतुर्णां यजुषां । हृदयभूता अग्निवायुसूर्याः किरिकादिशब्दवाच्या देवता आह ॥

नमो वः किरिकेभ्यइत्यग्निवायुसूर्यहृदयभूताः पञ्चव्याहृतयो बहुरुद्रदेवत्याः ॥ २३ ॥

किरिकेभ्यो विचिन्वत्केभ्यइत्येवमादिव्यस्तविशिष्टानामेवदेवतात्वेन श्रवणात् । अग्निवायुसूर्यहृदयभूता इति आसां चतसृणां व्याहृतीनां अग्निवायुसूर्याएव देवता हृदयभूता रुद्राणां प्रधानभूता देवताः किरिकादिशब्दैर्यामिकैरग्न्यादय एवाभिधीयन्तइत्यर्थः । अथवा व्याहृतिविशेषणत्वेन व्याख्येयं । कीदृश्यो व्याहृतयो अग्निवायुसूर्याः हृदयभूताः प्रधानभूताः किरिकविचिन्वत्कादिभिर्यामिकै

अथेदं तत्त्वेन प्रतिपाद्या याज्या आहुतीनां तावग्निवायुसूर्यहृदय-
भूताः । अत्र हि किरिका विचिन्वत्का विक्षिणत्का आनिर्हता अग्निवा-
युसूर्या एव । ते च रुद्राणां देवानां हृदयभूताः, कुतः नमो वः कि-
रिकेभ्य इति प्रक्रम्य देवानां हृदयेभ्य इत्यग्निवाय्वादित्या "एता-
नि ह तानि देवानां हृदयानीति श्रुतेः" । हृदयानीव हृदयानि । यथा
हृदयं सर्वेषामङ्गानां प्रधानभूतं । एवमेते रुद्राणां प्रधानभूता इत्यर्थः ।
अत्र नमो वः किरिकेभ्य इत्यादीनि चत्वार्येव यजूंषि चतुर्णामिवादौ नमः
शब्दपाठात् । देवानां हृदयेभ्य इत्येतत्तु किरिकेभ्य इत्यादीनां चतुर्णां वि-
शेषणमेव । न पृथग्युता इतरेषामिवादौ नमः शब्दाभावात् । मयोभवाय
चेत्यादीनामिव चकारोपबन्धाभावाच्च । एवमेव हरिस्वामिमाधवाचा-
र्यैः हलाभाष्यकारैर् अपि स्वस्वग्रन्थेषूक्तवन्तः । अतोऽग्न्यादय एवेदं सर्वं
जगत्कुर्वन्तीति किरिका इत्युच्यन्ते । "एते हीदं सर्वं कुर्वन्तीति श्रुतेः"
एतेषां प्राजापत्यमुखप्राणेभ्य उत्पत्तेः प्राजापत्यवचनत्वात् । तथा विचि-
न्वन्ति धर्मकारिणमधर्मकारिणं च पृथक्कुर्वन्तीति विचिन्वत्का त एव ।
तथा विविधं क्षिण्वन्ति हिंसन्तीति विक्षिणत्काः । त एव । तथा आनिर्ह-
तेभ्यः हंतिर्गत्यर्थः । एते ह्यग्निवायुसूर्याः समन्तादाभिमुख्येन एतेभ्यो
लोकेभ्यो निर्हताः निर्गताः । "तेभ्यस्तप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ता-
ग्निर्योऽयं पवते सूर्य इति श्रुतेः" । नमो विचिन्वत्केभ्य इत्येते हीदं सर्वं
विचिन्वन्तीत्यादौ सर्वमेतच्छ्रूयते । अग्न्यादिदेवतात्वसाम्याच्चैतेषां
व्याहृतीत्वमुक्तम् । अत्र केचित्पञ्चव्याहृतय इति पठन्ति । तदयुक्तं । प-
ञ्चमस्य यजुषोऽत्राभावात् । अथ समस्तस्य रौद्राध्यायस्य शतरुद्रि-
यहोमे विनियोगः ॥ १६ ॥ अथ नमो हिरण्यबाहव इत्यादीनां प्रत्येकं
छन्दांस्यभिधीयन्ते ॥ १७ ॥ नमो हिरण्य॰ यजुस्त्रिष्टुप् । दिशां च । य-
जुरनुष्टुप् । वृक्षेभ्यः । यजुः पङ्क्तिः । शष्पिञ्जराय । हरिकेशाय य-
जुस्त्रिष्टुभौ । पशूनां । पुष्टानां । यजुरनुष्टुभस्तिस्रः । १७ । न

बभ्लुशाय यजुर्बृहती । भवस्य । दैवीजगती । रुद्राय । यजुर्बृहती । सूताय यजुर्जगती । अन्ये पञ्च यजुरनुष्टुभः । १८ । रोहिताय । यजुः पङ्क्तिः, वृक्षाणां यजुरनुष्टुप् । भुवन्तये । यजुर्जगती । ओषधीनां यजुर्बृहती । मन्त्रिणे । यजुर्बृहती । कक्षाणां यजुरनुष्टुप् । उच्चैः । यजुस्त्रिष्टुप् । पत्तीनां । तिस्रो गायत्री । १९ । कृत्स्नायतया । पङ्क्तिः, सत्वनां । अनुष्टुप् । सहमानाय । त्रिष्टुप् । आव्याधिनीनां । पङ्क्तिः, निषङ्गिणे । पङ्क्तिः । स्तेनानां । अनुष्टुप् । निचेरवे । त्रिष्टुप् । अरण्यानां । बृहती ॥ २० ॥ वञ्चते पङ्क्तिः, स्तायूनां अनुष्टुप् । निषङ्गिणे । त्रिष्टुप्, तस्कराणां । बृहती । सृकायिभ्यः । पङ्क्तिः । मुष्णतां अनुष्टुप् । असिमद्भ्य पङ्क्तिः, विकृन्तानां । बृहती ॥ २१ ॥ उष्णीषिणे । त्रिष्टुप् । कुलुञ्चानां । बृहती । इषुमद्भ्यः । गायत्री । धन्वा० । अनुष्टुप् । आतन्वा० उष्णिक् । प्रतिदधा० पङ्क्तिः । आयच्छद्भ्यः । गायत्री । अस्यद्भ्योऽनुष्टुप् । २२ । विसृजद्भ्य. गायत्री । विध्यद्भ्य । उष्णिक् । स्वपद्भ्य. । दैवीपङ्क्तिः, जाग्रद्भ्यः उष्णिक् । शयानेभ्यः । गायत्री । आसीनेभ्य. अनुष्टुप् । तिष्ठद्भ्यः दैवीपङ्क्तिः । धावद्भ्यः उष्णिक् । २३ । सभाभ्यः । दैवीपङ्क्तिः, सभापतिभ्य । बृहती । अश्वेभ्यः दैवीबृहती । अश्वपति० । बृहती, आव्याधिनीभ्यः । उष्णिक् । विविध्यन्ती । उष्णिक् । उगणा । गायत्री । तृंहती० अनुष्टुप् ॥ २४ गणेभ्यः । दैवीपङ्क्तिः, गणपति० बृहती, व्रातेभ्यः । दैवीपङ्क्तिः । व्रातपति० । बृहती । गृत्सेभ्य. दैवीपङ्क्ति , गृत्सपति । बृहती, विरूपेभ्यः गायत्री । विश्व० बृहती । २५ । सेनाभ्य. दैवीपङ्क्तिः, सेनानिभ्यः । अनुष्टुप् । रथिभ्यः । दैवीपङ्क्तिः, अरथेभ्यः । अनुष्टुप् । क्षत्तृभ्यः । दैवीपङ्क्तिः, संग्रहीतृ० । बृहती, । महद्भ्यः दैवीपङ्क्तिः, अर्भकेभ्य । २६ । अनुष्टुप् । तक्षभ्य. । दैवीपङ्क्तिः । रथकारेभ्यः बृहती, कुलालेभ्यः । गायत्री । कर्मारेभ्यः अनुष्टुप् । निषादेभ्यः । गायत्री । पुञ्जिष्ठेभ्यः । अनु-

ष्टुप् । स्रक्तिभ्यः दैवीपङ्क्तिः । मृगयु० । अनुष्टुप् ॥ २७ ॥ सभ्यः । दैवीबृहती । अश्वपति० अनुष्टुप् । भवाय । गायत्री । रुद्राय च दैवी बृहती । शर्वाय गायत्री । पशुप० । गायत्री । नीलग्रीवाय । अनुष्टुप् । शितिकण्ठा० । गायत्री । २८ । कपर्द्दि० । उष्णिक् । व्युप्त० गायत्री । सहस्रा० । अनुष्टुप् । शत० । गायत्री । गिरिशयायानुष्टुप् । शिपि० गायत्री, मीढु० । अनुष्टुप् । इषुमते च । दैवीपङ्क्तिः ॥ २९ ॥ ह्रस्वाय । गायत्री । वामना । दैवीपङ्क्तिः । बृहते । वर्षीयसे । दैवी पङ्क्तिः, वृद्धाय गायत्री । सवृधे च । दैवी बृहती । अग्र्याय पङ्क्तिः, प्रथमाय । पङ्क्तिः । ३० । आशवे । गायत्री । अजिराय, पङ्क्तिः, शीघ्र्याय । गायत्री । शीभ्याय । बृहती । ऊर्म्याय । गायत्री, अवस्वन्याय । गायत्री । नादेयाय । उष्णिक् । द्वीप्याय । बृहती ॥ ३१ ॥ ज्येष्ठाय । गायत्री । कनि० । पङ्क्तिः, पूर्वजाय । उष्णिक् । अपर० गायत्री । मध्यमाय । उष्णिक् । अपगल्भाय । गायत्री । जघन्या । उष्णिक् । बुध्न्याय । दैवीबृहती ॥ ३२ ॥ सोभ्याय । गायत्री । प्रति० गायत्री । याम्याय । गायत्री, क्षेम्याय पङ्क्तिः । श्लोक्याय । गायत्री । अवसान्याय । गायत्री । उर्वर्याय । उष्णिक् । खल्याय । बृहती । ३३ वन्याय । गायत्री । कक्ष्याय च । बृहती । श्रवाय । गायत्री । प्रतिश्रवाय । गायत्री । आशुषेणाय । अनुष्टुप् । आशुरथाय । गायत्री । शूराय । गायत्री । अवभेदिने गायत्री । ३४ । बिल्मिने । गायत्री । कवचिने । पङ्क्तिः । वर्मिणे गायत्री । वरूथिने पङ्क्तिः, श्रुताय । गायत्री, श्रुतसेनाय । गायत्री । दुन्दुभ्या० । उष्णिक् । आह० । गायत्री ॥ ३५ ॥ धृष्णवे । गायत्री । प्रमृ० । पङ्क्तिः । निषङ्गि० । उष्णिक् । इषुधि । गायत्री । तीक्ष्णे० । उष्णिक् । आयु० पङ्क्तिः, स्वायु० । उष्णिक्, सुध० पङ्क्तिः । ३६ । स्रुत्याय । गायत्री । पथ्याय बृहती । काट्या० । गायत्री । नीप्या० । बृहती कुल्या० । गायत्री । सर० । गायत्री । नादेया उष्णिक् । वैशं । पङ्

क्तिः । ३७ । कूप्याय । गायत्री ॥ अवट्याय । पङ्क्तिः । वीध्र्याय । गाय-
त्री । आतप्या० पङ्क्तिः मेघ्या० । गायत्री । विद्युत्याय । पङ्क्तिः । वर्ष्याय ।
गायत्री । अवर्ष्या० । पङ्क्तिः । ३८ । वात्याय । गायत्री । रेष्म्या० । पङ्-
क्तिः । वास्तव्या० । उष्णिक् । वास्तु० । पङ्क्तिः । सोमाय गायत्री, रुद्रा-
य । बृहती । ताम्राय । गायत्री । अरु० पङ्क्तिः, । ३९ । शङ्गवे । गायत्री ।
पशु०गायत्री । उग्रा० । गायत्री । भीमा० । बृहती । अग्रेवधा० उष्णिक् ।
दूरे० । गायत्री । हन्त्रे पङ्क्तिः । हनीयसे । पङ्क्तिः । वृक्षेभ्यः हरिकेशे-
भ्यः । यजुः पङ्क्तिः । ताराय । दैवीपङ्क्तिः ॥ ४० ॥ शम्भवाय । उष्णिक् । म-
यो० । गायत्री, शङ्क० । उष्णिक् । मयस्कराय । गायत्री । शिवाय । शि.तरा
० । गायत्री ॥ ४१ ॥ पार्याय । गायत्री । अवार्याय पङ्क्तिः । प्रतरणाय ।
अनुष्टुप । उत्तरणा । गायत्री । तीर्थ्याय । गायत्री । कूल्या । बृहती । श-
ष्प्याय गायत्री । फेन्याय । बृहती ॥ ४२ ॥ सिकत्याय । उष्णिक् । प्रवा० ।
पङ्क्तिः । किꣳ० शि० । उष्णिक् । क्षय० पङ्क्तिः, कप० उष्णिक् । पु-
ल० पङ्क्तिः । इरि० । उष्णिक् । प्रप० । पङ्क्तिः ॥ ४३ ॥ व्रज्याय ।
गायत्री । गोष्ठ्या० । बृहती । तल्प्या० । गायत्री । गेह्या० । बृहती । हृ-
द० । उष्णिक् । निवे० । पङ्क्तिः । काट्या । गायत्री । गह्व । गाय-
त्री ॥ ४४ ॥ शुष्क्या० । गायत्री । हरि० । पङ्क्तिः । पांस० । उष्णि-
क् । रज० पङ्क्तिः । लोप्या । गायत्री । उल० । पङ्क्तिः, ऊर्व्या । गाय
त्री । सूर्व्या० बृहती ॥ ४५ ॥ पर्णाय । गायत्री । पर्ण० गायत्री । उ-
द्गुर० । अभि० । पङ्क्तिः, आखिद० उष्णिक् । प्रखि० । पङ्क्तिः । इषु०
गायत्री । धनु० अनुष्टुप् । किरिकेभ्यः । ४६ । देवानाꣳहृदयेभ्यः साम्नी-
उष्णिक् । विचि० । उष्णिक् । विक्षि० । नमऽआनिर्हतेभ्यो यजुरुष्णिक् ।
अत्रेदं रहस्यं । षडक्षरा यजुर्गायत्री । सप्ताक्षरा । यजुरुष्णिक्, अष्टाक्ष-
रा यजुरनुष्टुप् । नवाक्षरा यजुर्बृहती । दशाक्षरा यजुः पङ्क्तिः, ए-
कादशाक्षरा यजुस्त्रिष्टुप् । द्वादशाक्षरायजुर्जगती, पञ्चाक्षरा दैवीप

ङ्क्तिः, चतुरक्षराद्देवी बृहतीत्येताश्चैवाप छन्दांसि सन्ति ॥ २३ ॥

अग्न्याग्न्यावृतम् ॥

अग्नाग्नॄंश्चिन्त्येतद्यजुर्मन्त्रवृतं । मन्द्देवतं । विश्वपर्विषेके विनियु-क्तम् । आर्षीत्रिष्टुप् ॥

अयमँस्तेऽयमा ॥

अयमंस्ते चुद्दित्यस्यामा देवता माद्दी कुम्भकरणे विनियोगः। देवी बृहती ॥

मय्याशीः ॥

मयि तऽऊर्गित्यस्याशीर्देवता पुनः कुम्भादाने विनियोगः। देवीबृहती ॥

यन्निहत्ताऽअभिचारिकम् ॥

यन्निहतस्तन्नहृत्येतदाभिचारिकं अभिचारप्रयोजनं। अस्य शुक्। देवता। यजुर्बृहती। अद्भिसहितस्य कुम्भस्य निरसने विनियोगः॥

इमा मऽआग्नेयम् ॥

इमा मे अग्नइत्येतद्यजुरग्निदेवतं। इयं व्यूहेन दानवत्वषराविकृतिः। पाकमनऽपपरि प्रापणान्ते जपे विनियोगः॥

ऋतवोबृहती पङ्क्तिर्वा ॥

ऋतवस्थइत्यस्या बृहतीछन्दः पङ्क्तिर्वा। अष्टात्रिंशदक्षरत्वाद्विकल्पः। द्व्यधिका बृहती न्यूनापङ्क्तिर्वेति। एषाऽप्याग्नेयी । आग्नेयपदानुवृत्तेः। इष्टकादेवतेतिकल्पभाष्ये प्रापणान्तजपएव विनियुक्ता॥

समुद्रस्य द्वे गायत्र्यौ ॥

आग्नेयपदमनुवर्तते। तच यथार्थं विपरिणम्यते। समुद्रस्य त्वा, हिमस्य त्वेतीमे ऋचौ अग्निदेवते गायत्र्यौ। अग्नेरवकर्षणे विनियुक्ते। अनयोरष्टौ पादोद्दायकौ। तेन द्व्यधिके ॥

उपज्मं जगती त्रिष्टुब्वा ॥

आग्नेयपदमनुवर्तते । उपज्मन्नुपवेतस इतीयमग्निदेवता जगतीछन्दस्का त्रिष्टुप्छन्दस्का वा । इयं चतुश्चत्वारिंशदक्षरा । तेन त्रिष्टुब्भवत्येव, नदीषु भासादममिति व्यूहद्वयेन दृष्ट्वा जगती भवति । अग्नेरवकर्षणे विनियोगः ॥

अपामिदम् बृहती ॥

अपामिदमित्यस्या बृहतीछन्दः । अग्निर्देवता आग्नेयपदानुवृत्तेः अग्नेर्विकर्षणे विनियोगः ॥

अग्ने पावक वसूयवः ॥

अग्ने पावकेतीमां वसूयवऋषयोऽपश्यन् ॥

स नो मेधातिथिः ॥

स नः पावकदीदिव इतीमां मेधातिथिऋषिरपश्यत् ॥

एते आग्नेय्यौ गायत्र्यौ ॥

अग्ने पावक, स नः पावकेत्येते, अग्निदेवत्ये गायत्रीछन्दस्के । अग्न इत्यस्या दक्षिणपक्षविकर्षणे विनियोगः, स नः पावकेत्यस्याः पुच्छविकर्षणे विनियोगः ॥

पावकया जगती भरद्वाजः ॥

आग्नेयपदमनुवर्त्तते । पावकया इतीमामृचमग्निदेवतां जगतीं भरद्वाजऋषिरपश्यत् । उत्तरपक्षे विकर्षणेऽस्या विनियोगः । आर्षो व्यूहः ॥

नमस्ते बृहतीमाग्नेयीमृषिसुता लोपामुद्रा ॥

नमस्ते हरस इतीमामृचं बृहतीमग्निदेवतामृषिसुता ऋषेः पुत्री लोपामुद्रेतिनाम्नी अपश्यत् दृष्टवती । अग्नेरारोहणेऽस्या विनियोगः । अत्राद्यो नवकः । द्वितीयः सप्तकः । तृतीय एकादशकः । चतु-

र्यो दशकइति । तेनेयं सप्तत्रिंशदक्षरत्वादेकाधिका बृहती ॥ २४ ॥

नृषदे पञ्चाग्नेयानि ॥

नृषदे वेडित्यादीनि पञ्चयजूंष्याग्नेयानि । अग्निदेवतानि । स्वयमातृण्णायां पञ्चगृहीतहोमे विनियुक्तानि । नृषदे । दैवीबृहती । अप्सुषदे । बर्हिषदे । वनसदे । दैव्यः पङ्क्तयः । स्वर्विदे दैवीबृहती ॥

ये देवा जगत्यौ प्राणदेवत्ये ॥

ये देवा देवानां, ये देवा देवेष्वितीमे जगत्यौ प्राणदेवत्ये । दधिमधुघृतैरग्नेः प्रोक्षणे विनियुक्ते । व्यूहेनाद्यायाः पूर्त्तिः ॥

प्राणदा बृहतीपङ्क्तिर्वाग्नेयी ॥

प्राणदा अपानदा इतीयं बृहती वा पङ्क्तिर्वाग्निदेवत्या । अष्टात्रिंशदक्षरत्वाद्विकल्पः अग्नेः सकाशादवरोहणे विनियोगः ॥

अग्निस्तिग्मेनाग्नेयीं गायत्रीं भरद्वाजः ॥

अग्निस्तिग्मेन शोचिषेतीमामृचमग्निदेवत्यां गायत्रीछन्दस्कां भरद्वाजसञ्ज्ञकऋषिरपश्यत् । पञ्चगृहीतहोमेऽस्या विनियोगः । द्वितीये यकारस्य व्यूहः ॥

यऽइमा वैश्वकर्मणीस्त्रैष्टुभो विश्वकर्माभौवनः ॥

यऽइमा विश्वा इत्याद्या विश्वकर्मा ह्यजनिष्टेत्यंता वैश्वकर्मणी विश्वकर्मदेवताः त्रिष्टुप्छन्दस्का विश्वकर्माभौवनऋषिरपश्यत् । शोडशगृहीताज्यो होमे विनियुक्ताः ऋषिर्होता । व्यूहः, किंस्विदासीदष्टकः, किंस्विद्द्वादशकः, अन्त्यौ द्वादशकौ । याते द्वादशकः । स्वयं । व्यूहः, वाचस्पतिं । द्वादशकः । भयमुप, व्यूहः । यथासम । द्वादशकः, तंसं । व्यूहः । ऋषयः द्वादशकः, नीहारेण । व्यूहः । विश्वकर्मा हि व्यूहः । अपां गर्भ व्यूहः ॥ २५ ॥

आशुरैन्द्रीद्वादश त्रिष्टुभोऽप्रतिरथः ॥

आशु. शिशानइत्याद्या यजीनां चित्तमित्यन्ता द्वादश ऋचस्त्रिष्टुभ इन्द्रदेवत्याः इन्द्रस्य पुत्रोऽप्रतिरथसञ्ज्ञक ऋषिरपश्यत् । स यज्ञेऽग्निप्रणयने [illegible] अपि द्वादशानां विनियोगः । सङ्क्रन्दनेन द्वौ द्वादशकौ । तथापीयं त्रिष्टुप् । द्वौ तु जागतौ यस्याः सा जागती "जगती त्रैष्टुभे त्रिष्टुबितिवचनात्" । सऽइषुहस्तैः द्वादशकः, प्रभञ्जन् । द्वादशकः, अस्माकं दशकः । जयन्तं द्वादशकः, अभिगोत्राणि द्वादशकः, । इन्द्रऽआसां दशकः । जयंतीनां । व्यूहः । अस्माकमिन्द्रो द्वादशकः । एवमादीनि द्वौव्यूहौ ॥

अवसृष्टानुष्टुबिषुदेवत्या ॥

अवसृष्टा परेत्येषा अनुष्टुप् इषुदेवत्या । मर्माणि ते इत्येतत्पर्यंतानामप्रतिरथेतिसंहिताभाष्ये, अन्नो विनियोगाभावात्प्रजापतिः । संख्या वा न भवन्ति । सर्वसाधारणे विश्वानेवऋषिरित्यपरे ॥

प्रेत योद्धृदृष्टन्स्तौत्यनुष्टुप् ॥

प्रेताजयतेतीयमनुष्टुप् । योद्धारोऽस्या देवताइत्यर्थः, मद्वेत्येवमत्र व्यूहः ॥

असौ या मारुती ॥

असौ या इत्यस्या अग्नाद्यमलिङ्गोदेवता त्रिष्टुप् ॥

यत्र लिङ्गोक्तदेवता पङ्क्तिः ॥

यत्र वाणा इतीयं लिङ्गोक्तदेवता पङ्क्तिश्छन्दस्का पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिरित्युच्यते । इन्द्रो बृहस्पतिरदितिश्चात्र देवता लिङ्गोक्ताः ॥

मर्माणि लिङ्गोक्तैव त्रिष्टुप् ॥

मर्थोषि तऽद्दतीयं लिङ्गोक्तचषियदेवता त्रिष्टुप् । सहात्रते चषि- याय [illegible] विनियोगः पूर्वासां चतसृणां क्वाऽपि विनियोगः कल्पकतां नो नास्ति । अयमुत त्वामग्निरिति व्यूहः, काम सोमो वरुणो देवाश्च लिङ्गोक्ता देवताः । अथवा चषियएव देवता । त- स्य सम्बोध्यत्वेनाच प्रधानत्वात् । न सोमादयः ॥

उद्देनं तिस्रोऽनुष्टुभः ॥

उद्देनमुत्तरानित्याद्यास्तिस्रोऽनुष्टुप्छन्दस्का ज्ञेयाः ॥

आद्याग्नेयी ॥

तिसृणामाद्या उद्देनमित्येषाग्निदेवत्या द्वितीये व्यूहः ॥

द्वितीयैन्द्री ॥

पूर्वोक्तानां तिसृणां मध्ये द्वितीया इन्द्रेममित्येषा इन्द्रदेवत्या ॥

तृतीया लिङ्गोक्तदेवता ॥

पूर्वोक्तानां तिसृणां मध्ये तृतीया, यस्य कुर्मइत्येषा लिङ्गोक्तदेवता, तमग्ने व्यूहः । घृतोषितार्द्रौदुम्बरसमिदाधाने विनियोगः । आसां । अग्नोदुत्वेत्यस्य कण्यादिपूर्वमुक्तं । अत्र प्रदीप्तस्येत्यस्योपमने विनियोग इति विशेषः ॥

पञ्चदिशं पञ्चयज्ञाग्निसाधनवादिन्यः ॥

पञ्च दिशो दैवीरित्याद्याः पञ्चर्चो यज्ञाग्निसाधनवादिन्यः य- ज्ञं अग्निसाधनं यागसाधनञ्च विवदन्तीति यज्ञाग्निसाधनवादिन्यः । अथासां छन्दांसि क्रमेणाह ॥

आद्ये द्वे त्रिष्टुभौ ॥

आसां पञ्चानां मध्ये प्रथमद्वितीये पञ्चदिशः समिद्धोऽग्निरित्ये- त्येते द्वे त्रिष्टुभौ । पञ्चदिशः दिशोदेवताः । आद्यस्यायोदशकः । द्वि- तीयएकादशकः । तृतीयो द्वादशकः । चतुर्थो दशकः । इयंविकाउ-

अयन इति नवकः, व्यूहेनछन्दः पूर्तिः, पञ्चाग्निर्देवता ॥

तृतीया पङ्क्तिर्बृहती वा ॥

पञ्चानां मध्ये तृतीया देव्याय धर्त्र इत्येषा पङ्क्तिर्वा । बृहती वा । चत्वारिंशद्वर्णत्वाद्विकल्पः । अत्राप्यग्निर्देवता । अक्षरसंख्ययैवं पङ्क्तिर्बृहती वा पादाक्षरनियमस्तु नास्ति ॥

चतुर्थी बृहत्येव ॥

पूर्वोक्तानां पञ्चानां मध्ये चतुर्थी वीतं॰ हविरित्येषा बृहत्येव । बृहतीछन्दस्कैव, यकारव्यूहेनाक्षरैर्बृहती । अत्रापि पादाक्षरनियमो नास्ति । हविर्यज्ञश्च देवता ॥

अन्त्या त्रिष्टुप् ॥

पञ्चद्विमइत्यादिपंचानामन्त्या सूर्यरश्मिरितीयं त्रिष्टुप् । अग्निरेव देवता । पञ्चानामपि चित्यंप्रति गमने विनियोगः ॥

विमानो द्वे आदित्यदेवते ॥

त्रिष्टुप्पदमनुवर्त्तते । विमानऽएष,ऽउग्रा समुद्रऽइतीमे द्वे ऋचौ त्रिष्टुभौ । आदित्यदेवते । पृश्नस्योपधाने विनियुक्ते । विचक्षणे व्यूहः ॥

आद्या विश्वावसोः ॥

विश्वावसुरस्या ऋषिरित्यर्थः ॥

द्वितीयाऽप्रतिरथस्य ॥

पूर्वोक्तयोर्मध्ये द्वितीया उग्रा समुद्रइत्येषा अप्रतिरथस्यार्षं । अप्रतिरथोऽस्या ऋषिरित्यर्थः, इन्द्रं विश्वाऽइत्यध्यायादि प्रागुक्तं । अतिक्रमणेऽत्र विनियोगइति विशेषः ॥

देवहूर्विधृतिरनुष्टुब्यज्ञदेवत्या ॥

देवहूरित्यस्या विधृतिऋषिरनुष्टुप्छन्दो यज्ञोदेवता त्रिंशदक्षरत्वादियं दृश्यूनानुष्टुप् । उष्णिग्वेति संहिताभाष्ये । अत्रापि पादा-

परे नियमो नास्ति॥

वाजस्यैन्द्र्यनुष्टुप्॥

वाजस्य मा प्रसवइतीयमैन्द्री इन्द्रदेवत्या अनुष्टुप्छन्दस्का॥

उद्ग्राभमैन्द्राग्न्यनुष्टुबेव॥

उद्ग्राभं च निग्राभं चेतीयमृगैन्द्राग्नी। इन्द्राग्नी यस्या देवता अनुष्टुप्छन्दः, देवर्ष्यित्यादीनामग्निं प्रतिगमने विनियोगः। तृतीयो नवकः। चतुर्थः सप्तकः तेन पूर्णैव॥ २६॥

क्रमध्वं पञ्चाग्नेय्यः आद्यानुष्टुप्ततस्त्रिष्टुप्। ततो बृहती पिपीलिकमध्या॥

क्रमध्वमग्निनेत्याद्याः पञ्चमन्त्रोऽग्निदेवताः तासां पञ्चानां मध्ये आद्या क्रमध्वमित्यनुष्टुप्। अन्त्यगो व्यूहः, ततोऽनन्तरं द्वितीया प्राचीमनुष्टुप्, अत्र तृतीयो दशकः, चतुर्थो द्वादशकः। तेन पूर्तिः। ततोऽनन्तरं तृतीया पृथिव्या अहं पिपीलिकमध्याबृहती। यस्याः प्रथमतृतीयौ चयोदशकौ। मध्यमो द्वितीयोऽष्टकः सा पिपीलिकमध्याबृहतीत्युच्यते। "त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्येत्युक्ते."। अत्राद्यस्त्रयोदशकः द्वितीयो नवकः, तृतीयश्चतुर्दशकइति षट्त्रिंशदक्षरत्वात्बृहती त्रिपाद्विशिष्टमध्या पिपीलिकमध्येति वचनात्पिपीलिकमध्या च॥

ततोऽनुष्टुप्त्रिष्टुबन्त्या॥

ततोऽनन्तरं चतुर्थी स्वर्यन्तइत्यनुष्टुप्। पादे व्यूहः। ततः अन्त्याऽग्नेप्रेहीति पञ्चमी त्रिष्टुप्। द्वितीये व्यूहः, चतुर्थे स्वर्णीति व्यूहेऽपि दशकः। क्रमध्वमित्यादिपञ्चानामग्न्यारोहणे विनियोगः॥

नक्ते सहस्राद्यविराड्डाग्नेयी॥

अग्ने सहस्राक्षेत्येषाग्निदेवत्या विराट्छन्दस्का। यस्या दशाक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिः। अथ चतुष्पदा विराड्दशकाद्युक्ते।" चतुर्थोऽन्त्य नवकः, स्वाहा। पृथग्यजुः। स्वयमातृण्णायां उपरि पर्योहोमे विनियोगः॥

सुपर्णो द्वे पङ्क्तित्रिष्टुभौ॥

सुपर्णोऽसि आजुह्वानः इतीमे द्वे ऋचौ अग्निदेवत्ये यथाक्रमं पङ्क्तित्रिष्टुभौ। सुपर्णोऽसि पङ्क्तिः। आजुह्वानास्त्रिष्टुप्। अग्निनिधाने विनियोगः। आग्नेयीत्यनुवर्तते। तथा चाग्नेय्यौ इति विपरिणाम्यते। अत्र सुपर्णः असीत्येवं व्यूहः तेनेयं चत्वारिंशदक्षरा पङ्क्तिः। पञ्चपदा च पादानामक्षरसंख्या नियता नास्ति। आजुह्वानइत्यत्र तृतीयेन व्यूह. चतुर्थो द्वादशकोपेतः॥

ताꣳ सवितुः सावित्रीं त्रिष्टुभं पुरस्ताज्ज्योतिषं कण्वो ददर्श॥

ताꣳ सवितुरित्येतां सवितृदेवत्यामृचं त्रिष्टुभं कण्वऋषिर्ददर्श। अत्र वरेण्यस्येति व्यूहः। पुरस्ताज्ज्योतिषमिति केचित्पठन्ति। तदयुक्तं। तल्लक्षणस्याभावात्। तेन त्रिष्टुभंकण्वो ददर्शेत्येव सत्यः पाठः, संहिताभाष्ययोस्तु पुरस्ताज्ज्योतिषमित्यपि पाठो लिखितोऽस्ति। तदा द्व्यधिका सा भवति शमीमयसमिदाधाने विनियोगः॥

विधेमाग्नेयी गृत्समदस्त्रिष्टुभमस्यास्त्रिस्थानोऽग्निर्देवता॥

विधेम तदृतीमामृचमग्निदेवतां त्रिष्टुभं गृत्समदोऽपश्यत् अस्या ऋचस्त्रिस्थानोऽग्निर्देवता। त्रीणि स्थानानि यस्यासौ त्रिस्थानः तानि त्रीणि स्थानानि मन्त्रमध्ये कथितानि सन्ति। वैकङ्कतसमिदाधानेऽस्या विनियोगः॥

प्रेद्धो विराडाग्नेयी वसिष्ठस्य ॥

प्रेद्धोऽअग्नइत्येषा अग्निदेवत्या विराट्वसिष्ठस्यार्षं वसिष्ठोऽस्या ऋषिरित्यर्थः । अस्या दशाक्षरास्त्रयः पादा वर्त्तन्ते, द्वितीयस्य व्यूहेन पूर्त्तिः । तेनेयं विराडनुष्टुप् । "दशकास्त्रयो विराडिति वचनात्" । औदुम्बरसमिदाधाने विनियोगः ॥

चित्तिं वैश्वकर्मण्यतिजगती ॥

चित्तिं जुहोमीतीयमृक् विश्वकर्मदेवता अतिजगतीछन्दस्का । "द्वापञ्चाशदक्षरा अतिजगतीत्युच्यते" । अत्र द्वाभ्यां व्यूहाभ्यां पूरणं । स्रुवाहुतिहोमे विनियोगः ॥

सप्ततऽआग्नेयी त्रिष्टुप्सप्तऽऋषीणाम् ॥

सप्ततऽअग्नइत्येषा अग्निदेवत्या त्रिष्टुप्छन्दस्का सप्तऋषीणामार्षं सप्तऋषयोऽस्या ऋषयइत्यर्थः, षड्चत्वारिंशदक्षरेयं । येन द्व्यधिका त्रिष्टुप् । सर्वाहुतिहोमेऽस्य विनियोगः ॥ २१ ॥

शुक्रज्योतिः षण्मारुत्यः ॥

शुक्रज्योतिरित्याद्याः षड्ऋचो मारुत्यः । मरुतआसां देवताइत्यर्थः । ते च शुक्रज्योतिरित्यादिनामकाः । मन्त्रलिङ्गात् । तं चैकैकस्याऋषि सप्त सन्ति । तेन प्रत्यृचं सप्तानां सप्तानां मन्त्रं नामकानामुद्दे शः कार्यः, आसां क्रमेण छन्दांस्याह ॥

आद्या चतुर्थी चोष्णिक् ॥(१)

आसां मध्ये आद्या शुक्रज्योतिरितीयं उष्णिक्, चतुर्थी ऋतजिच्चेति इयञ्चोष्णिक् । प्रथमाऽष्टाविंशत्यक्षरा । चतुर्थी एकाऽधिका ॥

द्वितीया तृतीयाच गायत्री ॥(२)

(१) आद्या तृतीयोष्णिक् इति काण्वसर्वानुक्रमपाठः ॥

(२) द्वितीया चतुर्थी च गायत्री इत्यपि तत्रस्थः पाठश्च ॥

चतसां चत्वां द्वितीया इंद्रङ्घेति गायत्री । ऋतश्चेति तृतीया च गायत्री ॥

पञ्चमी जगती ॥

षण्णां मध्ये पञ्चमी इंद्रश्चासदिति जगती । अष्टाचत्वारिंशदक्षरत्वात् ॥

षष्ठी गायत्र्युष्णिग्वा ॥

षष्ठी स्वतवानित्येषा गायत्री । उष्णिग्वा । षड्विंशत्यक्षरत्वाद्विकल्पः । षण्णामपि क्रमेण मारुतपुरोडाशयागे विनियोगः ॥

इन्द्रं दैवीमाकृतम् ॥(१)

इन्द्रं दैवीरित्येतन्मारुतं दैवतं यजुः व्यूहेन षट्पञ्चाशदक्षराशक्वरी । जपे विनियोगः ॥

इमं त्रयोदशर्चं आग्नेयस्त्रैष्टुभोऽनुवाको यज्ञस्तुतिर्घृतस्तुतिर्वा वसोर्धाराभिवादिनी वा ॥

इमम्न इत्येषस्त्रयोदशर्चोऽनुवाकोऽग्निदेवत्रिष्टुप् छन्दस्कः एषोऽनुवाको यज्ञस्तुतिर्वा वसोर्धाराऽभिवादिनी घृतस्तुतिकः, अग्रे वसोर्धाराहोमो भविष्यति तदभिवादिनी घृतस्तुतिरप्यत्र दृश्यते सकलस्यानुवाकस्य जपे वाचने वा विनियोगः ॥

घृतं मिमिक्षे गृत्समदः ॥

अस्मिन्ननुवाके घृतं मिमिक्ष इत्यस्या गृत्समदऋषिः ॥

समुद्राद्वामदेवः ॥

समुद्रादूर्मिः । इत्यस्या वामदेवऋर्षिः ॥

चत्वारि शृङ्गा यज्ञपुरुषदेवत्यऋषभो मन्त्रः ॥

---

(१) इन्द्रं दैवीर्मारुती शक्वरी इत्यपि तथैव पाठः ॥

चत्वारि शृङ्गेत्ययं मन्त्रो यज्ञपुरुषदेवतः ऋषभः मन्त्रोक्तवृषभरूपो यज्ञपुरुषोऽस्य देवता इत्यर्थः अत । घृते स्थितः । व्यूहः, घृतस्य नाम । व्यूहः । चतुः शृङ्गः व्यूहः, द्वे शीर्षे व्यूहः । एता अर्षन्ति । व्यूहः । कल्याण्यः । अभ्यर्षत कामा । व्यूहः । धामन्ते द्वादशकः । अपामनीके द्वौ द्व्यर्चौ । अनानुक्तार्षीणां सर्वमन्त्राणामध्यायिनं प्रजापतिरपश्यत्साध्या वाऽपश्यन्नित्येतएव ऋषयः ॥ २८ ॥

१ वाजश्च मे देवानामार्षम् ॥ १८

वाजश्च मइत्यादीनि वेट्स्वाहेत्यन्तानि वसोर्धाराहोममन्त्रभूतानि यजूंषि देवानामार्षं । एतेषां यजुषां देवा ऋषय इत्यर्थः, वसोर्धाराहोमे विनियोगः ॥

एतैर्यजुर्भिर्यजमानोऽग्नेः कामान्याचते ॥

यजमानः एतैर्वाजश्च मइत्यादिभिर्यजुर्भिरग्नेः सकाशात् । वाजोऽन्नं मेऽस्त्वित्येवं कामानभिलाषान्याचते प्रार्थयते । अतएवैतेषां यजुषामग्निरेव देवता । तथा च श्रुतिः । "अथाऽतो वसोर्धारां जुहोत्यत्रैष सर्वोऽग्निः संस्कृतः सऽएषोऽत्र वसुस्तस्मै देवा एतां धारां प्राप्यँस्तयैनमप्रीणन्नित्यादि" । कामप्रार्थनं च श्रूयते अन्नादिकं च मह्यं मइत्यनेन चात्वा प्रीणात्यनेन चात्वाभिषिञ्चत्यनेन चेत्येतद्यो इदं च मे देहीदमस्त्वितीति । तथा "एतद्वै देवा अग्नेः कामान्कामानामप्रतिग्रहीष्यामइत्यात्मनैवेत्यब्रुवन्नग्निर्वै देवानामात्मा यतऽ उएव यजमानस्य स यदाह यज्ञेन कल्पन्तामित्यात्मना मे कल्पन्तामित्याहेति" । अत्र वाजादयः काम्यमानत्वात्कामाः । अत्र त्र्यक्षराणां । ऊर्क् च मइत्यादियजुषां दैव्यनुष्टुप् । वाजश्च मे इत्यादिचतुरक्षराणां दैवीबृहती, प्रसितिश्च मे इत्येवं पञ्चाक्षराणां दैवीपङ्क्तिः, आधिपत्यं च मइत्यादि षडक्षराणां दैवीत्रिष्टुप् यजुर्गायत्री वा । सप्ताक्षराणां द्वादश्योजसश्च इत्यादीनां दैवीजगती । यजुरुष्णिग्वा । अष्टाक्ष-

राणां आयुर्यज्ञेन इत्यादीनां यजुरनुष्टुप्। सुत्रामा पतये स्वाहेत्या-
दीनां नवाक्षराणां यजुर्बृहती। दशाक्षराणां सुत्राम वैमर्टं० मि-
मायेत्यादीनां यजुः पङ्क्तिः। एकादशाक्षराणां विमर्टं मित्रस्या-
स्यावनाय स्वाहेत्यादीनां यजुस्त्रिष्टुप् द्वादशाक्षरस्य अङ्कुलयः। अक्ष-
रयो द्विगुणसमऽइत्यस्य यजुर्जगती एवमनुक्तानामपि कल्पनीयं, अ-
त्र च चत्वारिंशताग्न्येकाधिकानि यजूंषि सन्ति। तत्र वाजश्च मह-
स्याध्यासु ज्येष्ठं च श्री, यसु च म इतिकण्डिकाद्वयवर्जितास्त्रिकोनविं-
शतिकण्डिकासु त्रयोदश त्रयोदश यजूंषि सन्ति। ज्येष्ठं च मह्य-
स्यां तु पञ्चदश यजूंषि। वसु च म इत्यस्यां नव। अग्निश्च मे घर्म-
श्च मइत्यस्यां कामास्त्रयोदश। यजूंषि तु द्वादशैव। अङ्कुलयः अक्ष-
रयो द्विगुणमइत्येकमेव यजुः अत्र कामास्तयः। यजुर्जगतीछन्दो, व्र-
तं च म इत्यस्यां कामा दश यजूंषि षडेव, अहोरात्रे उर्वष्ठीवे बृहद्र-
थन्तरे च म इत्येतावदेकं यजुः। पङ्क्तिनषट्कामाः। प्राजापत्यानु-
ष्टुप्सामानुष्टुप् छन्दः, एका च मइत्यस्यां त्रयस्त्रिंशत्। चतस्रश्च
मइत्यस्यां त्रयोविंशतिः। त्र्यविश्च म इत्यस्यामेकादश। पष्ठवाट्च
मेत्यस्यां नव, वाजायस्वाहेत्यस्यां चतुर्दश। तत्र त्रयोदश स्वाहान्ता-
नि। अग्निश्च चतुर्दश व्यूहाभ्यामष्टाविंशत्यक्षरा प्राजापत्या अनु-
ष्टुप् तस्य छन्दः। आयुर्यज्ञेनेत्यत्रैकविंशतिः। तत्र द्वादश कल्पन्ता-
न्तानि। स्तोमश्चेत्यादीनि षट्। स्वर्देवा अगन्मामृता अभूमेत्ये-
कं। साम्नीगायत्री तस्य छन्दः। व्यूहश्च। प्रजापतेः प्रजाऽ अभूमेत्ये-
कं। यजुर्बृहती। वेट्स्वाहेत्येकं। दैव्यनुष्टुप्, एवं च चत्वारिंशतान्ये-
काधिकानि पूर्णानि॥

वाजप्रसवीयं० समाप्तम्॥

समानाऽऋचां समाहारः सामचं वाजप्रसवीयसम्बन्धिसामर्चं अभि-
धीयतइति शेषः। वाजस्य न्वित्यस्या अपि ऋचो मध्ये गणनास-

मरुतो भवन्ति । अध्वास्तु ऋचो भवन्ति । अध्वास्तु ऋत्यादि प्रागुक्तम् ॥

विश्वे त्रैष्टुभं (१)वैश्वदेवं लुग्नोधानाकः ॥ १८/३१

विश्वे अद्येत्येतत्त्रिष्टुप् छन्दस्कं विश्वेदेवदेवतं लुग्नोधानाकोऽपश्यत् । अत्र द्वितीये व्यूहः । आग्निकराजप्रसवीयहोमे.स्य समर्थस्य विनियोगः ॥

वाजो नस्तिस्त्रोऽन्नदेवत्या आद्याऽनुष्टुप् द्वे त्रिष्टुभौ ॥

वाजो नः सप्त,इत्याद्यास्तिस्र ऋचोऽन्नदेवत्याः । तासामाद्याऽनुष्टुप् छन्दस्का वाजो नः सप्तइत्येषा । तृतीये व्यूहः । (तो वाजो नो अद्य, वाजः पुरस्तादितीमे द्वे त्रिष्टुभौ ॥

सप्ता विराजात्राग्नेय्यौ ॥

सप्ता, पश्चः पृथिव्यामित्यनयोः प्रजापतिर्दृ॰अग्निर्देवता विराडनुष्टुप्छन्दः । देवस्य त्वा प्रा॰सवितादेव॰प्रजापत्यावृहतीछन्दोऽभिषेके विनियोगः ॥

सरस्वत्यै लिङ्गोक्तम् ॥

सरस्वत्यै प्र॰यजमानो देवता प्राजापत्या बृहतीछन्दोऽभिषेके विनियोगः ॥

ऋताषाड्गन्धर्वोऽप्सरसः ॥

ऋताषाट्प्र॰ऋतधामाग्निप्राजापत्या बृहती । द्विरो व्यूहेन ऋग्बृहती । तस्यापो आसुरी उष्णिक्, भुज्यु । एकाधिकाप्राजापत्या पङ्क्ति । तस्य दक्षिणा । एकाधिकाप्राजापत्यानुष्टुप् । प्रजापतिः । प्राजापत्या त्रिष्टुप् । तस्य ऋक्सामानि । ऋग्गायत्री । इाद्ध

(१) वैश्वदेवां इति काण्वपाठः ॥

सूर्यहोमे कृताग्न्यादित्यादिहविरग्नमन्त्रयोर्विनियोगः ॥

स नः प्राजापत्या प्रस्तारपङ्क्तिः ॥

स नो भुवनस्यपत इतीयं प्रजापतिदेवत्या । अस्याः प्रस्तारपङ्क्तिश्छन्दः यस्या आद्यौ द्वादशकौ अन्त्यावष्टकौ सा प्रस्तारपङ्क्तिः । "आद्यौचेत्प्रस्तारपङ्क्तिरित्युक्तेः" रथशीर्षे पञ्चकृष्णीतहोमेऽस्या विनियोगः । अत्र तृतीयो नवकः । चतुर्थः स्वाहाकारेण सहाष्टकः ॥

समुद्रोऽसि वायव्यानि त्रीणि ॥

समुद्रोऽसि नभस्वानित्यादीनि त्रीणि यजूंषि वायुदेवतानि वातहोमे विनियुक्तानि । समुद्रोऽसि व्यूहेन ऋचामनुष्टुप् । मारुतोऽसि । उष्णिक् । अवस्यूरसि । प्राजापत्याबृहती, यास्ते अग्ने, यास्ते इत्यनयोः प्रागुक्तहोमे विनियोगः ॥

रुचमाग्नेय्यनुष्टुप् ॥

रुचं नो धेहीतीयमग्निदेवत्याऽनुष्टुप्होमे विनियुक्ता । प्रथमोऽत्र नवकः । नैतकाधिका ॥

तत्त्वा वारुणी त्रिष्टुभ्, शुनःशेपः ॥

तत्त्वा यामीमामृचं वरुणदेवत्यां त्रिष्टुभं शुनःशेपऋषिरपश्यत् । आज्याहुतिहोमेऽस्या विनियोगः ॥

स्वर्णाग्नेयानि पञ्च ॥

स्वर्ण घर्मइत्यादीनि पञ्च यजूंष्यग्निदेवतानि । आज्याहुतिहोमएवैषां विनियोगः । पञ्चानामपि यजुर्गायत्रीछन्दः द्वितीये व्यूहः । दैवीपङ्क्तिः ॥

अग्निं युनज्म्याग्नेय्यस्तिस्र आद्ये द्वे त्रिष्टुभौ पङ्क्तिस्तृतीया ॥

अग्निं युनज्मि, इमौ ते पक्षौ, इन्दुर्दक्ष इत्येतास्तिस्र ऋचोऽग्निदेवताः । तासां आद्ये द्वे त्रिष्टुप्छन्दसी । तृतीया इन्दुर्दक्ष इत्येषा पङ्क्तिः । अग्नियोजने तिसृणां विनियोगः । तेन वयं । द्वादशकः । इमौ ते । द्वादशकः । याभ्यां द्वौ व्यूहौ । यत ऋषयः चतुर्दशकः, तेनैकाधिका । इन्दुर्दक्षः नवकः । द्वितीयतृतीयौ एकादशकौ । चतुर्थो नवकः । तेन चत्वारिंशदक्षरापङ्क्तिः ॥

दिवो द्वे आग्नेय्यौ परोष्णिङ्महापदपङ्क्ती ॥

दिवो मूर्द्धाऽसि, विश्वस्य मूर्द्धन्निति इमे द्वे ऋचावग्निदेवत्ये यथाक्रमं परोष्णिङ्महापदपङ्क्तिः । तत्र दिवो मूर्द्धा परोष्णिक् यस्यास्त्रिपदा आद्यावष्टकौ । तृतीयो द्वादशकः । तेनैकाधिका आद्यपादयोरक्षरनियमो नास्ति, विश्वस्य मूर्द्धन्निति जगती महापदपङ्क्तिः । अष्टाचत्वारिंशदक्षरा । महापङ्क्तिलक्षणं त्वत्परिभाषायां नास्ति । महापङ्क्तिलक्षणं विद्यते । अष्टकः सप्तकः । षट्को दशको नवकोऽव्यष्टका वा महापङ्क्तिरिति, तेनात्र विश्वस्य मूर्द्धन्निति प्रथमो यकारव्यूहेन अष्टाक्षरः पादः, तिष्ठसीत्यादिद्वितीयः सप्तकः, समुद्रे ते तृतीयो दशकः । अपो दत्तेऽत्यष्टकः, पृथिव्या इत्यपि नवकः । तेनात्र परोष्णिङ्महापङ्क्तीत्येव पाठो युक्तः । इतरस्तु प्रमादपाठः अग्निविमोकेऽनयोर्विनियोगः ॥

इष्टो यज्ञो द्वृचं यजमानाग्निदैवत्यं गालवः । आद्योष्णिग्द्वितीया गायत्री ॥

इष्टो यज्ञ इत्येतद्द्व्यृचं ऋग्द्वयं क्रमेण यजमानाग्निदैवतं गालवऋषिरपश्यत् अस्मिन्द्वृचे आद्या इष्टो यज्ञस्त्वुष्णिक् अष्टाविंशत्यक्षरत्वात् । पादाक्षरनियमो नास्ति द्वितीया इष्टोऽअग्निर्गायत्री । आद्यः सप्तकः । तेनैकोना । स्वगाद्दमिति पूरणं वा । आग्नि-

कमिद्वस्सुहोमेऽस्यो विनियोगः ॥

यदाकूतादष्टर्चमाग्नेयं विश्वकर्मर्षः ॥

यदाकूतात्समसुस्रोदित्येतदष्टर्चं आग्निदेवतं । विश्वकर्मर्षदृष्टे-दार्थं विश्वकर्माऽस्यर्षिरित्यर्थः । स्रुवाहुतिहोमे विनियोगोऽस्याष्ट-र्चस्य ॥

तृतीया दैवी वा ॥

अग्निमद्यर्चं तृतीया एतं जानाथेत्येषा दैवी वा । देवा अस्या देवते-त्यर्थः । आग्नेयी वेति विकल्पः ॥

आद्या जगती ॥

अत्राद्या यदाकूतादित्येषा जगती । अत्र चतुर्थश्चतुर्दशकः । अत्र एकादशकाः । तृतीये व्यूहः ॥

तिस्रस्त्रिष्टुभः ॥

एतट॰ सधस्थ, एतं जानाथ, उद्बुध्यस्वेत्येतास्तिस्रऋचस्त्रिष्टुभः । एतठ॰ सधस्थेत्यत्र चतुर्थे व्यूहः । एतं जानाथ । व्यूहः । उद्बुध्यस्वे-त्यत्र तृतीयो दशकः, चतुर्थो द्वादशकः ॥

चतस्रोऽनुष्टुभः ॥

येन वहसि । प्रस्तरेण, यद्दत्तं, यत्र धारा इत्येताश्चतस्रऋचोऽनु-ष्टुभः । स्वर्देवेषु इत्यत्र सुवर्देवेष्विति चतसृष्वपि चतुर्थपादे व्यूहः, मधीर्घृतस्येत्यन्ततः ॥

अग्निरस्म्यग्न्यद्वैतवादिनीं त्रिष्टुभं देवश्रवादेववात-ऋषभारतौ ॥

अग्निरस्मि जन्मना इतीमामृचं त्रिष्टुप्छन्दस्कामग्न्यद्वैतवादिनीं भारतौ भरतपुत्रौ देववातश्चेतीमौ द्वावृषी अपश्यतां । अस्या अ-ग्निर्देवता । आत्मनोऽग्निना सहाद्वैतमैक्यं वदतीत्यग्न्यद्वैतवादि-

नीयस्या विनियोगो यज्ञकर्मणि नास्ति ॥

ऋचो यजुः ॥

ऋचो नामासीत्येतद्यजुः । एकवचनादेकमेव सप्तदशाक्षरं व्यूहेन ऋग्गायत्री आत्मादेवता । अस्याऽपि विनियोगकर्म नास्ति ॥

येऽग्नयोऽनुष्टुबाग्नेयी ॥

येऽग्नयः पांचजन्या इतीयमनुष्टुबग्निदेवत्या । अग्नेरुपस्थाने विनियुक्ता । अस्यां पृथिव्यां । व्यूहः ॥ ३० ॥

वार्त्रहत्याय सप्तर्चमिन्द्रोऽपश्यत् ॥

आग्नेयपदमनुवर्त्तते, वार्त्रहत्यायेत्यादि सप्तर्चं ऋक्सप्तकं चित्याग्निदेवतं इन्द्र ऋषिरपश्यत् । "इन्द्रस्तत्सप्तर्चमपश्य" दितिश्रुतेः" । पुरीषवत्या चितेरुपस्थाने विनियोगः ॥

आद्ये द्वे वार्त्रघ्न्यौ गायत्रित्रिष्टुभौ विश्वामित्रस्य च ॥

अथ सप्तर्चं आद्ये द्वे ऋचौ वार्त्रहत्याय, सहदानुमित्येते वार्त्रघ्न्यौ क्रमेण गायत्री त्रिष्टुभौ विश्वामित्रस्य च ऋषेरार्षं चकारादिन्द्रस्य च । अनयोरिंद्रविश्वामित्रौ द्वावप्यृषी स्त इत्यर्थः । विश्वामित्रेणेंद्रस्य बाधो माभूदिति । चकारः समुच्चयार्थः । अतएव यत्रान्यत्राविशेषोक्तेन ऋषिणा सामान्यस्यापवादो भवतीति गम्यते, पृतनाषाह्याय चेत्यत्र व्यूहः ॥

विनोऽनुष्टुप् ॥

वि न इन्द्रेतीयमनुष्टुप् ॥

मृगो न त्रिष्टुप् ॥

मृगो न भीम इतीयं त्रिष्टुप् ॥

प्रथमाऽग्राभो भारद्वाजः ॥

प्रथमां विन इन्द्रइतीमां भारद्वाजस्य पुत्रः शास ऋषिरपश्यत् । वि नः शासो भारद्वाज इति प्रागुक्तेऽपि इन्द्रेण ऋषिणाऽत्र विशेषोपदिष्टेन इन्द्र एव सप्तर्चमपश्यदिति प्रत्ययश्रुतेन शासस्य बाधो माभूदिति पुनरुक्तं । इन्द्रोऽप्यत्र भवत्येव । प्रत्ययश्रुतत्वात् ॥

द्वितीयां जय ऐन्द्रः ॥

द्वितीयां मृगो नेतीमां "इन्द्रस्य पुत्रो जयसंज्ञक ऋषिरपश्यत् । अत्रापीन्द्रो द्वितीययोस्ते च प्रत्ययश्रुतेः" ॥

द्वे वैश्वानर्यौ गायत्रीत्रिष्टुभौ ॥

वैश्वानरः, पृष्टोदिवीतीमे द्वे ऋचौ वैश्वानरदेवते क्रमेण गायत्रीत्रिष्टुभौ । वैश्वानरो गायत्री । पृष्टोदिवि त्रिष्टुप् ।

पृष्टो दिवि कुत्सस्य च ॥

पृष्टो दिवीत्येषा कुत्सस्यार्षं चकारादिन्द्रस्य च । तस्या इन्द्रकुत्सौ द्वावप्यृषी द्वा इत्यर्थः । अत्रापि चकारः समुच्चयार्थः ॥

अश्याम द्वे त्रिष्टुभावाग्नेय्यौ कामवत्यौ ॥

अश्याम तं । वयं ते, यद्येतीमे द्वे ऋचौ त्रिष्टुभौ अग्निदेवते कामशब्दवत्यौ ॥

अश्याम भरद्वाजस्य च ॥

अश्याम त इत्येषा भरद्वाजस्यार्षं । चकारादिंद्रस्य च । चकारः समुच्चयार्थः । इन्द्रभरद्वाजावस्य ऋषी इत्यर्थः ॥

वयं ते कात्यस्योत्कीलस्य ॥

त्रिष्टुप्पदमनुवर्त्तते । वयं त इत्येषा त्रिष्टुप् कात्यस्य कतापत्यस्योत्कीलस्य । आर्षमिति शेषः । अस्याः कतस्य पौत्र उत्कील ऋषिरित्यर्थः । चित्युपस्थानएवविकल्पेन विनियोगः ॥

धामच्छदनुष्टुब्वैश्वदेवी ॥

धामच्छदग्निरित्येषा विश्वदेवदेवतानुष्टुप् दर्शाभिघपञ्चानपङ्क्ते वि-
त्वुपञ्चाने विनियुक्ता, प्रथमः समकः । चतुर्थे व्यूहं कृत्वा छन्दः प-
रचम् ॥ २१ ॥ (१)

अथ सौत्रामणी ॥

अथानन्तरं सौत्रामणी । अभिधीयतइतिशेषः । सौत्रामणीम-
न्त्राणामृष्यादिकमभिधीयत इत्यर्थः ॥

प्रजापतेरार्षमश्विनोः सरस्वत्याश्च ॥

सा सौत्रामणी प्रजापतेरार्षं । सरस्वत्याआर्षं । सौत्रामण्यां त-
न्त्राणां प्रजापतिरश्विनौ च सरस्वतीच एतेऋषयः सन्तीत्यर्थः ॥

स्वाद्वीं त्वाऽनुष्टुप् सुरासोमदेवत्या ॥

स्वाद्वीं त्वा स्वादुनेतीयमनुष्टुप् अस्याः सुरासोमो देवता । सुरा-
रूपः सोमः सुरासोमइत्युच्यते । अत्र प्रथमोऽष्टकः तृतीयोऽष्टकः ।
चतुर्थसप्तकः । सुरायाः संसर्जने विनियोगः ॥

सोमोऽसि चत्वारि सौराणि ॥

सोमोऽस्यश्विभ्यामित्यादीनि चत्वारि यजूंषि सौराणि सुरा-
संसर्जनएव विनियुक्तानि । सोमोऽसि । देव्यनुष्टुप् । अश्विभ्यां यजु-
र्बृहती ॥

परीतो भारद्वाजः सौमीं बृहतीम् ॥

परीतोषिञ्चतेतीमां बृहतीं सोमदेवत्यां भरद्वाजऋषिरपश्यत् ।
अत्रोऽष्टकाः तृतीयो व्यूहाभ्यां द्वादशकः । तेनेयं बृहती । पयसा सु-
रापरिषेके विनियोगः ॥

वायोस्तपो गायत्रः सौम्यऽश्वाभूते ॥

---

(१) काण्वसर्वानुक्रमेऽत्रैव द्वितीयाध्यायः समाप्त. कृतः ॥

वायोः पूतइयं ब्रवः सोमदेवत्यो गायत्रीछन्दस्का वामूतेराविं प्र- त्र तृचस्याभूतिकं विरित्यर्थः । सुरापावनेऽस्य तृचस्य विनियोगः । इन्द्रस्य युज्यः, प्राङ्मुखोमइत्यमयोर्व्यूहः ॥

ब्रह्मक्षत्र त्रिष्टुप् सुरासोमवत्या ॥

ब्रह्मक्षत्रमितीयं त्रिष्टुप्पस्याः सुरासोमदेवता । पयः पावने विनि- योगः । चाद्यो द्वादशकः । द्वितीयस्त्रयोदशकः चत्वावेकादशको । तेन चधिका चश्विभ्यां त्वा । यजुस्त्रिष्टुप् । सरस्वत्यै त्वा चासुरीच- नुष्टुप् । इन्द्राय त्वा सुत्रामृणे सामोष्णिक् । उपयामस्त्रिष्वपि मध्ये ग- च्छते एव ते त्रयाणां प्राजापत्या गायत्रीछन्दः ॥

नानाहि जगती सुरासोमदेवत्या ॥ (१) मन्त्रा

नाना हि वामितीयं जगती अस्याः सुरासोमदेवता । सुराग्रहा- णां ग्रहणे प्रत्येकविनियुक्ता । द्वितीयो व्यूहेनैकादशकः, चतुर्थो व्यू- हेन द्वादशक, कुत्रचिद्व्यूहेन छन्दः पूरणं । आश्विनं तेजः । यजुर्जग- ती । सारस्वती सामोष्णिक् । ऐन्द्रस्वलं । यजुस्त्रिष्टुप् । उपयामइति- सर्वत्र मध्ये ज्ञेयं । एषते योनिरिति त्रयस्य प्राजापत्यागायत्रीछन्दः ॥

तेजोऽसि पयो देवत्यानि । ८

तेजोऽसीत्यादीनि त्रीणि यजूंषि पयोदेवत्यानि तेजोऽसि यजुर्बृ- हती । आश्विने पयोग्रहे गोधूमकुवलचूर्णावापे विनियोगः ॥

वीर्यमसि ॥

यजुः पङ्क्तिः । सारस्वते पयोग्रहे उपवाकबदरचूर्णावापे वि- नियोगः । वीर्यमसि । यजुः पङ्क्तिः । सारस्वते पयोग्रहे उपवा- काबदरचूर्णावापे विनियोगः । बलमसि । यजुः पङ्क्तिः । ऐन्द्र- पयोग्रहे एव कर्कन्धुचूर्णावापे विनियोगः ॥

---

(१) अन्यानि यजूंषि इति काण्वसर्वानुक्रमपाठोऽधिको बोध्यः ॥

ओजोऽसि सुरादेवत्यानि ॥

ओजोऽस्योजो मयि धेहीत्यादीनि त्रीणि यजूंषि सुरादेवत्यानि । ओजोऽसि यजुरनुष्टुप् सुराग्रहग्रहणे विनियोगस्तयोराग्रहयोरपि मन्त्रयोरपि । यजुः पङ्क्तिः । सहोऽसि । यजुर्बृहती ॥

१० या व्याघ्रं० हैमवर्चिरनुष्टुब्विषूचिकास्तुतिः ॥

या व्याघ्रमित्येषाऽनुष्टुप् हैमवर्चि । आर्षमिति शेषः । हैमवर्चि-संज्ञोऽस्याः ऋषिरित्यर्थः । इयं विषूचिकायाः व्याधिविशेषस्य स्तुतिः सैवात्र देवता । स्तुतिभाजो देवता इत्युक्तत्वात्, व्याधीनामप्यधिष्ठात्री-देवताः सन्ति तत्रतिमा विषूचिका च स्तूयन्त इत्यर्थः, क्षेमपथाभ्यां यजमानस्य पावने विनियोगः । या व्याघ्रमित्यस्य व्यूहेन पूर्तिः, सहमं पातु, अंहस इतिद्वौ व्यूहौ ॥

११ यद्रा पिपेषाग्नेयी बृहती ॥

यद्रा पिपेषेत्येषाऽग्निदेवत्या बृहती । अग्निप्रेरणे विनियुक्ता । अत्र तृतीय एकादशकः । अन्त्योऽष्टका एकोना ॥

सम्पृचस्थ पयोग्रहाः ॥

सम्पृचस्थेत्यस्य यजुष पयोग्रहा देवताः । यजुस्त्रिष्टुप् । पयोग्रह-संमर्शने विनियोगः ॥

विपृचस्थ सुराग्रहाः ॥

विपृचस्थेत्यस्य सुराग्रहा देवता । यजुस्त्रिष्टुप् । सुराग्रहसंमर्शने विनियोगः ॥

देवा यज्ञं ब्राह्मणानुवाको विंशतिरनुष्टुभः सोमसम्पत् ॥

देवा यज्ञमतन्वतेत्याद्या विंशतिऋचोऽनुष्टुप्छन्दस्काः । ब्राह्मणानुवाकः । अयं विंशतिकण्डिकात्मको ब्राह्मणरूपोऽनुवाको न तु सं-

[illegible]: । सोमसम्पदिति । सोमानमच्छा: सोमसम्पत्तिः सोमसा-
म्यमनानुवाके प्रतिपादितस्त्वार्थः । अतएवास्य ब्राह्मणरूपता सो-
[illegible]भाष्ये । यमेन्द्राग्नेत्रिष्टुभि नवकः । आनन्दी-
रूपं नवकः । पुरोडाशैः व्यूढः । छन्दोभिः समस्तः । याज्याभिः व्यू-
ढः । यजेति । व्यूढः । अर्धऋचैर्नवकः । याज्यैर्नवकः ॥ ३२ ॥

सुरावन्तं चतुर्ऋचं त्रिष्टुभमश्विसरस्वतीन्द्रदेवत्यम् ॥

सुरावन्तं बर्हिषदं, यस्ते रसः । यमश्विना । ब्रह्म क्षत्रं । इ-
त्येतच्चतुर्ऋचं ऋचां चतुष्कं त्रैष्टुभं त्रिष्टुप्छन्दस्कं अश्विसरस्वती-
न्द्रदेवत्यं । अश्विनौ सरस्वती इन्द्रश्चेति अस्य देवता इत्यर्थः, मदेमेन्द्रं, ।
व्यूढः । यमश्विना । आद्यो द्वादशकः । यदिन्द्रोऽपपिबदिति नव-
कः । सुरावन्तमित्यस्याः पयो ग्रहाणां होमे विनियोगः । यस्ते र-
स इत्यस्याः सुराग्रहहोमे । यमश्विनेति पयोग्रहभक्षे । यद्वरि समि-
ति सुराग्रहभक्षे

पितृभ्यः सप्त पित्र्याणि ॥

पितृभ्यः स्वधायिभ्य इत्यादीनि सप्त यजूंषि पितृदेवतानि ।
एषामुच्चारणानन्तरमपां स्वर्गः पितृत्वान, तत्र पितृभ्य इत्यादीनां
त्रयाणां सुराग्रहशेषहोमे क्रमेण विनियोगः । अक्षन्नित्यादीनां प्र-
क्षालनेनाङ्गारोपसेचने । पितर इत्यस्य जपे । पितृभ्यः यजुस्त्रिष्टुप्.
पितामहेभ्यः आसुर्यनुष्टुप् । प्रपिता० साम्नीत्रिष्टुप् । अक्षन्नुपङ्-
क्तिः । अमीमदन्त, अतीतृपन्त यजुरनुष्टुभौ । पितरः० यजुर्गाय-
त्री ॥

पुनन्तु मा नवर्चं पावमानम् ॥

पुनन्तु मा पितर इत्यादि नवर्चं ऋचां नवकं पावमानसूक्तं । पा-
वने विनियुक्तम् ॥

आद्ये द्वे पित्र्येऽनुष्टुभौ ॥

अथ सर्वे प्राणे हे यावो पुनन्तु मा इत्येते यजुषी विवदेऽवस्थे। आप्याया: प्रथमो दृशक: । तेन दृष्यधिका वा ॥

प्रजापतिस्तृतीयां वैखानसश्वाग्नेयीं गायत्रीम् ॥

अग्न आयूंषीतीमां तृतीयां गायत्रीमग्निदेवतां वैखानस: प्रजापतिर्ऋषिरपश्यत् ॥

चतुर्थी लिङ्गोक्तदेवतानुष्टुप् ॥ (१)

पुनन्तु मा देवजना इत्येषा चतुर्थी लिङ्गोक्तदेवतानुष्टुप्छन्दस्का देवजना धियो, विश्वा भूतानि जातवेदसश्चा लिङ्गोक्ता देवता ॥

पञ्चम्याग्नेयी गायत्री ॥

पवित्रेण पुनीहि मेत्येषा गायत्री अग्निदेवता च । ऋक्षेण । व्यूहः ॥

षष्ठाग्नेयी ब्राह्मी वा गायत्री ॥ (२)

यत्ते पवित्रमित्येषा षष्ठी गायत्री अग्निदेवत्या ब्रह्मदेवत्या वा ॥

ब्राह्मस्तृतीय: पाद: ॥

ब्रह्म इत्यस्यास्तृतीय: पादएवां, ब्रह्म तेनेयं ब्राह्म: ब्रह्मदेवता: ॥

सौमी सप्तमी ॥

पवमान: सइत्येषा सप्तमी ऋक् गायत्री सोमदेवता च गायत्रीत्यत्रानुवर्त्तते ॥

सावित्र्यष्टमी ॥

गायत्रीत्यनुवर्त्तते । उभाभ्यामित्येषा अष्टमी गायत्री सवितृदेवत्या च । मां पुनीहीति सप्तक: । तत्र व्यूहो वा ॥

नवमी त्रिष्टुब्वैश्वदेवी ॥

---

(१) दैवतमनुष्टुप् । इति काण्वसर्वानुक्रमपाठ: ॥

(२) ब्राह्मी च गायत्री इतिकाण्वसर्वानुक्रमपाठश्च बोध्य: ॥

नवमी वैश्वदेवी पुनतीत्येषा त्रिष्टुब्विश्वेदेवदेवता । अथ द्वितीयो द्वादशकः । अन्ये दशकाः व्यूहेन पूर्याः ॥

ये समाना अनुष्टुभौ पित्र्याऽऽद्या द्वितीया यजमानाशीः ॥

ये समाना इतीमे द्वे अनुष्टुभौ । तयोराद्या पितृदेवत्या । द्वितीया यजमानाशीर्देवतेति केचित् । मन्त्रोक्ता जीवदेवता इत्यभिमिनः । यमराज्यस्त्वत्र व्यूहः । इन्द्रियाणामनयोरन्त्याः क्रमेणाज्याहुतिहोमे द्वयोर्विनियोगः ॥

द्वेसृती त्रिष्टुबेव यानपित्र्ययाणौ पन्थानौ ब्रवीति ॥

द्वे सृतीऽअशृणवमितीयं त्रिष्टुप् । देवयानपितृयाणसंज्ञकौ पन्थानौ द्वौ मार्गौ ब्रवीति । वक्ति । तृतीयमार्गौ । तावेवात्र देवते प यो होमेऽस्या विनियोगः । तत्र चेदं सृतीभ्यामिति त्यागः ॥

इदꣳ० हविर्त्र्यवसाना्ऽष्टिर्यजमानाशीः ॥

इदं हविः प्रजननमितीयमष्टिछन्दस्का त्र्यवसाना । यजमानाशीर्देवता । चतुः षष्ट्यक्षरा अष्टिः । एकोऽत्र व्यूहः । यजमानस्य पयः शेषभक्षे विनियोगः ॥ ३४ ॥

उदीरतां त्रयोदशर्चं पित्र्यं त्रैष्टुभं शंखः ॥ (१)

उदीरतामित्येतत्त्रयोदशर्चं पितृदेवत्यं त्रिष्टुप्छन्दस्कं शंखऋषिरपश्यत् । असंख्ययोदशर्चं त्वं सोम प्रचिकित इति तत्रस्य वाचने विनियोगः । बर्हिषदः पितर इति तत्रस्य च । परिशिष्टानां विनियोगश्चो नास्ति ॥

एकादशी तु जगती ॥ (२)

---

(१) उदीरतामेकादशर्चं इति काण्वपाठः ॥

(२) अष्टमी जगती इत्यपि काण्वसर्वानुक्रमपाठश्च ॥

अ अग्नूषयोर्दशर्चे एकादशी अग्निष्वात्ताः पितरइतीयं जगती । अन्ये द्वादश त्रिष्टुभएव । अथ । उपाध्यमाः । ते नोऽवन्तु । अथर्वाणः । अपि भद्रे । ये नः पूर्वे । त्वठं० सोम प्रचि० । त्वं रजिष्ठ । त्वं सोमपि० । वयं स्याम । बर्हिषदः । त्वागता । उपहूताः । बर्हिष्येषु । अधिब्रुवन्तु । आयन्तु । अग्निष्वात्ता । तेभ्यः स्वराट् । यथा दक्षं । एतेषु व्यूहः । अग्निष्वात्तानृतुमतइति द्वादशकाः ॥

आच्याजानु दशर्चोऽनुवाकः ॥

आच्याजानु दक्षिणतइत्ययं दशर्चं चतुःशकामकोऽनुवाक ॥

नव पित्र्याः ॥

पित्र्यदशर्चेऽनुवाके आद्या नव ऋचः पितृदेवत्याः ॥

दशम्यैन्द्री गायत्री ॥

दशमीभर्पाकेनेनेतीयं इन्द्रदेवत्या गायत्री ॥

तृतीयाचतुर्थीनवम्योऽनुष्टुभः ॥

अस्मिन्दशर्चेऽनुवाके तृतीया यमग्ने कव्यवाहनेति । योऽग्निः कव्यवाहनइतिचतुर्थी । उशन्तस्त्वेति नवमी । एताऋचोऽनुष्टुभः । अत्र त्वं चित्, तन्नो गीर्भिः । अनयोर्व्यूहः ॥

त्रिष्टुभइतराः ॥

इतराः षट् प्रथमा द्वितीया पञ्चमीषष्ठीसप्तम्यष्टम्यः । आच्याजानु, आसीनास , त्वमग्न ईळितः, ये चेह, इदं पितृभ्य, अधा यथा, इत्येता त्रिष्टुभ । रयिंधत्त । पुत्रेभ्यः, ये चेह । त्वंवेत्थ । इदं पितृभ्यः । ये पार्थिवे । एतेषु व्यूहः । सुरावन्तमित्यादीनामुशन्तस्त्वेत्यन्तानां श्राद्धकाले पञ्चनत्सु ब्राह्मणेषु जपे विनियोगः ॥

सोमो राजाऽष्टर्चमग्निसरस्वतीन्द्राअपश्यन् ॥

सोमोराजामृतमित्याद्यष्टर्चं ऋगष्टकमग्निसरस्वतीन्द्रा ऋषयोऽ-

पश्यन् इत्यन्तः पशुधर्मानुपस्थाने विनियोगः । अतएवास्य बहुदे-वताः ॥

आद्यास्तिस्रो महाबृहत्यऽनुपान्त्या च ॥

अग्निस्त्वर्चे आद्यास्तिस्रऋचः सोमो राजा, अद्भ्यः क्षीरं, सोम-मद्भ्य इत्येता महाबृहत्यः । अन्त्यायाः उपान्त्या समीपे, ततः पूर्वा उ-पान्त्या, वेदेन रूपमित्येषा च महाबृहती । यस्याश्चत्वारः पादा अष्ट-काः, पञ्चमो द्वादशकः । सा महाबृहती । "चत्वारोऽष्टका आगतश्च महाबृहतीत्युक्ते" । अथ इन्द्रस्येन्द्रियमिति त्रयोदशकः । अद्भ्यः क्षीरं । कुङ्गाङ्गिरसो । सोममद्भ्यः । एतेषु व्यूहः ॥

चतुर्थ्यन्ते अतिजगत्यौ ॥

चतुर्थी अद्यात्परिस्रुतइति । अन्त्या इद्यापरिस्रुत इती मे द्वे ऋचौ अतिजगत्यौ । द्विपञ्चाशदक्षरा अतिजगती । अत्र तु एकाधि-का ॥

शेषे अतिशक्वर्यौ अवसाने ॥

शेषे रेतो मूत्रं, दृष्ट्वा रूपे व्याकरोदित्येते पञ्चमीषष्ठ्यौ । अति-शक्वरीछन्दस्के अवसाने । अवसानद्वययुक्ते षष्ट्यक्षरा अतिशक्वरी द्वितीया एकाधिका ॥

सीसेन तन्त्रमश्विसरस्वतीन्द्रदेवत्याः षोडश जगत्यः ॥

सीसेन तन्त्रमित्याद्याः षोडशर्चोऽश्विसरस्वतीन्द्रदेवत्या ज-गतीछन्दस्काः । "जगतीभिर्जुहोति जागता वै पशवः षोडशभिर्ऋ-ग्भिर्जुहोतीति श्रुत्या, षोडशानामपि जगतीत्वमुक्तं । ग्रहैर्वसाप-ग्रहाणे विनियुक्ताः । आद्यासूत्रेषु एकादशकः । इन्द्रस्य रूपं । सू-त्रं, तदश्च रूपमित्यस्यां चतुरेकादशकाः, तदश्विनेत्यस्यां तृतीयोऽ-ष्टकः । तेन चतुरूनाऽपि सा जगत्येव, बहूनापि त्रिष्टुभएवेत्यु-

दृष्टेयद्व्यूहत्वात्, इयं च मध्ये ज्योतिर्जगतीत्युच्यते, यस्याः अवसाना एकपादोऽष्टकः। सा ज्योतिष्मती। तथा चोक्तं। पिङ्गले। एकेन त्रिष्टुब्ज्योतिष्मती। तथा जगती। पुरस्ताज्ज्योतिः प्रथमेन। मध्येज्योतिर्मध्येनोपरिष्टाज्ज्योतिरन्त्येनेति। सरस्वतीत्यस्यां मध्यौ दशकैकादशकौ। तथाऽपि जगती द्वौ तु जागतौ यस्याः सा जागतं जगतीत्युक्तत्वात्। पयसा शुक्रमित्यस्यां त्रय एकादशकाः। चतुर्थो दशकः। तत्र तृतीये एको व्यूहः। चतुर्थे द्वौ व्यूहौ। एवं द्वौ द्वादशकौ। चतुर्थस्तु स्वत एव द्वादशकः। एवं द्वौ द्वादशकौ तेनेयमपि जगती। आन्वाणीत्यत्र चत्वारोऽप्येकादशकाः। चतुरूनाऽपि सा जगत्येव। इत्युद्देशवदुक्तत्वात्। "जगतीभिर्जुहोतीति श्रुतेश्च"। कुर्वाणमिष्टिरित्यत्र आद्य एकादशकः त्रयोदशकः। तथाऽपि जगत्येव बहुनाऽपि। सुखं सखिन्त्यत्र द्वितीयो द्वादशकः। त्रय एकादशकाः। तथापि जगती अग्निभ्यां चक्षुरित्यत्रापि तृतीयो द्वादशकः। त्रय एकादशकाः अविर्मैत्यत्राद्यो दशकः, द्वितीयाद्यावेकादशकौ। तृतीयो नवकः, इन्द्रस्य रूपमित्यत्र चतुर्थो द्वादशकः। त्रय एकादशकाः। आत्मन्नुपस्थ इत्यत्र तृतीयो द्वादशकः। अन्ये एकादशकाः, अङ्गान्यात्मन्नित्यत्र द्वितीयो द्वादशकः। प्रथमो व्यूहेन तथा। अन्त्यावेकादशकौ। सरस्वती योन्यामित्यत्राद्यो दशकः। त्रय एकादशकाः। तेजः पशूनामित्यत्र प्रथम एकादशकः। त्रयो द्वादशकाः। अत्र "जगतीभिर्जुहोति षोडशभिर्द्वादशभिर्जुहोतीति" श्रुतिबलाद्बहुभिरक्षरैरप्यूनानां जगतीत्वमेव। न छन्दोऽन्तरत्वम्॥ ३५॥

ऋतस्य योनिर्द्विपदा गायत्र्यासन्दीदेवताका॥ (१)

ऋतस्य योनिरितीयं द्विपदा गायत्री। आसन्दी देवता यस्याः सा आसन्दीदेवता। "शेषाद्विभाषेति कप्।" वेद्यां मध्ये आसन्द्या-

(१) योनिरित्यत्र नाभिरिति काण्वसर्वानुक्रमपाठः॥

निधानेऽस्या विनियोगः ॥

मा त्वा कृष्णाजिनम् ॥

मा त्वेत्यस्य यजुषः कृष्णाजिनं देवता । कृष्णाजिनस्यासन्द्यामास्तरणे विनियोगः । प्राजापत्या गायत्री ॥

द्वयो रुक्मौ ॥

मृत्योः पाहि विद्योत्पाहीत्यनयोर्द्वयोर्यजुषो रुक्मौ देवते पादयो रुक्मोपासने उभयोर्विनियोगः । दैव्यौ बृहत्यौ निषसादेत्यस्य तु प्रागुक्तम् ॥

अश्विनोर्भैषज्येन लिङ्गोक्तदेवतानि त्रीणि ॥

अश्विनोर्भैषज्येनेत्यादीनि त्रीणि लिङ्गोक्तदेवतानि । वसापहसंस्रवैर्यजमानाभिषेके विनियुक्तानि । अश्विनोः प्राजापत्याबृहती सरस्वत्यै आर्चीगायत्री । इन्द्रस्य आर्चीगायत्री ॥

कोऽसि प्राजापत्या गायत्री ॥

कोऽसि कतमोऽसीत्येषा प्रजापतिदेवता गायत्रीछन्दस्का । यजमानालम्भने विनियुक्ता । अत्रैको व्यूहेन सप्ताक्षरः । द्वितीयः षडक्षरः । तृतीय एकादशकः । तेनेयमुष्णिग्गर्भा गायत्रीत्युच्यते । "षट्सप्तैकादशोष्णिग्गर्भेत्युक्तेः" ॥

शिरो मे पञ्चर्चमिन्द्रशरीरावयवदेवताकम् ॥

इन्द्रस्य शरीरावयवा देवता यस्य तदिदं शरीरावयवदेवताकं । तृतीया गायत्री । अत्र पञ्चर्चे तृतीया बाहू मे बलमित्येषा गायत्रीछन्दस्का । अत्र द्वितीयः सप्तकः । अन्त्या महापङ्क्तिस्त्र्यवसाना । अत्र पञ्चर्चे नाभिर्मे चित्तमित्येषा अन्त्या महापङ्क्तिः । अवसानत्रययुक्ता च । अत्राष्टाक्षराः षट्पादाः सन्ति तेनेयं महापङ्क्तिः "षळष्टका वा महापङ्क्तिरित्युक्तेः" पायुर्मे । भगः, सौभाग्यं । अनयो-

व्यूहः। अनुष्टुभोऽन्त्याः, अथ पञ्चर्चं अस्याः शिरो मे, जिह्वा मे, पृष्टीर्मे, हस्तौ मे अनुष्टुभः। अस्य पञ्चर्चस्य यजमानकर्तृके यथालिङ्गं विभज्य विभज्याङ्गसंमर्शने विनियोगः॥

प्रतिक्षत्रे वैश्वदेवम्॥

प्रतिक्षत्रइत्येतद्यजुर्विश्वदेवता। यजमानस्यासन्दीतः कृष्णाजिनेऽवरोहणे विनियुक्तं। अष्टापञ्चाशदक्षराणि। द्वौ व्यूहौ। तेनातिशक्वरीछन्दः॥

अया देवा दैवी पङ्क्तिस्त्र्यवसाना॥

अया देवा तृतीयस्य दैवी देवत्या पङ्क्तिः त्र्यवसानयुक्ता च। देवस्य सवितुः व्यूहः। अष्टकाः पञ्चपदाः। तेन चत्वारिंशदक्षरा पङ्क्तिः। सर्वासां गणानामवसानस्य होमे विनियोगः॥

प्रथमा द्वितीयै वैश्वदेवमाशीर्लिङ्गम्॥

प्रथमाद्वितीयैरित्येतद्यजुर्विश्वदेवदेवतमाशीर्लिङ्गं आशिषो लिङ्गानि यस्मिन् तदाशीर्लिङ्गं पूर्णाहुतेः पश्चात् होमे विनियुक्तं। अत्र त्र्यशीतिरक्षराणि एको व्यूहः। तेन प्रकृतिश्छन्दः, अया देवा इत्यादीनां सप्तदशानां पादानां शस्त्रमध्ये निविद्रूपे शंसने विनियोगः॥

लोमान्यनुष्टुब्लिङ्गोक्तदेवता॥

लोमानि प्रयतिरित्येषा लिङ्गोक्ता देवता अनुष्टुप्। अत्र तृतीयः सप्तकश्चतुर्थो नवकः। लोमत्वङ्मांसमस्थिमज्जानोऽत्र लिङ्गोक्ता देवता। यजमानस्य पशुमेषणसे विनियोगः॥ ३६॥

यद्देवास्तिस्रोऽग्निवायुसूर्यदेवत्या अनुष्टुभः कूष्माण्डीः॥

यद्देवा, यदि दिवा, यदि जाग्रदित्येतास्तिस्र ऋचः क्रमेणाग्निवायुसूर्यदेवत्या अनुष्टुभः। कूष्माण्डीसञ्ज्ञकाश्च। मासरकुम्भप्लावने वि-

नियुक्ताः, विश्वाभ्यस्त्वा पञ्चमइति व्यूह ॥

यद्ग्रामे लिङ्गोक्तदैवतम् ॥

यद्ग्रामेइत्येतद्यजुस्तच्चावभृथमसीत्यन्तं लिङ्गोक्तदैवतं । मासर कुम्भस्थापनएव विनियुक्तं । एकाधिका आर्षी त्रिष्टुप् । यद्ग्रामेऽपवत्स्याम इतीयं वारुणी यायच्छन्दसामः प्रथमे व्यूह । मासरकुम्भप्लावनएव विनियोगः ॥

अवभृथेति यजुर्दैवतम् ॥

द्वौ व्यूहौ । आर्षीमनुष्टुप मासरकुम्भमार्जने विनियोगः ॥

समुद्रे ते द्विपदा विराडापो ॥

समुद्रे ते इतीयं विराड्द्विपदा आपः अब्देवता । मासरकुम्भमार्जनएव विनियुक्ता । दशाक्षरौ द्वौ पादौ । "दशाक्षराणि विराडिति श्रुतेः" अतएव विनियुक्ता ॥

द्रुपदादिवानुष्टुबापो ॥

द्रुपदादिवेतीयमनुष्टुप्छन्दस्काऽब्देवत्या । पादौ नवकः, तद्व्यधिका । कामोपासने विनियोगः ॥

उद्वयं सौर्यनुष्टुप्प्रस्कण्वस्य ॥

उद्वयमित्येषा सूर्यदेवत्याऽनुष्टुप्प्रस्कण्वस्यार्षं प्रस्कण्वोऽस्याः ऋषिरित्यर्थः जलादुत्तारणे विनियोगः, द्वितीयो व्यूह ॥

अपोऽअद्याग्नेयी पङ्क्तिः ॥(१)

अपोऽअद्यान्वचारिषमितीयमाग्नेयदेवत्या पङ्क्तिछन्दस्का पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिः । आहवनीयोपस्थाने विनियोगः ॥

एधोऽसि समिद्देवत्ये यजुषी ॥

एधोऽसि, समिदसीत्येते यजुषी समिद्देवत्ये । एधोऽसीत्यस्य देवो-

(१) आदर्शे पङ्क्तिरिति कात्यसर्वानुक्रमपाठः ॥

जगती समिदादाने विनियोगः । समिदसीत्यस्य समिदाधाने विनियोगः । व्यूहेन सामोष्णिक् ॥

समावववर्त्येनिरुक्ता गायत्री ॥

समावववर्तीत्येषा अनिरुक्ता गायत्रीछन्दस्का । आज्याहुतिहोमे विनियुक्ता । अग्निदेवत्येति कल्पसंहिताभाष्ये ॥

वैश्वानरज्योतिर्यजुः ॥

वैश्वानरज्योतिरितीदं यजु', नत्वृक् अस्य वैश्वानरो देवतेतिकल्पभाष्ये ऋग्गायत्री । पूर्वसमीक्षहोमएव विनियोग. ॥

अभ्यादधाम्याग्नेयमानुष्टभं तृचमाश्वतराश्विः ॥

अभ्यादधामि समिधमित्येतत्तृचमनुष्टप्छन्दस्कमग्निदेवत्यमाश्वतराश्विर्ऋषिरपश्यत् । क्रमेण समित्त्रयाधाने विनियोगः । अत्र इन्द्रस्येति व्यूहः ॥

अꣳशुनामौर्यनुष्टुप् ॥

अꣳशुना तइत्येषा सौरी सूर्यदेवत्याऽनुष्टुप् । सुरासंसर्जने विनियुक्ता । आद्यः षट्कः । नेन द्व्यूना ॥

सिञ्चन्ति परि सौर्यैन्द्री वाऽनुष्टुप ॥

सिञ्चन्ति परिषिञ्चन्तीत्येषा सौरी । ऐन्द्री वा । सूर्यइन्द्रो वा अस्य देवतेत्यर्थः । अनुष्टुप्छन्दः । पूतायाः सुराया आदाने विनियोगः । अत्रांत्यगोर्व्यूहः ॥

धानावन्तमैन्द्री गायत्री विश्वामित्रस्य ॥

धानावन्तमित्येषा इन्द्रदेवत्या गायत्रीछन्दस्का, विश्वामित्रस्यार्षम् अस्या विश्वामित्रऋषिः । अपाकर्मणि धानाहोमे विनियोगः ॥

वृहदिन्द्राय वृहतीनृमेधपुरुषमेधयोरन्त्यौ गायत्री ॥

ऐन्द्रीत्यनुवर्त्तते। बृहदिन्द्रायेत्येषा बृहती नृमेधपुरुषमेधयोरार्षं। नृमेधपुरुषमेधनामानौ अस्या ऋषीइत्यर्थः। अस्यां हि गौरावां सामगानं विहितं। अथ सामगायतीति प्रत्यक्षऐन्द्र्यां बृहत्यां गायतीति। अध्वर्यो गायत्री,अध्वर्योभद्रिरितिगायत्री। वृशक्तः पयोऽनुमन्त्रणे विनियुक्ता॥ ३७॥

योभूतानामात्मप्रवादा पङ्क्तिर्नारायणीया कौण्डिन्यस्य॥

योभूतानामित्येषा पङ्क्तिरात्मप्रवादा नारायणीयकौण्डिन्यस्यार्षं नारायणीयस्य शिष्यो नारायणीयः स चासौ कौण्डिन्यनारायणीयकौण्डिन्यः सोऽस्या ऋषिरित्यर्थः। आत्मनः प्रवादो यस्यां सा आत्मप्रवादा। अस्यां हि यः परमात्मा सर्वभूतानां अधिपतिः इत्यात्मप्रवादोऽस्ति। गृह्यमाणो ग्रहोदेवता। त्रयस्त्रिंशस्य वसाग्रहस्य ग्रहणे विनियोगः। उपयामेति सामत्रिष्टुप्। एष ते योनिः प्राजापत्याबृहती। उभयोर्ग्रहोदेवता॥

प्राणपा मे द्वे अनुष्टुबुपरिष्टाद्बृहत्यौ लिङ्गोक्तदेवते॥

प्राणपा मे, अग्निनक्षत्रस्यतीमिद्दे ऋचौ यथाक्रममनुष्टुबुपरिष्टाद्बृहत्यौ लिङ्गोक्तदेवते च प्राणपामइत्यनुष्टुप्। अग्निनक्षत्रस्येत्युपरिष्टाद्बृहती। अत्र व्यूहेन छन्दः पूर्यं, पादाक्षरनियमो नास्ति अमृतमानो ग्रहयोर्देवतालिङ्गोक्ता। स एवात्र स्तूयते यतः॥

समिद्धऽइन्द्र एकादशाप्रीस्त्रिष्टुभऽआङ्गिरसः॥

समिद्धःइन्द्रउषसामनीकइत्याद्या एकादशऋचस्त्रिष्टुपछन्दस्का आप्रीसञ्ज्ञका आंगिरसऋषिरपश्यत्आसां देवता आह॥

इध्मस्तनूनपान्नराशंस,इडो बर्हिर्द्वारऽउषासानक्ता दैव्या होतारा तिस्रः, देवीस्त्वष्टावनस्पतिः, स्वाहाकृ-

तयइत्येता आप्रीदेवताः ॥

इत्यादय एकादशसंख्याः यथाक्रममेतासां समिद्धोऽग्निरित्यादीनां स्तोकानामिन्द्रमित्यन्तानामाप्रीणां देवताः । अत्र वर्गगाथाः प्रथमानं । व्यूहः, सुवीरा वीरं द्वादशकः । परिक्षुमं द्वादशकः ॥

आया तु सप्तत्रिष्टुभऐन्द्रयः ॥

आयात्विन्द्रइत्याद्याः सप्तर्चस्त्रिष्टुभ इन्द्रदेवत्याः, आद्याः षडैन्द्रपशुवपापुरोडाशपशूनां याज्यापुरोनुवाक्यात्वेन विनियुक्ताः । अत्र । आयात्विन्द्रः । व्यूहः । आ नः दशकः । आनऽइन्द्रो हरिभिः, आद्यायां व्यूहः । श्रवस्तनो मघवा द्वौ व्यूहौ । इन्द्रः सुत्राम । व्यूहः । सुवीर्यस्य । द्वौ व्यूहौ, अपि भद्रे ससृतामा । इयोर्व्यूहः ॥

आमन्द्रैर्बृहती ॥

चतुर्थं बृहती तृतीया द्वादशकस्त्वेव त्रिधा ॥

आयातु वामदेवः ॥

आयात्विन्द्रइत्यस्या वामदेवऋषिः ॥

त्रातारङ्गर्गः ॥

त्रातारमिन्द्रमित्यस्या गर्गऋषिः ॥

आमन्द्रैर्विश्वामित्रः ॥

आमन्द्रैरित्यस्या विश्वामित्रऋषिः ॥

एवेद्वसिष्ठः ॥

एवेन्द्रित्यस्या वसिष्ठऋषिः इन्द्रोदेवता । वसिष्ठासः द्वौ व्यूहौ, यूयं पात । व्यूहः ॥ ३८ ॥

अथ हौत्रं त्रिपशोः ॥

अथानन्तरं त्रिपशोर्हौत्रं ज्ञातुः कर्मोच्यतइति शेषः ॥

समिद्धोऽग्निराप्रीर्द्वादश विदभिरश्विनरस्वतीन्द्र

देवत्या अनुष्टुभः ॥

समिद्धोऽअग्निरश्विनेत्याद्या द्वादशर्चः । आप्रीसञ्ज्ञा अनुष्टुभोऽश्विसरस्वतीन्द्रदेवत्याः विदर्भिऋषिरपश्यत् । इध्मादय एवामी देवता इतिहरिस्वामी । "अनुष्टुभ आप्रियो भवन्तीति श्रुतेरनुष्टुभआप्रीरित्युक्तः" । त्रिपशोः प्रयाजयाज्यात्वेनासां विनियोगः । मध्वा रजांसि, अश्विना भारतीडा, स्वाहेन्द्रे सुतं मधु । एषु व्यूहः ॥

अश्विना हविस्तिस्रोऽनुष्टुभएकैकाऽश्विसरस्वतीन्द्रदेवत्याः ॥

अश्विना हविरित्याद्यास्तिस्रोऽनुष्टुभः । एकैकाश्विसरस्वतीन्द्रदेवत्याः, तमिन्द्रमपि प्रत्येकं तिस्रस्तिसॄणां देवतात्वार्थं, न तु यथासंख्येन, समुपेक्षिया नवकः, त्रिपशुवपानां याज्यापुरोनुवाक्यात्वेनासां विनियोगः ॥

यऽइन्द्रऽइन्द्रसवितृवरुणदेवत्यास्तिस्रोऽनुष्टुभः ॥

यऽइन्द्रऽइन्द्रियं दधुरित्याद्यास्तिस्रऋचः प्रत्येकं इन्द्रसवितृवरुणदेवत्याः, अनुष्टुपछन्दस्काश्च । अत्राप्येकैका इत्यनुवर्तते, त्रिपशोः पशुपुरोडाशानां याज्यापुरोनुवाक्यात्वेन विनियुक्ताः ॥

अश्विना गोभिस्तिस्रोऽनुष्टुभः ॥(१)

अश्विना गोभिरिन्द्रियमित्याद्यास्तिस्रऋचोऽनुष्टुभः । अत्र एकैकाश्विसरस्वतीन्द्रदेवत्या इत्यनुवर्तते । हविषां याज्यात्वेन विनियुक्ताः । अथर्वभिर्वीर्यमिति समन्त्रः ॥

युवं पुत्रमिवानुष्टुप्त्रिष्टुभौ ॥

युवं सुरामं, पुत्रमिवेतीमे ऋचौ अनुष्टुप्त्रिष्टुप्छन्दस्के । अश्विसरस्वतीन्द्रदेवत्ये तदत्राप्यपेक्ष्यते । ग्रहाणां याज्यापुरोनुवाक्यात्वेन

(१) गोभिरश्विसरस्वतीन्द्रदेवत्याः इतिकाण्वसर्वानुक्रमेऽधिकः पाठः ॥

विनियुक्ते । अनयोरार्षादिकं प्रागुक्तमेव । युवमनुष्टुप्युग्ममिव, त्रिष्टुब-ग्निसरस्वतीन्द्रदैवत्ये इति । तेन पुनरुक्तमिदं तत्सूत्रं इति केचिन्न-पठन्त्येव । तत्साधकं इन्द्रकर्म । इन्द्रावधुः । यत्स्वराम । एषु व्यूहः ॥

यस्मिन्नश्वासऽआग्नेय्यौ जगती त्रिष्टुभौ ॥

यस्मिन्नश्वासोऽह्राव्यग्न इतीमे द्वे ऋचौ अग्निदैवते । यथा क्रमं जगतीत्रिष्टुप्छन्दस्के । पशुष्विष्टकृतो याज्यापुरोनुवाक्यात्वेन विनियुक्ते । यस्मिन्नश्वासऽइति याज्या । अह्राव्यग्ने त्रिष्टुप्पुरोनुवाक्या, अह्राव्यग्ने इत्यस्यात्र इष्टो व्यूहः ॥

अश्विना तेजसैकादशर्चं शस्त्रम् ॥

अश्विना तेजसेत्यत आरभ्यैकादशर्चं शस्त्रम् ॥

गोमदूगृत्समदस्तृचमाश्विनं गायत्रम् ॥

गोमदूषुणेत्यत तृचमाश्विदैवत्यं गायत्रछन्दस्कं । गोमदिति त्रयः सप्तकाः, तेन पादनिचृदित्युक्तिः । "कश्चित्त्रिपाद्यैर्गि: सा पादनिचृदिति पिङ्गलोक्तेश्च" । व्यूहेन वा त्रयाणां पूरणं कार्यं, भिषावरिवी व्यूहः ॥

पावकानो मधुच्छन्दाः सारस्वतम् ॥

तृच गायत्रमिति चानुवर्तते । पावका नः सरस्वतीत्येतत्तृचं सरस्वतीदैवतं गायत्रछन्दस्कं मधुच्छन्दा ऋषिरपश्यत् । चेतन्तीति सप्तकः । तेनैकोना ॥

इन्द्रायाह्यैन्द्रं मधुच्छन्दा एव ॥

तृच गायत्रमिति चानुवर्तते । इन्द्रायाहि चित्रभानो इत्यादिकं तृचं इन्द्रदैवतं गायत्रछन्दस्कं मधुच्छन्दा एवापश्यत् । ता इमे व्यूहः ॥

अनुक्तमानुष्टुभमग्निसरस्वतीन्द्रदैवत्यम् ॥

यदात्रानुक्तमनुक्तदैवतमनुक्तछन्दस्कं च मन्त्रजातं तदानुष्टुभमनुष्टु-

प्छन्दस्कमग्निसरस्वतीन्द्रदेवत्यं च । तत्राग्निर्विना तेजसाऽग्निर्विना
पिबतामित्यृग्द्वयमेव । अनयोः प्रत्यक्षायाम्नयोः प्रसमं क्रमेण वि-
नियोगः । अष्टयागयाज्यापुरोनुवाक्यात्वेन च । तत्राग्निना तेजसेत्य-
त्र प्रथमोऽष्टकः, द्वितीयो नवकः, तृतीयो व्यूहेन सप्तकः । चतुर्थोऽष्ट-
कः । शुभ्राः प्रासोम्यं । व्यूहः ॥ ३८ ॥

इमं मे गायत्रीत्रिष्टुभौ वारुण्यौ शुनःशेपः ॥

इमं मे वरुण, तत्त्वा यामीतीमे द्वे ऋचौ यथाक्रमं गायत्रीत्रिष्टुप्-
छन्दस्के वरुणदेवते शुनःशेपऋषिरपश्यत् । एककपालस्य याज्या-
पुरोनुवाक्यात्वेन विनियुक्ते । त्वामवस्युः । व्यूहः । तत्त्वेत्यस्य ऋष्या दि-
प्रागुक्तमेव । तत्त्वा वारुणी त्रिष्टु०ठं० शुनःशेप इति । किमिति
पुनरुच्यते । सौत्रामण्युक्ते, प्राजापत्यग्निसरस्वत्यादिभिः शुनःशेपस्य
बाधो माभूदित्येवमर्थं पुनरुपदेशः, अतएव वचनाभावे प्रागुक्तस्य
ऋषेर्बाध एव भवतीति गम्यते ॥

त्वन्नस्त्रिष्टुभावाग्निवारुण्यौ वामदेवः ॥

त्वं नो अग्ने, स त्वं नो अग्न इतीमे ऋचौ अग्निवरुणदेवते त्रिष्टु-
प्छन्दस्के वामदेवऋषिरपश्यत् । अग्निवरुणयागे याज्यापुरोनुवा-
क्यात्वेन विनियोगोऽनयोः । त्वं नः, विश्वा द्वेषांसीत्यनयोर्व्यूहः । स
त्वमित्याद्यपादयोर्व्यूहः ॥

महीमू षु त्रिष्टबादित्या ॥

महीमू षु मातरमित्येषा त्रिष्टुप्छन्दस्का अदितिदेवत्या । आदित्य-
चरुयागे याज्यात्वेन विनियुक्ता ॥

सुत्रामाणं गयः प्लातः ॥

त्रिष्टुबादित्या इत्यनुवर्तते । सुत्रामाणमितीमां त्रिष्टुभं अदितिदेवत्यां ।
गयः प्लातऋषिरपश्यत् । आदित्यचरुयागे पुरोनुवाक्यैषा अस्याध्याया-
द्यकः ॥

सुनावं नौः स्वर्ग्या गायत्री ॥

सुनावमित्यस्याः स्वर्ग्या स्वर्गसम्बन्धिनी नौर्देवता । गायत्रीछन्दः । आप्यायनार्थोऽर्थः । नावा आरोहणे विनियोगः ॥

आनो मैत्रावरुणीं गायत्रीं विश्वामित्रः ॥

आनो मित्रावरुणेतीमां मित्रावरुणदेवत्यां गायत्रीछन्दस्कां विश्वामित्रऋषिरपश्यत् । पयस्या यागे पुरोनुवाक्या । आद्यः सप्तकस्तेनैकोना निचृत् ॥

5 ## प्रबाहवा वसिष्ठस्त्रिष्टुप् ॥

मैत्रावरुणीमित्यनुवर्त्तते प्रबाहवेत्येतां त्रिष्टुभं मित्रावरुणदेवत्यां वसिष्ठोऽपश्यत् पयस्या यागे याज्येयं । शं नो भवन्तु वाजिन इति वाजियागे याज्यानुवाक्ये । तयोर्ऋष्यादिप्रागुक्तम् ॥

2 ## समिद्धोऽग्निरेकादशाप्रमानुष्टुभꣳस्वस्त्यात्रेयस्यार्षं वयोधा इन्द्रो देवता ॥ (१)

समिद्धोऽग्निः समिधेत्येतदेकादशर्चमाप्रं आप्रीसम्बन्धि अनुष्टुप्छन्दस्कं स्वस्त्यात्रेयस्यार्षं । स्वस्त्यात्रेयसञ्ज्ञोऽस्यर्षिरित्यर्थः । इन्द्रो वयोधा अस्य देवता । वयोधसे पशौ प्रयाजानां याज्या एताः यथायथैवमुक्तं । तथाप्यत्र इध्मस्तनूनपादित्यादय एवामीषां देवताः । ऐन्द्रपशौ तथैवोक्तत्वात् । वयोधा इन्द्रो देवतेत्ययं तु प्रमादपाठ इव दृश्यते । अन्यदेवताभिर्देवैरसङ्गतत्वात् । अत्र सुसमिद्धः । अयर्विणः । इडाभिः । सोमो । स्तीर्णं बर्हिः । विश्वे देवाः । स्वाहा यज्ञं । एतेषु व्यूहः । अतिछन्दाः सप्तकः । बृहद्गर्भा दशकः । एकाधिकत्वाद्भुरिक् ॥

---

(१) अत्र सूत्रे स्वस्त्यात्रेयपदादग्रे स्वस्त्यात्रेयस्यार्षं वयोधा इन्द्रो देवता एतदर्थन्तं कण्वसर्वानुक्रमे नास्ति लिङ्गोक्तदेवतमित्याधिकं पदमस्तीति बोध्यम् ॥

वसन्तेनऽर्तुना षडृचमानुष्टुभं लिङ्गोक्तदैवतम् ॥

वसन्तेन ऋतुनेत्यादि षडृचं अनुष्टुप्छन्दस्कं लिङ्गोक्तदैवतं । इन्द्रादयो अस्य देवता इत्यर्थः । वयोधसं पशौ वपापुरोडाशपशूनां क्रमेण याज्यानुवाक्या एताः वसन्तेन । शारदेन । एकविंश० म०, हेमन्तेन । शैशिरेण । एते नवकाः ॥

होता यक्षद्द्वादशाप्रीप्रैषा अग्निसरस्वतीन्द्रदेवत्याः ॥

होता यक्षत्समिधानमित्याद्या द्वादशाप्री प्रैषाः आप्रीणां, प्रयाजयाज्यानां प्रैषाः आप्रीप्रैषाः अग्निसरस्वतीन्द्रदेवत्याः । अत्रापि समिदादय एव देवता नाग्न्यादय इति ऋषिस्वामिनः । होता यक्षत्समिधाग्निमिति व्यूहः । चतुः षष्ट्यक्षरा अष्टिः । तनूनपादेकाधिका अत्यष्टिः । नराशंसं न । षडनवत्यक्षराऽतिधृतिः । इडितः । द्वौ व्यूहौ । अतिधृतिः, बर्हिरूर्णम्रदा व्यूहः । अष्टिछन्दः । दुरो दिशः । व्यूहः । अतिधृतिः । सुपेशसोषे । एकाधिका अष्टिः । दैव्या होतारा । व्यूहः । अष्टिः । तिस्रो देवीः । धृतिः । सुरेतसमृषभं एकाधिका कृतिः । वनस्पतिं शमितारं । व्यूहः । अत्यष्टिः, होता यक्षदग्निः, अत्र चतुस्त्रिंशदक्षराणि सन्ति तेन छन्दो नास्ति एतावदक्षरस्य छन्दसोऽभावात् ॥

अश्विनौ छागस्य सप्तलिङ्गोक्तदेवताः प्रैषाः ॥

होता यक्षदश्विनौ छागस्येत्याद्याः सप्त प्रैषा लिङ्गोक्तदेवताः । अत्र याज्यानां वपानां क्रमेण प्रैषाः । होता यक्षदश्विनौ सरस्वतीमिति पशूनां प्रैषः । ततस्त्रयः प्रैषास्त्रिपशुहविषां यागेषु, तत्र होता यक्षदश्विनौ छागस्य वपायामेदस इत्यादीनां त्रयाणां प्राजापत्या पङ्क्तिश्छन्दः । प्रथमतृतीययोरेकाऽधिका । द्वितीयस्य द्व्यधिका । अश्विनौ सरस्वती । अष्टद्व्यधिकं अक्षराणि । तेन छन्दो नास्ति ।

अश्विनौ छागस्य हविषः । अत्र चतुर्दशाधिकं शतमक्षराणि । सरस्वतीं मेषस्य, अत्र सप्तदशाधिकं शतमक्षराणि । इन्द्रमृषभस्य । अत्र चतुर्दशाधिकं शतमक्षराणि ॥

४६ वनस्पतिमभियूपः ॥

होता यक्षद्वनस्पतिमभीत्यस्य यूपो देवता वनस्पतियागे प्रैषोऽयं । वनस्पतिमभि । अत्र द्वाभ्यामधिकं शतद्वयमक्षराणि ॥

४७ अग्निꣳ स्विष्टकृतꣳ स्विष्टकृदग्निः ॥

होता यक्षदग्निꣳस्विष्टकृतमित्यस्य स्विष्टकृदग्निर्देवता । अत्र सप्तत्यधिकं शतमक्षराणि । स्विष्टकृद्यागे प्रैषोऽयं । एतेषामश्विनौ छागस्येत्यादीनां स्विष्टकृदन्तानां छन्दो नास्ति, एतावत्परिमाणस्य छन्दसोऽभावात् । तदुक्तं यजुषामनियताक्षरत्वादेकेषां छन्दो न विद्यत इति ॥

४८ देवं बर्हिरेकादशानुयाजप्रैषा अग्निसरस्वतीन्द्रदेवत्याः ॥

देवंबर्हिः सरस्वतीत्याद्या एकादशानुयाजप्रैषा अग्निसरस्वतीन्द्रदेवत्याः । यथापिताकृत्य एव, बर्हिर्द्वारादयो देवता नाश्वादय इति हरिस्वामिनः । देवं बर्हिः । आर्षीत्रिष्टुप् । देवीर्द्वारः । द्वौ व्यूहौ । आर्षीत्रिष्टुप् । देवी उषासा आर्षीत्रिष्टुप् । देवीऊर्जाहुती । अतिजगती । देवा देवानां । एकाधिका अतिजगती । देवीस्तिस्त्रः । आर्षीत्रिष्टुप् । देवइन्द्रः । द्वौ व्यूहौ अतिशक्वरी । देवो देवै । व्यूहः । अत्यष्टिः । देवं बर्हिः । अतिशक्वरी । देवोऽग्निः अत्रैकादशाधिकं शतमक्षराणि सन्ति तेन छन्दो नास्ति ॥

४९ अग्निमद्य होतारमवृणीतेत्यादिसूक्तवाकप्रैषो लिङ्गोक्तदैवतो लिङ्गोक्तदेवतः ॥

अग्निमद्यहोतारमित्ययं सूक्तवाक्य प्रैषो लिङ्गोक्ताग्निवरुण-आदिदेवताः, अग्निमद्यऋषिः । सूपस्थाः । धृतिः । त्वामद्य । एकाधिकाकृतिः । अनियताक्षरो ह्ययं समस्तः प्रैषः । तेन छन्दसोऽभावः । अनियताक्षरत्वात् । द्विरभ्यासोऽध्यायसमाप्त्यर्थः ॥ ४० ॥

इति श्रीमदग्निचित्सम्राट्स्थपतिविंशत्क्रतुकृत्महायाज्ञिकश्रीश्रीप्रजापतिसुतेन याज्ञिकश्रीदेवकृते सर्वानुक्रमणिकाव्याख्याने द्वितीयोऽध्यायः समाप्तः ॥ २२

अथाश्वमेधः

अथानन्तरमश्वमेधः अभिधीयत इति शेषः ॥

चतुरोऽध्यायान्प्रजापतिरपश्यत् ॥

तेजोऽसि सौवर्णनिष्कं । तेजोऽसि शुक्रमित्यस्य सौवर्णं निष्कं देवता । वाचने विनियोगः । प्राजापत्याऽनुष्टुप् । देवस्य त्वेत्यस्य साम्नः जगतीछन्दः । व्याहृतय । अश्वाभिधाने विनियोगः ॥

इमामगृभ्णंस्त्संवत्सरो यज्ञपुरुषस्त्रिष्टुभम् ॥ २२

इमामगृभ्णन्नितीमास्तव त्रिष्टुभं संवत्सरो यज्ञपुरुषश्चापश्यत् अस्मिन्नादौ बहुवर्णमिति कल्पभाष्ये । अत्र तृतीयो दशकः । अभिधा असीत्यस्य आर्षी त्रिष्टुप् छन्दः अभिधा लिङ्गोक्तानि । अश्वबन्धने विनियोगः । अस्यासावश्वो देवता । ब्रह्मन्नश्वं भन्त्स्यामीत्यस्य प्राजापत्या बृहती । ब्रह्मा देवता । ब्रह्मामन्त्रणे विनियोगः । तत्त्वान्याम । व्यूहेन साम्ना गायत्री अध्वर्युर्देवता । अश्वबन्धने विनियोगः । प्रजापतये । यजुस्त्रिष्टुप् । प्रजापतिर्देवता । इन्द्राग्निभ्यां । यजुः पङ्क्तिः । इन्द्राग्नी देवते । वायवे त्वा । यजुर्बृहती । वायुर्देवता । विश्वेभ्यस्त्वा । सर्वेभ्यस्त्वा यजुर्जगत्यौ । विश्वेदेवा देवता सर्वे देवा देवता । क्रमेण । प्रजापतये त्वेत्यादीनां प्रोक्षणे विनियोगः । अथवा एषां

पञ्चानां यजुषामग्निर्देवता ॥

योऽर्वन्तं गायत्र्यग्निनाश्वस्तुतिः परोऽसौ लिङ्गोक्तः ॥

योऽअर्वन्तमिति गायत्री । अस्याः पूर्वार्धेनाश्वः स्तूयते । तस्मादश्वो देवतेत्यर्थः । परो द्वितीय उत्तरोऽसौ लिङ्गोक्तदेवतः । अथवा पर इति परोमर्त इत्ययमसौ लिङ्गोक्तदेवतः । अथ व्यूह । योऽअर्वन्तमित्यश्वस्य घातने विनियोगः । परोमर्त इत्यश्वस्य शुनोऽधोऽप्लावने ॥

६ **अग्नये लिङ्गोक्तान्येव ॥**

अग्नये स्वाहेत्यष्टानि यजूंषि लिङ्गोक्तान्येव अग्न्यादिदेवतानीत्यर्थः । होमे विनियोगः ॥

9 **हिंकारायेत्यश्वस्यैकान्नपञ्चाशच्चेष्टितानि ॥**

हिंकारायेत्यादीनामेकान्नपञ्चाशत्संख्यानां यजुषां हिंकारहिंकृतादीन्येकान्नपञ्चाशत्संख्यान्यश्वचेष्टितानि क्रिया व्यापारा देवताः । दक्षिणाग्नौ प्रक्रमहोमे विनियोगः । अथाग्नय इत्यादीनां छन्दांसि कथ्यन्ते । त्र्यक्षराणां दैव्यनुष्टुप् चतुरक्षराणां दैवी बृहती । पञ्चाक्षराणां दैवी पङ्क्तिः । षडक्षराणां दैवी त्रिष्टुप्, यजुर्गायत्री वा, सप्ताक्षराणां दैवी जगती यजुरुष्णिग्वा । अष्टाक्षराणां यजुरनुष्टुप् । प्राजापत्या गायत्री वा । नवाक्षराणां यजुर्बृहती आसुरी जगती । दशाक्षराणां यजुः पङ्क्तिः । एकादशाक्षराणां यजुस्त्रिष्टुप् । द्वादशाक्षराणां यजुर्जगती । इति स्वाहान्तानां सर्वयजुषां छन्दः कथनप्रकारः । तत्सवितुरित्यस्य प्रागुक्तम् ॥

० **हिरण्यपाणिं पञ्चर्चं० सावित्रं गायत्रम् ॥**

हिरण्यपाणिमूतय इत्यादिपञ्चर्चं सवितृदेवतं गायत्रीछन्दस्कं । सावित्र्यामिष्टायां तत्सवितुर्वरेण्यमित्यादिकाः याज्यानुवाक्या इति संहिताभाष्ये । रातिं० सत्पतिं सप्तकः । प्रासवं । व्यूहः ॥

आद्यां मेधातिथिः ॥

आग्नेयमृचं आद्यां हिरण्यपाणिमित्येतां मेधातिथिऋषिरपश्यत् ॥

अग्निᳪस्तोमेनाग्नेयं तृचं गायत्रᳪ सुतंभरो विश्वामित्रो विरूपो यथासङ्ख्यम् ॥ 22

अग्निᳪस्तोमेनेत्यादिकं तृचमग्निदैवतं गायत्रीछन्दस्कं । अस्य तृचस्य यथासंख्यं सुतम्भरो विश्वामित्रो विरूप इत्येते त्रय ऋषयः । तत्राग्निंस्तोमेनेतीमां सुतम्भरऋषिरपश्यत् । अग्निं दूतमितीमां विरूपोऽपश्यदिति यथासङ्ख्यशब्दार्थः ॥

अजीजनो हि पवमानीं कृतिं पिपीलिकमध्यामनुष्टुभं त्र्यरुणत्रसदस्यू ॥ 22

अजीजनो हि पवमानेतीमामृचं पावमानीसञ्ज्ञां पिपीलिकमध्याकृत्यनुष्टुप्छन्दस्कां त्र्यरुणत्रसदस्यू ऋषी अपश्यतां यस्याः प्रथमतृतीयौ पादौ द्वादशकौ द्वितीयोऽष्टकः सा पिपीलिकमध्याकृतिरनुष्टुप् । "मध्ये जागतावष्टकश्च कृतिर्मध्ये चेदष्टकः । पिपीलिकमध्येति वचनात्" । अत्र पूर्वसूत्रात्कृतिपदमनुवर्तनादनुष्टुभः पिपीलिकमध्याकृतिरित्येषा सञ्ज्ञा । पावयति पवित्रं करोतीति पावमानीं तथा ॥

विभूरग्निदैवतम् ॥ 22-

विभूर्मात्रा इत्येतदग्निदैवतं । अस्यास्य दक्षिणे कर्णे जपे विनियोगः । अतिजगतीछन्दः ॥

देवा दैवम् ॥

देवा भागापाला इत्येतद्दैवं । देवदैवतं दक्षिणामादेशे विनियुक्तं । ऋगुष्णिक् ॥

इहरन्ति राम्ण्यानि चत्वारि ॥

इहरन्तीत्यादीनि चत्वारि यजूंष्यग्निदैवत्यानि । धृतिहोमे विनियुक्तानि । प्रथमे इहरन्तिः स्वाहा । यजुर्गायत्री । इहरमतिः स्वाहा । यजुरुष्णिक् । इह धृतिः स्वाहा । यजुर्गायत्री, इह स्वधृतिः स्वाहा । यजुरुष्णिक् ॥

१० कायौदुम्भराणि लिङ्गोक्तानि ॥

काय स्वाहेत्यादीन्यौदुम्भराणमन्त्राणि लिङ्गोक्तदैवतानि औदुम्भरहोमे विनियुक्तानि । छन्दांसि तु प्रागुक्तानि ॥

२ आब्रह्मँ लिङ्गोक्तान्यध्यायात् ॥

आब्रह्मन्नित्यादीन्यध्यायपर्यन्तानि लिङ्गोक्तदैवतान्येव । आब्रह्मन्नित्यस्य जपे विनियोगः । चतुष्षडधिक शतमक्षराणि तेन द्व्यधिका उत्कृतिः । प्राणाय स्वाहेत्यादीनां सर्वरात्रहोमे एषां छन्दांसि प्रागुक्तप्रकारेण कल्पनीयानि ॥ १ ॥

प्रजापतये प्राजापत्यम् ॥

प्रजापतये त्वा जुष्टमित्येतत्प्रजापतिदैवतं । एकाधिका ऋग्गायत्री । हिरण्यगर्भ इत्यस्य ऋष्यादिकं प्रागुक्तम् । महिम्नो ग्रहणे तस्य विनियोगोऽस्य च । एषत इत्यस्य । यजुस्त्रिष्टुप् । सादने विनियोगः ॥

यस्ते दैवम् ॥

यस्ते हंसँवत्सर इत्येतद्दैवं । देवदैवतं । होमे विनियुक्तं द्व्यधिका शक्वरी । व्यूहाभ्यां अतिशक्वरी वा ॥

३ यः प्राणतस्त्रिष्टुप्कायो हिरण्यगर्भः ॥

यः प्राणतो निमिषत इतीयं त्रिष्टुप्छन्दस्का कायी । कोदेवता यस्याः सा कायी । हिरण्यगर्भस्य ऋषेः आर्षं । हिरण्यगर्भोऽस्या ऋषिरित्यर्थः । तृतीया द्वादशकः । उत्तरस्य महिम्नो ग्रहेऽस्या विनियो-

गः । अथापि प्रजापतये स्वाहापेतं । वीयवायस्य एकाधिका ज-गायत्रीछन्दः । एष तरति यजुर्जगती, यद्वे ... कृत्याधिकाऽतिज-गती वा । व्यूहाभ्यामष्टिर्वा ॥

युञ्जन्ति मधुच्छन्दा आदित्यदैवत्यां गायत्रीम् ॥ २३-

युञ्जन्ति ब्रध्नमित्यृचमादित्यदैवत्यां गायत्रीं मधुच्छन्दा ऋषिरपश्य-त् । अश्वयोजने विनियोगोऽस्याः ॥

युञ्जन्त्यस्याश्वस्तुतिः ॥ २३

युञ्जन्त्यस्य काम्येत्यश्वस्तुतिः । इयमपि गायत्री आद्यः पादः षड्कः । तेन व्यूहो । पूर्वसूत्राद्गायत्रीत्यनुवर्तते । इतराश्वयोजने विनियोगोऽस्याः ॥

यद्वातो बृहती ॥ २३-

अश्वस्तुतिरिति वर्तते । यद्वातो अपो ... बृहतीछन्दः । व्यू-हेन छन्दः पूरणं, वाचनेऽस्या विनियोगः ॥

वसवस्त्वा लिङ्गोक्तानि ॥ २३-

वसवस्त्वाञ्जन्त्विति त्रीणि लिङ्गोक्तदैवतानि । अश्वस्याञ्जने विनि-युक्तानि । वसवस्त्वा गायत्रेणानुष्टुप्, रुद्रास्त्वा यजुस्त्रिष्टुप् । आदित्या-स्त्वा । अनुष्टुप् । अश्वस्य केसरपुच्छेषु शिरोग्रीवापुच्छरोमसु क्रमेण पत्नीनां मणीन्प्रवर्तने विनियोगः ॥

लाजी३न्नश्वदेवत्याम् ॥

लाजी३ञ्छाची३न्निति प्राजापत्यदैवतं, यजुः, स्वराड्बृहती वा ... शिष्टान्नभक्षणे विनियोगः ॥

कः स्विदेकाकीत्योऽनुष्टुभः प्रश्नप्रतिप्रश्नभूता ब्रह्मोद्ये हो-२ तुर्ब्रह्मणश्च ॥

ब्रह्मोद्यसंज्ञे हे कर्मणि होतुर्ब्रह्मणश्च प्रश्नप्रतिप्रश्नभूताः ।

कालावयवं, वीरोसीदिं त्रयोव्यूहः ॥

वायुष्ट्वा लिङ्गोक्तानि ॥

वायुष्ट्वेत्यादीनि लिङ्गोक्तानि । यद्वदेवतानीत्यर्थः । वायुरादिदेवतानि वा । वायुष्ट्वा व्यूहेन ... एवं च ... वासुरी ... । वृष्णा ... प्राजापत्यागायत्री । ... दैवीबृहती ... एषां विनियोगः ॥

सर्ठ०शितस्तिस्रोऽश्वदेवत्या अनुष्टुब्विराट्त्रिष्टुभः ॥

सर्ठ०शितो रश्मिनेत्याद्यास्तिस्रोऽनुष्टुभोऽश्वदेवत्याः, एषामनुष्टुब्विराट्त्रिष्टुभो भवन्ति । अश्वप्रोक्षणे एव विनियुक्ताः । अपु ... इति व्यूहः । संशितो रश्मिनेति अनुष्टुप् । स्वयं वाजिनिति विराट् । दशकास्त्रयो विराडित्येतल्लक्षणयुक्तत्वात् । ... त्रिष्टुप् । ... द्वादशको तेन ह्यधिका ॥

अग्निः पशुरास्त्रीणि ... ॥

अग्निः पशुरित्यादीनि त्रीणि यजूंषि ... विनियुक्तानि । आर्षीपङ्क्तिः, ... इत्यादीनामुक्तं । ... पदेषु ... विनियोगः ॥

अम्बेऽनुष्टुबम्बस्तुतिः ॥

अम्बे ऽअम्बिके इतीयमनुष्टुप् ... अम्बस्तुतिः । ... देवता । ... व्यूहः । पत्नीनां ... विनियोगः ॥

गणानां त्वा चत्वारि लिङ्गोक्तानि ॥

गणानां त्वा गणपतिमित्यादीनि चत्वारि यजूंषि लिङ्गोक्तदेवतानि ... प्राजापत्यानुष्टुप् । ... वसामेति ... शेयो ... पत्नीनामश्वपरिगमनेषु विनियोगः क्रमेण । ... पङ्क्तिः । ... विनियोगः । ...

प्राजापत्याऽऽयत्री । अधीवासेत्यस्य महिष्योरविवाहेन ... वि-
नियोगः । वृषा वाजीत्यस्य यजुर्जगतीच्छन्दः । अश्वदेवत्या । म-
हिष्याभ्युत्थापने विनियोगः ॥ २ ॥

उत्सक्थ्या गायत्र्याम्नी ॥(१) २३

उत्सक्थ्या अवगुदमित्यस्य गायत्रीछन्दस्का अग्न्याग्नी यज-
मानस्याश्वाभिधाने विनियुक्ता ॥

एकादशर्चमानुष्टुभम् ॥

द्वितीया तूपरिष्टाद्बृहत्यध्वर्य्वादीनां कुमार्यादि-भिरश्लीलभाषणा एव देवताः ॥

यकाऽसकौ शकुन्तिकेत्यादि दशर्चमनुष्टुप्छन्दस्कं तत्र दशमी द्वि-
तीया सा, यकाऽसकौ शकुन्तिकेत्येषा उपरिष्टाद्बृहती षट्त्रिं-
शदक्षरत्वात्, अन्या नवानुष्टुभः । कीदृशं दशर्चं । अध्वर्य्वादी-
नां कुमार्यादिभिः सहाश्लीलभाषणं । अश्लीलं ग्राम्यं स्त्रीपुरुष-
संयोगकालीनयोनिशिश्नादिसंबन्धात्तद्धि भाष्यते निर्लज्जप्रकटीक्रि-
यते येन दशर्चेन । तत्तथा । अनेन हि दशर्चेनाध्वर्युब्रह्मोद्गातृहोतृक्ष-
त्तारः, यजमानकुमारीपत्नीभिः सह एवं विधमश्लीलं संवादं कुर्व-
न्ति ता एव देवता, अस्य दशर्चस्य ता अध्वर्युकुमार्यादय एव ता दे-
वताः । यकाऽसकौ अस्य टीका संज्ञकः । तेवेकामा । यदेवा व्यू-
ह । यूदा यत् । समक ॥

दधिक्राव्णो दधिक्रावा वामदेव्यः सुरभिमतीमनुष्टुभमाश्वीम् ॥ २३

दधिक्राव्णोऽकारिषमितीमां सुरभिमतीं सुरभिशब्दयुक्तामनु-
ष्टुभं अश्वदेवत्यां वामदेवपुत्रो दधिक्रावा ऋषिरपश्यत् । अध्वर्य्वादी-

(१) आशीर्येति 'क' पुस्तकपाठः ॥

नानुवाकयो विनियोगः । अन्याः स्वरनिमित्तिवसमुत्पा ॥

3 गायत्री पशुयमान्त्रम् ॥(१)

गायत्रीत्रिष्टुबित्येतत्पशुयमान्त्रं पशुदैवतं । विकृतौ पशौ… मन्त्रलिङ्गैर्विनियुक्तं । अस्याम् आद्यास्तस्रोऽनुष्टुभो-ऽन्त्या त्रिष्टुप् । अस्मिन्दशर्चे आद्या गायत्रीत्रिष्टुबित्येषा उष्णिक् । तत् परास्तस्रोऽनुष्टुभः, द्विपदायाः महापङ्क्त्यः । मार्यस्ते, इत्यष्टा दरि-णीत्येताः, अन्त्या कुविदङ्गेत्येषा त्रिष्टुप् । अत्र सूक्तानि । महापङ्-क्त्यः । षैषी । मार्यस्ते, देवानां । पतेषु व्यूहः । महापङ्क्तीति सूक्ते दशकः ॥

८ कस्त्वापशुयमान्त्रम् ॥

कस्त्वाच्छ्यतीत्येतत्पशुयमान्त्रं पशुदैवतं । पशुविशसने विनियुक्तम् ॥

आद्या गायत्री ॥

पञ्चानुष्टुभः अस्मिन्नपृचे आद्या कस्त्वेत्येषा गायत्री, अन्तवस्ते, अ-र्धमासाः, देवाऽध्वर्यवः, श्रोते । शम्, इत्येताः पञ्चर्चोऽनुष्टुभः । कस्त्वेति नवकः तैनैकाधिका । अन्तवस्ते अत्र प्रथमो नवकः । अ-न्यः सप्तकः । देवाः प्रथमे व्यूहः । तृतीये सप्त । शम् । द्वितीये द्वौ व्यूहौ । तृतीये चतुर्थे चैकः ॥

४५ कः स्विदेकाकी दशर्चं मन्त्रोपदे० होताध्वर्युः प्रश्नप्रति-प्रश्नभूतं, आद्यास्तस्रोऽनुष्टुभः का स्विदाद्यास्तस्रस्ताद्या-द्या त्रिष्टुभः ॥

अस्मिन्दशर्चे, आद्यास्तस्रोऽनुष्टुभः । कः स्विदेकाकी, सूर्य एका-की । किं स्वित्सूर्यसमं । ब्रह्मसूर्यसमज्योतिः । तथा । का स्विदा ।

(१) उष्णिगाद्या चतस्रोऽनुष्टुभोऽन्त्या त्रिष्टुप् । इत्यधिकः काण्वसर्वानुक्रमे पाठः ॥

वीत् । वीरावीत् । कार्द्विमे, यजामि ब्रह्मोद्यमनुष्टुभः । अ-
न्त्या उष्णिगनुष्टुब्व्यतिरिक्ता । इयं चतोऽनुष्टुभः । तासु, पृच्छामि त्वा
चितये । अपि तेषु । केष्वन्तः, पञ्चस्वन्तः, कत्यस्य । अग्ने । कोऽस्य-
। वेदाहं । पृच्छामि त्वा, इयं वेदिरित्येताः । अथ, किंस्विदावपनं,
येषु विष्णुः । अपि तेषु । केष्वन्तः । कास्विदासीत् । एतेषु व्यूहः । किं स्वि-
त् । द्वौ व्यूह्ये । काः स्विदासीः । कं माधवः । यजामि । कत्यस्य । को ह्यस्य-
, कः सूर्यस्य ज्योतिः । को वेद दृशः । पृच्छामि वाचः । अयं
यज्ञः । ब्रह्मायं । एतेषु व्यूह ॥

सुभूरनुष्टुबलिङ्गोक्तदेवता ॥ 23—63

सुभूः स्वयम्भूरित्येषानुष्टुबलिङ्गोक्तदेवता । पूर्वस्य महिम्नः पुरोऽ-
नुवाक्या । उत्तरमहिम्नो याज्या च । द्वितीये व्यूह, लिङ्गाभावाच्च
प्रजापतिर्देवता ॥

होता यक्षत्प्राजापत्यः प्रैषः ॥ 23— 64

होता यक्षत्प्रजापतिमित्ययं प्रजापतिदेवत, महिम्नः प्रैषः । द्व्यधि-
का आर्षीगायत्री । व्यूहेन बृहती वा ॥

प्रजापते हिरण्यगर्भः प्राजापत्यां त्रिष्टुभम् ॥ 23—

प्रजापते न त्वदेतान्यन्य इत्यृचं प्रजापतिदेवतां त्रिष्टुभं हिरण्यगर्भ
ऋषिरपश्यत् । इयं पूर्वस्य महिम्नो याज्या । उत्तरस्य पुरोऽनुवाक्या
च । अत्राध्यायोऽध्यूढः ॥ ३ ॥

अश्वस्तूपरइत्याद्यः पशवोऽध्यायेनोक्ता देवता वा पर्यङ्ग्याः ॥

अश्वस्तूपरइत्यनेनाध्यायेनाश्वतूपराद्यः पञ्चदशपर्यायाः पर्यङ्ग्य
पशवः पशवः उक्ता देवता वा । अस्यार्थः, येषामश्वादीनां पर्यङ्ग्या
यां देवतास्ताः प्राजापत्यस्याश्वादय उक्ताः । अश्वाद्यः पञ्चदशपशवः प-

यैश्चादेवत्या उच्यन्ते ।। "एतत् [illegible] ब्रूते [illegible] पशवो मध्यमीति" [illegible] ॥

तथा रोहितादयो गुणयुक्ताः ॥

पशवस्तूक्ता इति चानुवर्तते । तथा गुणयुक्ताः, रोहितो धूम्ररोहि-तइत्यादीनां रक्तत्वादिगुणवन्तः पशवस्ते देवताभ्यो ज्ञेयाः ॥

आरण्याश्च कपिञ्जलादय आऽध्यायात् ॥

चकारेण पशवो देवतासंबद्धा कथ्यन्ते । वसन्ताय कपिञ्जला-नित्येवमादिना, आरण्या अरण्ये भवाः कपिञ्जलादिपशवस्तद्देवता-योक्ताः, आ अध्यायादध्यायसमाप्तिं यावत् ॥

आदद्दद्भिरित्यादित्वगित्येतदन्तं द्रव्यदेवतमुक्तम् ॥

आदद्दद्भिरित्यतआरभ्य त्वगित्येतदन्तं पृथिवीं त्वचेत्येतत्पर्यन्तं द्रव्यदेवतमुक्तं । द्रव्याणि च देवताश्च द्रव्यदेवतम् ॥

अश्वस्तूपरो ब्राह्मणोऽध्यायः ॥

अश्वस्तूपर इत्ययमध्यायो ब्राह्मणरूप । द्रव्यदेवतासंयोगविधाय-कत्वात् न तु मन्त्ररूपस्तदर्थः ॥

आदद्दद्भिस्त्वचान्तश्च ॥

पृथिवीं त्वचेत्येतत्पर्यन्तः आदद्दद्भिरित्ययमप्यध्यायो विधायकं ब्रा-ह्मणमेव । न मन्त्राः ॥

शुंकाय याहणीं द्विपदां मुण्डिभ औदन्यः

शुंकाय स्वाहेतीमां वरुणदेवत्यां द्विपदां औदन्यउदन्यपुत्रो मु-ण्डिभऋषिरपश्यत् । द्वे पदे यस्याः सा द्विपदा, अप्सु मग्नस्य पिङ्ग-लखलतिविक्लिधशुक्लस्य मूर्द्धनि होमेऽस्या विनियोगः । यजुर्गा-यत्री । अस्या एव विनियोगमारमाह ॥

एषा चावमाश्यन्तं ते ॥

जैवकार्य स्वाहेत्येषा हिमवन्तर्जले उदकमध्ये जाता सती पाप-नाशनी पापनाशिनी। तथा च श्रुतिः। जम्बका नाम गायत्री वै-देवाजसनेयके, यत्तज्जलेसंजाता ब्रह्महत्यां व्यपोहतीति। हिरण्य-गर्भो, यः प्रजापतिस्त्वमग्नोरापोदि प्रोक्ता यतः प्रकृतिराजापत्यमृ-नामग्न्यादीनामिता याज्यानुवाक्या इतिसंहिताभाष्ये॥

यस्येमे काण्यौ त्रिष्टुभौ हिरण्यगर्भः प्राजापत्यऋषि-रपश्यत्॥

यस्येमे। यस्येमाः, यस्य छाया, एतेषु व्यूहः॥

आनो दशर्चं जागतं वैश्वदेवं गोतमः॥

आनो भद्राइत्यादि दशर्चं जगतीछन्दस्कं विश्वेदेवदेवतं गोत-मऋषिरपश्यत। जागतमित्यस्यापवादमाह॥

स्वस्ति नो विराट्स्थाना॥

स्वस्ति नइन्द्रइतीयमृक् विराट्स्थाना। न जगतीमवयो वैराज त्रिष्टुभयेत्येतज्ञापनायुक्ता। पुनरपि जागतमित्यस्यापवादमाह॥

भद्रं कर्णेभिस्तृचं त्रैष्टुभम्।

भद्रं कर्णेभिरित्येतत्तृचं त्रिष्टुप्छन्दस्कं। न जागतं। अथ भद्र-व्यासएकादशकः। तस्मात। व्यूहेनैकादशकः। तन्नप्त्रिना व्यूहः। रक्षिता पायुः। व्यूहः। स्वस्तिनो बृहस्पतिः। व्यूहेन त्रैष्टुभः। भद्रं पश्येम। व्यूहः। आनो भद्राइत्याद्या वैश्वदेवमग्न्यायुषरोडाशयागे-ना याज्यानुवाक्या इति संहिताभाष्ये॥

मानोऽश्वस्तोमीयं दीर्घतमास्त्रैष्टुभं (१) द्वाविंशं॰ मृत्यु-प्रमस्तुतिः॥

---

(१) द्वाविंशतेस्थाने षोडशर्चामिति काण्वसर्वानुक्रमपाठः॥

— मन्त्रको विश्वे सबस्वतोर्दे, द्वाविंशत्यृचं विद्, एकादशकमध्वत्रीयं सप्तकं वीणतमाच त्रिष्टुप्त्वम्। प्रथम ऋषिः। पश्चो यूपस्तूयते। तेषु च प्रथम देवता। आश्वमेधिकोऽयं विनियोगोऽन्या सब्यवकदक्षस्य वाजीतमहतो हुत्वा द्विपदं जुहोतीत्यादौ मंत्रस्यार्थम्॥

तृतीयाद्यष्टौ जगत्यौ॥

अग्निरद्वाविंशत्यृचेऽश्वस्तोमीये एष छागो, यूपस्तत्त्वे। तृतीयाषष्ठ्यौ जगत्यौ, अन्य। प्रवर्ग्यामः। सुपाङ्क्तः। व्यूहः। पूर्वो भागो व्यूहेन द्वादशक। ये चार्वते व्यूहेन द्वादशकः। यद्वाजिनो द्वादशकः। सर्वा ताते व्यूहः। अभिमूलं द्वादशकः, ये चार्वतइति द्वौ द्वादशकौ। तं देवासः व्यूहः, निक्रमणं द्वादशकः। यच्चाष्टकः। सर्वाताते व्यूहः। अधीवासं व्यूहः। सन्दानं नवकः। प्रिया व्यूहेन दशकः। पात्र्या वा। व्यूहः। एकस्त्वष्टुः, ताता पिताना, छिद्रा, व्यूह, नवा उ द्वादशकः। सुगव्यं नः, पुत्रा १॥ ऽर्त्त, व्यूह॥

इमा नु द्वैपदं वैश्वदेवं दृचं भुवनआप्त्यो वा साधनो भौवनो वा॥

इमा नु कं भुवनेति द्वैपदं द्विपदाछन्दस्कं विश्वदेवदैवतं दृचं आप्त्यो भुवनो वा, अथ वा भुवनपुत्र साधनो वा अपश्यत्। भौवनआप्त्यो वेति क्वचित्पाठः, तत्र भुवनस्य पुत्रआप्त्यऋषिरिति चार्थः। द्विपदा उत्तमा जुहोतीत्यत्र होमे विनियोगः। अग्ने त्वं नइत्यादीनां तु पूर्वमेव सर्वमुक्तं। पाशाभ्यवेव पूर्वसूत्रोक्तोमे विनियोगः, इमा०१०१०। ऽश्वमेधः॥ ५॥

अग्निश्च सप्त लिङ्गोक्तानि॥

अग्निश्च पृथिवी चेत्यादीनि सप्तयजूंषि लिङ्गोक्तदेवतानि। अत्र

ऋषिर्विश्वानेव यम्यकानुक्तत्वात् । विश्वानि । आदित्यः "आदित्या-नीमानि शुक्लानि यजूंषीति" वचनात् । याज्ञवल्क्यो वा । याज्ञवल्क्यो नाख्यायन्त इति श्रुतेः । खिलमन्त्रा एते । ऋषिर्दिनियोगानुक्तेः । अ-श्विनेति चतस्रो ऋग्गायत्र्यः । सप्त सर्ठ०सदः । आसुर्यनुष्टुप् । स कामान् । प्राजापत्यानुष्टुप् । अधेमाम् । व्यूहेन ब्राह्मीगायत्री ॥

प्रियो देवानां लौगाक्षिरनुष्टुभमनवसानाम् ॥

प्रियो देवानां दक्षिणाया,इतीमामृचं अवसानवर्जितं । अनुष्टुभं लौगाक्षिर्ऋषिरपश्यत् । व्यूहेन छन्दः पूरणम् ॥

बृहस्पते गृत्समदो ब्राह्मीं त्रिष्टुभम् ॥

बृहस्पते अतियदर्य इतीमामृचं ब्रह्मदेवत्यां त्रिष्टुभं गृत्समदऋ-षिरपश्यत् । बृहस्पते सवे बार्हस्पते सवे बार्हस्पत्यग्रहेऽस्याः सोप-यामाया विनियोगः । उपयाम । आसुरी अनुष्टुप् । एष ते योनिः । यजुस्त्रिष्टुप् । सादने विनि० ॥

इन्द्रगोमन्नैन्द्र्यौ गायत्र्यौ रम्याक्षिः ॥ (१)

इन्द्रगोमन्निन्द्रायाहीत्येते ऋचौ इन्द्रदेवत्ये गायत्र्यौ रम्याक्षिर्ऋ-षिरपश्यत् । इन्द्रायाहि । व्यूहः । गोसवे यज्ञे ग्रहणेऽनयोः सोप-यामयोर्विनियोग इति संहिताभाष्ये । उपयाम आसुर्युष्णिक् । एष ते । यजुर्जगती ॥

ऋतावानं प्रादुराक्षिर्वैश्वानरीयाम् ॥ (२)

गायत्रीमित्यनुवर्त्तते । ऋतावानं वैश्वानरमितीमामृचं गायत्रीं वैश्वानरदेवतां प्रादुराक्षिर्ऋषिरपश्यत् । उपयाम । साम्न्युष्णिक् । ए-

---

(१) ऐन्द्र्यौ गायत्रीति काण्वसर्वानुक्रमपाठः ॥

(२) वैश्वानरीये गायत्र्यौ, इति च काण्वसर्वानुक्रमपाठो बोध्यः ॥

(३) एतस्यामेव वैश्वानरो नो गायत्री वसिष्ठभरद्वाजः इति काण्वसर्वानुक्रमेऽधि-कः पाठो ज्ञेयः ॥

ष ते । यजुस्त्रिष्टुप् ॥

वैश्वानरस्य त्रिष्टुभं कुत्सः ॥ (१)

वैश्वानरस्य सुमताविस्येतामृचं वैश्वानरदेवतां त्रिष्टुभं कुत्सऋषिरपश्यत् । अत्राद्यान्त्ययोर्व्यूहः । यजुषोः पूर्वसूत्रवत् ॥

अग्निर्ऋषिराग्नेयीं गायत्रीं वसिष्ठभरद्वाजौ ॥

अग्निर्ऋषिरितीमामृचं अग्निदेवतां गायत्रीं वसिष्ठभरद्वाजावृषी अपश्यताम् । यजुषोः प्रागुक्तम् ॥

महाँऽइन्द्रो माहेन्द्रीं वसिष्ठः ॥

गायत्रीमित्यनुवर्त्तते । महाँ इन्द्रो वज्रहस्तऽइतीमामृचं महेन्द्रदेवतां । गायत्रीछन्दस्कां वसिष्ठऋषिरपश्यत । यजुषोः प्रागुक्तम् ॥

तं वऽऐन्द्रीं पथ्याबृहतीं नोधागोतमः ॥

तं वो दस्ममितीमामृचं इन्द्रदेवत्यां पथ्याबृहतीं । नोधागोतमोऽपश्यत् । जपस्वाध्यायादिषु विनियोगः ॥

यद्वाहिष्ठं वसूयव आग्नेयीमनुष्टुभम् ॥

यद्वाहिष्ठमितीमामृचमग्निदेवत्यामनुष्टुभं वसूयवऋषयोऽपश्यन् । अन्त्ययोर्व्यूहः ॥

एहि भरद्वाजो गायत्रीम् ॥

आग्नेयीमित्यनुवर्त्तते । एह्यू षु ब्रवाणि त इतीमामृचं गायत्रीछन्दस्कां भरद्वाजऋषिरपश्यत् । एह्यू षु व्यूहः ॥

ऋतवस्ते बृहती ॥

आग्नेयीत्यनुवर्त्तते । ऋतवस्ते यज्ञमितीयमृगग्निदेवत्या बृह-

(१) महत्त्वान्माहत्यैन्द्री त्रिष्टुबिति काण्वसर्वानुक्रमेऽधिकः पाठः । एतत्सूत्राग्रे महाँ इन्द्रस्ततोऽग्निर्ऋषिरिति पूर्वापरीभावेण सूत्रे वेदितव्ये काण्वसर्वानुक्रमे । एतदग्रे सूत्रषट्कं काण्वसर्वानुक्रमे नास्तीति बोध्यम् ॥

तीछन्दस्का नवकाष्टकैकादशाष्टिनो विषमपदेत्येषा इयं बृहती, अत्र तु प्रथमः पादो दशकः । तेनैकाधिका ॥

उपह्वरे वत्सः ॥

उपह्वरे गिरीणामितीमामृचं वत्सऋषिरपश्यत् । अस्याः सोमो देवतेति संहिताभाष्ये । गायत्रीछन्दः । अनुक्तानां गायत्रमितिवक्ष्यमाणसूत्रात् । अत्राद्यौ सप्तकौ ॥ ६ ॥

उग्रा ते गायत्रं तृचर्ऽ० सौम्यमाग्नीध्रः ॥

उग्रा । ते जातं । स न इन्द्राय । एना विश्वानीत्येतत्तृचं सोमदैवतं गायत्रीछन्दस्कं आग्नीध्रऋषिरपश्यत् । दिवि सत् । वरेण्या । एना । द्युम्नानि । एषु व्यूहः । द्युम्नानीत्यत्र नामधेयस्याभ्यासेन पूरणं । इति छन्दोग्रन्थे ॥

अनुवीरैर्मुद्गलो यज्ञपुरुषस्त्रिष्टुभम् ॥ (१)

अनुवीरैरित्येतामृचं त्रिष्टुप्छन्दस्कां मुद्गलो यज्ञपुरुषऋषिरपश्यत् । आशीरियं देवादेवताः । द्वितीयो दशकः । तृतीयो द्वादशकः ॥

अग्ने पत्नीर्मेधातिथिराग्नेयीं गायत्रीम् ॥

अग्ने पत्नीरितीमामृचं अग्निदेवतां गायत्रीं मेधातिथिरपश्यत् । अग्ने पत्नीरित्याद्याः पत्नीसंयाजनेष्टौ नेष्टुर्याज्याः । प्रथमा प्रातः सवने नेष्ट्रचमसयागे याज्या ॥

अभियज्ञं द्रव्यृचमृतुदैवतं मेधातिथिः ॥

अभियज्ञं । द्रविणोदा इत्येतत् द्व्यृचमृतुदैवतं मेधातिथिऋषिरपश्यत् । अतएतदपि गायत्रीछन्दस्कं । अनुक्तानां गायत्रमितिसू-

(१) मौद्गलो इति काण्वसर्वानुक्रमपाठः । एतत्सूत्रमिमानास्त्विष्टुभ वसिष्ठऐन्द्रीमाशिषम् । इतिपाठः । एतदग्रे सूत्रषट्क नास्ति काण्वसर्वानुक्रमे ॥

स्यात् । उन्नाबद्गृति नवकः । त्वठं॰ होति सप्तकः । तेनाध्वरपूर्तिः, अस्य दृष्ट्वस्य चतुर्यागे नेष्टुर्याज्यात्वेन विनियोगः ॥

तवायमैन्द्रो त्रिष्टुभं विश्वामित्रः ॥

तवायमितीमामिन्द्रदेवतां त्रिष्टुभं विश्वामित्रोऽपश्यत् । माध्यंदिने सवने नेष्टृचमसयागे याज्या । तवायं । द्वौ व्यूहौ । एतस्मिन्दृशे व्यूहः ॥

अमेव नो जगती गृत्समदः ॥

अमेव महतीमामृचं जगतीं गृत्समदोऽपश्यत् । लिङ्गादियं त्वष्टृदेवत्या । तृतीयसवने नेष्टृचमसयागे याज्या ॥

स्वादिष्ठया मधुच्छन्दाः सौम्यौ ॥

स्वादिष्ठया, रक्षोहा विश्वचर्षणिरितीमे ऋचौ सोमदेवत्ये मधुच्छन्दा ऋषिरपश्यत् । अनयोर्गायत्रीछन्दः ॥

अनुक्तानां गायत्रम् ॥

स्वादिष्ठया, रक्षोहा । उपह्वरे । अभियज्ञं । द्रविणोदा इत्यादीनामनुक्तानामनुक्तछन्दस्कानां गायत्रंछन्दो ज्ञेयं । अनेनैव सर्वत्र सिद्धे विद्रुणीमसैन्द्र्यौ गायत्र्यौ, अग्निऋषिरा्ग्नेयी गायत्रीमित्यादौ गायत्रीग्रहणं पुनरुक्तमेव ॥ ७ ॥

समास्त्वाऽऽग्निकोऽध्यायः प्रजापतेरार्षम् ॥

समास्त्वाग्नऽऋतवऽइत्ययमाग्निकोऽध्यायः अग्निरिष्टकाचित पञ्चचितिकः स्थलः । अग्नेः सम्बन्धी आग्निकः । प्रजापतिरार्षं । प्रजापतिरस्याध्यायस्य ऋषिरित्यर्थः । एतच्चपुनरुक्तं । आग्निकत्वेनैवास्यार्थस्य सिद्धेः । अथाग्निं प्रजापतिरपश्यदिति व्यवहितत्वेन तथैव स्मरणार्थमिति न दोषः ॥

सामिधेन्यो नवाग्नेय्यस्त्रिष्टुभोऽग्निना दृष्टाः ॥

अस्मिन्नध्याये समास्त्वाग्नइत्याद्या नव ऋचोऽग्निदैवत्यास्त्रिष्टुभोऽग्निना ऋषिणा दृष्टाः । अग्निं प्रजात्य स एता अपश्यत्, समास्त्वाऽग्नऽऋतवो वर्द्धयन्त्विति । तथा ता आग्नेय्यः प्राजापत्या "यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतीꣳ समैधत तेन प्राजापत्याइति च श्रुतेः" । इष्टकापक्षे समिध्यमानसमिद्धत्योरन्तराले चासां विनियोगः ॥

अग्निर्ऋषिः कर्माङ्गभूतमग्निं स्तौति ॥

अत्राध्याये प्राक्पौर्वोऽग्नारपिहवइत्येतस्मात् । ऋषिरग्निः कर्माङ्गभूतमग्निं स्तौति ॥

ऊर्ध्वा द्वादशर्चमाप्रियमौष्णिहं विषमपदं प्राजापत्यमाग्नेयमग्निरपश्यत् ॥

ऊर्ध्वाऽअस्येत्येतद्द्वादशर्चं चापीसञ्ज्ञं उष्णिक्छन्दस्कं विषमपदं प्राजापतिदेवतमाग्निदेवतं चाग्निर्ऋषिरपश्यत् । विषमाऽनियताक्षराः पादा यस्य तद्विषमपदं । द्वादशाप्रिय इति स एता अपश्यद्ददर्शाऽस्य समिधो भवन्ति । तथा ता आग्नेय्यः प्राजापत्या यदग्निरपश्यत्तेनाग्नेय्यो यत्प्रजापतिनाप्रीणात्तेन प्राजापत्यास्ताविषमा विषमपदा विषमाक्षरा, "विषमाणि हि छन्दाꣳसीति श्रुतेः" इष्टकापक्षे प्रयाजयाज्या एताः । तत्त्वाग्नेयं चेत्कथं प्राजापत्यमित्यत आह ॥

अग्निर्हि प्रजापतित्वेन संस्तूयते तेन प्राजापत्यम् ॥

हि यतः कारणादग्निरत्र प्रजापतित्वेन प्रजापतिरूपेण संस्तूयते । तेनैतद्द्वादशर्चं प्राजापत्यं । "प्रजापतिरग्निरित्यादिश्रुतेः" । अत्र स्वेगये द्वौ व्यूहौ, मा त्वा, निम्नमवग्नुपसत्ता द्वादशके । तथापीयं त्रिष्टुबेव न जगती । कुतः । द्वौ तु जागतौ यस्याः सा जागती, "द्वौ-ज्जागते जगती चेत्त्रिष्टुभे त्रिष्टुबिति श्रुतेः" । अग्ने पाग्ने, सजातानां, द्वाद

शकः । अतिनिचृोऽष्टकः । अत्यर्चिति । व्यूह, विश्वाह्वाने व्यूहः । अनाधृष्य, अत्र द्वितीयएकादशकः, अन्ये द्वादशकाः, बृहस्पते द्वादशकः । ऊर्ध्वा इत्यत्र तु विषमाक्षरत्वं विषमपदत्वं चाशमेव ॥

पीवोऽअन्ना द्वे वायव्यत्रिष्टुभौ वसिष्ठः ॥ (१)

पीवोऽअन्नारयिवृध, राये नु, इत्येते द्वे वायुदेवते त्रिष्टुभौ वसिष्ठऋषिरपश्यत् । अथैतं वायवे नियुत्वते शुक्लं तूपरमालभते इत्यस्य पशोः, पीवोऽअन्नारयिवृधइत्याद्याः षड्याज्याऽनुवाक्या वपापुरोडाशपशूनां क्रमेण भवन्तीति संहिताभाष्ये, विश्वेश्वर, व्यूहः ॥

आपो ह द्वे प्राजापत्ये हिरण्यगर्भः प्राजापत्यः ॥ (२)

त्रिष्टुभावित्यनुवर्त्तते । आपो ह,यश्चिदापइतीमे द्वे ऋचौ प्रजापतिदेवते त्रिष्टुभौ, प्रजापतेरपत्यं हिरण्यगर्भऋषिरपश्यत । ततो देवानां । त्रयोदशकः तेन द्व्यधिका ॥

प्रयाभिर्द्वे वायव्ये वसिष्ठः ॥ (३)

त्रिष्टुभावित्यनुवर्तते प्रयाभिर्यासि । आनो नियुद्भिरितीमे द्वे ऋचौ वायव्ये वायुदेवत्ये त्रिष्टुभौ वसिष्ठऋषिरपश्यत् । प्रयाभिः, निवीर । व्यूहः । आनो द्वादशकः । यूयं पात । व्यूहः ॥

नियुत्वान्वायव्याः षट् ॥

नियुत्वान्वायवागहीत्याद्याः षडृचो वायुदेवताः ॥

वायो शुक्रोऽनुष्टुप् ॥

---

(१) काण्वसर्वानुक्रमे वायव्यपदमत्रसूत्रे नास्ति । एतदग्रे वायुरग्रेगा गायत्री ति काण्वसर्वानुक्रमे पाठो बोध्यः ॥

(२) प्रयाभिर्वसिष्ठास्त्रिष्टुभमिति काण्वसर्वानुक्रमपाठः । एतदग्रे वायो ये गायत्रीतीदं सूत्रं, एतदग्रे सूत्रचतुष्टयं नास्ति तदग्रे एकया चेदं सूत्रमस्तीति बोध्यम् ॥

(३) वायो शुक्रोऽनुष्टुभं पुरुमाढाजमीढावन्त्यास्त्रिष्टुभमाजमीढमिति पाठः काण्वसर्वानुक्रमीयो बोध्यः ॥

आसां षसां मध्ये याशो शुक्रङ्गत्यनुष्टुप् ॥

एकया च त्रिष्टुप् ॥

एकया च दशभिश्चेत्येषा त्रिष्टुप् । द्वाभ्यामिष्टये द्वे व्यूहौ द्व्यूनता वा । अन्या गायत्र्यः । अन्त्यास्तिस्रो नियुत्वायो, वायुरग्रेगा । वायो येते । तव वायो ॥

नियुत्त्वान्वायो गायत्रीं गृत्समदः ॥

नियुत्त्वान्वायो । वायोशुक्रःइतीमे ऋचो गृत्समदऋषिरपश्यत् ॥

वायो शुक्रः पुरुमीढाजमीढौ ॥ (१)

वायो शुक्रइतीमामृचं पुरुमीढाजमीढावृषी अपश्यताम् ॥

तव वायो व्यश्व आङ्गिरसः ॥ (१)

तव वायो इतीमामृचं अङ्गिरसोपत्यं व्यश्वऋषिरपश्यत् । अस्य षडृचस्य वायव्येऽष्टकापशुपत्ने वपादीनां याज्यानुवाक्यात्वेन विनियोगः ॥

अभित्वा वसिष्ठऐन्द्रं प्रगाथम् ॥ (२)

अभित्वा शूर नोनुमइतीमं प्रगाथं इन्द्रदेवतं वसिष्ठऋषिरपश्यत् ॥

प्रथमा बृहती द्वितीया सतोबृहती ॥

तत्र प्रगाथे. प्रथमा, अभित्वेत्येषा बृहती । द्वितीया, न त्वावानित्येषा सतोबृहती । एनयोर्लक्षणमेताभ्यां बृहतीत्रयसम्पादनप्रकारः प्रागुक्तः, तत्र पूर्वा बृहती सतोबृहत्युत्तरा ताभ्यां तिस्रो बृहत्यः सम्पा-

---

(१) गायत्र्यः सर्वा वायव्या, हिरण्यगर्भोऽनुवाकः प्रतीकोक्तो, ऐन्द्रौ: पञ्चानुष्टुभः, आद्ये द्वे हिरण्यगर्भ, आपो ह ति्स्रः प्राजापत्या. कद्देवत्याः प्रजापते न प्राजापत्या त्रिष्टुप् । इत्यधिकः पाठः काण्वसर्वानुक्रमे बोध्यः ॥

(२) अभित्वा द्व्यृच वसिष्ठः काण्वपाठ. ॥

दिना इत्यत्र । ईशानमस्य । व्यूहः । नत्वावान् व्यूहः ॥

त्वामिद्देवर्ठ॰ शंयुर्बार्हस्पत्यः ॥

त्वामिद्धि इत्याद्यामृचमिन्द्रदेवतां बृहतीं शंयुरपश्यत् । तत्र ऋग्द्वये प्रथमा त्वामिद्, द्वितीयं बृहती द्वितीया, स त्वं नश्चित्र, इत्येषा सतोबृहती । बृहतीसतोबृहतीभ्यां बृहतीत्रयसंपादनं च पूर्वं विस्तरेणोक्तमिति नेह पुनरुच्यते । अत्र त्वामिद्धि, त्वांवृत्रेषु व्यूहः । त्वां काष्ठासु द्वौ व्यूहौ, गामश्वं द्वौ व्यूहौ, "अग्नौ अथेनर्ठ॰ सामभिः परिगायतीत्यध्वर्योः सामगानं विहितं माध्वर्योर्गायेदिति च" । तेनात्र तेषां साम्नां योनिभूताऋचो यजुर्वेदे पठ्यन्ते । अभिता द्वे रथन्तरस्य योनी । "रथन्तरं दक्षिणे पक्षे इति श्रुतेः" । त्वामिद्धीति द्वे बृहतः । "बृहदुत्तरे पक्षे इति श्रुतेः"। कया नइति तिस्रो वामदेव्यस्य योनयः "वामदेव्यमात्मन्निति श्रुतेः" । यज्ञायज्ञा वः, ऊर्जो नपातं, इति द्वे यज्ञायज्ञियस्य । यज्ञायज्ञियं पुच्छइति हि श्रूयते । एते यानि संवत्सरदीक्षे संवत्सरसुत्येव । अन्यस्मिन्पक्षे "ऋतुष्टा यज्ञायज्ञायं गेयमिति शाट्यायनः" । "अथ प्रजापतेर्हृदयं गायतीत्येनं तु अनृचं गीयते प्रजापतेर्हृदयमनृचं गायतीति ब्राह्मणान्तरात् ॥

कया नऽऐन्द्रं तृचं गायत्रं वामदेवोऽन्त्या तु पादनिचृत् ॥

कया नश्चित्रऽआभुवदित्येतत्तृचं इन्द्रदेवतं गायत्रीछन्दस्कं वामदेवऋषिरपश्यत् । तु पुनः । अस्मिन्तृचे अन्त्या अभीषुणइत्येषा पादनिचृद्गायत्री अस्यां हि त्रयः पादाः सप्ताक्षराः । पादनिचृदुच्यते । त्रयः सप्तकाः पादा निचृदित्युक्तेः, कस्त्वा व्यूहः ॥

यज्ञायज्ञा वऽऊर्ज्जो नपातर्ठ॰ शंयुः ॥

यज्ञायज्ञाव, ऊर्जोनपातमित्येतद्दृग्द्वयं शंयुऋषिरपश्यत् ॥

प्राङ्गिनो गर्भः प्रगाथः ॥

पाहि नोऽग्न इत्येषा, गर्भे मध्ये यस्य प्रगाथस्य स पाहि नो गर्भः ॥

एतत्तृचं प्रगाथमाग्नेयो ।

एतत्पूर्वोक्तं तृचं ऋक्त्रयात्मकं प्रगाथमाग्नेयमग्निदेवतम् ॥

द्वे बृहत्यौ ॥

अत्र तृचे यज्ञायज्ञा वः, पाहि नो अग्न इतीमे द्वे बृहत्यौ । पाद्यन्त व्यूहः । पाहि गीर्भिरेकादशकः ॥

तृतीया सतोबृहती ॥

अत्र तृतीया ऊर्जोनपातमित्येषा सतोबृहती । भुवद्वाजेषु व्यूहः । उत त्राता समकः ॥

सँव्वत्सरोऽस्याग्नेयम् ॥ (१)

सँव्वत्सरोऽसी त्येतद्यजुरग्निदेवतं । अत्र नवनवत्यक्षराणि एको व्यूहः । तेन शताक्षराभिकृतिरियं, अग्नेरभिमर्शने विनियोगः ॥ ६ ॥

इन्द्रमिड: सौत्रामणिकोऽध्यायः ॥

होता यक्षत्समिधेन्द्रमिड इत्ययमध्यायः सौत्रामणिकः सौत्रामण्या अयं सौत्रामणिकः । सौत्रामण्यङ्गभूतयोरैन्द्रवायोधसयोराप्त्यपश्वोः प्रयाजानुयाजप्रैषरूप इत्यर्थः । तत्राप्यस्य सौत्रामणीप्रजापतेरार्षमश्विनोः सरस्वत्याश्चेत्येतदध्यायस्यऋषयः ॥

एकादशप्रयाजप्रैषा ऐन्द्राण्याप्रीर्देवता (२) पाद्यानुवाके ॥

अस्याध्यायस्यादौ प्रथमेऽनुवाके एकादशऐन्द्रा ऐन्द्रपश्वोः सम्बन्धि-

---

(१) अत्रसूत्रचतुष्टयाग्रे पूर्ववदाग्नेयर्ठ० सँव्वत्सरोऽस्याग्नेयर्ठ० शताक्षराभिकृती-त्यधिकः काण्वसर्वानुक्रमे पाठो बोध्यः ॥

(२) देवत्याइति काण्वसर्वानुक्रमपाठः ॥

न: आप्रीदेवताः, समिन्तनूनपादित्यादिदेवताकाः, प्रयाजानां प्रैषाः, होता यक्षत्समिधेन्द्रमिडस्पद इत्यत आरभ्य होता यक्षदिन्द्रमित्यन्ताः, तत्र समिधेन्द्रं। व्यूहः। आर्षीत्रिष्टुप्। तनूनपातं व्यूहः। अतिजगती। इडाभिरिन्द्रं। ब्राह्मीउष्णिक्। बर्हिषीन्द्रं। आर्षीत्रिष्टुप्। ओजो न। व्यूहः। अतीजगती। उषेऽइन्द्रस्य। आर्षीत्रिष्टुप्। दैव्या होतारा, अतिजगती। तिस्रोदेवी, व्यूहः। ब्राह्मी अनुष्टुप्। त्वष्टारमिन्द्रं। व्यूहौ,अतिजगती। वनस्पतिम्। द्वौ व्यूहौ।। शक्करी। होता यक्षदिन्द्रं। व्यूहः, शक्करी॥

देवं बर्हिरनुयाजप्रैषा ऐन्द्राएकादशैव॥

देवं बर्हिरित्यादयएकादशैन्द्रा,ऐन्द्रपशोः सम्बन्धिनएवानुयाजप्रैषाः। एवकारो भिन्नक्रमः। ऐन्द्र एवेति। देवतास्तु बर्हिरादयएव। तत्र देवं बर्हिः। व्यूहः। अतिजगती। देवीर्द्वारः, एकाधिकाशक्करी, अथवा त्रयो व्यूहाः, अतिशक्करीति। देवी उषासा। ब्राह्मीउष्णिक्। देवी जोष्ट्री। एकाधिकाऽतिजगती। ऊर्जाहुती त्रयो व्यूहाः। विकृतिः, देवा दैव्या। त्रयो व्यूहाः। अतिजगती। एकाधिकाजगती वा। देवीस्तिस्रः। अतिजगती। देवऽइन्द्रः। कृतिः, देवो देवैः, व्यूहः। अतिशक्करी। देवं बर्हिः। आर्षीत्रिष्टुप्। देवोऽग्निः व्यूहः। आर्षीत्रिष्टुप॥

अग्निमद्येन्द्रः सूक्तवाकप्रैषः॥

अग्निमद्येत्ययमैन्द्रऐन्द्रपशुसम्बन्धसूक्तवाकप्रैषः॥

त्वामद्य प्रतीकउभयत्रापि॥

त्वामद्य ऽऋषइत्ययं मन्त्रः। उभयत्रापि ऐन्द्रानुवाके वायोधसानुवाके च प्रतीकः प्रतीकोक्तः, आदिमात्रेणोपात्तः सकलो ज्ञेयः। अथवा सूक्तवाकप्रैषइत्यस्य विशेषणम्, कीदृशः सूक्तवाकप्रैषः।

त्वामद्य प्रतीकः । त्वामद्येति प्रतीकं यस्मिंस्तथा । न केवलमस्य । किंतु उभयस्य । उभयोरैन्द्रवायोधसानुवाक्ययोरयं,त्वामद्य प्रतीकएव । अग्निमद्य एकाधिका प्राजापत्याजगती, सूपस्थाः । ब्राह्मीउष्णिक् । त्वामद्यएकाधिका विकृतिः । अथवाऽग्निमद्येत्यतआरभ्य सूक्ता ब्रूहीत्यन्तः प्रैषं एकं यजुः, तदाऽनियताक्षरत्वाच्छन्दोनास्ति॥

समिधानं मद्द्वायोधसऽआप्रियएकादशप्रयाजप्रैषाः ॥

होता यक्षत्समिधानं महदित्याद्या एकादशसंख्या वायोधसपशौ प्रयाजानां प्रैषाः, आप्रियइत्याप्रीदेवता समित्तनूनपादादिदेवताइत्यर्थः ॥

तथैव देवं बर्हिरनुयाजप्रैषाः ॥

तथैव वायोधसपशावेव देवं बर्हिर्वयोधसमित्याद्या एकादशानुयाजानां प्रैषाः, बर्हिरादिदेवताः ॥

अग्निमद्य वायोधसः सूक्तवाकप्रैषः ॥

वयोधसः अयं वायोधसः । अग्निमद्येत्ययं वायोधसस्य पशोः सूक्तवाकप्रैषइत्यर्थः । वयोधसा देवतया तत्सम्बन्धिकर्म लक्ष्यते, वायोधसइति षष्ठ्येकवचनं पूर्वसूत्रे तु सप्तम्येकवचनं । अथानयोरनुवाक्ययोश्छन्दांस्युच्यन्ते । होता यक्षत्समिधानं । द्वे व्यूहे । अतिजगती । तनूनपातं । एकाधिकातिजगती, ईडेन्यम् । व्यूहः । शक्वरी । सुबर्हिषं द्वौ व्यूहौ । शक्वरी, व्यचस्वतीः । द्वौ व्यूहौ अतिशक्वरी । सुपेशसा व्यूहः । अतिशक्वरी । प्रचेतसा । एकाधिका शक्वरी । पेशस्वती । एकाधिकाशक्वरी । सुरेतसं त्वष्टारं । एकाधिकाशक्वरी । वनस्पतिं, व्यूहः । अष्टिः, स्वाहाकृतीः । अतिशक्वरीः । देवं बर्हिः, देवीर्द्वारः । एकाधिके आर्ष्यौ त्रिष्टुभौ । उषासानक्ता । जोष्ट्री । ऊर्ज-

हः । आह्न्यौ बृहत्यौ । उजांहुती, व्यूहः । अक्षरी । देवा देव्या । अतिजगती । देवीस्तिस्रः । एकाधिकाब्राह्मी अनुष्टुप् । देवो नराशंसः । व्यूह, अतिजगती । देवो वनस्पतिः, व्यूहः अतीजगती । देवं बर्हिः, ब्राह्मी बृहती । देवोऽग्निः, ब्राह्मी बृहती । अग्निमद्य । एकाधिकाब्राह्मीगायत्री । सूपस्थाः द्वौ व्यूहौ । ब्राह्मीअनुष्टुप् त्वामद्य । एकाधिकाविकृतिः ॥ १० ॥

समिद्धोऽग्रजन्नाश्वमेधिकोऽध्यायः ॥

समिद्धोऽअंजन्कृदरमित्ययमध्याय आश्वमेधिकः अश्वमेधसंबन्धीत्यर्थः । ततश्च प्रजापतिरेवाश्वऋषिः, ननु तत्रिंशत्तुरोऽध्याय अप्रजापतिरपश्यदिति, चतुर्णामेवाध्यायानां, प्रजापतिऋषिरुक्तः । तत्कथमस्य प्रजापतिऋषिः । उच्यते । "प्रजापतिरकामयत सर्वान्कामानाप्नुयां सर्वा व्यष्टीर्व्यश्नुवीयेति स एतमश्वमेधं त्रिरात्रं यज्ञक्रतुमपश्यदिति श्रुतेः" । प्रतिपादितः साधारणः प्रजापतिऋषिरत्रापि भवत्येवेति ॥

आद्या आग्नेयस्त्रिष्टुभएकादशाश्वस्तुतीर्बृहदुक्थो वामदेव्यो ददर्शाश्वो वा सामुद्रिः ॥

आद्याः प्रथमा एकादशऋचस्त्रिष्टुभआग्नेयाः अश्वस्तुतिरूपा वामदेवपुत्रो बृहदुक्थो ददर्श । अथवा सामुद्रिः समुद्रपुत्रोऽश्वऋषिः एताएकादशर्चो ददर्श, ताश्चाग्नेयीसंज्ञकाश्चकथिताः "समिद्धोऽअंजन्कृदरम्मतीनामितिवाहंदुक्थी भरापीणयाद्बृहदुक्थो ह वै वामदेव्योऽश्वो वा सामुद्रिरश्वस्याग्नीददर्शेतिश्रुतेः" । समिद्धनूनपादिडादयः आसां देवताः प्रजानन्वाजी द्वौ व्यूहौ । ईड्यश्च, आशुश्च । द्वौ व्यूहौ । अश्वो घृतेन । व्यूहः ॥

यदक्रन्दस्त्रयोदशाश्वस्तुतिस्त्रिष्टुभो भार्गवो जमद-

ग्निर्ददर्श दीर्घतमाश्च ॥(१)

यद्क्रन्दः प्रथममित्याद्यास्त्रयोदश ऋचः । अश्वस्तुतिरूपास्त्रिष्टुभो भृगोरपत्यं जमदग्निर्ऋषिर्दीर्घतमाश्च ददर्श दृष्टवान् । यमेन दत्तं । द्वादशकः । असि यम. । असि त्रितः । व्यूहः । शीर्षण्वद्वौ व्यूहौ । उतेवमे । अनुगावः । अनुदेवाः । हिरण्यशृङ्गो । यदाक्रिषुः । तव शरीरं । उपप्रागाच्छसनं । देवद्रीचा, अथाशास्ते । एतेषु व्यूहः । होतुरश्वाभिषवे एतासां विनियोगः ॥

समिद्धोऽद्य द्वादशाप्रीस्त्रिष्टुभो जमदग्निः ॥

समिद्धोऽद्यमनुष इत्याद्या द्वादशर्चश्चाप्रीसंज्ञास्त्रिष्टुभो जमदग्निर्ऋषिरपश्यत् । ददर्श "जमदग्निभिरेव आप्रीणीयादिति श्रुतेः" । समित्तनूनपान्नराशंसो देवता । त्वष्टा कविः । दैव्या च, आजुह्वानः । आयाह्यग्ने । त्वं देवानां । सऽएनान् । एतेषु व्यूहः । देवेभ्योऽदितये । द्वौ व्यूहौ । देवेभ्यो भवत । तिस्रो देवीः, सरस्वती । उपावसृज । सद्योजातः ॥ १२ ॥

केतुं कृण्वन्नाग्नेयीमनिरुक्तां गायत्रीं मधुच्छन्दाः ।

केतुं कृण्वन्नितीमामृचमग्निदेवतां गायत्रीं, मधुच्छन्दा ऋषिरपश्यत् ॥

जीमूतस्येव पायुर्भारद्वाजः संग्रामाङ्गान्यस्तौषीत् ॥(२)

भारद्वाजो भरद्वाजस्य पुत्रः पायुर्ऋषिः, जीमूतस्येव भवतीत्यादिभिः ऋक्शः एकैकया ऋचा वक्ष्यमाणानि संनाहादीनि संग्रामाङ्गानि अस्तौषीत्स्तुतवान् । एकैया ऋचा यथाक्रमं एकैकं क

(१) अत्रारभ्य सूत्रद्वयं काण्वसर्वानुक्रमे नास्तीति बोध्यः ॥

(२) अत्र काण्वसर्वानुक्रमे जीमूतस्येवेत्यारभ्य क्रमात्द्वस्याधिकः पाठो बोध्यः ॥

सङ्ग्रामाङ्गं स्तुतवानित्यर्थः। तत्कृतः सङ्ग्रामे कवचनाच, बीभत्सायामिति ग्रस्। अतएवामी संनाहादीनि संग्रामाङ्गान्येव देवता: "स्तुतिभाजां देवताभवन्तीति वेदवचनात्" । तान्येव संग्रामाङ्गानि क्रमेणाह ॥

सन्नाहम् ॥

जीमूतस्येत्यनया त्रिष्टुभा सन्नाहमस्तौषीत् । अनाविद्धया व्यूढः ॥

कार्मुकम् ॥(१)

धन्वनेत्यनया कार्मुकं । धनुरस्तौषीत् ॥

गुणम् ॥

वक्ष्यन्तीत्यनया धनुषो गुणं ज्यां प्रत्यञ्चामस्तौषीत् । ज्याऽऽयं व्यूहः ॥

आर्त्नी ॥(२)

तेऽयाचरन्तीत्यनया आर्त्नी धनुः कोटी अस्तौषीत् ॥

तूणम् ॥(३)

बह्वीनामित्यनया तूणं इषुधिं अस्तौषीत् ॥

जगत्यर्द्धेन सारथिमर्द्धेन रश्मीन् ॥(४)

रथे तिष्ठन्नित्यस्या जगत्या जगतीछन्दस्काया अर्द्धेन सारथिं अ

(१) अत्र धनुः पदं काण्वसर्वानुक्रमेऽस्ति ॥

(२) इत्यधिकं एतत्सूत्राग्रे काण्वपाठः ॥

(३) एतत्सूत्राग्रे इषुधिमानि काण्वपाठः ॥

(४) ततो जगत्यर्द्धेन सारथिमुत्तरार्द्धेन रश्मीनतोऽनुष्टुभा कशामन्त्यया दुन्दुभिं यथामन्त्रलिङ्गमनकच्छन्दस्काः सप्तास्त्रिष्टुभः, यदक्रन्दस्त्रयोदशास्वसनुष्टुभौ त्रिष्टुभौ भार्गवजमदग्निर्ददर्श दीर्घतमाश्च, समिद्धोऽअद्य द्वादशाप्रीस्त्रिष्टुभो जमदग्निरग्ने गायत्र्यावेकादशाहं विषमेन्द्र इन्द्रदेवता, आग्नेयः कृष्णग्रीव इत्याद्याऽएकादशाग्न्योऽध्यो पशुदेवताब्राह्मणेनाभिधीयन्ते । अध्यायद्वयमस्राजराऽऽइत्यध्यायस्याग्रे वक्ष्यति काण्वसर्वानुक्रमकारः ॥

स्तौषीत् । द्वितीयेनार्द्धेन अभीशूनामित्यनेन रश्मीनस्तौषीत् ॥

हरीन् ॥

तीव्रान्घोषानित्यया हरीनश्वानस्तौषीत् ॥

रथम् ॥

रथवाहणमित्यनया रथमस्तौषीत् ॥

रथगोपायितॄन् ॥

स्वादुषंसद इत्यनया रथगोपायितॄनस्तौषीत् ॥

जगत्या लिङ्गोक्तदेवताः ॥

ब्राह्मणासः पितर इत्यस्या जगतीछन्दस्काया लिङ्गोक्ता ब्राह्मणादयो देवता, ब्राह्मणासः पितर इति व्यूहेनैकादशकः । तेनैकोना ॥

द्वाभ्यां त्रिष्टुबनुष्टुभ्यामिषुम् ॥

सुपर्णं वस्ते, ऋजीते परीत्याभ्यां द्वाभ्यां यथाक्रमं त्रिष्टुबनुष्टुभ्यामिषुमस्तौषीत् ॥

अनुष्टुभा कशाम् ॥

आजङ्घन्तीत्यनयानुष्टुप्छन्दस्कया कशामश्वाजनीमस्तौषीत् । अश्वानां भयप्रकाशनार्थां कशेत्युच्यते । आजङ्घन्ती व्यूह ॥

ततो हस्तघ्नम् ॥

ततोऽनन्तरं अहिरिवेत्यनया हस्तघ्नमस्तौषीत् । याज्याहेतिं । व्यूहः । पुमान्पुमांसं द्वादशकः ॥

ततस्तृचौ रथदुन्दुभिदेवत्यौ ॥

ततोऽनन्तरं यथाक्रमं रथदुन्दुभिदेवत्यौ तृचौ, वनस्पते वीड्वङ्गः । दिवः पृथिव्याः, इन्द्रस्य वज्र इत्ययं तृचो रथदेवत्यः । उपश्वासय, आक्रन्दय, आमूरज इत्ययं तृचो दुन्दुभिदेवत्यः ॥

ऐन्द्रोऽर्द्धर्चोऽन्त्यः ॥

अन्ते भवोऽन्त्यः, सम्यक्षपर्यावर्तीत्ययमर्द्धर्च ऐन्द्रं इन्द्रदैवतः । वनस्पते वीड्वङ्गः । आख्याता व्यूह । अपामोष्मानं । द्वौ नागतौ । वेमानः । व्यूहः । पुरुषा ते, द्वादशकः । अपप्रोथ द्वादशकः, आमूरज, वीतुमत् । व्यूहः ॥

सर्वास्त्रिष्टुभोऽनुक्ताः ॥

जीमूतस्येवेत्यादीनां या अनुक्तछन्दस्का ऋचस्ताः सर्वास्त्रिष्टुभो ज्ञेयाः । रथे तिष्ठन्, ब्राह्मणासः, सुपर्णं वस्ते, ऋजीते परि, आजघ्नन्तीत्येताभ्योऽन्याः सर्वा अनुक्तछन्दस्का वर्तते ताः सर्वास्त्रिष्टुभ इत्यर्थः ॥

आग्नेयः कृष्णग्रीव इत्याद्या एकादशिन्योर्द्वयोः पशुदेवताः ॥(१)

अश्वमेधे श्रूयते । "द्वे त्वेवैते एकादशिन्या आलभेतेति" तयोर्द्वयोरेकादशिन्योः, आग्नेयः कृष्णग्रीवः सारस्वतीमेषीत्याद्यः पशुदेवताः पश्वादेवताश्चेत्यर्थः । उभयेषामप्युक्तत्वात् । तेनेमानि ब्राह्मणवाक्यानि द्रव्यदेवताविधायकानि न तु मन्त्राः ॥

अग्नये गायत्र्यायेति दश हविषो वेष्टेर्देवता ॥

अग्नौ श्रूयते । "अथाग्नीषोमीयस्य पशुपुरोडाशमनु दिशामवेष्टीर्निर्वपतीत्युपक्रम्य तदाहुर्दशहविषमेवैतामिष्टिं निर्वपेत् सर्वस्तोमा सर्वपृष्ठा सर्वाणि छन्दांसि सर्वा दिशः सर्व ऋतवः सर्वमेवैतद्यमग्निरिति" । अस्या दशहविष्काया अवेष्टेरग्नये गायत्र्यायेत्येता दश देवता । हवींष्यत्रावोक्तानि । तेन देवताप्रकरण हविष्यमप्युपलक्षणा-

(१) एतत्सूत्रादिमे, ब्राह्मणनामाधायन्ते । इति काण्वसर्वानुक्रमपाठः । एतदग्रे ऽध्यायत्रितयस्य काण्वसर्वानुक्रमे ऋषिदैवतसूत्राणि न सन्ति अध्यायत्रितयं विहाय अस्याजरासइत्यध्यायस्य सूत्रमकरवाणज्जाग्रतइत्यस्य चोक्त्वाऽनन्तरमध्यायत्रितयस्य सर्वानुक्रमसूत्रमुक्तं काण्वसर्वानुक्रमे पूर्वापराभावेनेति बोध्यम् ॥

र्थं । अष्टर्चोऽपि देवतायाचना इत्यर्थः । द्रव्यदेवताविधायकानि ब्राह्मणवाक्यानि न तु मन्त्राः ॥ १२ ॥

देव सवितर्द्वावध्यायौ पुरुषमेधो नारायणः पुरुषो ददर्श ॥

अथ पुरुषमेध उच्यते । देव सवित, सहस्रशीर्षा एतौ द्वावध्यायौ नारायणपुरुषो ददर्श दृष्टवान् । "पुरुषो ह नारायणोऽकामयतेत्युपक्रम्य, स एतं पुरुषमेधं पञ्चरात्रं यज्ञक्रतुमपश्यत्" । तत्र देव सवितः, तत्सवितुरित्यनयोः सर्वं प्रागुक्तं । अवाप्याहुतिहोमे विनियोगः ॥

विश्वानि देव गायत्रीं सावित्रीं श्यावाश्वः ॥

विश्वानि देव सवितरितीमां गायत्रीछन्दस्कां सवितृदेवत्यां श्यावाश्वऋषिरपश्यत् । देव सवितरित्यादीनां तिसृणामृचां अतिरात्रसंस्थे मध्यमेऽहनि पश्वाकरणात्पूर्वमाहुतिहोमे विनियोगः ॥

विभक्तारं मेधातिथिः सावित्रीम् ॥

गायत्रीमित्यनुवर्तते, । विभक्तारं हवामहइतीमामृचं मेधातिथिऋषिरपश्यत् ॥

ब्रह्मणे ब्राह्मणमिति द्वे कण्डिके तपसेऽनुवाकश्च ब्राह्मणम् ॥

ब्रह्मणे ब्राह्मणं नृत्ताय सूतमितीमे द्वे कण्डिके, तपसे कौलालमित्ययमध्यायसमाप्तिपर्यन्तोऽनुवाकश्च द्रव्यदेवताविधायकं ब्राह्मणमेतत् । न तु मन्त्राः । द्रव्यदेवतासम्बन्धविधायकवाक्यान्येतानीत्यर्थः ॥ १३ ॥

सहस्रशीर्षा षोडशर्चमानुष्टुभं त्रिष्टुबन्त्यं पुरुषो जगद्बीजमस्य देवता ॥

सहस्रशीर्षा पुरुषइत्यादि षोडशर्चमानुष्टुभं अनुष्टुप्छन्दस्कं । त्रिष्टुबन्त्यं । त्रिष्टुबन्त्या षोडशी यस्य तत्त्रिष्टुबन्त्यं । जगद्बीजं जगतः कारणभूतः पुरुषोऽस्य षोडशर्चस्य देवता ब्राह्मणे नियुक्ताभ्यां यजमानमभिषवे विनियोगोऽस्य । अत्र पुरुषएव, यद्भूतं । व्यूहः । त्रिपादूर्ध्वं नवकः । ततोविष्वङ् व्यूहः । सम्भृतम् । आरण्याः । ये केच । साध्याः सन्ति । यत्पुरुषम् । कतिधा । एतेषु व्यूहः । मुखं नवकः, बाहू । वसन्तोऽस्य । तानि धर्माणि । यत्र पूर्वे । एतेषु व्यूहः ॥

अद्भ्यः षडृचउत्तरनारायणो मन्त्रः ॥

अद्भ्यः सम्भृतइत्यादिः षडृचः । ऋक्षट्कात्मकउत्तरनारायणसञ्ज्ञो मन्त्रः । अस्य षडृचस्यादित्योपस्थाने विनियोगः, अतएवादित्यो देवता । सञ्ज्ञाकरणमुत्तरनारायणेनादित्यमुपस्थायेत्यादौ व्यवहारार्थम् ॥

आद्यास्तिस्रस्त्रिष्टुभः ॥

अस्मिन्षडृचे आद्यास्तिस्रस्त्रिष्टुभ, अद्भ्यः सम्भृतः, वेदाहमेतं प्रजापतिश्चरति । एतास्तिस्रऋचस्त्रिष्टुप्छन्दस्काः । तमसस्त्वं । द्वादशकः । नान्यः पन्थाः । व्यूहः । अजायमानो द्वादशकः ॥

द्वे अनुष्टुभौ ॥

अस्मिन्षडृचे चतुर्थीपञ्चम्यौ यो देवेभ्यो, रुचं ब्राह्ममितीमे अनुष्टुभौ ॥

अन्त्या त्रिष्टुप् ॥

अन्त्या श्रीश्च तइत्येषा त्रिष्टुप् । द्वौ तु जागतौ यस्या इतीयं त्रिष्टुप् । व्यूहः ॥ १४ ॥

तदेव सर्वमेधोऽध्यायआत्मदैवतः सप्तमेऽहनि सर्वहोमे विनियुक्तः ॥

तदेवाग्निरित्यध्यायः सर्वमेधसम्बन्धी श्याम्‌देवतः सप्तर्षिदृष्ट-स्त्रयोविंशत्यृचकः स्वयं जुहोतीत्यध्याये विनियुक्तः ॥

सर्वमेधं ब्रह्मस्वयमवैक्षत तदीयं मन्त्रगणं प्रवायुमच्छेत्येतस्मात् ॥

स्वयं तु ब्रह्म सर्वमेधं प्रवायुमच्छेत्येतस्मात्प्राक् तदीयं मन्त्रगणं च ऐक्षत ददर्श ॥

आद्ये द्वे अनुष्टुभौ ॥

तदेव, सर्वं निमेषा इत्येते द्वे आद्ये ऋचावनुष्टुभौ ॥

न तस्य द्विपदा गायत्री ॥

न तस्य प्रतिमेतीयं द्विपदा गायत्री ॥

हिरण्यगर्भस्तस्तो मा मा हिंसीद्यस्मान्न द्वे एताः प्रतीकचोदिताः ॥

हिरण्यगर्भः समवर्तत, यः प्राणतः । यस्येमे, यऽ इमाऽआपो इत्येता स्तिस्रः । मा मा हिंसीज्जनितेत्येका । यस्मान्न जातः, इन्द्रश्च सम्राडितीमे द्वे एताऋचोऽत्र प्रतीकचोदिताः पूर्वं पठितत्वादादिमात्रेणोपात्ताः । यदि प्रतीकचोदितास्ततः किमत आह ॥

ब्रह्मयज्ञेऽध्येयाः ॥

ब्रह्मयज्ञे स्वाध्यायाध्ययने एताः सकला अध्येयाः पठनीयाः । न केवलमत्र किं तु ॥

सर्वत्रैवम् ॥

यत्र यत्र लोकं, ता, ऽइन्द्रं । त्वामग्नऽऋषे । आपो ह यद्बृहती र्यश्चिदापः । तं प्रत्नथाऽयं वेनः । ऽअहं इन्द्रो यशोजमा, कदा चन स्तरीरसि, कदा चन प्रयुच्छसि । तम्प्रत्नथाऽयं वेनश्चित्रं देवानां । तं प्रत्नथाऽयं वेनो, ये देवासऽ, आनऽइडाभि, र्विश्वेभिः सोम्यं मध्वा, मा-

समवर्त्ताधीभूतः । यतो वारहृयं तं प्रत्नथाऽयं वेनः । इमाऽउ त्वा, यज्ञस्य, मयठ० सहस्र, मूर्द्धञ्जुषाः, यऽइमा विश्वा, विश्वकर्मा, यो नः पिताऽन्नपतेऽन्नस्य नो देह्येवं, या याः प्रतीकचोदिता ऋचः तत्र सर्वत्र ता ब्रह्मयज्ञे सकला ध्येयाः । ब्रह्मयज्ञग्रहणं जपादेरप्युपलक्षणम् ॥

एषो ह चतस्रस्त्रिष्टुभः ॥(१)

एषो ह देवः । यस्माज्जातं । येन द्यौ, यं क्रन्दसीत्येताश्चतस्रस्त्रिष्टुभः । प्रत्यङ्जना आगतः । त्रीणि ज्योतींषि आगतः ॥

आपो ह यश्चित्प्रतीकचोदिते ॥

आपो ह यद्बृहतीर्यश्चिदापइत्येते द्वे ऋचावत्र प्रतीकचोदिते । ब्रह्मयज्ञादावध्येये ॥ १५ ॥

वेनस्तत्पञ्च त्रिष्टुभः ॥

वेनस्तत्पश्यन्नित्याद्याः पञ्चर्चस्त्रिष्टुभः, यत्र विश्वं, प्रतत् द्वे ये धामन् । एतत्तु व्यूह ॥

सदसस्पतिं तृचेन मेधाकामो मेधां याचते ॥

सदसस्पतिमद्भुतमित्यादिकेन तृचेन कश्चिन्मेधाकामो मेधां धारणावतीं बुद्धिं याचते प्रार्थयते ॥

प्रथमा गायत्री लिङ्गोक्तदेवता ॥

तत्र तृचे प्रथमा सदसस्पतिमित्येषा गायत्री लिङ्गोक्तसदसस्पतिदेवता । प्रियमिन्द्रस्य । व्यूह ॥

द्वितीयाग्न्येय्यनुष्टुप् ॥

द्वितीया यां मेधामित्येषा आग्नेयी अग्निदेवत्या अनुष्टुप् । यां

(१) अत्र, यस्मान्न, प्रतीकोक्ता परीत्य भूतानि, द्वे परमात्मदेवत्ये त्रिष्टुभाविति, इति काण्वसर्वानुक्रमेऽधिकः पाठः ॥

मेधां समकः, द्वितीये ब्यूहः ॥

तृतीया लिङ्गोक्तदेवताऽनुष्टुप् ॥

मेधां मे वरुण इत्येषा तृतीया ऋक् लिङ्गोक्तवरुणाग्न्यादिदेवता । अनुष्टुप्छन्दस्का । प्रथमो नवकः ॥

इदं मे मान्त्रवर्णिक्यनुष्टुप् ॥

इदं मे ब्रह्म चेतीयं मान्त्रवर्णिकी मंत्रवर्णोक्तदेवता अनुष्टुप् । अत्र प्रथमतृतीयौ नवद्वितीयः समकः, तृतीयोऽपि व्यूहेन समकः ॥

एतया देवेभ्यः श्रीकामो याचते श्रियम् ॥

इदं मऽइत्येतया ऋचा कश्चित् श्रीकामः देवेभ्यः श्रियं याचते लक्ष्मीं प्रार्थयते ॥ १६ ॥

सर्वमेधे श्रूयते । तस्याग्निष्टुदग्निष्टोमः प्रथममहर्भवतीति प्रकृत्य तस्याग्नेया ग्रहा भवन्त्याग्नेय्यः पुरोरुचः सवमाग्नेयमसदिति । तत्र कल्पसूत्रे अनुक्तत्वादेताग्नेयीः पुरोरुचो दर्शयति ॥

अस्याजरास: सप्तदशाग्निष्टुत्याग्निष्टोमिके प्रथमेऽहनि पुरोरुचआग्नेय्यः ॥

सर्वमेधे अग्निष्टुत्संज्ञे प्रथमेऽहनि अस्याजरासो दमामित्याद्या मह्यऽअग्नेरित्येतत्पर्यन्ताः सप्तदशसङ्ख्या ऋचोऽग्निदेवत्या पुरोरुचो भवन्ति । अत्र पुरोरुक्शब्देन ऋचएव ग्रहणपरा मन्त्राअभिधीयन्ते न यजूरूपाः । कुतः "हविष पुरोरुचमिति श्रुते" । उक्थमहावैश्वदेवपाक्षीवतहारियोजनेषु यजूरूपे ग्रहणमन्त्रे सत्यपि "तं वा अपुरोरुक्कं गृह्णातीति श्रुतेश्च" । तेन येषां ग्रहाणां प्रकृतौ पुरोरुचः सन्ति तेषामेवेदं वैकृतं विधानं सोमांशुस्तर्यामोक्थमहावैश्वदेवानां । अतएवाग्नेयीभिः प्राकृत्य ऋचएव निवर्त्यन्ते नोपयामादीनि यजूंषि ॥

आद्ये द्वे ऐन्द्रवायवस्य ॥

आद्ये अस्याजरास इत्यो धूमकेतव इतीमे द्वे ऋचौ ऐन्द्रवायवग्रहस्य पुरोरुचौ प्रथमऋचौ ॥

अस्याजरासो वत्सप्रीः ॥

अस्याजरास इतीमामृचं त्रिष्टुभं वत्सप्रीऋषिरपश्यत् । प्रथमतृतीययोर्व्यूहः । चतुर्थो दशकः तेनैकोना । आवायवित्यस्यापवादः ॥

इत्यो धूमकेतवो विरूपः ॥

इत्यो धूमकेतव इतीमामृचं गायत्रीं विरूपऋषिरपश्यत् । इन्द्रवायूइत्यस्या अपवादः ॥

यज्ञानो मैत्रावरुणस्य गोतमः ॥(१)

यज्ञानो मित्रावरुणेतीमामृचं मैत्रावरुणस्य पुरोरुचं गोतमऋषिरपश्यत् । अयं वामित्यस्या अपवादः । अग्ने यक्षि व्यूह । गायत्री । युव्वं हीत्यस्या आश्विनग्रहग्रहणे विनियोगः । कुतः मैत्रावरुणशुक्रपुरोरुचां मध्ये पाठात् । प्रकृताऽप्यस्मिन्नेव क्रमे अयं वां, तं प्रत्नथेत्यनयोर्मैत्रावरुणशुक्रपुरोरुचां मध्ये, या वां कशेत्याश्विनपुरोरुचः पाठाच्च । अयं वामग्ने इति लिङ्गाच्च । वक्ष्यमाणेषु षट्स्वपि पुरोरुग्गणेष्वस्मिन्नेव क्रमे, आसुते सिञ्चत, दैव्यावध्वर्यू, अभि नङ्गरैर्षां, दस्रा युवाकवो, दैव्यावध्वर्यू, आयातमुपभूषतमित्येतासामवीसां व्यक्ताश्विलिङ्गानामाश्विनपुरोरुचां पाठाच्च । या वां कशेत्यस्य बाधः ॥

द्वे विरूपे शुक्रस्य कुत्सः ॥

द्वे विरूपे इतीमामृचं त्रिष्टुभं शुक्रग्रहस्य पुरोरुचं कुत्सऋषिरपश्यत् । तं प्रत्नथेत्यस्यापवादः । द्वे विरूपे व्यूहेन दशकः । कुत्रापि व्यूहं

(१) एतत्सूत्रमेव, युव्वमाश्विनस्येति सूत्रमधिकं काण्वसर्वानुक्रमेऽस्तीति ॥

कृत्वा छन्दःपूर्त्तिः ॥

अयमिह मन्थिनः ॥

अयमिहेति मन्थिग्रहस्य पुरोरुग्ग्रहणमन्त्रः । त्रिष्टुप् । द्वितीयो दशकः, तृतीयो दशकः, तृतीयो द्वादशकः, तेन पूर्तिः, अयं वेनइत्यस्यापवादः ॥

वैश्वदेवग्रहग्रहणे त्रीणि शता विश्वामित्रः ॥

त्रीणि शतेतीयं त्रिष्टुप् वैश्वदेवस्य विश्वेदेवदेवः तस्याग्रयणग्रहस्य ग्रहणे पुरोरुग्ग्रहणमन्त्रो भवति । अस्या विश्वामित्रऋषिः । ये देवासइत्यस्यापवादः, अत्र वैश्वदेवशब्देन तद्देवत आग्रयण उच्यते । कथमाग्रयणस्य तद्देवत्वं "आत्मा ह वा अस्याग्रयणइति प्रकृत्य विश्वेभ्यो देवेभ्यो गृह्णातीति श्रुतेः" । मूर्द्धानमित्यस्याः प्रकृतिरेव ध्रुवग्रहणे पुरोरुक्त्वं सम्भवति नात्र पुनरुक्तम् । त्रीणि शता । आदित्ता-तारमित्यनयोर्व्यूहः । मूर्द्धानं व्यूहः ॥

ऐन्द्राग्नस्याग्निर्वृत्राणि भरद्वाजः ॥

अग्निर्वृत्राणीतीमामैन्द्राग्नग्रहस्य पुरोरुचं गायत्रीं भरद्वाजऋषिरपश्यत् । इन्द्राग्नी आगतमित्यस्यापवादः ॥

वैश्वदेवस्य विश्वेभिः सोम्यं मेधातिथिः ॥

विश्वेभिः सोम्यमितीमामृचं गायत्रीं वैश्वदेवस्य पुरोरुचं मेधातिथिरपश्यत् । ओमासश्चर्षणीधृतइत्यस्यापवादः, आद्ये व्यूहः ॥

आयन्मरुत्वतीययोर्द्वे ॥

आ यद्दिषे, अग्ने शर्द्धेतीमे द्वे ऋचौ द्वयोर्मरुत्वतीययोर्यथाक्रमं पुरोरुचौ ग्रहणमन्त्रौ त्रिष्टुभौ । स्वादृष्यं जनयत् । व्यूहेन दशकः । पुनः कुत्रापि व्यूहं कृत्वा छन्दःपूर्तिः । तव द्युम्नानि व्यूहः । इन्द्रमरुत्वइत्यस्या आयद्दिषेऽपवादः । मरुत्वन्तं वृषभमित्यस्या अग्नेशर्द्ध-

ति ॥

आयत्पराशरः शाक्त्यः ॥

आयद्वितीमामृचं शक्तेरपत्यं पराशरऋषिरपश्यत् ॥

अग्ने मही विदुहिता विश्ववारा ॥

अग्ने मह्ये इतीमामृचमश्विदुहिता सूर्ये पुत्री विश्ववारा इतिमा मों अपश्यत् ॥

त्वा ठ॰ हि (१) भरद्वाजः ॥

त्वा ठं हि मन्द्रतममितीमां त्रिष्टुभं माहेन्द्रपुरोरुचं भरद्वाजोऽपश्यत् । अस्या अनन्तरोऽपि माहेन्द्रग्रहणे विनियोगं कल्पयते । कुतः इन्द्रं नत्वेतिलिङ्गात्स्तुत्यतीयपुरोरुचोऽनन्तरं पाठाच्च । प्रकृतावप्यस्मिन्नेव क्रमे माहेन्द्रपुरोरुक्पठ्यते, महाँऽइन्द्रो नृवदिति । इन्द्रस्तुतिरप्यनेनैव क्रमेण माहेन्द्रपुरोरुक्पठ्यते । महाँऽइन्द्रो यऽओजसेति । महाँइन्द्रो नृवदित्यस्यापवादः । ववृमहे । इन्द्रं नत्वा । व्यूह ॥

त्वेऽअग्ने द्वे बृहत्यावादित्यस्य ॥

त्वे अग्ने । शुचिरश्त्वाणीतीमे द्वे बृहत्यौ आदित्यग्रहग्रहणे पुरोरुचौ ग्रहणमन्त्रौ ॥

त्वमग्ने वसिष्ठः ॥

त्वमग्ने स्वाहुतेतीमां बृहतीमादित्यग्रहस्य प्रथमां पुरोरुचं वसिष्ठऋषिरपश्यत् । प्रथमे व्यूहाभ्यामष्टकः, तृतीयपक्षादनकः । चतुर्थः सप्तकः, द्व्यूना । कदा चन स्तरीरसीत्यस्या अपवादः ॥

शुचिप्रस्कण्वः ॥

शुचिरश्त्वाणीतीमां बृहतीमादित्यग्रहस्य द्वितीयं । पुरोरुचं प्रस्क-

(१) अत्र हिरण्यतोऽमे माहेन्द्रस्तोत्रादर्भमाक काण्वसर्वानुक्रमेऽस्तीति ॥

वऋषिरपश्यत् । कदा चन प्रयुच्छसीत्यस्या अपवादः ॥

आदित्यग्रहग्रहणे विश्वेषामदितिर्वामदेवो गोतमः ॥(१)

विश्वेषामदितिरितीमामादित्यग्रहस्य ग्रहणे विनियुक्तां त्रिष्टुभं वामदेवो गोतमऋषिरपश्यत् । यज्ञो देवानामित्यस्या अप-वादः । अनयोर्व्यूहः । आदित्यग्रहग्रहणइति केचित्पठन्ति, “श्रु-तौ वाऽथ दधिगृह्णाति सगृह्णाति यज्ञो देवानामिति पठ्यते” । तत्र श्रुत्यनुकरणमेतत् ॥

महो अग्नेः सावित्रस्य लुशोधानाकः ॥

महो अग्नेरितीमां त्रिष्टुभं सावित्रग्रहस्य पुरोरुचं लुशोधानाक-ऋषिरपश्यत् । वाममद्येत्यस्या अपवादः, अथान्त्यौ जागतौ ॥

अनुक्तं गायत्रं त्रैष्टुभम् ॥

अनुक्तं अनुक्तछन्दस्कं मन्त्रजातं गायत्रच्छन्दस्कं त्रिष्टु-प्छन्दस्कं च । तथैव प्रागुक्तं । इन्द्रस्तदादिष्वपि सप्तदशानां पुरोरुचामनेनैव क्रमेणैतेष्वेव ग्रहेषु विनियोगः कल्प्यः । समाप्ता त्रिष्टु-त् ॥ १० ॥

सर्वमेधे श्रूयते इन्द्रस्तुत्युक्थ्यो द्वितीयमहर्भवतीति प्रकृत्य तस्यै-न्द्रा ग्रहा भवन्त्यैन्द्र्यः पुरोरुचः सर्वमैन्द्रमिति । तत्रैन्द्रीः पुरोरुचः प्रदर्शयति ॥

इन्द्रस्तुत्युक्थ्ये द्वितीयेऽहन्यैन्द्र्यः पुरोरुचो द्वाद-शप्रतीकचोदिते च द्वे तिस्रश्च ॥

इन्द्रस्तुत्युक्थे उक्थ्यसंस्थे सर्वमेधस्य द्वितीयेऽहनि आप-श्चित्पिप्युरित्यादि द्वादशान्ता द्वादशर्चः । तथा । तं प्रत्नथा, प-

(१) अस्मिन्सूत्रे आदित्यग्रहग्रहणे काण्वसर्वानुक्रमपाठो बोध्यः ॥

यं वेनइमे द्वे प्रतीकचोदिते च, तथा महाँइन्द्रो यओजसा, कदा चन स्तरीरसि, कदा चन प्रयुच्छसीत्येतास्तिस्रः प्रतीकचोदितास्त्वेवमन्त्राः सप्तदशचैन्द्रश्च इन्द्रदेवत्या, पुरोरुचो भवन्ति, ऐन्द्रवायवादिसाविचान्तानां ग्रहाणां यथिनष्टुदुत्क्रमेण ग्रहणमन्त्रा भवन्तीत्यर्थः । एवं सप्तदशैन्द्रस्य पुरोरुचः सम्पन्नाः ॥

आपश्चिद्वसिष्ठः ॥

आपश्चिदितीमां त्रिष्टुभं ऐन्द्रवायवस्य प्रथमां पुरोरुचं वसिष्ठ ऋषिरपश्यत् । आवायवित्यस्या बाधः, आपश्चित् । चतुर्थीदयकः ॥

गावऽउप पुरुमीढाजमीढौ ॥

गावउपेतीमां गायत्रीं ऐन्द्रवायवस्य द्वितीयां पुरोरुचं पुरुमीढाद्दृषी अपश्यतां । इन्द्रवायूइत्यस्या अपवादः ॥

यद्द्य वसिष्ठः ॥

यद्द्य सूरइतीमां गायत्रीं मैत्रावरुणपुरोरुचं वसिष्ठोऽपश्यत् । अयं वामित्यस्या अपवादः ॥

आसुतेऽसुनीतिः ॥

आसुतइतीमां गायत्रीं आश्विनपुरोरुचं असुनीतिर्ऋषिरपश्यत् । आवामित्यस्या अपवादः । द्वितीये व्यूहः । तं प्रत्नथा, अयं वेनइत्यनयोः प्रकृतिवच्छुक्रामन्थिग्रहणे विनियोगः ॥

आतिष्ठन्तं विश्वामित्रः ॥

आतिष्ठन्तमितीमामृचं त्रिष्टुभं आग्रयणग्रहपुरोरुचं विश्वामित्रोऽपश्यत् । ये देवासइत्यस्या बाधः ॥

प्रवः सुचीकः ॥ (१)

प्रवो महइतीमां त्रिष्टुभं ध्रुवग्रहणपुरोरुचं सुचीकऋषिरपश्यत् ।

---

(१) सुचीकइति काण्वपाठः ॥

अथान्त्यो जागती । मूर्धानमित्यस्या बाधः ॥

बृहन्निदित्रिशोकः ॥

बृहन्निदितीमां गायत्रीमैन्द्राग्नपुरोरुचं त्रिशोक ऋषिरपश्यत् । इन्द्राग्नी इत्यस्या बाधः । आद्यः सप्तकः ॥

इन्द्रेहि मधुच्छन्दाः ॥

इन्द्रेहि मत्स्यन्धस इतीमां गायत्रीं वैश्वदेवपुरोरुचं मधुच्छन्दा अपश्यत् । ओमास इत्यस्या बाधः ॥

इन्द्रो वृत्रं विश्वामित्रः ॥

इन्द्रो वृत्रमिति त्रिष्टुभं प्रथममरुत्वतीयपुरोरुचं विश्वामित्रोऽपश्यत् । इन्द्र मरुत्व इत्यस्या बाधः ॥

कुतस्त्वमगस्त्यः ॥

कुतस्त्वमित्येतां त्रिष्टुभं सगस्त्वमरुत्वतीयपुरोरुचमगस्त्य ऋषिरपश्यत् । आद्यो व्यूहेन दशकः । तेनैकोना । मरुत्वन्तमित्यस्या अपवादः । प्रतीकर्षादितासु तिसृषु महाँ इन्द्र इत्यस्या माहेन्द्रग्रहणे विनियोगो लिङ्गात् । नृवदित्यस्यापवादः । कदा चनेत्यनयोः प्रकृतिवदादित्यग्रहणे ॥

आतष्ठौ रोविति: श्यात्तयः ॥ (१)

आतस्त इति त्रिष्टुभं गाङ्गारीविरपश्यत् । आदित्यग्रहस्य द्वा अपवे विनियोगः । अथ द्वितीयतृतीययोर्व्यूहः । अन्नो देवानामित्यस्या अपवादः ॥

इमां ते कुत्सो जगती ॥

इमां ते धियमिति जगतीं सावित्रपुरोरुचं कुत्सोऽपश्यत् । वाममस्यापवादः ॥

(१) शाक्त्यङ्गातकाण्वपाठः ॥

अनुक्तं गायत्रं त्रैष्टुभम् ॥

अस्यां कण्डिकायामनुक्तछन्दस्कं मन्त्रगणं यथासम्भवं गायत्रं त्रैष्टुभं वा तथैवोदाहृतं । इतीन्द्रस्तुत्समासः ॥ १८ ॥

अथसूर्यस्तुत् । सर्वमेधएव सूक्ते । सूर्यस्तुदुक्थ्यस्तृतीयमहर्भवति इति प्रकृत्य तस्य सौर्यो गृहा भवन्ति, सौर्यः पुरोरुचः सर्वं सौर्यमसदिति । तत्र सौरीः पुरोरुचोऽत्र दर्शयति ॥

सूर्यस्तुत्युक्थ्ये तृतीयेऽहनि सौर्यश्चतुर्दश पुरोरुचस्तिस्रश्च प्रतीकोक्ताः ॥

विभ्राड्बृहदित्यारभ्याकृष्णेनेत्येतत्पर्यन्ता। चतुर्दश ऋचः, तं प्रत्नथाऽयं वेनश्चित्रं देवानामित्येताः स्तिस्रः प्रतीकयोदिताः, इत्येवं सप्तदशर्चः सूर्यस्तुत्सञ्ज्ञकस्य सर्वमेधस्य तृतीयेऽहनि पुरोरुचो भवन्ति । ऐन्द्रवायवादिसावित्रान्तानां गृहाणां पूर्वोक्तक्रमेण पञ्चपमन्त्रा भवन्तीत्यर्थः ॥

विभ्राड्बृहज्जगतीं विभ्राड्सौर्यः ॥

विभ्राड्बृहदित्येतां जगतीं ऐन्द्रवायवपुरोरुचं सूर्यपुत्रो विभ्राडृषिरपश्यत् । विभ्राड्बृहत् व्यूहः ॥

उदुत्यं तिस्रः प्रस्कण्वः ॥

उदुत्य, येनापावक,देव्याध्वर्यू इत्येतास्तिस्रः प्रस्कण्वोऽपश्यत् । उदुत्यमित्यैन्द्रवायवस्य द्वितीयापुरोरुक् । येनापावकेत्मैत्रावरुणस्य देव्याध्वर्यू इत्याश्विनस्य । इन्द्रो विश्वाय व्यूहः । त्वष्टर्णेति च । रथेनेति च प्रतीकत्रोदितास्तु तिसृषु तं प्रत्नथाऽयंवेनइत्येतयोः प्रकृतिवच्छुक्रामन्थिग्रहणे विनियोगः । चित्रं देवानामित्यस्याग्रयणग्रहणे ॥

आनोऽगस्त्यः ॥

भानद्वाभिरितीनां त्रिष्टुभं भुवस्य पुरोहवमगस्त्योऽपश्यत् ।

यद्द्य श्रुतकक्षसुतंकक्षौ ॥

यद्द्य कच्चेति गायत्रीं ऐन्द्राग्नपुरोरुचं श्रुतकक्षसुतंकक्षौ । द्वावृषी अपश्यतं । द्वितीयः सप्तकः ॥

तरणिः प्रस्कण्वः ॥

तरणिर्विश्वदर्शतइतिगायत्रीं वैश्वदेवपुरोरुचं प्रस्कण्वोऽपश्यत् । द्वितीयः सप्तकः ॥

तत्सूर्यस्य द्वे कुत्सः ॥

तत्सूर्यस्य, तन्मित्रस्येतीमे द्वे ऋचौ त्रिष्टुभौ क्रमेण गरुत्मतीययोः पुरोरुचौ कुत्सऋषिरपश्यत् ॥

बण्महा द्वे जमदग्निर्बृहतीसतोबृहत्यौ ॥

बण्महा,न्बट्सूर्येति द्वे बृहत्यौ जमदग्निऋषिरपश्यत् । बण्महानित्यस्य माहेन्द्रग्रहणे विनियोगः । बट्सूर्येत्यस्यां आदित्यस्य प्रथमे ग्रहणे । बण्महान् । सप्तकः । बट्सूर्य । दशकः ॥

आयन्त इव नृमेधो बृहती ॥

आयन्तइतिबृहतीआदित्यस्य पुनर्ग्रहणे पुरोरुका अस्या नृमेधऋषि, षाद्यः सप्तकः ॥

अद्या देवाः कुत्सः ॥

अद्या देवा इतित्रिष्टुप् । कुत्सऋषिः । तथा आदित्यश्रपणे विनियोगः । आद्ये व्यूहः ।

आकृष्णेन हिरण्यस्तूपआङ्गिरसः ॥

आकृष्णेनेति त्रिष्टुभं सावित्रपुरोरुचमाङ्गिरसः पुत्रो हिरण्यस्तूपोऽपश्यत् । द्वितीये व्यूहः, ॥

अनाख्यातं सार्धं गायत्रं त्रैष्टुभम् ॥

अथ कश्चिदेकाक्षरमन्त्रात् छन्दस्कं मन्त्रगणं यथायोगं गायत्रं त्रैष्टुभं च ज्ञेयम् । इति सूर्यस्तुत्यधिकारः । अथ वैश्वदेवस्तुत । सर्वमिध एव श्रूयते । वैश्वदेवस्तुतौ चतुर्थमहर्भवतीति प्रकृत्य तस्य वैश्वदेवा गृह्या भवन्ति वैश्वदेवः पुरोरुचइति । तत्र वैश्वदेवीः पुरोरुचोऽत्र दर्शयति ॥ १८ ॥

वैश्वदेवस्तुतिचतुर्थेऽहनि वैश्वदेव्यः पुरोरुचएकादशषट्प्रतीकोक्ताः ॥

प्रवावृजे सुप्रयेत्याद्या देवेभ्यो हीत्यन्ता एकादशर्चः, तं प्रत्नथा । अयं वेनः । ये देवासः, आनइन्द्राभिः । विश्वेभिः सोम्यं मधु । ओमासः प्रचर्षणीधृतइत्येताः षट्प्रतीकचोदिताश्चेत्येवं सप्तदशऋचो विश्वेदेवदेवत्याः वैश्वदेवस्तुत्संज्ञे सर्वमेधस्य चतुर्थेऽहनि ऐन्द्रवायवादित्यसावित्रान्तानां पुरोरुचो भवन्ति ग्रहयाजमन्त्रा भवन्तीत्यर्थः ॥

प्रवावृजे वसिष्ठस्त्रिष्टुभम् ॥

प्रवावृजइति त्रिष्टुभं ऐन्द्रवायवपुरोरुचं वसिष्ठोऽपश्यत् । चतुर्थी व्यूहः ॥

इन्द्रवायू बृहस्पतिं द्वे मेधातिथिः ॥

इन्द्रवायू । बृहस्पतिमिति द्वे गायत्र्यौ मेधातिथिरपश्यत् । इन्द्रवायूइत्यस्य । ऐन्द्रवायुरस्य पुनर्ग्रहणे विनियोगः । बृहस्पइत्यस्य मैत्रावरुणग्रहणे ॥

अधि नः कुसीदी काण्वः ॥

अधिनइत्येतां गायत्रीमाश्विनपुरोरुचं कण्वपुत्रः कुसीदी अपश्यत् । आद्यषड्कः । द्वितीयो व्यूहेन सप्तकः, तृतीयोऽष्टकः, तमेवं वर्द्धमानां गायत्रीं । अस्यास्तु षट्सप्ताष्टकः सा वर्द्धमानेत्युक्तेः । प्रतीक-

चोदितास्तु । तं प्रत्नथेतिशुक्रस्य ग्रहणे पुरोरुक् । अयं वेन इतिमन्थिनः, ये देवासइत्याग्रयणस्य । आनऽइन्द्राभिरितिध्रुवस्य । विश्वेभिः सोम्यमित्यैन्द्राग्नस्य । ओमासइति वैश्वदेवस्य ॥

अग्नऽइन्द्र प्रतिक्षत्रः ॥

अग्नइन्द्रइति त्रिष्टुभं प्रथममरुत्वतीयपुरोरुचं प्रतिक्षत्रऋषिरपश्यत् । तृतीये व्यूहः ॥

इन्द्राग्नी मित्रावरुणा जगतीं काश्यपो वत्सारः ॥

इन्द्राग्नी इति जगतीमग्न्यमरुत्वतीयपुरोरुचं काश्यपपुत्रो वत्सारऋषिरपश्यत् । आद्ये व्यूहः । चतुर्थएकादशकः ॥

अस्मे रुद्राः प्रगाथः ॥

अस्मे रुद्रा मेहनेतीमां त्रिष्टुभं माहेन्द्रपुरोरुचं प्रगाथऋषिरपश्यत् ॥

अर्वाञ्चोऽअद्य कूर्मो गार्त्समदः ॥

अर्वाञ्चो अद्येति त्रिष्टुभं आदित्यस्य प्रथमपुरोरुचं गृत्समदपुत्रः कूर्मऋषिरपश्यत् ॥

विश्वेऽअद्य लुशो धानाकः ॥

विश्वेऽअद्येतीमां त्रिष्टुभं आदित्यस्य पुनर्ग्रहणे पुरोरुचं धानाकपुत्रो लुशऋषिरपश्यत् । द्वितीये व्यूहः ॥

विश्वेदेवाः सुहोत्रः ॥

विश्वेदेवाः शृणुतेतीमां त्रिष्टुभं सुहोत्रऋषिरपश्यत् । आदित्यग्रहस्य दध्ना श्रपणेऽस्य विनियोगः ॥

देवेभ्यो हि वामदेवो जगतीम् ॥

देवेभ्यो हि प्रथममिति जगतीं सावित्रपुरोरुचं वामदेवोऽपश्यत् ।

अथ तृतीयचतुर्थं तु सूक्तम्॥

अनुक्तं गायत्रं त्रैष्टुभम्॥

अस्मिन्प्रवायुमच्छेत्यादिगर्चे अनुक्तं छन्दस्कं मन्त्रगणं गायत्रं त्रैष्टुभं च ज्ञेयं। तथैव प्रागुदाहृत इतिवेदमन्त्रेष्वस्तु दृक्तः॥ २०॥

अथानारभ्याधीतं मन्त्रगणमर्वाक्पितृमेधादादित्ययाज्ञवल्क्यौ ददृशतुः॥

अथानन्तरमर्वाक्पितृमेधात्। अपेतोयंत्वित्ययमध्यायः पितृमेधः तेनायमर्थः। प्रवायुमित्यत आरभ्यापेतो यन्तु पणय इत्यतः प्राग्वर्तमानं मन्त्रगणं मन्त्रसमूहं आदित्ययाज्ञवल्क्यौ ददृशतुः। कीदृशं मन्त्रगणं अनारभ्याधीतं। कञ्चन कर्मविशेषमारभ्योपक्रम्याधीतमारभ्याधीतं, न आरभ्याधीतमनारभ्याधीतं। श्रौतकर्मविशेषे कुत्राप्यविनियुक्तमित्यर्थः॥

प्रवायुं पञ्चदशर्चः पुरोरुग्गणो द्वे च प्रतीकोक्ते॥

प्रवायुमच्छेत्यतआरभ्य पञ्चदश सङ्ख्या ऋचस्ता प्रतथा, अयं वेन इतीमे द्वे प्रतीकोक्ते चेत्येवं सप्तदशर्गात्मकः पुरोरुग्गणः पुरोरुक्संज्ञः॥

प्रवायुमृजिश्वा॥

प्रवायु मतीमां त्रिष्टुभं ऋजिश्वऋषिरपश्यत्। लिङ्गाद्वायुर्देवता। इन्द्रवायू इत्यस्याः सर्वं प्रागुक्तम्॥

मित्रं०हुवे द्वे मधुच्छन्दाः॥

मित्रं० हुवे, दस्रायुवाकवइतीमे द्वे गायत्र्यौ मधुच्छन्दाऽपश्यत्॥

मित्रं लिङ्गोक्ता॥ (१)

(१) उक्तोक्तदेवत्याः। इति काण्वपाठः॥

मित्र ठं० द्वे तृतीयस्यकिरिक्षोप्ता मित्रावरुणदेवता ॥

दस्रा युवाकवऽआश्विनी ॥

दस्रा त्वेषा प्रजापतिदेवत्या । तं प्रजापतोऽयं वेनस्त्वमयोरुक्तम् ॥

विदद्यदैन्द्रीं कुशिकः ॥

विदद्येतीमां त्रिष्टुभं इन्द्रदेवत्यां कुशिकोऽपश्यत् । द्वितीयतृती-
ययोर्व्यूहः ॥

नहि स्पशं विश्वामित्रो वैश्वानरीम् ॥

नहि स्पशमितीमां त्रिष्टुभं वैश्वानरदेवतां विश्वामित्रोऽपश्य-
त् । द्वितीयो द्वादशकः । तृतीयो द्वादशक, तेन पूर्तिः ॥

उग्रा विघनिनैन्द्राग्नीं भरद्वाजः ॥

उग्रा विघनिनेतीमां गायत्रीमिन्द्राग्निदेवतां भरद्वाजोऽपश्यत् ।
द्वितीयसप्तकः ॥

उपास्मै सौमीं देवलोऽसितो वा ॥

उपास्मै गायतेतीमां गायत्रीं सोमदेवत्यां देवलो वा असितो
वा ऋषिरपश्यत् । द्वितीये व्यूहः ॥

ये त्वा विश्वामित्रः ॥

ये त्वा हि इत्यृतीमां त्रिष्टुभं विश्वामित्रऋषिरपश्यत् । इ-
न्द्रोदेवता । चतुर्थे व्यूहः ॥

जनिष्ठाऽउग्रो गौरीवितिः ॥

जनिष्ठाऽउग्र इतीमां इन्द्रदेवत्यां त्रिष्टुभं गौरीवितिरपश्यत् ॥

आ तु वामदेवः ॥

आ तून इन्द्र इतीमामृचमिन्द्रदेवत्यां गायत्रीं वामदेवोऽपश्यत् ॥

तृचऐन्द्राः ॥

ये त्वा हि इत्ये । जनिष्ठाउग्रः, आ तून इत्ययं तृच ऐन्द्रदेवतः ॥

त्वमिन्द्र यौ नृमेधः पथ्याबृहतीसतोबृहत्यौ ॥

त्वमिन्द्र,प्रभूत,इतीमे च द्वे ऐन्द्री इन्द्रदेवत्ये ऋचौ क्रमेण पथ्याबृहतीसतोबृहत्यौ नृमेधऋषिरपश्यत् । त्वमिन्द्रेति पथ्याबृहती । प्रभूतद्युतिसतोबृहती । त्वमिन्द्र, त्व तूयं, व्यूह ॥

यज्ञो देवानां कुत्सः ॥

यज्ञो देवानामितित्रिष्टुभमादित्यदेवत्यां कुत्सऋषिरपश्यत । आदित्ययाज्ञवल्क्याभ्यां कुत्सस्य बाधो मा भूदितिपुनरुक्तं । अतएव विना वचनं पूर्वोक्तऋषिर्न भवतीति गम्यते ॥

अदब्धेभिः सावित्रीं जगतीं भरद्वाजः ॥

अदब्धेभिरितीमां सवितृदेवत्यां जगतीं भरद्वाजोऽपश्यत् ॥ २१॥

प्रवीरया पञ्चदशर्चः पुरोरुगणो द्वे च प्रतीकोक्ते ॥

प्रवीरयेत्याद्या,अदब्धेभिरित्यन्ताः पञ्चदशसङ्ख्या ऋचः,तं प्रत्नथाऽयं वेनइति द्वे प्रतीकचोदिते चेत्येवमेव सप्तदश पुरोरुच्याख्याः पुरोरुचां व्यूहः ॥

प्रवीरया वसिष्ठो वायव्याम् ॥

प्रवीरयेति त्रिष्टुभं वायुदेवतां वसिष्ठोऽपश्यत् । अन्त्ययोर्व्यूहः । गावउपेत्यस्य प्रागुक्तम् ॥

काव्ययो राजानेषु दक्षः ॥

काव्ययोरितीमां गायत्रीं मित्रावरुणदेवतां दक्षोऽपश्यत् । देव्याअध्वर्यू, तं प्रत्नथाऽयं वेन इत्येतेषां प्रागुक्तम् ॥

तिरश्चीनः परमेष्ठीप्रजापतिर्भाववृत्तम् ॥ (१)

तिरश्चीनो विततः इत्येतामृचं भाववृत्तसंज्ञं परमेष्ठीप्रजापतिरपश्यत् । प्रजापतिर्वा परमेष्ठीऋषिः । भाववृत्तं भावानां पदार्था-

(१) तृचात्मकत्वाभकः काण्वसर्वानुक्रमपाठो बोध्यः ॥

गो वृत्तिः सूक्ष्मादिर्मृत्तर्यस्य देवता । तद्भाववृत्तं । यस्य भाववृत्तं देवता विश्वेदेवा देवता वा ॥

आरोदसी जगतीं विश्वामित्रः ॥

आरोदसी इतीमामृचं जगतीं वैश्वानरदेवतां विश्वामित्रोऽपश्यत् । आद्ये व्यूहः ॥

उक्थेभिर्वृत्रहन्तमा वसिष्ठः ॥

उक्थेभिरितीमां गायत्रीं वसिष्ठोऽपश्यत् । इन्द्राग्नी देवता ॥

उपनः सुहोत्रो वैश्वदेवीम् ॥

उपनः सूनवइतीमां गायत्रीं विश्वेदेवदेवतां सुहोत्रऋषिरपश्यत् । द्वितीये व्यूहः ॥

ब्रह्माणि मेऽगस्त्यः द्वे इन्द्रमरुत्वत्यौ द्वे ॥

ब्रह्माणि मे । अनुत्तमातऽइतीमे द्वे ऋचौ त्रिष्टुभौ इन्द्रमरुत्वत्यौ द्वे अगस्त्य ऋषिरपश्यत् । इन्द्रो मरुत्वाननयोर्देवता । आद्यावते व्यूहः ॥

तद्दिदासाथर्वणो बृहद्दिवः ॥

तद्दिदासेतीमामृचं त्रिष्टुभमथर्वणः पुत्रो बृहद्दिवऋषिरपश्यत् । अस्या महेन्द्रो देवता ॥

इमाऽउ त्वा द्वे बृहत्यौ मेधातिथिः ॥

इमाऽउ त्वा, यस्यायमिति द्वे ऋचौ बृहत्यौ मेधातिथिऋषिरपश्यत् । अनयोरादित्यो देवता । अस्याद्यं । व्यूहः ॥

अयꣳ सहस्रं मेधातिथिः सतोबृहतीम् ॥

अय सहस्रमितीमामृचं सतोबृहतीं मेधातिथिरपश्यत् । अस्यादित्यो देवता । चतुर्थी व्यूहः । षड्क्षे विंशत्योत्तमम् ॥ २४ ॥

आमन्द्रयोदध्यर्थः पुरोरुग्गायत्र्युष्टुभं प्रतीकयो-

दितं च ॥

आनो यज्ञमित्यारभ्याध्यायसमाप्तिपर्यन्ताश्चतुर्दशसंख्याकश्च इमा ऽउ त्वा, अस्मायमयठं० सहस्तन्नइन्द्रवृष्णतीदं प्रतीकग्रहणादित्तं चतुर्दशं चेत्येवमृचां समुदायकः पुरोरुग्गणः । ऐन्द्रवायवादिसावित्रान्तानां ग्रहाणां ग्रहणमन्त्राणां समूहः ॥

आनो वायव्यां जमदग्निः ॥

आनो यज्ञमितीमामृचं बृहतीं वायुदेवतां जमदग्निर्ऋषिरपश्यत् । तृतीयएकादशकस्तेनैकोना ॥

इन्द्रवायू सुसंदृशेन्द्रवायव्यां तापसः ॥

इन्द्रवायू सुसंदृशेतीमां बृहतीमिन्द्रवायुदेवतां । तापसऋषिरपश्यत् ॥

ऋधगित्था मैत्रावरुणीं जमदग्निः ॥

ऋधगित्थेतीमां बृहतीं मित्रावरुणदेवतां जमदग्निऋषिरपश्यत् । आद्ये व्यूहः ॥

आयातमाश्विनीं वसिष्ठः ॥

आयातमितीमां बृहतीमश्विदेवत्यां वसिष्ठोऽपश्यत् । तृतीये व्यूहः ॥

प्रैतु वैश्वदेवीं कण्वः ॥

प्रैतु ब्रह्मणस्पतिरिति बृहतीं विश्वेदेवदेवतां कण्वऋषिरपश्यत् । पादयोर्व्यूहः । तृतीय एकादशः ॥

चन्द्रमा अप्स्वैन्द्रीमाहुतिपरिणामवादिनीं त्रितऽआप्त्यः ॥

चन्द्रमा अप्स्वन्तरिति बृहतीमिन्द्रदेवतामाहुतिपरिणामवादिनीं त्रितसंज्ञ आप्त्यऋषिरपश्यत् । आद्ये व्यूहः ॥

देवं देवं वो मनुर्वैवस्वतो वैश्वदेवीम् ॥

देवं देवं बृहतीमां बृहतीं विश्वदेवदेवतं । विवस्वतोऽपत्यं मनुर्ऋ-षिरपश्यत् । आद्यान्तयोर्व्यूहः ॥

दिवि पृष्टो मेध ऐन्द्रः ॥

दिवि पृष्टइतीमं बृहतीम् । इन्द्रपुत्रो मेधा ऋषिरपश्यत् । वैश्वानरो देवता ॥

इन्द्राग्नीऽअपात्सुहोत्रः ॥

इन्द्राग्नीऽअपादितीमां बृहतीं सुहोत्रऋषिरपश्यत् । इन्द्राग्नीदेवता । प्रथमद्वितीयचतुर्थेषु व्यूहः ॥

देवासो हि मनुः ॥

देवासो हीतीमां सतोबृहतीं मनुरपश्यत् । विश्वेदेवादेवता ॥

अपाधमद्द्वे नृमेधः ॥

अपाधमत् । प्रवऽइतीमे द्वे । नृमेधऋषिरपश्यत् । तत्रापाध-मदिति सतोबृहती । प्रवइति बृहती इन्द्रो मरुत्वानुभयोर्देवता ॥ प्रथमेऽन्त्ये । व्यूहः । मरुतो ब्रह्मा । व्यूहः ॥

अस्येन्मेधातिथिः ॥

अस्येदिन्द्रइतीमां सतोबृहतीं मेधातिथिरपश्यत् । महेन्द्रोदेवता ॥ आद्ये व्यूहः । प्रतीकोक्तानां सर्वं प्रागुक्तम् ॥

दशाद्ये कादश्यन्त्या च सतोबृहत्यः ॥

आनो यथामितयोर्दशर्चं दशमी,देवासो हि ष्मेति । एकादशी अपाधमदिति अन्त्या चास्येदिन्द्रइति एतास्तास्तः सतोबृहत्यः । "अयुजौ जागती सतोबृहतीति तल्लक्षणम्" ॥

शेषा बृहत्यः शेषा बृहत्यः ॥

दशाद्ये कादश्यन्त्याभ्योऽन्याः शेषा दश ऋचो बृहत्यः बृहतीछन्द-

स्का। हिरण्यास्तोऽध्यायपरिसमाप्तिद्योतनार्थः। इति श्रीषड्गुरुशि-
ष्यविरचिते कात्यायनप्रणीतसर्वानुक्रमणीवृत्तौ वेदार्थदीपिकायां सर्वानुक्रमणि-
काव्याख्याने तृतीयोऽध्यायः॥

यज्जाग्रतः षळृचं मानसं त्रैष्टुभं० शिवसङ्कल्पः॥

यज्जाग्रतः। येन कर्माणि। यत्प्रज्ञानं, येनेदं, यस्मिन्नृचः। सुषा-
रथिरित्येतत्षळृचं मानसं मनोदेवतं त्रिष्टुप्छन्दस्कं शिवसङ्कल्पऋषि-
रपश्यत। अथवा शिवसङ्कल्प इति मन्त्राः। ऋषी त्वादित्ययाज्ञवल्क्या
वेव। तदु सूक्तस्य द्वौ व्यूहौ। यस्मात्कृते ऋषोदयकः। तेन दृष्ट्या
धिका, नेनीयते द्वादशकः॥

पितुं नु षळगस्त्योऽन्नस्तुतिम्॥

पितुं नु स्तोषमितीमामृचं षळगस्त्यऋषिरपश्यत्। इयमन्नस्य
स्तुतिः। अन्नदेवतेत्यर्थः, आद्याः पञ्चकः। ततस्त्रयोऽष्टकाः। तृतीये
व्यूहः। अनन्तरमनुष्टुब्गर्भा त्वाग्रुच्यते। आद्याः पञ्चकास्त्रयोऽष्टका
अनुष्टुब्गर्भेतिवचनात्॥

अग्निश्चतुर्ऋचमानुष्टुभम्॥(१)

अग्निरनुमत इत्येतच्चतुर्ऋचमनुष्टुप्छन्दस्कम्॥

द्वयोरनुमतिः॥

अस्मिन्चतुर्ऋचाद्ययोर्द्वयोर्ऋचोरन्वित्, अनुमत इत्येतयोरनुमति
र्देवता। अन्वित्व्यूहः। अनुमः व्यूहः॥

द्वयोः सिनीवालि सरस्वत्यौ॥

अस्मिन्चतुर्ऋचेऽपरयोर्द्वयोर्ऋचोः सिनीवालि पृथुष्टुके इत्यनयोः
सिनीवालिसरस्वत्यौ यथाक्रमं देवते। तो देवौ व्यूहः॥

सिनीवालि पथ्याष्टुके द्वे गृत्समदः॥

---

(१) अग्निश्चतुर्ऋचमानुष्टुभमाग्नाग्नाः। इति काण्वसर्वानुक्रमणीपाठो बोध्यः॥

सिनीवालि पृथुष्टुके पञ्चानृचतौमे द्वे, ऋचौ गृत्समदऋषिरप-श्यत् ॥

त्वमग्ने द्वे आग्नेय्यौ जगत्यौ हिरण्यस्तूपाङ्गिर-सः ॥

त्वमग्ने प्रथमः, त्वंनो ऽअग्ने तव देवेतीमे द्वे ऋचावग्निदेवत्ये । ज-गत्यौ अङ्गिरसः पुत्रो हिरण्यस्तूपोऽपश्यत् । त्वमग्ने । त्वंनो । व्यू-हः । प्रथमानां रचो द्वौ व्यूहौ ॥

उत्तानायां द्वे देवश्रवा देववातश्च भारतौ ॥

उत्तानायामव । इडायास्त्वेतीमे द्वे ऋचावग्निदेवत्यौ भरतपु-त्रौ देवश्रवा देववातश्चेतीमौ द्वौ ऋषी अपश्यतां, आग्नेय्यावित्यनुव-र्तते ॥

आद्या त्रिष्टुप् ॥

पूर्वोक्तयोर्द्वयोराद्या उत्तानायामित्येषा त्रिष्टुप् ॥

द्वितीयाऽनुष्टुप् ॥

इडायास्त्वेति द्वितीयाऽनुष्टुप् । नाभा । व्यूहः ॥

प्रमन्महे नोधा त्र्यृचमैन्द्रं त्रैष्टुभम् ॥

प्रमन्महे प्रवामहे, इत्येतत्त्र्यृचमिन्द्रदेवत्यं त्रिष्टुपछन्दस्कं नोधाऋ-षिरपश्यत् । अर्चामार्के । आङ्गूष्यं । व्यूहः ॥

इच्छन्ति त्वा त्र्यृचमैन्द्रं त्रैष्टुभमेव देवश्रवा देववा-तश्च भारतौ ॥

इच्छन्ति त्वा, न ते दूरे, इत्येतत्त्र्यृचं इन्द्रदेवत्यं त्रिष्टुपछन्दस्क-मेव भारतौ भरतपुत्रौ देववातसञ्ज्ञौ अपश्यतां, इच्छन्ति व्यूहः ॥ १ ॥

अषाढं युत्सु, गोतमश्चतुर्ऋचं त्रैष्टुभं सौम्यम् ॥

अषाढं युत्सु, सोमा धेनुं, त्वमिमा, देवेन, इत्येतच्चतुर्ऋचं त्रिष्टुप्छन्दस्कं सोमदेवत्यं गोतम ऋषिरपश्यत् । अषाळ्हमषा, सोमो धीरं । व्यूह । सादन्यं । द्वौ व्यूहौ । त्वमिमा । व्यूह । ततन्थ । द्वौ व्यूहौ, अभिमातिषाह । द्वौ व्यूहौ । त्वं ज्योतिषा । व्यूह । रायो भागं । दाश्वस्त्वः । मा त्वा तनत् । व्यूह ॥

अष्टौ व्यख्यच्चतुर्ऋचं त्रैष्टुभं सावित्रमाङ्गिरसो हिरण्यस्तूपः ॥

अष्टौ व्यख्यत् हिरण्यस्तूप इत्येतच्चतुर्ऋचं सवितृदेवतं त्रिष्टुप्छन्दस्कं अङ्गिरसोऽपत्यं हिरण्यस्तूप ऋषिरपश्यत् ॥

द्वितीया जगती ॥

अत्र चतुर्ऋचे हिरण्यपाणिः सवितेत्येषा द्वितीया जगती । अष्टौ वि, वीधस्य । दधत् । व्यूहः । आ कृष्णेन दाशुषः । सुमृडीकः, द्वौ व्यूहौ । ये ते व्यूहः ॥

उभा पिबतमाश्विनं तृचम् ॥

उभा पिबतं । अप्नस्वतीमश्विना, द्युभिरक्तुभिरित्येतत् तृचं आश्विनं । अश्विदेवतम् ॥

उभा पिबतं प्रस्कण्वो गायत्रीम् ॥

उभा पिबतं इतीमामृचं गायत्रीं प्रस्कण्वोऽपश्यत् ॥

अप्नस्वतीमश्विना त्रिष्टुभौ कुत्सः ॥

अप्नस्वतीमश्विना, द्युभिरक्तुभिरितीमे ऋचौ त्रिष्टुभौ कुत्सऋषिरपश्यत् । अश्व्ये । द्वौ व्यूहौ । आ कृष्णेनेत्यत्र प्रागुक्तम् ॥

आरात्रि पार्थिवं बृहतीं रात्रिदेवत्यां कश्यपो भरद्वाजदुहिता ॥

रात्रि पार्थिवमितीमामृचं रात्रिदेवत्यां पथ्याबृहतीं भरद्वाज-दुहिता रात्रिनाम्नी अपश्यत् ॥

उषस्तदुषस्यां परोष्णिहं गोतमः ॥

उषस्तदितीमामृचमुषस्यां उषोदेवतां परोष्णिहं परोष्णिक्छन्दस्कां गोतमऋषिरपश्यत् ॥

प्रातरग्निं वसिष्ठः सप्तर्चम् । (१)

प्रातरग्निं, प्रातर्जितं, भगप्रणेत, उतेदानीं । भग एव । समध्वराय । अश्वावतीरित्येतत्सप्तर्चं वसिष्ठऋषिरपश्यत् ॥

आद्या जगती बहुदेवत्या ॥

अस्मिन्सप्तर्चे आद्या प्रातरग्निमित्येषा जगतीछन्दस्का बहुदेवत्या अग्नीन्द्रमित्रावरुणाश्विभगपूषब्रह्मणस्पतिसोमरुद्रदेवतेत्यर्थः । चतुर्थ एकादशकः ॥

पञ्च भगदेवत्यास्त्रिष्टुभः ॥ (२)

प्रातर्जितमित्याद्याः पञ्च ऋचो भगदेवत्यास्त्रिष्टुभः । राजा चिद्यं । भग प्रणेत । उतेदानीं । उतोदिता । वयं देवानां । तेन वयं । समध्वराय । एषु ऋक्षु ॥ रथमिव । द्वादशकः ॥

अन्त्योषस्या ॥ (३)

त्रिष्टुबित्यनुवर्तते । अश्वावतीरित्येषा त्रिष्टुप् सप्तर्चस्यान्त्योषस्या उषोदेवतेत्यर्थः ॥ अन्त्ये व्यूहः ॥

पूषन्तव सुहोत्रः ॥

पूषन्तवेतीमामृचं सुहोत्रऋषिरपश्यत् ॥

---

(१) प्रातर्जितं भग वासिष्ठो भगदेवत्यां त्रिष्टुभम् ॥

(२) प्रातर्जितं भग वासिष्ठो भगदेवत्यां त्रिष्टुभमिति काण्वसर्वानुक्रमपाठः ॥

(३) इदं काण्वसर्वानुक्रमे नास्ति ॥

पथस्पथः परिपतिरृजिश्वा ॥

पथस्पथ इतीमामृजिश्वऋषिरपश्यत् ॥

एते पौष्ण्यौ गायत्रीत्रिष्टुभौ ॥

इति ऋचौ पूषं तव पथस्पथ, इत्येते पौष्ण्यौ पूषदेवत्ये यथाक्रमं गायत्रीत्रिष्टुभौ । पूषन्निति गायत्री । पथस्पथ इति त्रिष्टुप् । कामेन । सनो रासत् ॥

त्रीणि पदा वैष्णव्यौ गायत्र्यौ मेधातिथिः ॥

त्रीणि पदा, तद्विप्रास इतीमे विष्णुदेवते गायत्रीछन्दस्के मेधातिथिर्ऋषिरपश्यत् । विष्णुर्गोपाः । व्यूहः ॥

घृतवती भुवनानां भरद्वाजो द्यावापृथिव्यां जगतीम् ॥(१)

घृतवती भुवनानामितीमामृचं द्यावापृथिवीदेवतां जगतीछन्दस्कां भरद्वाजऋषिरपश्यत् ॥

ये नो लिङ्गोक्तदेवतां त्रिष्टुभं विहव्यः ॥

ये नः सपत्ना इतीमामृचं लिङ्गोक्तदेवतां त्रिष्टुभं विहव्यऋषिरपश्यत् । इन्द्राग्नी वसवो रुद्रा आदित्याश्च लिङ्गोक्ताः । वसवो रुद्राश्चतुर्दशकः ॥

आ नासत्या हिरण्यस्तूप आश्विनीं जगतीम् ॥

आ नासत्या इतीमामृचमश्विदेवत्यां जगतीछन्दस्कां हिरण्यस्तूपऋषिरपश्यत् ॥

एष वो मारुतीं त्रिष्टुभमगस्त्यः ॥

एष व इति त्रिष्टुभं मरुद्देवत्यां अगस्त्योऽपश्यत् । मांहायेचा हो

(१) अत्र सूत्रेऽनुस्वाराभावात् काण्वसर्वानुक्रमपाठो बोध्यः ॥

व्यूहौ । एषा यागोष्ट । व्यूहे अतोऽपि द्वयक: ॥

सहस्तोमा ऋषिसृष्टिप्रतिपादिकां त्रिष्टुभं यज्ञ: प्राजापत्य: ॥

सहस्तोमा इति त्रिष्टुभमृषिसृष्टे: प्रतिपादयित्रीं प्रजापते: पुत्रो यज्ञऋषिरपश्यत् । ऋषयो देवता: । सहस्तोमा द्वादशक:, अन्यो द्व्यक: ॥

आयुष्यं वर्चस्यं तृचं दक्ष उष्णिक्शक्करीत्रिष्टुभो हिरण्यस्तुति: ॥

आयुष्यं । न तत् । यदाबध्नन्निति तृचं दक्षऋषिरपश्यत् । अस्मिन्तृचे तिस्र ऋचो यथाक्रममुष्णिक्शक्करीत्रिष्टुप्छन्दस्का: । अष्टपञ्चाशदक्षरा शक्करी । तत्र आयुष्यमुष्णिक् । आद्य: षड्क:, द्वाद: सप्तक: । द्वौ अष्टकौ । तेनाधिका पुरउष्णिगियं । न तत् । शक्करी एकाधिका । यदाबध्नन् । त्रिष्टुप् । तृतीयो द्वादशक:, चतुर्थो दशक: । एतत्तृचं हिरण्यस्तुति: । हिरण्यदेवतमित्यर्थ: ॥

उत नऽऋजिश्वो बहुदेवत्यान्त्रिष्टुभम् ॥

उत नइति त्रिष्टुभं बहुदेवत्यां ऋजिश्वोऽपश्यत् । उत न: द्वौ व्यूहौ । अहिर्बुध्न्य:, अजऽएकपात् । पृथिवी समुद्र:, विश्वेदेवाश्च देवता: ॥

इमा गिर: कूर्मो गार्त्समदऽआदित्यदेवत्यां त्रिष्टुभम् ॥

इमा गिरऽइतीमामृचमादित्यदेवत्यां त्रिष्टुभं गृत्समदपुत्र: कूर्मऋषिरपश्यत् ॥

सप्त ऋषय इतीयमध्यात्मवादिनो जगती ॥

सप्त ऋषय, इतीयमध्यात्मवादिनी जगती सप्त ऋषयो देवता । एकाधिका । पादाक्षरनियमो नास्ति ॥

उत्तिष्ठ तृचो ब्राह्मणस्पत्यः ॥

उत्तिष्ठ, प्रनूनं । ब्रह्मणस्पते इत्यय तृचो ब्रह्मणस्पतिदैवत्यः ॥

आद्ये बृहत्यौ काण्वो घोरः ॥

अस्मिंस्तृचे उत्तिष्ठ, प्रनूनमित्येते आद्ये ऋचौ बृहत्यौ घौरो घोर-पुत्रः कण्वऋषिरपश्यत् । देवयन्त व्यूहः । मन्त्र । द्वौ व्यूहौ ॥

अन्त्या त्रिष्टुभं गृत्समदः ॥

अन्त्यां ब्रह्मणस्पतइतीमां त्रिष्टुभं गृत्समदोऽपश्यत् । तूर्णमस ते । व्यूहः ॥

यऽइमां चतुर्ऋचं प्रतीकोक्तम् ॥

यऽइमां चतुर्ऋचं प्रतीकोक्तम् । यऽइमा विश्वा भुवनानि । विश्वकर्मा ह्यजनिष्ठ, यो नः पिता जनिता । अन्नपतेऽन्नस्य नो देही त्येतच्चतुर्ऋचमध्याये प्रतीकोक्तम् । पूर्वमेव पठितत्वात्सप्तदशाध्यायादि-मात्रेणोपात्तम् ॥

अपेतोऽध्यायः पित्र्यऽआदित्यस्य देवानां वा ॥(१)

अपेतो यन्त्वित्ययऽइत्ययमध्याय पित्र्यः पितृदेवत्यः । आदित्यस्यार्षम् । आदित्योऽस्य ऋषिरित्यर्थः । देवानां वा, देवा वा अस्याध्यायस्य ऋषय इत्यर्थः ॥

आद्या गायत्री परं यजुः ॥

अस्मिन्नध्याये आद्या अपेत, इति गायत्री । ततः परं । द्युभिरक्तो-भिरित्येतद्यजुः सामपङ्क्ति । पलाशशाखया व्यूहने विनियो-गोऽस्याः ॥

सविता ते गायत्री ॥

---

(१) अपेतोऽनुवाकः पित्र्य आदित्यस्यार्षं देवानां वेति काण्वसर्वानुक्रमपाठः ॥

सविता ते शरीरेभ्य, इति गायत्री। जपे विनियुक्ता॥

वायुः पुनात्विति चत्वारि लिङ्गोक्तानि॥

वायुः पुनात्वित्यादीनि चत्वारि यजूंषि लिङ्गोक्तवाय्वादिदेवतानि। चतसृणां सीतानां कर्षणे विनियुक्तानि। वायुः। दैवी पङ्क्तिः। सविता। दैवी त्रिष्टुप्। अग्नेः। दैवी पङ्क्तिः। सूर्यस्य। दैवी त्रिष्टुप्। विमुच्यन्तां। दैवी जगती। अनडुद्विमोके विनियोगः। अनडुहो देवताः। अश्वत्थे व इत्यस्य सर्वौषधवपने विनियोगः॥

सविता ते गायत्री॥

सविता ते शरीराणीति गायत्री। अग्निनिवापे विनियोगः। प्रजापतौ त्वा। आर्षी उष्णिक्। प्राजापत्या त्रिष्टुब्वा। अग्निनिवाप एव विनियोगः॥

परं मृत्यो सङ्कसुकस्त्रिष्टुभं मृत्युदेवत्याम्॥

परं मृत्यो इति त्रिष्टुभं मृत्युदेवत्यां सङ्कसुकोऽपश्यत्। जपे विनियोगः॥

शंवातोऽनुष्टुब्बृहत्यौ वैश्वदेव्यौ॥

शंवातः, कल्पतां इती मे द्वे ऋचौ यथाक्रममनुष्टुब्बृहत्यौ विश्वे देवा देवताः। अश्मनां यथाङ्ग कल्पने विनियोगोऽनयोः। पादः शिवतमाश्चतुर्दशकः, तेन बृह्यधिकः॥

अश्मन्वती सुचीकस्त्रिष्टुभं वैश्वदेवीम्॥

अश्मन्वतीरियत इतीमां त्रिष्टुभं विश्वदेवदेवतां सुचीकऋषिरपश्यत्। अश्मधिगमने विनियोगोऽस्याः। अपाअघीमः। व्यूहः॥

अपाद्यं लिङ्गोक्तदेवतामनुष्टुभं शुनःशेपो दुःस्वप्ननाशनीम्॥

अपाघमितीमामृचं लिङ्गोक्तदेवतामनुष्टुप्छन्दस्कां दुःस्वप्ननाश-

नी शुनःशेप ऋषिरपश्यत् । अपामार्गैरपमार्जने विनियोगः । अनयोर्व्यूहः । सुमित्रिया न इत्यस्य प्रागुक्तम् । स्नाने विनियोगः ॥

अनड्वाहमानडुह्यनुष्टुप् ॥ (१)

अनड्वाहमन्वारभामह, इतीयमृक् आनडुही अनडुद्देवता अनुष्टुप् छन्दः अनडुत्पुच्छान्वारम्भे विनियुक्ता । उद्वयमित्यस्य तु प्रागुक्तम् । आगमने विनियोगः ॥

इमं जीवेभ्यः सङ्कुसुको मृत्युदेवत्यां त्रिष्टुभम् ॥

इमं जीवेभ्य, इति त्रिष्टुभं मृत्युदेवत्यां सङ्कुसुकोऽपश्यत् । ग्रामश्मशानान्तरे मर्यादालोष्ठनिधाने विनियोगः ॥

आयुष्मानग्नऽआग्नेयीं त्रिष्टुभं वैखानसः ॥ (२)

आयुष्मानग्न, इतीमामग्निदेवतां त्रिष्टुभं वैखानसऋषिरपश्यत् । औपासने आहुतिहोमे विनियोगोऽस्याः । आद्यतीयो दशकः । चतुर्थो द्वादशकः ॥

परीमेऽनुष्टुभमैन्द्रीं भारद्वाजः शिरिंबिठः ॥

परीमे गामित्यनुष्टुभमिन्द्रदेवतां भरद्वाजस्यापत्यं शिरिंबिठऋषिरपश्यत् । परिदावदने विनियोगोऽस्याः । द्वितीययोर्व्यूहः ॥

क्रव्यादमग्निं त्रिष्टुभमाग्नेयीं दमनः ॥

क्रव्यादमग्निमिति त्रिष्टुभं अग्निदेवतां दमनऋषिरपश्यत् । अन्त्येष्टौपासनस्य निरसने विनियोगोऽर्द्धस्य । इहैवायमित्युत्तरार्द्धस्य वपे विनियोगः ॥

वह वपां जातवेदसी त्रिष्टुप् ॥

---

(१) आनुष्टुभमिति काण्वसर्वानुक्रमपाठः ॥

(२) इदं सूक्तं पूर्वपरीमार्येण काण्वसर्वानुक्रमे पाठो बोध्यः ॥

यद्व्यपामितीयमृक् जातवेदसी जातवेदो देवत्या त्रिष्टुप् । अस्य-
[illegible] विनियोगोऽवगन्तव्यः ॥

स्योना पृथिवि मेधातिथिः पार्थिवीं गायत्रीम् ॥

स्योना पृथिवीति गायत्रीं पार्थिवीं पृथिवीदेवतां यजुरन्तां मेधातिथिऋषिरपश्यत् । अस्या अन्ते अपनः शोशुचदघमिति यजुः । प्राजापत्या गायत्री । अस्य सम्बन्धिमरणनिमित्ते स्नाने विनियोगः ॥

अस्मात्त्वमाग्नेयी गायत्र्यनिरुक्ता ॥

अस्मात्त्वमधिजातोऽसीति गायत्री अग्निर्देवता । अनिरुक्ता मध्येऽग्निपदप्रयोगशून्या । साग्निकस्य पात्रप्रतिपत्त्यन्ते दाहात्पूर्वं आज्याहुतिहोमे विनियुक्तम् ॥ ४ ॥

ऋचं वाचमध्यायो दध्यङ्ङाथर्वणो ददर्शाग्निकाश्वमेधिकवर्जम् ॥

ऋचं वाचं । देवस्य त्वा ३, स्वाहा प्राणेभ्यः, ईशावास्यमितीमां पञ्चाध्यायीं अग्निकाश्वमेधिकमन्त्रवर्जितामथर्वणः पुत्रो दध्यङ्ङृषिर्ददर्श । दृष्टवान् । "दध्यङ् ह वा आथर्वण एतं शुक्रमेतं यज्ञं विदाञ्चकारेति श्रुतेः" । पञ्चानामध्यायानां समाहारः पञ्चाध्यायी । अपवाद आग्निकाश्वमेधिकवर्जमिति, उग्रश्च भीमश्चेत्येतदाग्निकम् । अग्निं हृदयेनेत्याध्यायसमाप्तिं यावदाश्वमेधिकं तद्वर्जयित्वा । आग्निकस्याश्वमेधिकस्य च गायत्र्यृषिरित्यर्थः । वैश्वदेव इति बहुदेवत इत्यर्थः । तथा च यास्कः । "यत्तु किञ्चिद्बहुदेवतं वैश्वदेवानां स्थाने युज्यते यदेव विश्वलिङ्गमिति शाकपूणिरिति" ॥

आद्योऽध्यायः प्राजापत्यो वैश्वदेवः ॥

अस्यां पञ्चाध्याय्यामाद्यः प्रथम ऋचं वाचमित्यध्यायो विश्वदेवदेवतः प्राक्तर्थः । [illegible] ॥

प्राणानि यजूंषि ॥

प्राणानि ऋचं वाचमित्यादीनि यजूंषि । ऋचो चतुर्थी दैवीजगतीच्छन्दः । यामीजः यजुर्जगती । लिङ्गोक्ता ऋगाद्या देवताः ।

यस्मे बार्हस्पत्या पङ्क्तिः ॥

यस्मे च्छन्द्रमितीयं बृहस्पतिदेवत्या पङ्क्तिः । व्यूहेन चत्वारिंशदक्षरत्वात् । अत्र भूर्भुवः स्वस्तत्सवितुः । कयानश्चित्र, इति तृचस्य छन्दोदेवतादि सर्वं प्रागुक्तम् । ऋषिरत्र दध्यङ्ङाथर्वण एवेति विशेषः ॥

कया त्वमैन्द्र्यनिरुक्ता गायत्री ॥

कया त्वं न, इतीयं गायत्री अनिरुक्ता ऐन्द्री इन्द्रपदप्रयोगं विनापीन्द्रदेवत्या । पादे द्वौ व्यूहौ ॥

इन्द्रो विश्वस्य विराड्द्विपदा ॥

इन्द्रो विश्वस्येतीयमृक् विराड्द्विपदा । इन्द्रो देवता । विंशत्यक्षरा द्विपदा विराडित्युच्यते । तथा चोक्तमृग्वेदानुक्रमण्याम् । विंशतिका द्विपदा विराज इति"। तथा तदर्धमेकपदा । एतदर्धं विंशत्यर्धं या एकपदा दशाक्षरेत्यर्थं । साऽपि विराडुच्यते ॥

शं नो द्वे अनुष्टुभौ ॥

शंनोमित्रः, शंनोवात इती मे द्वे ऋचौ अनुष्टुभौ । शंनो भवतु व्यूहः । शंनोवात, इत्यत्र द्वौ व्यूहौ । तेन व्यूना । मित्रवरुणादयो लिङ्गोक्ता देवताः ॥

अहानि द्विपदा गायत्री ॥

अहानि शमितीयं द्विपदा गायत्री । अहानि रात्रयश्च देवताः ॥

शं न इन्द्राग्नी त्रिष्टुब्गायत्र्यौ ॥ (१)

शं न इन्द्राग्नी, शंनोदेवीरितीमे द्वे ऋचौ यथाक्रमं त्रिष्टुब्गायत्र्यौ । शं न इन्द्राग्नी त्रिष्टुप् । इन्द्राग्नी इन्द्रावरुणौ इन्द्रापूषणौ इन्द्रासोमौ देवताः । शंनो देवीर्गायत्री । आपो देवताः ॥

अन्त्या आशीः ॥

प्रागुक्तयोर्द्वयोरन्त्या शंनो देवीरित्येषा आशीः । द्यौश्च पृथिवी आपो दिशः इत्यस्य प्रागुक्तम् । अत्र दध्यङ्ङाथर्वण ऋषिरिति विशेषः ॥

द्यौः शान्तिर्यजूंषि ॥ (२)

द्यौः शान्तिरित्यादीनि ज्योक्ते सहस्र जीव्यासमित्यन्तानि यजूंषि लिङ्गोक्तदेवतानि । द्यौः शान्तिः, एकाधिका शक्वरी । दृते दृंह मा मित्रस्य मा, एकाधिका ब्राह्मी अनुष्टुप् । दृते । ऋगुष्णिक् । नमस्ते हरस इत्यस्य प्रागुक्तम् । अत्र दध्यङ्ङाथर्वण ऋषिरिति विशेषः ॥

नमस्तेऽस्त्वनुष्टुभौ ॥

नमस्ते अस्तु विद्युते, यतो यतः, इतीमे ऋचावनुष्टुभौ । यतः स्व । शं नः कुरु । अभयं नः । एषु व्यूहः । विद्युत्स्तनयित्नुरूपो भगवान्देवता द्वयोरपि । सुमित्रिया न इत्यस्य तु प्रागुक्तम् । अत्र तु दध्यङ्ङाथर्वण ऋषिरिति विशेषः ॥

तच्चक्षुः पुरउष्णिक् सौरी ॥ (३)

इति जीर्णः पाठः । स तु नोपपद्यते । अस्यां हि सप्तषष्टिरक्षराणि सन्ति । पुरउष्णिक् चाष्टाविंशत्यक्षरा "आद्यश्चेत्पुरउष्णिगिति" । अतस्तल्लक्षणाभावान्नेयं पुरउष्णिक् । तेन तच्चक्षुर्ब्राह्मी त्रिष्टुप् सौरीति-

---

(१) गायत्र्यौ इति काण्वसर्वानुक्रमेऽधिकः पाठोऽस्ति ॥

(२) दृते दृं० ह मित्रदेवत्ये । आद्या त्र्यवसाना जगती द्वितीया द्विपदा गायत्री इति काण्वसर्वानुक्रमेऽधिकः पाठो बोध्यः ॥

(३) तच्चक्षुः पङ्क्तिः सौरी इति काण्वसर्वानुक्रमपाठो बोध्यः ॥

पाठः । तच्चक्षुरित्येषा सौरी सूर्यदेवता एकाधिका ब्राह्मी त्रिष्टुप् । व्यूहेनात्वरिवर्ग । पुरउष्णिक् त कथमपि न घटत एव ॥

आददे नारिरस्यभ्रिर्देवतम् ॥

देवस्य त्वेति प्रागुक्तम् । आददे नारिरसीत्येतद्यजुरभ्रिर्देवतम् । दैवीजगती । अभ्र्यादाने विनियोगोऽस्य । युंजते मन, इत्यस्य छन्दोदैवतं प्रागुक्तम् । सावित्र्यादौ विनियोगोऽस्य ॥

देवी द्यावापृथिव्यम् ॥

देवी द्यावापृथिवी, इत्येतद् द्यावापृथिवीदेवतम् । मृत्तिकादाने विनियुक्तम् । ब्राह्मी गायत्री ॥

देव्यो वम्र्यो वल्मीकवपा ॥

देव्यो वम्र्य, इत्यस्य वल्मीकवपादाने विनियोगः । व्यूहेनार्षी पङ्क्तिः ॥

इयत्यग्रे वराहविहतम् ॥

इयत्यग्र, इत्यस्य वराहविहतं देवता । वराहविहतस्यादाने विनियोगः । द्वौ व्यूहौ । ब्राह्मी गायत्री ॥

इन्द्रस्योजस्थादाराः ॥

इन्द्रस्योजस्थेत्यस्यादारा देवताः । आदारादाने विनियोगः । आर्षी त्रिष्टुप् । मखाय त्वेति यजुः पङ्क्तिः । अजापयस आदाने विनियोगो द्वितीयस्य । तृतीयस्य सम्भृतानामभिमर्शने ॥

प्रैतु (१)मखस्याग्नुस्पर्शने यमाय देवस्त्वाग्नि रसि घर्मदेवत्यानि ॥

प्रैतु ब्रह्मणस्पतिः । मखस्य शिरोऽसि । मखाय त्वा, मखस्य त्वा । यमाय त्वा । अर्चिरसि शोचिरसि तपोऽसीत्येतानि यजूंषि घर्मदेव-

(१) कण्वो वैश्वदेवीं बृहतीमिति काण्वसर्वानुक्रमपाठोऽस्ति ॥

सांनि । मधु वर्मंधदेन विमनियोजन इत्यत चाह ॥

यो घर्मः स आदित्यो यऽएष तपतीति ॥

यो घर्मः सोऽऽदित्यः सूर्यः । स कः । य एष तपति । आकाशे दृश्यते । अथ मैत्रीति बृहती । प्रवृत्तं प्रति गमने विनियोगः । अथा अन्ते पीपि मखाय त्वेति सन्ति । तत्र प्रथमस्य परिश्रुते सम्भारणिधाने विनियोगः । द्वितीयस्य सम्भारैः पिण्डस्य संसर्जने । तृतीयस्य महावीरकरणे । मखस्य शिर, इत्यस्य निहितस्याभिमर्शने । यजुर्गायत्री । तदुत्तरस्य मखायत्वेत्यस्य द्वितीयमहावीरकरणे । मखस्य शिर इत्यस्य निहिताभिमर्शने । पुनर्मखायेत्यस्य तृतीयमहावीरकरणे । ततो मखस्य शिर इत्यस्य मखाय त्वेति सहितस्य निहिताभिमर्शने । ततस्त्रयाणां मखाय त्वा मखाणां गवेधुकाभिस्त्रयाणां महावीराणां धूपने । ततस्त्रयाणामपरस्य त्वाञ्चाणां समस्तायत्वानां त्रयाणां यजुःत्रिष्टुभः । महावीराणां धूपने विनियोगः । ततस्त्रयाणां मखाय त्वेति मंत्राणां प्रदहने । अजवे त्वेत्यादीनां देवी बृहती । उद्वपने विनियोगः । ततो मखाय त्वेति त्रयाणां अजापयोऽवसेके । यमाय त्वा । मखायत्वा दैव्यौ बृहत्यौ । सूर्यस्य त्वा देवीजगती । प्रोक्षणे त्रयाणां विनियोगः । देवस्त्वा । यजुः पङ्क्तिः । महावीरस्थापने विनियोगः । पृथिव्याः । प्राजापत्या गायत्री । रजतग्रतमानस्य खरे उपगूहने विनियोगः । रजतं देवता । अर्चिरसि यजुस्त्रिष्टुप् । सुवर्णमयमानामुपरि महावीरकरणे ॥

अनाधृष्टा पुरस्तात्सप्त पार्थिवानि यजमानाग्नेः ॥ (१)

अनाधृष्टा पुरस्तादित्यादीनि सप्तयजूंषि पार्थिवानि पृथिवीदेवत्या-

(१) इयाहा महद्भिर्वन्मौ, दिवः सत्त्वस्थः सुवर्णम् । इति कात्यायनसर्वानुक्रमण्यां बोध्यः ॥

नि । यजमानवाचीः, यजमानवृष्टाः । ऋच: । पुरवरी । ... ।
ततश्चिरो व्यूहेन ... । यजमानामपि ... विनियोगः ।
त्रिष्टुभ्यो मा । यजुर्बृहती । ... विनियोगः ।
मनोरश्वादि । दैवी पङ्क्तिः । ... विनियोगः ।
स्वाहा मरुद्भिः । यजुः पङ्क्तिः । घर्मो देवता । विकङ्कतशकलाभ्यां
... विनियोगः । दिवइति दैवी जगती । सुवर्णशतमानेन ...
... विनियोगः । सुवर्ण देवता ॥

अथ प्राणदेवत्यानि ॥

अश्वित्यादीनि यजूंषि प्राणदेवत्यानि । अविवेकपवाजने विनियुक्तानि । दैव्युष्णिक् ॥

गर्भो देवानामवकाशा, मा मा हिंसीरित्येतदन्ता घर्मदेवत्याः ॥ (१)

गर्भो देवानामित्यादयो नमस्ते अस्तुमामाहिंसीरित्येतदन्ता अवकाशाः । अवकाशसञ्ज्ञका मन्त्राः । सञ्ज्ञाकरणमवकाशेष्वपतिहत इत्येव संव्यवहाराय । महावीरावेक्षणे विनियोग एषाम् । गर्भो देवानां ऋचां पङ्क्तिः । समग्निः ब्राह्मी अनुष्टुप् ॥

अर्ता दिवऽऊर्ध्वबृहती ॥

अर्ता दिव, इतीयमृक् ऊर्ध्वबृहती । त्रिभागतोर्ध्वबृहतीति तद्वचनम् । अत्र तु आद्यो द्वितीयौ द्वादशकौ । तृतीय एकादशकः । एकाधिका बृहती ॥

अपश्यं गोपां त्रिष्टुभं दीर्घतमा ॥ (२)

अपश्यं गोपामितीमामृचं त्रिष्टुभं दीर्घतमा अपश्यत् । चतुर्थं

---

(१) गर्भो देवानां पङ्क्तिः समग्निर्जगती । इति काण्वसर्वानुक्रमपाठो बोध्यः ॥
(२) एतत्सूत्रारम्भे विश्वासां भुवामरत्पतिः । इति काण्वसर्वानुक्रमपाठश्च बोध्यः ॥

व्यूहः । विश्वासां भुवां । व्यूहः । षत्वहिम्नवर्ह ॥

हृदे त्वा परोष्णिक् ॥

हृदे त्वेत्येषा परोष्णिक् । माध्यन्दिनोऽयं व्यूहः । परोष्णिक्पदत्वात्, इति महत्त्वम् । पितानोऽसि, पञ्चमाग्नी ॥

त्वष्टृमन्तः परस्ताग्नी: ॥

त्वष्टृमन्त इत्येतद्यजुः परस्तात् पामी: । अथा त्रिष्टुप् । अग्नी देवता । परस्ता यजने विनियोगः ॥

अहः केतुना यजुषी घर्मदेवत्ये ॥

अहः केतुना, रात्रिः केतुनेतीमे यजुषी घर्मदेवत्ये साम्न्युष्णिहौ । रौहिणहोमे विनियुक्ते ॥

आददेऽदित्यै रज्जुः ॥

आददेऽदित्यै रास्नासीत्यस्य यजुषो रज्जुर्देवता । रज्जुग्रहणा-दाने विनियोगः । प्राजापत्या गायत्री छन्दः ॥

इड एहि गौः ॥

इड एहीत्यादीनां गौर्देवता गोराह्वाने विनियोगः । इडे । दैवी बृहती । अदिते । सरस्व । दैवी पङ्क्तिः । असावेहि । दैवी बृहती । असावित्यत्र गोर्नामाधरादि गणयित्वा छन्दो ज्ञेयम् । छन्दोऽभिलषितं विधानात् । अदित्यै । यजुस्त्रिष्टुप् । गौः रास्नायामे विनि-योगः । पूषासि । वत्सो देवता । दैव्यनुष्टुप् । वत्सोत्सर्गे विनियोगः । घर्माय । वत्सो देवता । दैवी पंक्तिः । वत्सोपयने विनियोगः । अश्विभ्यां । इन्द्राय । यजुर्गायत्र्यौ । सरस्वत्यै । यजुरनुष्टुप् । त्रिस्रो देवताः । दोहने विनियोगः । स्वाहेन्द्रवत् । दैव्यौ बृहत्यौ । विप्रु-षामभिमन्त्रणे विनियोगः । धवित्रा समस्तस्य यजुर्जगती । विप्रुषो देवताः ॥

यस्ते त्रिष्टुभं दीर्घतमा ॥

यस्ते स्तन इति त्रिष्टुभं दीर्घतमा अपश्यत् । तृतीये व्यूहः । वाग्देवत्या । "वाग्वै सरस्वतीति श्रुतेः" । स्तनालम्भे विनियोगः । उर्वन्तरिक्षमित्यस्य गोः समीपादागतां प्रति गमने विनियोगः । प्राजापत्या गायत्री । गायत्रं छन्दोऽसि । यजुर्गायत्री । त्रैष्टुभम् । यजुर्गायत्री । परिग्रासादने विनियोगः । परीशासौ देवते । द्यावापृथिवीभ्यां । यजुर्जगती । परीशासाभ्यां महावीरग्रहणे विनियोगः । अन्तरिक्षेणेति यजुर्बृहती । उपयमन्योपग्रहणे विनियोगः । शफयोर्घर्मो देवता ॥

इन्द्राश्विना वैश्वदेवम् ॥ (१)

इन्द्राश्विनेत्यस्य विश्वेदेवा देवताः । व्यूहः । ब्राह्मी गायत्री । महावीरे गोः पयसोऽवनयने विनियोगः ॥

समुद्राय त्वा वातनामानि ॥

समुद्राय त्वा वाताय स्वाहेत्यादीनां समुद्रादीनि वातनामानि देवताः । समुद्राय । सरिराय । यजुः पङ्क्तिः । अनाधृष्याय । यजुस्त्रिष्टुप् । अप्रतिधृष्याय । यजुर्जगती । अवस्यवे । यजुः पङ्क्तिः । अशिमिदा । यजुस्त्रिष्टुप् । इन्द्राय त्वा । साम्नोष्णिक् । आदित्यवते । यजुः पङ्क्ती । सवित्रे । ऋग्गायत्री । यमाय त्वा । साम्न्युष्णिक् ॥

स्वाहा घर्माय घर्मदेवत्ये ॥

स्वाहा घर्माय, स्वाहा घर्मः पित्रे, इत्येते यजुषी घर्मदेवत्ये । प्रथमस्य दैवी पङ्क्तिः । उपयमनीस्थाज्यस्य घर्मपात्रे विनियोगः । द्वितीयस्य यजुर्गायत्री । जपे विनियोगः ॥

विश्वाऽआशाऽआश्विन्यनुष्टुप् ॥

विश्वा आशा, इत्यनुष्टुबाश्विनी । अश्विनौ अस्या देवतेत्यर्थः । अत-

(१) इन्द्राश्विनौ दैवम इति काण्वसर्वानुक्रमपाठः ॥

ट्कर्ते होमे विनियोग: ॥

द्विविधा घर्मदैवत्यम् ॥

द्विविधा, इत्येतद् घर्मदैवत्यं यामोष्णिक् । उत्क्रमणे विनियोग: ॥

अश्विना घर्ममुष्णिक् ॥

अश्विनाघर्ममित्यस्योष्णिक्छन्द: । अश्विनावाश्विनौ द्यावापृथिव्यौ च देवता: । इत्यधिकलात्स्वराडुष्णिगियम् । भुक्षयोऽनुमन्त्रणे विनियोग: ॥

अपातां ककुप् ॥

अपातामश्विनेत्यस्या: ककुबुष्णिक् छन्द: । "मध्यमश्चेत्ककुबिति वचनात् । मध्यमे व्यूह: । यजमानकर्तृकेऽनुमन्त्रणे विनियोग: । इषे पिन्वस्व । ऋचां पङ्क्ति: । अध्वर्युकर्तृके पिन्वमानानुमन्त्रणे विनियुक्ता: । घर्मोऽसि । यजुर्गायत्री । उत्तरपूर्वोदिञ्चक्रमणे विनियोग: ॥

अमेन्यस्मै स्वर: ॥

अमेन्यस्मै इत्यस्य स्वरो देवता । स्वरे महावीरनिधाने विनियोग: । द्वौ व्यूहौ । ऋग्बृहती । घर्मो देवता ॥

स्वाहा पूष्णे सप्त लिङ्गोक्तानि ॥

स्वाहा पूष्णे शरसे, इत्यादीनि सप्त लिङ्गोक्तपूषादिदेवतानि । स्वाहा पूष्णे । दैवीजगती । ग्रावभ्य: । दैवीपङ्क्ति: । प्रतिरवेभ्य: । दैवीजगती । पितृभ्य: । आसुरीगायत्री । सकलस्य दक्षिणतो बर्हिषुपगूहने विनियोग: । द्यावापृथिवीभ्यां । आसुरनुष्टुप् । विश्वेभ्यो । आसुरनुष्टुप् । रुद्राय । यजु:पङ्क्ति: । सकलस्य प्रतिप्रस्थात्रे समर्पणे विनियोग: । इतराणि सप्त यजूंषि विकङ्कतशकलैर्भक्ष्यहोमे विनियुक्तानि ॥

स्वाहा सप्तर्षयोदैवत्यम् ॥

स्वाहा संज्योतिषेत्येतत्पयोदैवत्यम् । आसुरनुष्टुप् । घर्मोच्छिष्टभक्षणे विनियुक्तम् ॥

मधुहुतं घर्मः ॥

मधुहुतघर्मस्य घर्मो देवता । पंक्तिश्छन्दः । मधवे विनियोगः । मह:केतुना, राचिः केतुनेत्यनयोः प्रागुक्तम् ॥

अभीमङ्गायत्रीष्टहत्यावनवसाने ॥

अभीमं महिमा । सठं० सीदस्व, इतीमे द्वे ऋचौ गायत्रीबृहत्यौ । अभीममिति गायत्री । सठं० सीदस्वेति बृहती । कीदृश्यौ अनवसाने । द्वयोर्ऋचोः संधावसानं नास्तीत्यर्थः । उत्तमवर्ष्मा पृथिव्याठं० सठं०सीदस्वमहानित्येवं संबद्ध एव पाठोऽस्तीत्यर्थः । महावीरस्यासन्धानिधाने विनियोगः । अनयोरेवर्चोरन्तरामिकस्य गणनेन छन्दोन्तरं वैकल्पिकमाह ॥

अतिशक्करी वास्नेयी समस्ता व्यवसाना ॥

अथवा नेमे गायत्रीबृहत्यौ द्वे ऋचौ । किंतु समस्तेयं षष्ट्यक्षरा अतिशक्करीछन्दस्का एकैव ऋक् अग्निदेवत्या व्यवसाना अवसानद्वययुता । षष्ट्यक्षरा अतिशक्करी ॥

याते घर्मः ॥

यातेघर्मेत्यादिकानामिन्द्राग्नीभ्यादीनां घर्मो देवता । चतुर्गृहीतहोमे एषां विनियोगः । चतस्रामपि ऋचां पङ्क्तिः । द्वितीये व्यूहः ॥

अनस्त्व बृहती ॥

अनस्य त्वा परश्वावेत्यस्या बृहती छन्दः । निष्क्रमणे विनियोगः । उपरिष्टाद्बृहतीयम् । अन्त्यपादस्य द्वादशाक्षरत्वात् तथा चोक्तम् । अन्त्यचेदुपरिष्टाद्बृहतीति । घर्मो देवता । अत्र द्वितीये व्यूहः ॥

चतुः स्रक्तिर्मध्वष्टहती ॥

चतुः स्रक्तिरिति मध्याबृहती । चत्वारोऽष्टकाअन्ततः मध्येबृहती-

ति तन्नयम् । उत्तरवेदौ महावीरनिधाने विनियोगः । घर्मो देवता ॥

घर्मैतदनुष्टुप् ॥

घर्मैतत्त इत्यस्या, अनुष्टुप् छन्दः । आसेचनवन्तं पयसा पूरणे विनियोगः । घर्मो देवता । अत्र प्रथमचतुर्थौ सप्तकौ । द्वितीयो द्वादशकः । तेनाक्षरसंख्यापूर्तिः ॥

अचिक्रदत्परोष्णिक् ॥

अचिक्रददित्यस्याः परोष्णिक् छन्दः । तृतीयपादस्य द्वादशाक्षरत्वात् । तथा च पिङ्गलः । परोष्णिक्परतश्चेति । परिवेषे विनियोगः । सुमित्रिया न, इत्यस्य मार्जने विनियोगः । उद्वयमित्यस्योत्तरपूर्वार्धचरमत्वे । एधोऽसीत्यस्य समिदाधाने । समिदसीत्यस्याहवनीयेऽभ्याधाने ॥

यावती द्यावापृथिवी दधिघर्मः ॥

यावतीत्यस्य दधिघर्मो देवता । ब्राह्मी उष्णिक् । इन्द्रो देवता । दधिघर्मग्रहणे विनियोगः ॥

मयि त्यत्पंक्तिर्यजमानाशीः ॥

मयि त्यदिति पङ्क्तिर्यजमानस्याशीः । पञ्चपदा चत्वारिंशदक्षरा पङ्क्तिरियम् । दधिघर्मशेषभक्षणे विनियोगः । घर्मो देवता ॥

पयसो रेतो गायत्र्यवसाना ॥

पयसो रेत, इत्यवसानवर्जिता गायत्री । भक्षणे विनियोगः । अत्र पूर्वसूक्ते च यजमानाशीर्देवतेति कण्वसंहिताभाष्ये ॥

त्विषः संवृग् दधिघर्मः ॥

त्विषः संवृगित्यस्य दधिघर्मो देवता । व्यूहः । अतिजगती । यथा-क्रतसंज्ञकेऽहनि दधिघर्मशेषभक्षणे विनियुक्ता ॥

यजुर्ज्ञं घर्मदैवतम् ॥

अथ घर्मप्रकरणे यदनुक्तमनुक्तदैवतं मन्त्रजातं तद् घर्मदैवतम् । एतस्मिन्सूत्रे सति पूर्वेण स्वाहा घर्माय घर्मदैवत्ये, अतः कैतुना अक्षुधी घर्मदैवत्ये इत्येवमादी घर्मदेवत्वत्वकथनं पुनरुक्तम् ॥

स्वाहा प्राणेभ्यो मांचवर्णिक्यो देवताः ॥

स्वाहा प्राणेभ्य, इत्यादीनां यजुषां मांचवर्णिक्यो देवताः। घर्मभेदे प्रायश्चित्तहोमे विनियोगः, स्वाहा प्राणेभ्यः । यजुस्त्रिष्टुप् । पृथिव्यै स्वाहेत्यादिषु चतुरक्षराणां दैवीबृहती । पञ्चाक्षराणां दैवीपङ्क्तिः । षडक्षराणां दैवीत्रिष्टुप् । सप्ताक्षराणां दैवीजगती ॥

मनसः काममनुष्टुब्यजमानाशीः श्रीर्देवता ॥

मनसः काममाकूतिमित्येषा अनुष्टुप् । यस्याः श्रीर्देवतेति कल्पभाष्ये । घर्मभेदे पूर्णाहुतिहोमे विनियोगः ॥

प्रजापतिः संभ्रियमाणो यथाकालं प्रायश्चित्तदेवताः ॥

प्रजापतिः सम्भ्रियमाण, इत्याद्या घर्मभेदे यथाकालं प्रायश्चित्तदेवताः। यो यो यस्याः कालो यथाकालम्। तद्यथा। प्रजापतिः सम्भ्रियमाणो महावीरसम्भरणे क्रियमाणे महावीरभेदे प्रजापतिः प्रायश्चित्तहोमे देवता। तत्र प्रजापतये स्वाहेति प्रायश्चित्ताहुतिः। एवं सर्वकालेषु ज्ञेयम् ॥

सविता प्रथमेऽहन् प्रत्यहं क्रमेण ॥

सविता प्रथमेऽहन्नित्याद्याः घर्मभेद एव प्रत्यहं प्रतिदिनं क्रमेण प्रायश्चित्तदेवताः। सविता प्रथमेऽहन्। प्रथमेऽहनि घर्मभेदे सविता प्रायश्चित्ताहुतिदेवता। द्वितीयेऽहनि घर्मभेदे द्वितीया अग्निर्देव-

ता। एवं सर्वत्र वाक्यानामर्थो ज्ञेयः। प्रजापतिः समुद्रियमाहुः सविता प्रथमेऽहन्नीतीमे द्वे कण्डिके कात्यायनसूत्रे। महावीरभेदे काण्डभेदेन देवताभेदविधायिके ॥

उग्रश्च मारुती गायत्री विमुखाख्यो मन्त्रोऽग्नौ विनियुक्तः ॥

उग्रश्च भीमश्चेति गायत्री मारुती। उग्रभीमादयो मरुतोऽस्या देवता इत्यर्थः। विमुखाख्यः विमुखसञ्ज्ञकोऽयं मन्त्रः। अग्नौ चयने सप्तममारुतपुरोडाशहोमे विनियोगः। अरण्याध्ययनसामान्यादिहास्य पाठः ॥

तस्मादाग्निक एवास्य ऋषिः(१) ॥

तस्मादस्य मन्त्रस्याग्निक एवाग्निसम्बन्ध्येव ऋषिः। प्रजापतिर्ऋषिः। साध्या वा ऋषय इत्यर्थः ॥

परमेष्ठी प्राजापत्यो वा ॥

अश्मवाश्योपश्चेतिमन्त्रस्य प्रजापतेरपत्यं परमेष्ठी वा ऋषिः ॥

पञ्चिठं० हृदयेनाश्वमेधिकानि तत्रत्य एव ऋषिः(२) ॥

पञ्चिठं० हृदयेनेत्यादीनि अध्यायसमाप्तिपर्यन्तानि यजूंषि आश्वमेधिकानि। अश्वमेधसम्बन्धानि। एषां च तत्रत्य एवाश्वमेधिकः प्रजापतिरेव ऋषिः ॥ पञ्चिठं० हृदयेन, उपंलोहितेनेति द्वे कण्डिके कात्यायनकल्पे। देवतावाचकपदसम्बन्धविधानात्। अरण्येऽध्येयत्वादिह पाठः ॥

सोमस्य स्वाहेतिप्रायश्चित्ताहुतयो द्विचत्वारिं-

(१) एवास्यार्षेरिति काण्वपाठः ॥

(२) तत्रोक्त एवार्षेरिति च काण्वपाठो बोध्यः ॥

च ॥ (१)

सौमस्य वा हैत्याद्याः द्विचत्वारिंशत्संख्याः प्रायश्चित्ताहुतयः। अरण्येऽनूच्यानं हुत्वा द्यावापृथिव्यामुत्तमामाहुतिं जुहोत्येतिश्रौते एषां सर्वेषां विनियोगः॥ ८॥

ईशा वास्यमात्मदेवत्य आनुष्टुभोऽध्यायः॥

ईशा वास्यमिदमित्ययमध्याय आत्मदेवत्यः आनुष्टुभश्च। अनुष्टुप्छन्दस्का एव ऋचोऽस्मिन्सन्तीत्यर्थः। अपवादमाह॥

अनेजदेकं त्रिष्टुप्॥

अनेजदेकमितीयं त्रिष्टुप्॥

सपरि जगती॥ (२)

सपर्यगादितीयं जगती। अग्ने नयेति त्रिष्टुप् प्रागुक्ता। अन्याः सर्वा अनुष्टुभः। अत्र। एवं त्वयि। नवकः। तेनैकाधिका। तद्धावतः। व्यूहः। तद्दूरे। न व्यूहः। तदु सर्वस्य नवकः। स परि पञ्चाक्षरः। तेन द्व्यधिका जगती। ततो भूयो नवकः। यच्च सप्तकः। ये विद्यां। ततो भूयः। नवकः। यच्च विद्यायां। सप्तकः। विद्यां च। व्यूहः॥

वायुरनिलं यजुषी॥

वायुरनिलमितीमे द्वे यजुषी। वायुरनिलममृतमित्येकम्। अथेदमिति द्वितीयम्। प्रथमस्य प्राजापत्या गायत्री। द्वितीयस्य यजुर्बृहती। अथवैकमेवेदं यजुः। न द्वे इति काण्वभाष्ये। तदा व्यूहेन ब्रह्मगायत्री॥

ओ३मिति परमाक्षरस्य योगिनामालम्बभूतस्य परस्य ब्रह्मणः (३) प्रणवाख्यस्य स्थूलादिगुणयुक्तस्य ब्रह्मा ऋ-

(१) अष्टत्रिꣳशत् इति काण्वसर्वानुक्रमपाठः॥

(२) पूषꣳश्चेत्यधिकः पाठः काण्वसर्वानुक्रमे बोध्यः॥

(३) परमस्य ब्रह्मण इति काण्वसर्वानुक्रमपाठो बोध्यः॥

पिच्छन्दो गायत्रं परमात्मा देवता ॥

ओ३मित्यस्य परमाक्षरस्य ब्रह्मा ऋषिः। परमात्मा देवता गायत्रं छन्दः। दैवी गायत्री छन्द इत्यर्थः। कीदृशस्य ओमित्यस्य परस्य ब्रह्मणः प्रणवसंज्ञस्य परब्रह्मणः। कीदृशस्य ब्रह्मणः अस्थूलमनण्वह्रस्व-मित्यादिगुणोपेतस्य। पुनः कीदृशस्य। योगिनामात्मभूतस्य ॥

विनियोगः कल्पकारोक्त इत्युक्तम्। ओ३मित्यस्य च विनियोगः कल्पकारेण नोक्त इति स्वयमेवाह विनियोगमाह ॥

ब्रह्मारम्भे विरामे (१) च यागहोमादिषु शान्तिपु-ष्टिकर्मसु चान्येष्वपि काम्यनैमित्तिकादिषु(२) विनियो-गोऽस्य ॥

अस्य ओङ्कारस्य ब्रह्मारम्भे ब्रह्मणो वेदस्यारम्भे विरामे च विरा-मे वेदसमाप्तौ च विनियोगः। तथा यागहोमादिषु। यागो दर्शपू-र्णमासादयः। होमा जुहोतयः श्रौताः स्मार्ताश्च। देवतोद्देशेन द्रव्य-त्यागो यागः। स एव प्रक्षेपाधिको होम इति तयोर्लक्षणम्। तयोरा-दिषु ओ३इदमग्नये न ममेत्येवं ओङ्कारस्य विनियोगः। तथा शान्ति-पुष्टिकर्मसु शान्तिकर्मसु रोगादिशान्त्यर्थं क्रियमाणेषु कर्मसु पुष्ट्यर्थं अभिलषितसम्पत्त्यर्थं क्रियमाणेषु कर्मसु चास्य विनियोगः। तथा अन्येष्वपि काम्यनैमित्तिकादिषु सर्वेषु कर्मस्वस्य विनियोगः। तथा च आश्वलायनः। दानव्रततपस्वाध्यायजपध्यानसन्ध्योपासनप्राणाया-महोमदेवपित्र्यमन्त्रोच्चारणब्रह्मारम्भादीनि प्रणवमुच्चार्य प्रवर्त्तयेदि-ति। दाल्भ्यपरिशिष्टे च। ब्रह्मयज्ञो जपो होमो देवर्षिपितृकर्म च। अनोंकृत्य कृतं सर्वं न भवेत्सिद्धिकारकमिति ॥ अतश्च मन्त्रमात्रो-च्चारणे आदौ ओङ्कारः प्रयोज्यः ॥

---

(१) प्रयोगहोमादिषु इति काण्वसर्वानुक्रमपाठो बोध्य. ॥

(२) सर्वेषु इत्यधिकः पाठः काण्वसर्वानुक्रमस्येति ॥

अग्ने नय सुपथा राये अस्मान् विश्वानि देव वयुनानि विद्वान् ।

क्रतो स्मर क्लिबे स्मर कृतं स्मर ॥

क्रतो त्रिभिर्यजुर्भिरन्ते यज्ञाम्योगी स्मारयति ॥

क्रतो स्मरेत्यादिभिर्यजुर्भिरन्ते अन्तकाले प्राणप्रयाणसमये योगी यज्ञान् स्मारयति । देव्यो बृहत्यः । हे क्रतो त्वं मां स्मर । योऽग्निर्यज्ञकर्मादारभ्य परिचरितः स मनसि वासनारूपेणावस्थितः सम्बोध्यते । हे क्रतो हे भगवन्नग्ने त्वं मां स्मरेति । अथ वा क्रतुर्यज्ञः सम्बोध्यते । हे क्रतो श्रीभगवन्विष्णो कृतं स्मर । इदानीं तव उपस्थितः प्रत्युपकारस्य काल इत्येवं क्रतुर्यज्ञः सम्बोध्यते । क्लिबे स्वस्ताय लोकाय स्मर, मया यत्कृतं तत् स्मर ॥

अग्ने नयान्ते नमस्कारोक्तिः ॥

अग्ने नयेत्यनेनान्ते अन्तकाले जीवितावसानेऽग्नेर्नमस्कारोक्तिः । नमस्कारवचनम् ॥

हिरण्मयेनादित्योपासनम् ॥ (१)

हिरण्मयेन पात्रेणेत्यस्य सूर्यस्योपासनं कार्यम् । उष्णिगियम् । अष्टाविंशत्यक्षरत्वात् ॥

ओ३मिति नामनिर्देशो ब्रह्मणः ॥

ओ३मित्ययं ब्रह्मणो नामनिर्देशः ॥

खं ब्रह्मेत्याकाशरूपमन्ते ब्रह्म ध्यायेत् ॥

खं आकाशरूपं ब्रह्म इत्यनेन प्रकारेणान्ते अवसानकाले आकाशरूपं ब्रह्म ध्यायेत् ॥ ८ ॥

अथातश्छन्दोदेवताः ॥

अभिधीयन्त इति शेषः । अथानन्तरं छन्दसां गायत्र्यादीनां देव-

(१) इति सूत्रं काण्वसर्वानुक्रमेऽत्रैव ग्रन्थपरिसमाप्तिसूचकं वारद्वयं कथितं कण्वमहर्षिणेति ॥

ता अभिधीयन्ते ॥

गायत्र्या अग्निः ॥

गायत्र्या अग्निर्देवता ॥

उष्णिहः सविता ॥

देवता ॥

अनुष्टुभः सोमः ॥

देवता ॥

बृहत्या बृहस्पतिः ॥

देवता ॥

पङ्क्तेर्वरुणः ॥

देवता ॥

त्रिष्टुभ इन्द्रः ॥

देवता ॥

जगत्या विश्वेदेवाः ॥

देवताः ॥

विराजो मित्रः ॥

देवता ॥

स्वराजो वरुणः ॥

देवता ॥

अतिच्छन्दसः प्रजापतिः ॥

देवता ॥

विच्छन्दसो वायुः ॥

देवता ॥

द्विपदाया: पुरुष: ॥

देवता ॥

एकपदाया ब्रह्मा ॥

देवता ॥

सर्वा ऋच आग्नेय्यः ॥

सर्वा ऋच आग्नेय्योऽग्निदेवता ज्ञेयाः ॥

सर्वाणि यजूंषि वायव्यानि ॥

सर्वाणि यजूंषि वायुदेवत्यानि ज्ञेयानि ॥

सर्वाणि सामानि सौराणि ॥

सूर्यदे तानि ॥

सर्वाणि ब्राह्मणानि च ॥

चकारात्सूर्यदैवतानि ॥

स्वाहाकारस्याग्निः ॥

देवता ॥

वषट्कारस्य विश्वेदेवाः ॥

देवताः ॥

कर्मारम्भे मन्त्राणां देवता वेदितव्याः ॥

कर्मारम्भे कर्मणः प्रारम्भे तत्कर्मोपयोगिनां मन्त्राणां देवता वेदितव्या ज्ञातव्याः ॥

सन्यस्य मनसि देवतां ततो हविर्हूयते ॥

होमात्पूर्वं मनसि देवतां सन्यस्य संचिन्त्य संस्मृत्य ततस्तदनन्तरं हविर्हूयते । तथा च यास्कः । यस्यै देवतायै हविर्गृहीतं स्यात्तां मनसा ध्यायेद्वषट् करिष्यन्निति हविर्ध्यायत इति । देवतामज्ञात्वा हो-

मन्त्रदेवताज्ञानाभावे दोषमाह ॥

देवतामविज्ञाय यो जुहोति देवास्तस्य हविर्न जुषन्ते ॥

देवतामविज्ञाय अज्ञात्वा यो होमं करोति तस्य हविराज्यादिकं देवा न जुषन्ते न सेवन्ते न स्वीकुर्वन्तीत्यर्थः ॥

स्वाध्यायाध्ययनकाले ऽपि मन्त्राणां देवताज्ञाने फलमाह ॥

स्वाध्यायमपि योऽधीते मन्त्रदेवतज्ञः सोऽमुंल्लोके देवैरपीड्यते ॥

यः पुमान्मन्त्रदेवतज्ञः सन् मन्त्राणां देवता जानन् स्वाध्यायमपि वेदमपि अधीते पठति स स्वाध्यायपाठकोऽमुष्मिंल्लोके स्वर्गलोके देवैरपीन्द्रादिभिरपीड्यते स्तूयते। इन्द्रादयोऽपि तस्य स्तुतिं कुर्वन्ति किं पुनरन्य इति ॥

तस्माद्व देवता वेद्या मन्त्रे मन्त्रे प्रयत्नतः ॥

यतो देवतामज्ञात्वा होमं कुर्वन्तो देवा हविर्न जुषन्ते। यस्माच्च देवतां ज्ञात्वा स्वाध्यायाध्यापको देवैरपि स्तूयते। तस्मात्कारणात्प्रयत्नतो मन्त्रे मन्त्रे देवता वेद्या ज्ञेयाः ॥

देवताज्ञानस्य प्रयोजनान्तरमप्याह ॥

मन्त्राणां देवताज्ञानान्मन्त्रार्थमधिगच्छति ॥

मन्त्राणां देवताज्ञानात् मन्त्रार्थं जानाति ॥

मन्त्रार्थज्ञानेन किं भवतीत्यत आह ॥

मन्त्रार्थज्ञानात्तु विधूतपाप्मा नाकमभ्येति ॥

मन्त्रार्थज्ञानात् विधूतपाप्मा निरस्तपापः क्षीणपापः सन् नाकमभ्येति स्वर्गं प्राप्नोति ॥

देवतामज्ञात्वा कर्म कुर्वाणः कर्मणां फलमपि न प्राप्नोतीत्याह ॥

न हि कश्चिदविज्ञाय याथातथ्येन दैवतम् श्रौतानां कर्मणां विप्रः स्मार्त्तानां चाश्नुते फलम् ॥

कश्चिद्विप्रो मेधावी याथातथ्येन परमार्थत्वेन अस्य मन्त्रस्येय-मेव नियता देवता अस्येयं अस्येयं इत्येवं देवता अविज्ञाय अज्ञात्वा श्रौतानां कर्मणां स्मार्त्तानां च कर्मणां फलं न हि अश्नुते। नैव प्राप्नोतीत्यर्थः। हि हेतावधारणे इत्यमरः। अत्रापि हेतौ अवधारणे वा हीति व्याख्येयम्। हि यतः देवतामज्ञात्वा कर्मणां फलं नाश्नुते तस्माद्देवता ज्ञात्वैव कर्माणि कार्याणीति। अवधार-णार्थे तु प्रागेव व्याख्यातम्॥

अनादिष्टमध्वरादौ सवान्तकर्मणि परिभाषितं मन्त्रगणं वक्ष्यामः ॥

अध्वरादौ सवान्तकर्मणि अनादिष्टं परिभाषितं मन्त्रगणं वक्ष्यामः॥

सर्वमाग्नेयं गायत्रं गौतमीयम् ॥

सर्वमग्निदेवतं गायत्रच्छन्दस्कञ्च मन्त्रगणं गौतमीयं जानी-यात्। अग्निदेवतस्य गायत्रच्छन्दस्कस्य मन्त्रगणस्य गौतमऋ-षिर्ज्ञेय इत्यर्थः। अध्वरादिसवान्ते काण्डत्रयविहिते कर्मण्येतद्दव-तैतच्छन्दस्कस्य ऋष्यनादेशे अयमृषिर्ज्ञेय इति भावः। एवमेवाग्रि-माण्यपि सूत्राणि व्याख्येयानि। अथ ऋषिदैवतच्छन्दसामेकैक-स्यानादेशे अन्यतराभ्यामादिष्टाभ्यामन्यतरस्यानादिष्टस्य निर्णयः क्रियते। तद्यथा यद्गायत्रं गौतमीयञ्चानादिष्टदेवताकं तदाग्नेय-मग्निदेवत्यं भवति। यच्चाग्नेयं गौतमीयं चानादिष्टच्छन्दस्कं तद्गायत्रं यच्चाग्नेयं गायत्रं चानादिष्टर्षिकं तद्गौतमीयं भवतीति। एवं वक्ष्यमाणेषु सूत्रेषु द्रष्टव्यम्॥

सर्वं सावित्रमौष्णिहं भारद्वाजम् ॥

अध्वरादौ सत्रान्ते कर्मणि सवितृदेवत्यमुष्णिक्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकं भारद्वाजं जानीयात् ॥

सर्वं सौम्यमानुष्टुभमाथर्वणिकम् ॥

सोमदेवत्यमनुष्टुप्छन्दस्कं सर्वमन्त्रगणमनादिष्टर्षिकमाथर्वणिकं जानीयात् । अथर्वा तस्य ऋषिरित्यर्थः ॥

सर्वं बार्हस्पत्यं बार्हतमाङ्गिरसम् ॥

बृहस्पतिदेवतं बृहतीछन्दस्कं सर्वमन्त्रगणमाङ्गिरसं जानीयात् । तस्याङ्गिरा ऋषिर्ज्ञेय इत्यर्थः ॥

सर्वं वारुणं पाङ्क्तमालम्बायनीयम् ॥

वरुणदेवत्यं पङ्क्तिछन्दस्कं सर्वमन्त्रगणमालम्बायनीयं जानीयात् । तस्यालम्बायन ऋषिर्ज्ञेय इत्यर्थः ॥

सर्वमैन्द्रं त्रैष्टुभं याज्ञवल्कीयम् ॥

इन्द्रदेवत्यं त्रिष्टुप्छन्दस्कं सर्वं मन्त्रगणं याज्ञवल्कीयं विद्यात् । याज्ञवल्क्यस्तस्य ऋषिरित्यर्थः ॥

सर्वमादित्यदेवतं जागतं कौत्सम् ॥

आदित्यदेवतं जगतीछन्दस्कं सर्वमन्त्रगणं कौत्सं विद्यात् । कुत्सस्येदं कौत्सम् । कुत्सोऽस्य ऋषिरित्यर्थः । अध्वरादौ सत्रान्तकर्मणि अनादिष्टं मन्त्रगणमित्येतत्समस्तस्वपि सूत्रेष्वनुवर्तत एव । उदाहरणान्यथाभियुक्तैः प्रयत्नतो गवेषणीयानि ॥

ज्योतिष्टोमे दीक्षाप्रभृति वक्ष्यामः ॥

ज्योतिष्टोमे दीक्षाप्रभृति दीक्षात आरभ्य सर्वाङ्गानां प्रधानानां च ऋषिदेवतछन्दांसि वक्ष्यामः । आमन्त्ररूपाणामपि

दीक्षादिकर्मणामुद्दमीयातिरात्रातानामध्यादिज्ञानारफलविशेषो भवति । तथा च श्रूयते । यद्दे दीक्षन्तेऽग्नाविष्णू एव देवते यजन्तेऽग्नाविष्णू देवते भवन्ति अग्नाविष्णोः सायुज्यꣳ सलोकतां जयन्तीत्यादि स पापीयान् भवति श्रेयाꣳ स आत्मनेत्यन्तम् । अथाहुर्हरिस्वामिनः । एतदपि कर्मसु देवताविद्याब्राह्मणं प्रसन्नमेव । अग्नाविष्णू देवते भवन्त्यभेददर्शिनः । अग्नाविष्णोः सायुज्यꣳ सलोकतां जयन्ति देवदर्शिनः । तत्रापि प्रकृष्टविद्याः सायुज्यं जयन्ति । मन्दविद्याः सलोकतामिति विशेषः । एव मुत्तरत्रापि वाच्यम् ॥

दीक्षायां भृगुरग्नाविष्णू गायत्री ॥

दीक्षायां भृगुऋषिः अग्नाविष्णू देवते गायत्री छन्दः ॥

प्रायणीय आङ्गिरसोऽदितिरुष्णिक् ॥

प्रायणीये आङ्गिरस ऋषिः अदितिर्देवता उष्णिक् छन्दः ॥

क्रये विश्वामित्र सोमोऽनुष्टुप् ॥

सोमक्रये विश्वामित्र ऋषिः सोमो देवता अनुष्टुप्छन्दः ॥

आतिथ्ये वसिष्ठो विष्णुर्बृहती ॥

आतिथ्ये कर्मणि वसिष्ट ऋषिः विष्णुर्देवता बृहती छन्दः ॥

प्रवर्ग्ये कश्यप आदित्यः पङ्क्तिः ॥

प्रवर्ग्ये कश्यप ऋषिः आदित्यो देवता पङ्क्तिश्छन्दः ॥

उपसत्स्वात्रेय उपसद्देवता त्रिष्टुप् ॥

उपसत्स्वात्रेय ऋषिः । उपसद्देवता त्रिष्टुप्छन्दः ॥

अग्नीषोमीयेऽगस्त्यो ऽग्नीषोमौ जगती ॥

अग्नीषोमीयेऽगस्त्यऋषिः अग्नीषोमौ देवते जगती छन्दः ॥

प्रायणीयेतिरात्र आग्निवेश्योऽहोरात्रे अति-जगती ॥

प्रायणीयेतिरात्रे आग्निवेश्य ऋषिः । अहोरात्रे देवते । अति-जगती छन्दः ॥

चतुर्विꣳशत्यहे शौकरायणः संवत्सरः शक्करी ॥

चतुर्विंशत्यहे सौकरायण ऋषिः । संवत्सरो देवता । शक्करी छन्दः ॥

अभिप्लवे षडहे सावर्णोऽर्द्धमासा मासाश्चाति-शक्करी ॥

अभिप्लवे षडहे सावर्ण ऋषिः । अर्द्धमासा मासाश्च देवताः । अतिशक्करी छन्दः ॥

पृष्ठ्ये षडहे सायकायन ऋतवोऽष्टिः ॥

पृष्ठ्ये षडहे सायकायन ऋषिः । ऋतवो देवता । अष्टिश्छन्दः ॥

अभिजिति प्रियव्रतोऽग्निरत्यष्टिः ॥

अभिजिति प्रियव्रत ऋषिः । अग्निर्देवता । अत्यष्टिश्छन्दः ॥

स्वरसामसु सरस्वत्यापो धृतिः ॥

स्वरसामसु सरस्वती ऋषिः । आपो देवता । धृतिश्छन्दः ॥

विषुवति रौहिणायन आदित्योऽतिधृतिः ॥

विषुवति रौहिणायन ऋषिः । आदित्यो देवता । अतिधृति-श्छन्दः ॥

विश्वजिति सौभर इन्द्रः कृतिः ॥

विश्वजिति सौभर ऋषिः । इन्द्रो देवता । कृतिश्छन्दः ॥

गोषायुषोर्वाकलिर्मित्रावरुणौ प्रकृति: ॥

गोषायुषेर्वाकलिर्ऋषि: । मित्रावरुणौ देवते । प्रकृतिश्छन्द: ॥

द्व्यहराव्र आचार्यो विश्वेदेवा आकृति: ॥

द्व्यहरात्रे आचार्यं ऋषि: । विश्वेदेवा देवता: । आकृतिश्छन्द: ॥

द्व्यहरात्रिके पृष्ठ्ये षडहे भाल्लवेयो दिशो विकृति: ॥

द्व्यहरात्रिके द्व्यहरात्रसम्बन्धिनि पृष्ठ्ये षडहे भाल्लवेय ऋषि: । दिशो देवता: । विकृतिश्छन्द: ॥

छन्दोमेषु शौल्वायन इमे लोका संकृति: ॥

छन्दोमेषु शौल्वायन ऋषि । इमे लोका देवता: । संकृतिश्छन्द: ॥

दशमेऽहनि पराशर: संवत्सरोऽभिकृति: ॥

दशमेऽहनि अविवाक्ये पराशर ऋषि: । संवत्सरो देवता । अभिकृतिश्छन्द: ॥

महाव्रते शैलिन: प्रजापतिरुत्कृति: ॥

महाव्रते शैलिन ऋषि: । प्रजापतिर्देवता । उत्कृतिश्छन्द: ॥

उदयनीयेतिरात्रे भौवायनो वायुश्छन्दांसि सर्वाणि ॥

उदयनीये अतिरात्रे भौवायन ऋषि: । वायुर्देवता । सर्वाणि गायत्र्यादीन्युत्कृतिपर्यन्तानि छन्दांसि ॥ १२ ॥

ऋषिभिरुपलक्षितं वाक्यम् ॥

ऋषिभि: परमेष्ठ्यादिभिर्मन्त्रवाक्यमुपलक्षितं ज्ञापितं विद्यमानमेव प्रकटीकृतम् ॥

ऋषयश्छन्दोभिरुपलक्षिताः ॥

परमेष्ठ्यादय ऋषयश्च तत एतं परमेष्ठी प्रजापत्यो यज्ञमपश्यद्दर्शपूर्णमासौ, इत्यादिभिश्छन्दोभिर्वेदवाक्यैरुपलक्षिताः ज्ञापिताः ॥

देवता मन्त्रवर्णादृग्यजुषयोर्विनियोगतश्च विज्ञेयाः ॥

ऋग्यजुषयोर्मन्त्रवर्णादृग्यजुषयोर्विनियोगाच्च मन्त्राणां देवता ज्ञेयाः । मन्त्रवर्णात्तावत् । इन्द्रो वीर्यमक्षणोदित्येवमादौ । विनियोगाच्च । यथा निवेशनः संगमनो वसूनामित्येन्द्र्या गार्हपत्यमुपतिष्ठत इति । अत्र गार्हपत्योपस्थाने विनियोगादस्या गार्हपत्योऽग्निर्देवतेति ज्ञेयम् ॥

सर्वमेतच्छन्दो दैवतमार्षं च विज्ञाय यत्किञ्चिज्जपहोमादि करोति तस्य फलमश्नुते ॥

एतच्छन्दो दैवतमार्षञ्च विज्ञाय विशेषतो ज्ञात्वैवास्य मन्त्रस्यायं ऋषिः इयं देवता इदं छन्दः इत्येवं ज्ञात्वैव यत्किञ्चिज्जपहोमयागाध्ययनाध्यापनयाजनादिकं कर्म करोति तस्य कर्मणः फलमश्नुते प्राप्नोति नान्यथा ॥

ब्रह्मयज्ञारम्भे यथाविधि स्नात्वा छन्दःपुरुषमेनोनिर्णोदनꣳ शरीरे न्यसेत् ॥

ब्रह्मयज्ञारम्भे स्वाध्यायारम्भे यथाविधि अथातो नित्यस्नानं मध्याह्नावत्यर्थांतप्रकारेण स्नात्वा स्नानं कृत्वा छन्दःपुरुषं वेदपुरुषमेनोनिर्णोदनं पापक्षयकरं सर्वोपद्रवनाशनं शरीरे न्यसेत् । स्वदेहे न्यसेत्॥

कीदृशश्छन्दःपुरुष इत्यपेक्षायां तत्स्वरूपमाह ॥

तिर्यग्बिलश्चमस ऊर्ध्वबुध्नः ॥

तस्य छन्दःपुरुषस्य तिर्यग्बिलस्तिर्यग्छिद्रमिदमेव शिरश्चमसः चम्यतेऽश्यतेऽनेन रसा इति चमसः कीदृशः ऊर्ध्वबुध्नः । ऊर्ध्वबन्धनः । उपरि व्यवस्थितमेतद्बन्धनमस्य शरीरस्य । एतद्वियोगे हि विस्रस्यते शरीरमनेनास्य शिर उक्तम् । एवंविधमेतच्छन्दःपुरुषस्य शिरः । तस्य मुखे न्यासः कर्तव्यः । तिर्यक् बिलं मुखं यस्य स तथा । ऊर्ध्वं बुध्नं यस्य स तथा । श्रुतिरप्यमुमेवार्थमाह । अर्वाग्बिलश्चमस ऊर्ध्वं बुध्नमितीदं तच्छिर एष ह्यर्वाग्बिलश्चमस ऊर्ध्वबुध्न इति ॥

तथाक्षीणी गौतमभरद्वाजौ ॥

तस्य छन्दःपुरुषस्य गौतमभरद्वाजावृषी ज्ञेयौ । तत्र न्यासे प्रकारद्वयम् । मुखं स्पृष्ट्वा तिर्यग्बिलश्चमस ऊर्ध्वबुध्नं, इति पठितव्यम् । अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाविति । एकोऽयं प्रकारः । मुखं स्पृष्ट्वा तिर्यग्बिलाय चमसायोर्ध्वबुध्नाय नमः । अक्षिणी स्पृष्ट्वा गौतमभरद्वाजाभ्यां नम इति । ततश्च यथारुच्यनुष्ठेयम् । एवं वक्ष्यमाणेष्वपि प्रकारद्वयं द्रष्टव्यम् ॥

श्रोत्रे विश्वामित्रजमदग्नी ॥

तस्य छन्दःपुरुषस्य विश्वामित्रजमदग्नी श्रोत्रे कर्णौ ॥

नासिके वशिष्ठकश्यपौ ॥

तस्य छन्दःपुरुषस्य वसिष्ठकश्यपौ नासिके ज्ञेये ॥

वागत्रिः ॥

अत्रिर्महर्षिस्तस्य वाग् ज्ञेया ॥

गायत्रीं छन्दाग्निदेवतां शिरसि विन्यसेत् ॥

ततो गायत्रीं छन्दाग्निदेवतां शिरसि विन्यसेत् । गायत्र्यै नमोऽग्नये नम इति ॥

एवमेवोष्णिहर्ठं० सवितारं ग्रीवासु ॥

विन्यसेदिति शेषः । उष्णिहं छन्दः सवितारं देवतामेवमेव ग्रीवासु विन्यसेत् । उष्णिहे नमः सवित्रे नम इति ॥

अनूके बृहतीं बृहस्पतिम् ॥

बृहतीछन्दो बृहस्पतिदेवताश्चानूके पृष्ठवंशे विन्यसेत् । बृहत्यै नमो बृहस्पतये नम इति ॥

बाह्वोर्बृहद्रथन्तरे द्यावापृथिवी ॥

बृहद्रथन्तरे छन्दसी बाह्वोर्न्यसेत् । बृहद्रथन्तराभ्यां नमो द्यावापृथिवीभ्यां नम इति ॥

मध्ये त्रिष्टुभमिन्द्रम् ॥

मध्ये उदरे त्रिष्टुभं छन्द इन्द्रं देवतां न्यसेत् । त्रिष्टुभे नम इन्द्राय नम इति ॥

श्रोण्योर्जगतीमादित्यम् ॥

जगतीं छन्द आदित्यं देवतां श्रोण्योः कट्योर्न्यसेत् । जगत्यै नम आदित्याय नम इति ॥

मेढ्रे ऽतिच्छन्दसं प्रजापतिम् ॥

अतिच्छन्दसं छन्दः प्रजापतिं देवतां मेढ्रे शिश्ने न्यसेत् । अतिच्छन्दसे नमः प्रजापतये नम इति ॥

पायौ यज्ञायज्ञियं वैश्वानरम् ॥

यज्ञायज्ञियं छन्दो वैश्वानरं देवता पायावपाने न्यसेत् । यज्ञायज्ञियाय नमो वैश्वानराय नम इति ॥

ऊर्वोरनुष्टुभं विश्वान्देवान् ॥

अनुष्टुभं छन्दो विश्वान्देवान् देवता ऊर्वोः सक्थ्नोर्न्यसेत् । अनुष्टुभे नमो विश्वेभ्यो देवेभ्यो नम इति ॥

अष्ठीवतोः पङ्क्तिर्मरुतः ॥

पङ्क्तिश्छन्दो मरुतो देवता अष्ठीवतोर्जान्वोर्न्यसेत् । पङ्क्तये नमो मरुद्भ्यो नम इति ॥

पादयोर्द्विपदां विष्णुम् ॥

द्विपदां छन्दो विष्णुं देवताञ्च पादयोर्न्यसेत् । द्विपदाय नमो विष्णवे नम इति ॥

प्राणेषु विच्छन्दसं वायुम् ॥

प्राणेषु चक्षुःश्रोत्रादिषु सर्वेषु प्राणेषु प्राणायतनेषु विच्छन्दसं वायुञ्च न्यसेत् । विच्छन्दसे नमो वायवे नम इति ॥

न्यूनातिरिक्तेष्वङ्गेषु न्यूनाक्षरं छन्दो आपो देवतेति ॥

न्यूनाक्षरं छन्द आपो देवता न्यूनातिरिक्तेष्वङ्गेषु न्यसेत् । न्यूनाक्षराय छन्दसे नमोऽद्भ्यो नम इति च ॥

एवठं॰ सर्वाङ्गेषु योजयित्वा वेदमयः सम्पद्यते ॥

एवमनुना प्रकारेण सर्वाङ्गेषु सर्वेषु शिरोग्रीवादिष्ववयवेषु योजयित्वा छन्दोदैवतन्यासं कृत्वा स्वयं वेदमयः सम्पद्यते वेदरूपो भवति ॥

तथा शापानुग्रहसमर्थो भवति ॥

तव धनादिहानिर्भवत्वित्येवमादिरूपशापेऽक्षणायां तथा तव पुत्रधनविद्यादिसम्पत्तिर्भवत्वेवमादिरूपे अनुग्रहे शोभनेक्षणायाञ्च समर्थो भवति ॥

ब्राह्मं तेजश्च वर्द्धते ॥

अस्य ब्राह्मं तेजो ब्रह्मवर्चसं वर्द्धते ॥

न कुतश्चिद्भयं विन्दति ॥

अयं कुतश्चिदपि चौरव्याघ्रादेर्भयं न विन्दते न प्राप्नोति ॥

ऋङ्मयो यजुर्मयः साममयस्तेजोमयो ब्रह्ममयोऽमृतमयः सम्भूय ब्रह्मैवाभ्येति ॥

ऋगादिरूपो भूत्वा ब्रह्मैवाभ्येति मुक्तिं प्राप्नोतीत्यर्थः ॥

तस्मादेतन्नाब्रह्मचारिणे नातपस्विने नासंवत्सरोषिताय नाप्रवक्त्रे ऽनुब्रूयात् ॥

तस्मात्कारणादेतत्पूर्वोक्तसर्वानुक्रमणमब्रह्मचारिणे न ब्रूयात् । अतपस्विने च न ब्रूयात् । तपो विद्यते यस्यासौ तपस्वी अतपस्विने न ब्रूयात् । तथा ऽसंवत्सरोषिताय यः संवत्सरं समीपे नोषितो न स्थितस्तस्मा एतन्न ब्रूयात् । तथा ऽप्रवक्त्रे यः स्वयं ज्ञात्वाऽन्यान्न पाठयति तस्मै च नानुब्रूयात् ॥

अनेनाधीतेन चान्द्रायणाब्दफलमवाप्नोति ॥

अनेन सर्वानुक्रमणिकाख्येन ग्रन्थेनाधीतेन पठितेन चान्द्रायणाब्दस्य फलमवाप्नोति प्राप्नोति । चान्द्रायणव्रतसम्बन्धी अब्दः संवत्सरश्चान्द्रायणाब्दः । संवत्सरं चान्द्रायणव्रताचरणेन यावत्फलं तावदेतद्ग्रन्थाध्ययनमात्रेण प्राप्नोतीत्यर्थः ॥

अनेन च सम्यग्ज्ञातेन ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोत्याप्नोति ॥

अनेन च प्रागुक्तेन ग्रन्थेन सम्यक्ज्ञानेन यथार्थं बुद्धेनावगतेन ब्रह्मणः सायुज्यꣳ सलोकतामाप्नोति । अत्रापि प्रकृतविद्यः सायुज्यं प्राप्नोति मन्दतरः सलोकतामिति विशेषः । द्विरभ्यासोऽध्यायपरिसमाप्तिसूचनार्थः ॥

इति श्रीविरम्बिविक्रमसम्राट्स्थपतिविंशत्क्रतुकृत्सहायाग्निकश्रीप्रजापतिसुतसहायाग्निकश्रीदेवकृते ऽनुक्रमणीव्याख्याने चतुर्थोऽध्यायः ॥

अथ छन्दांसि ॥

अभिधीयन्त इति शेषः । अथानन्तरं छन्दांस्यभिधीयन्ते । अथ तेषां छन्दसां नामान्याह ॥

गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यतिजगतीशक्वर्यतिशक्वर्यष्ट्यत्यष्टिधृत्यतिधृतयः कृतिप्रकृत्याकृतिविकृतिसङ्कृत्यभिकृत्युत्कृतयः ॥

गायत्र्यादय उत्कृतिपर्यन्ता एकविंशतिशब्दाश्छन्दसां सञ्ज्ञाः । सञ्ज्ञाकरणं समिधाग्नेय्यचतस्रो गायत्र्य इत्यादौ संव्यवहारार्थम् । अथैतेषामेव छन्दसामक्षरसंख्यामाह ॥

चतुर्विंशत्यक्षरादीनि चतुरुत्तराणि ॥

एतानि गायत्र्यादीन्युत्कृतिपर्यन्तानि एकविंशतिसंख्यानि छन्दांसि चतुर्विंशत्यक्षरादीनि चतुर्विंशत्यक्षरात्मकं गायत्रीसञ्ज्ञं छन्द उपक्रम्य चतुरुत्तराणि भवन्ति। पूर्वपूर्वछन्दोऽपेक्षया उत्तरमुत्तरं छन्दश्चतुर्भिश्चतुर्भिरक्षरैरधिकं भवतीत्यर्थः। तथाहि। गायत्री चतुर्विंशत्यक्षरा । तदपेक्षया चतुर्भिरक्षरैरधिकोष्णिगष्टाविंशत्यक्षरा । उष्णिगपेक्षयानुष्टुप्चतुर्भिरक्षरैरधिका द्वात्रिंशदक्षरा। अनुष्टुबपेक्षया चतुर्भिरक्षरैरधिका बृहती षड्त्रिंशदक्षरा । एवमेव प्रतिच्छन्दः पूर्वपूर्वापेक्षया चतुरक्षरवृद्धिर्ज्ञेया । चत्वारिंशदक्षरा पङ्क्तिः । चतुश्चत्वारिंशदक्षरा त्रिष्टुप् । अष्टाचत्वारिंशदक्षरा जगती । द्वापञ्चाशदक्षराऽतिजगती । षट्पञ्चाशदक्षरा शक्वरी । षष्ट्यक्षराऽतिशक्वरी । चतुःषष्ट्यक्षरा अष्टिः । अष्टषष्ट्यक्षरा अत्यष्टिः । द्वासप्तत्यक्षरा धृतिः । षड्सप्तत्यक्षरा ऽतिधृतिः । अशीत्यक्षरा कृतिः । चतुरशीत्यक्षरा प्रकृतिः । अष्टाशीत्यक्षरा आकृतिः । द्वानवत्यक्षरा

विकृतिः। षण्णवत्यक्षरा सङ्कृतिः। शताक्षराऽभिकृतिः। चतुरधिकशताक्षरोत्कृतिरिति। एतेषामुदाहरणानि प्रागेव दर्शितानि॥

ऊनाधिकेनैकेन निचृद्भुरिजौ॥

पूर्वोक्तानां नियताक्षराणां गायत्र्यादीनामुत्कृतिपर्यन्तानां छन्दसामेकेनाक्षरेणोनेन न्यूनेनैकेनाधिकेनातिरिक्तेन यथाक्रमं निचृद्भुरिगित्येते सञ्ज्ञे भवतः। तद्यथा। गायत्री चतुर्विंशत्यक्षरा सैकेनाक्षरेणोना त्रयोविंशत्यक्षरा निचृदित्युच्यते। सैवैकाधिका पञ्चविंशत्यक्षरा भुरिगित्युच्यते। एवमनुष्टुबाद्युत्कृतिपर्यन्तानां ज्ञेयम्॥

द्वाभ्यां विराट्स्वराजौ॥

सर्वेषां छन्दसां द्वाभ्यामक्षराभ्यां न्यूनाभ्यां विराट्सञ्ज्ञा भवति। द्वाभ्यामक्षराभ्यामधिकाभ्यां स्वराट्सञ्ज्ञा भवति। अत्रोनाधिकेनेत्यनुवर्तते। तदूनाधिकाभ्यामिति विपरिणम्य द्वाभ्यामित्यनेन सम्बध्यते। तद्यथा द्वाविंशत्यक्षरा गायत्री विराट्। षड्विंशत्यक्षरा स्वराट्। एवं त्रिंशदक्षरा विराडनुष्टुप्। चतुस्त्रिंशदक्षरा स्वराट्। षड्विंशत्यक्षरा विराडुष्णिक्। त्रिंशदक्षरा स्वराडुष्णिगिति। एवमुत्कृतिपर्यन्तेषूह्यम्। अत्र शास्त्रे निचृदादिसञ्ज्ञाचतुष्टयस्य क्वचिदप्यनुक्तिर्लाघवार्था। अन्यथा सर्वत्र न्यूनाधिकाक्षरत्वस्य विद्यमानत्वेन निचृदादिसञ्ज्ञोपबन्धे सति शास्त्रं गुरुतरं स्यादतः स्वयमेवोहित्वा यथासम्भवमेतत्सञ्ज्ञाचतुष्टयं ज्ञेयम्॥

अथ न्यूनाक्षरेष्वक्षरपूरणोपायमाह॥

पादपूरणार्थन्तु क्षैप्रसंयोगैकाक्षरीभावान्व्यूहेत्॥

न्यूनाक्षरेषु पादेषु पादपूरणार्थं क्षैप्रसंयोगानेकाक्षरीभावांश्च

व्यूहेत् । क्षिप्रे संहितायां भवः सन्धिः क्षैप्रः । क्षैप्रः संयोगो यकारवकारसंयोगः । अपसंयोग इत्यपरे । तदुक्तम् ।

समानाक्षरमन्तस्थां स्वामकन्थं स्वरोदयम् ।

न समानाक्षरे स्वे स्वे ते क्षैप्राः प्राकृतोदयाः ॥ इति ।

ते सन्धयः क्षैप्रा इत्यर्थः । एकः पूर्वपरयोरित्यस्मिन्नधिकारे यः सन्धिराहुणो वृद्धिरेचीत्यादिभिर्द्वयोर्वर्णयोः स्थाने य एकादेशः स एकाक्षरीभावः । अनेकाक्षरस्यैकाक्षरभाव एकाक्षरीभावः । एतान्पादपूरणार्थं व्यूहेत् । पृथक्कुर्यात् । तदुक्तम् । व्यूहेदेकाक्षरीभावान्पादेषूनेषु सम्पदे । ऊनेषु पादेषु सम्पदे सम्पदर्थं एकाक्षरीभावान् सन्धीन्व्यूहेत् । पृथक्कुर्यादित्यर्थः । तथा । क्षैप्रवर्णांश्च संयोगाव्यवेयात्सदृशैः स्वरैरिति । अस्यार्थः । क्षैप्रवर्णान् संयोगानन्तस्थासंयोगानित्यर्थः । व्यवेयात् । व्यवधानं कुर्यात् । कैः सदृशैः समानस्थानैर्वर्णैः । तद्यथा । त्रियम्बकं यजामहे । तत्सवितुर्वरेणियमिति । अत्र यकारस्य समानस्थानेनेकारेण व्यवायेन पादपूरणम् । तथा दुवंनः सर्पिरासुतिरिति । सुवर्णभिषीहजनस्य गोपामिति । अत्र वकारस्य समानस्थानेनोकारेण व्यवायः । पिङ्गलोऽपि । पादपूरणादिपूरण इति यकारस्य समानस्थानेनेकारेण व्यवायमाह । आदिशब्देनोवादि गृह्यते । क्वचिद्रेफमपि व्यूहेत् । अयं समानस्थानैः स्वरैर्व्यवायः स्वाभाविकेष्वेव यकारवकारसंयोगेषु भवति । यथा समष्वपर्वाश्वरन्ति नो नर इति । यथादेशेन कृतेषु यकारवकारसंयोगेषु तु अप्सु अन्तरमृतमिति वामं भयति पश्वर इत्येव पदप्रकृत्या व्यूहः कर्त्तव्यः । यकारवकारसंयोग एवायं व्यवाय इष्यते । रेफलकारसंयोगयोस्तु नेष्यत इति प्रातिशाख्यभाष्ये । गायत्रविधाने । प्राकृतसन्ध्ययोः सन्देहे सन्ध्यो विकृषः । सदृशयोस्तु परो विकृष इति । यत्र तु द्विपादिव्यूहस्थानानि तत्र पूर्वव्यूहेनैव पाद-

पूरणे सिद्धे द्वितीयादौ न व्यूहेत् । अथैकाक्षरीभावव्यूहोदाहरणानि । प्र वृता जयता नर, इत्यत्रादुण इत्येकादेशस्य गुणस्य व्यूहेन पूरणम् । प्र ऐतु ब्रह्मणस्पतिरित्यत्रैत्येधत्यूठ्स्विति वृद्धेरेकादेशस्य व्यूहः । परिमाग्ने दुश्चरितादित्यत्राकः सवर्णे दीर्घ इत्यनेन कृतस्यैकादेशस्य दीर्घस्य व्यूहः । अधिब्रवन्तु ते अवन्त्वस्मानित्यत्रैङः पदान्तादिति एकादेशस्य पूर्वरूपस्य व्यूहः । छन्दोगपरिशिष्टे ऽपि । सर्वछन्दःस्वेकेन पञ्चाक्षरेण न्यङ्कुमती भवत्यथैकाक्षरहीना निचृदेकाधिका भुरिक् । द्व्यूना विराट् । द्व्यधिका स्वराडल्पीयोमध्या पिपीलिकमध्या भूयोमध्या यवमध्येति । यत्राभ्यां यकारवकारविकर्षेण न्यूनानि छन्दांसि पूरयेत्तांश्छन्देन च नदश्च वर्जम्। परप्रकृत्या च । त्वयश्छे न्यूनत्वे तु ग्रन्थपूरण इति । तदेवं यत्र व्यूहः सम्भवति तत्र व्यूहेन पूरणम् । यत्र तु व्यूहेनापि न पूर्यन्ते तत्र निचृद्भुरिग्विराट्स्वराडादिसञ्ज्ञा । यत्र तु सन्देहो जायते यथा कश्चिद्द्वात्रिंशदक्षराणि भवन्ति । तत्र किमियं बृहती वा द्व्यधिका । अथवा पङ्क्तिर्द्व्यूनेति । तत्र विकल्पो बृहती वा पङ्क्तिर्वेति । तथा च सूत्रकारः । कृतवो बृहती पङ्क्तिर्वा । उपज्ञं जगती त्रिष्टुब्वा । चतुस्त्रिंशं ऽम्महर्देवत्या पङ्क्तिस्त्रिष्टुब्वेति । एवं पिङ्गलोक्तेष्वपि छन्दःसूक्तिपर्यन्तेषु सन्देहे विकल्पो द्रष्टव्यः । अधिकाक्षरं पूर्वं छन्दो न्यूनाक्षरञ्चोत्तरमिति । तथा ॥

अक्षराण्येव सर्वत्र निमित्तं बलवत्तरम् ।

त्रिष्टाद्विप्रतिपन्नानां पादवृत्ताक्षरैस्तथा ॥ इति ।

अस्यार्थः । पादैर्वृत्तैरक्षरैश्च विप्रतिपन्नानामृचां सर्वत्र बलवत्तरं निमित्तमक्षराण्येव विद्यात् । यथा मोठुष्टमेति पादैर्विप्रतिपन्ना अक्षरैस्त्रिष्टुब्व्यवसीयते । यथैषा ते अग्ने समिदिति वृत्तेन विप्रतिपन्ना ऽक्षरैरनुष्टुब्व्यवसीयते । यदा काचित्षड्विंशत्यक्षरा

ष्णम्भवति । तत्र सन्देहः किमियं स्वराट् गायत्री उत विराडुष्णि-गिति । एवं सर्वछन्दःसु संशय उह्यः । तदा निर्णयोपायमाह पिङ्गलः । आदितः सन्दिग्धे । सन्दिग्धे छन्दस्यादितः प्रथमपादा छन्दो निश्चेतव्यम् । यदा प्रथमः पादोऽष्टाक्षरस्तदा सा गायत्री । यदा द्वादशस्तदोष्णिगिति । एवं सर्वेषु । तथा दैवतादितः । सन्दिग्धं छन्दो देवतादिभिर्निश्चेतव्यम् । तद्यथा । यदा सन्दिग्धे छन्दस्यग्निर्देवता भवति तदा सा गायत्री । यदा सविता तदो-ष्णिक् । यदा सोमस्तदानुष्टुबित्यादि ॥

आद्ये तु सप्तवर्गे पादविशेषात्सञ्ज्ञाविशेषः ॥

तुशब्दोऽवधारणे । गायत्र्यादीनामेकविंशतिसंख्यानां छन्दसां त्रयः सप्तवर्गाः । तेषां त्रयाणां सप्तवर्गाणां मध्ये आद्य एव सप्तवर्गे गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगतीत्येतेषां सप्तानां छन्दसां वर्गे समूहे पादविशेषात् पादानां चतुरक्षरपञ्चाक्षरषडक्ष-रसप्ताक्षराष्टाक्षरनवाक्षरत्वादिरूपविशेषात् सञ्ज्ञाविशेषाः पद-पङ्क्त्यादयो भवन्ति न द्वितीयतृतीयसप्तवर्गयोः ॥

##ताननुक्रामन्त एवोदाहरिष्यामः ॥

तान्प्रकृतसञ्ज्ञाविशेषाननुक्रामन्त एव ऋष्याद्यनुक्रमणं कुर्वन्त एवोदाहरिष्यामः । पदपङ्क्तौ नवमः । अन्त्या तु पादनिचृत् । उप-रिष्टाज्ज्योतिःषष्ठीत्येवम् ॥

विराड्रूपा विराट्स्थानाश्च बह्वृचा अपि त्रिष्टुभ एव ॥

नवको वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विरा-ट्स्थानेति । एकादशिनस्त्रयोऽष्टकश्च विराड्रूपेति च वक्ष्यति । तत्रेदमुच्यते । त्रिष्टुभश्चतुश्चत्वारिंशदक्षरत्वाद्विराड्रूपाया एकचत्वा-

त्रिंशदक्षरत्वाद्विराट्त्वामाव। एकोनचत्वारिंशदक्षरत्वाच्च त्वारिंशदक्षरत्वाद्वा त्रिष्टुब् न भविष्यतीति मन्दायामाह। विराड्रूपा विराट्स्थानाश्च ऋचो बह्वना अपि बहुभिरक्षरैरूना अपि त्रिष्टुभ एव। ऊनाक्षरत्वात्त्रिष्टुभो न भवन्तीति शङ्का न कार्येत्यर्थः। किं च स्यात्। एकोनचत्वारिंशदक्षराया त्रिष्टुप्पङ्क्तित्वं चत्वारिंशदक्षरायाः पङ्क्तित्वमेकचत्वारिंशदक्षराया भुरिक्पङ्क्तित्वं स्यात् तस्मा भुरिक्त्वेवमर्थमस्यारम्भः॥

इत्युद्देशः॥

इतिशब्दः प्रकारे। इति अनेन प्रकारेण सर्वछन्दसामुद्देशः। एकद्विबह्वक्षरैरूनानामपि स्वनाम्नैव सङ्कीर्तनम्। सैव सञ्ज्ञा ज्ञेयेत्यर्थः। उद्दिश्यते ऽभिधीयते ऽनेनेत्युद्देशः सञ्ज्ञा। यथा विराड्रूपादीनां न्यूनाक्षराणामपि त्रिष्टुबेव। एवमितरेषामपि छन्दसां न्यूनाधिकत्वेऽपि तत्तच्छन्दस्त्वमेव भवति। न चाक्षरेण छन्दांसि वियन्ति न द्वाभ्यामिति श्रुतेः। तथा गायत्र्याश्छन्दो व्येत्येकस्मान्न द्वाभ्यामिति श्रुतेश्च। यथा त्रयः सप्तकाः पादा त्रिवृदिति त्रिभिरूनापि गायत्र्येव॥

तत्र दशैकादशद्वादशाक्षराणां वैराजत्रैष्टुभजागता इति सञ्ज्ञाः॥

तत्र छन्दसां पादविशेषेण सञ्ज्ञाविशेषाभिधाने दशाक्षरैकादशाक्षरद्वादशाक्षराणां पादानां यथाक्रमं वैराजत्रैष्टुभजागता इति तिस्रः सञ्ज्ञाः। दशाक्षराणामित्यत्र पादानामिति शेषः। अक्षरशब्दस्य प्रत्येकं सम्बन्धः। तेन दशाक्षरस्य पादस्य वैराज इति सञ्ज्ञा। एकादशाक्षरस्य त्रैष्टुभ इति। द्वादशाक्षरस्य जागत इति। सञ्ज्ञाकरणं संव्यवहारार्थम्। संव्यवहारश्च गवकी

वैराजत्रैष्टुभजागतेति त्रिभागलोपार्थमित्येवमादौ । पिङ्गलोऽपि । पादः । इत्यादिपूरणम् । गायत्र्या वसवः । जगत्या आदित्याः । विराजो दिशः । त्रिष्टुभो रुद्रा इत्यादि । दशाक्षरा विराट् । एकादशाक्षरा त्रिष्टुप् । द्वादशाक्षरा वै जगतीत्यादिश्रुतिरपि पादाक्षराभिप्रायेणैव ॥

अनादेशे ऽष्टाक्षराः पादाः ॥

अनादेशे ऽक्षरसङ्ख्यानुक्तौ पादा अष्टाक्षरा भवन्ति ॥

चतुष्पदा ऋचः ॥

चकारादनादेशे ऽनुक्तपादसङ्ख्या ऋचश्चतुष्पदा भवन्ति ॥

प्रथमं छन्दस्त्रिपदा गायत्री ॥

चतुर्विंशत्यक्षरं प्रथमं छन्दो गायत्री । सा च त्रिपदा भवति । त्रयः पादा यस्याः सा त्रिपदा । पादस्य लोपोऽहस्त्यादिभ्य इत्यन्तलोपः । टाबृचीति टाप् । पादः पत् । अस्या उदाहरणं समिधाग्निं दुवस्यतेत्यादिकम् । अस्या अष्टाक्षरास्त्रयः पादाः । तथा च छन्दोगानाम् । त्रयोऽष्टकाः स्वभावस्थिति । गायत्रीति प्रागुष्णिहोऽधिकारः ॥

पञ्चकाश्चत्वारः षट्कश्चैकश्चतुर्थश्चतुष्को वा पदपङ्क्तिः ॥

गायत्रीत्यनुवर्तते । पञ्चाक्षराणि परिमाणमस्यासौ पञ्चकः । सङ्ख्याया अतिशदन्तायाः कन् । एवं षट्कादयोऽपि । पञ्चकाः पञ्चाक्षराश्चत्वारः पादाः । एकः षट्कः षडक्षरः । अथवा चतुर्थः पादश्चतुष्कश्चतुरक्षरः सा षड्विंशत्यक्षरा पञ्चविंशत्यक्षरा वा पदपङ्क्तिर्गायत्री । अध्वाध्वन इति प्रथमपक्षस्योदाहरणम् । चतुर्थश्चतुष्को वेत्यस्योदाहरणमग्ने तमद्येति । तदुक्तं पिङ्गले । पदपङ्क्तिः पञ्च । चतुष्कषट्कौ चयवेति ॥

षट्सप्तैकादशा उष्णिग्गर्भा ॥

गायत्रीत्येव। यस्याः षडक्षरसप्ताक्षरैकादशाक्षराः क्रमेण त्रयः पादाः सा चतुर्विंशत्यक्षरोष्णिग्गर्भा गायत्री भवति। उदाहरणमृग्वेदे। ता मे अश्व्यानाम् ॥

त्रयः सप्तकाः पादनिचृत् ॥

यस्या गायत्र्यास्त्रयः सप्ताक्षराः पादा सैकविंशत्यक्षरा पादनिचृत्संज्ञा गायत्री। अभीषुणः सखीनामित्युदाहरणम्। तथा च पिङ्गलः। क्वचित्त्रिपाहषिभिः। सा पादनिचृदिति। त्रिपात् पादनिचृत्संज्ञका सप्ताक्षरैरिति छन्दोगानाम्। अत्र पिङ्गले विशेषः। आद्यश्चतुष्पाद्दतुभिरिति। आद्यं प्रथमं गायत्रीसञ्ज्ञं छन्द ऋतुभिः षडक्षरैश्चतुर्भिः पादैश्चतुष्पाद्भवति। छन्दोगानां च। चतुष्पाद्गायत्री षडक्षरैरिति ॥

मध्यमः षट्कश्चेदतिनिचृत् ॥

यस्या आद्यतृतीयौ सप्ताक्षरौ मध्यमः षट्कः षडक्षरः सा विंशत्यक्षराऽतिनिचृद्गायत्रीति सञ्ज्ञा। उदाहरणमृग्वेदे। पुरूतमं पुरूणामिति ॥

दशकश्चेद्यवमध्या ॥

गायत्रीत्यनुवर्त्तते। यस्या गायत्र्याः प्रथमतृतीयौ सप्ताक्षरौ पादौ मध्यमो दशाक्षरः सा चतुर्विंशत्यक्षरा यवमध्या गायत्री। उदाहरणम्। सुसन्दृशो वसूनामिति। तदुक्तम् ॥

आद्ये पादे तृतीये च सप्तके मध्यमो यदि।
दशाक्षरः सा गायत्री यवमध्या प्रकीर्त्तितेति ॥

यस्यास्तु षट्कसप्तकाष्टकाः सा वर्द्धमाना ॥

गायत्रीत्यनुवर्त्तते। यस्या आद्यः पादः षडक्षरो द्वितीयः

समाक्षरस्तृतीयोऽष्टाक्षरः सा वर्द्धमाना गायत्रीति सञ्ज्ञा भवति। उदाहरणम्। अग्निमद्य्रैमम्। षट् सप्ताष्टौ च वर्द्धमानेति छन्दोगानाम्॥

विपरीता प्रतिष्ठा॥

या पूर्वोक्तविपरीता प्रथमोऽष्टाक्षरो द्वितीयः समाक्षरस्तृतीयः षडक्षर इत्येवंविधा सैकविंशत्यक्षरा प्रतिष्ठासञ्ज्ञा गायत्री। उदाहरणम्। त्वमग्ने व्रतपा इति। पुरीष्योसि विश्वभरा इति च। तदुक्तं पिङ्गले। अष्टौ सप्त षट् चेति प्रतिष्ठा। एवैव विपरीता वर्द्धमानेति। छन्दोगानामपि। अष्टसप्तषड्भिः प्रतिष्ठेति॥

द्वौ षट्कौ सप्तकश्चेति ह्रसीयसी॥

गायत्रीत्यनुवर्त्तते। यस्या द्वौ पादौ षडक्षरावेकः सप्ताक्षर एवंविधा सैकोनविंशत्यक्षरा ह्रसीयसी गायत्रीसञ्ज्ञा भवति। उदाहरणमृग्वेदे। त्रैष्टुमियाचामिति। एवं दश गायत्र्य उक्ताः। तदुक्तम्। इति पादविभागेन दश गायत्र्य ईरिता इति॥

द्वितीयमुष्णिक्त्रिपदा॥

अष्टाविंशत्यक्षरं द्वितीयं छन्द उष्णिक् सा त्रिपदा भवति। त्रयः पादा यस्याः सा त्रिपदा। उष्णिगित्ययमधिकारः प्रागनुष्टुबधिकारात्॥

अन्त्यो द्वादशकः॥

अस्यास्त्रिपदाया उष्णिहोऽन्त्यस्तृतीयः पादो द्वादशकः। द्वादशाक्षराणि परिमाणमस्यासौ द्वादशकः। प्रथमद्वितीयौ त्वष्टाक्षरावेव। उदाहरणम्। अग्ने वाजस्य गोमत इति। तदुक्तम्। उष्णिग्गायत्रौ जागतश्चेति। छन्दोगानाञ्च। उष्णिगष्टाक्षरौ द्वादशकश्चेति।

अत्राह पिङ्गलः। परोष्णिक् परत इति। छन्दोगानाञ्च। स एवो-परिष्टात्पर उष्णिगिति। स इति द्वादशाक्षरः पादः॥

आद्यश्चेत्पुर उष्णिक्॥

यस्या उष्णिह आद्यः पादो द्वादशाक्षरः। अन्त्यावष्टाक्षरौ। सा पुरउष्णिक्सञ्ज्ञा भवति। आदौ भव आद्यः। आद्यः प्रथमो द्वादशकश्चेत्सा पुर उष्णिगिति सूत्रार्थः। तदुक्तम्। पुर उष्णिक् परत इति। छन्दोगानामपि। स पुरश्चेत्पुर उष्णिगिति। स इति द्वादशकः। उदाहरणम्। अप्स्वन्तरमृतमिति॥

मध्यमश्चेत्ककुप्॥

उष्णिहो मध्यमः पादो द्वादशकश्चेत्सा ककुबुष्णिगिति सञ्ज्ञा भवति। तदुक्तम्। ककुम्मध्ये चेदन्त्य इति। छन्दोगानामपि। स चेन्मध्ये ककुब्भवतीति। उदाहरणम्। भद्रो नो अग्निराहुत इति॥

त्रैष्टुभजागतचतुष्काः ककुन्न्यङ्कुशिरा॥

यस्या उष्णिहस्त्रैष्टुभजागतचतुष्काः क्रमेण पादाः। त्रैष्टुभ एकादशाक्षरः प्रथमः। ततो जागतो द्वादशाक्षरो द्वितीयः। ततश्चतुरक्षरस्तृतीयः। सा सप्तविंशत्यक्षरा ककुन्न्यङ्कुशिरेतिसञ्ज्ञा उष्णिग्भवति। उदाहरणम्। दृदीरेक इति॥

एकादशिनोः परः षट्कस्तनुशिरा॥

यस्या उष्णिह एकादशिनोरेकादशाक्षरयोर्द्वयोः पादयोः परस्तृतीयः पादः षट्कः षडक्षरः सा तनुशिरेतिसञ्ज्ञा उष्णिक्। अष्टाविंशत्यक्षरा। एकादशिनोरिति व्रीह्यादित्वादिनिः। पञ्च-म्यर्थे व्यत्ययेन षष्ठी। प्रयाबोधेत्युदाहरणमृग्वेदे॥

४२॥

मध्ये चेत्पिपीलिकमध्या ॥

अयं षडक्षरः पादो मध्ये चेत्साष्टाविंशत्यक्षरा पिपीलिकमध्योष्णिगुच्यते। अग्ने स्वाहा कृणुहीत्युदाहरणम्॥

आद्यः पञ्चकस्त्रयोऽष्टका अनुष्टुब्गर्भा ॥

यस्या उष्णिह आद्यः पादः पञ्चकः पञ्चाक्षरस्ततस्त्रयः पादा अष्टका अष्टाक्षराः सा एकोनत्रिंशदक्षरा ऽनुष्टुब्गर्भेतिसञ्ज्ञा उष्णिक्। अस्या उदाहरणम्। पितुन्नुस्तोषमिति॥

चतुःसप्तकोष्णिगेव ॥

या चतुःसप्तका चत्वारः पादाः सप्तकाः सप्ताक्षराण्यस्याः सा चतुःसप्तका। साष्टाविंशत्यक्षरा उष्णिगेवोच्यते। केवलोष्णिक्शब्दवाच्या सैवेत्यर्थः। श्यायुषञ्जमदग्नेत्युदाहरणम्। पिङ्गलः। चतुर्थ्याहर्षिभिरिति। ऋषिभिः सप्ताक्षरैः पादैरिति। छन्दोगानामपि। चतुर्भिश्चसप्ताक्षरैरिति। इत्यष्टावुष्णिह उक्ताः। तदुक्तम्। उष्णिहोऽष्टौ समुद्दिष्टाः सम्यक् पादविभागत इति॥

तृतीयमनुष्टुप् ॥

द्वात्रिंशदक्षरं तृतीयं छन्दोऽनुष्टुब्सञ्ज्ञं भवति। चतुष्पादाश्चेत्युक्तत्वात्सा चतुष्पदा भवति। पादाश्चाष्टाक्षराः। अनादेशेऽष्टाक्षराः पादा इति प्रागुक्तत्वात्। अस्या उदाहरणम्। अयन्ते योनिर्ऋत्विय इति। येषामध्येतीति च। पिङ्गलः। अनुष्टुब्गायत्रैरिति। छन्दोगानाञ्च। अनुष्टुब्चत्वारोऽष्टका इति। अनुष्टुबित्ययमधिकारः प्राक् बृहत्यधिकारात्॥

पञ्च पञ्चकाः षट्कश्चैको महापदपङ्क्तिः॥

यस्या अनुष्टुभः पञ्च पञ्चकाः पञ्चाक्षराः पञ्च पादा एकः पादः षट्कश्च षडक्षरश्च सैकत्रिंशदक्षरा महापदपङ्क्तिरिति सञ्ज्ञा। तत्र स्वादिष्ठादीत्युदाहरणमृग्वेदे॥

जागतावष्टकश्च कृतिः ॥

द्वौ पादौ जागतौ द्वादशाक्षरौ तृतीयश्चाष्टकोऽष्टाक्षरो यस्याः सा कृतिसञ्ज्ञाऽनुष्टुप्। सा कस्मै धातमित्युदाहरणम् ॥

मध्ये चेदष्टकः पिपीलिकमध्या ॥

कृतिरित्यनुवर्त्तते। जागताविति च। अयमष्टकः पादो जागतयोर्द्वादशाक्षरपादयोर्मध्ये चेद्भवति प्रथमो द्वादशको द्वितीयोऽष्टकस्तृतीयो द्वादशक इत्येवं तर्हि सा पिपीलिकमध्याकृतिरित्येवंसञ्ज्ञाऽनुष्टुब्कथ्यते। अजीजनोहीत्युदाहरणम्। अत्र पिङ्गलः। त्रिपात्कश्चिज्जागताभ्याञ्च मध्ये ते चेति। छन्दोगानामपि। त्रिपदाप्यष्टाक्षरा द्वादशौ चेति ॥

नवकयोर्मध्ये जागतः काविराट्।

यस्या नवकयोर्नवाक्षरयोः पादयोर्मध्ये जागतो द्वादशाक्षरः पादः सा द्वात्रिंशदक्षरा काविराट्सञ्ज्ञा ऽनुष्टुब्भवति। सा विद्मासाहत्रामह इत्युदाहरणमृग्वेदे ॥

नववैराजत्रयोदशैर्नष्टरूपा ॥

नवाक्षरदशाक्षरत्रयोदशाक्षरैस्त्रिभिः पादैर्द्वात्रिंशदक्षरा नष्टरूपासञ्ज्ञा ऽनुष्टुब्भवति। वाचस्पतये पवस्वेत्युदाहरणम्। रूपेण वो रूपमित्युदाहरणमिति केचित्। त्रिपृक्षामि पाक्यनेद्रेवानित्युदाहरणमृग्वेदे।

दशकास्त्रयो विराट् ॥

यस्या दशका दशाक्षरास्त्रयः पादाः सा त्रिंशदक्षरा विराडनुष्टुब्भवति। उदाहरणम्। प्रवोऽग्ने दीदिहि पुरो न इति ॥

एकादशका वा ॥

त्रया विराडित्यनुवर्त्तते । यस्या एकादशाक्षरास्त्रयः पादाः साऽपि त्रयस्त्रिंशदक्षरा विराडित्युच्यते । वा विकल्पार्थः । उदाहरणम् । पयः पृथिव्यामित्यादि । एवमष्टावनुष्टुभ उक्ताः । तदुक्तम् । इत्यनुष्टुभ उद्दिष्टा अष्टौ पादप्रभेदत इति ॥

चतुर्थं बृहती ॥

षट्त्रिंशदक्षरं चतुर्थं छन्दो बृहतीसञ्ज्ञं भवति । बृहतीत्ययमधिकारः प्राक् पङ्क्त्यधिकारात् । इयमपि चतुष्पदा । चतुष्पदाश्चेव इति प्रागुक्तत्वात् ॥

अष्टाक्षराः पादा इत्यस्यापवादमाह ॥

तृतीयो द्वादशकः ॥

अस्यास्तृतीयो द्वादशको द्वादशाक्षरः । अन्ये प्रथमद्वितीयचतुर्थी अष्टाक्षराः । उदाहरणमेनावो अग्निं नमसेत्यादिकम् । अत्र पिङ्गल । बृहती जागतस्त्रयश्च गायत्रा इति । छन्दोगानामपि । बृहती त्रयोऽष्टाक्षरा द्वादशश्चेति ॥

आद्यश्चेत्पुरस्ताद्बृहती ॥

छन्दोगानामपि । प्रथमकल्पेनोपरिष्टाद्बृहती विपरीता पुरस्ताद्बृहतीति । अन्त्यो द्वादशक इति प्रथमः कल्पस्ततो विपरीता आद्यो द्वादशक इति । उदाहरणम् । परिमाग्न इति ॥

द्वितीयश्चेन्न्यङ्कुसारिणी ॥

यस्या बृहत्या द्वितीयः पादो द्वादशकः सा न्यङ्कुसारिणीसञ्ज्ञा । उदाहरणम् । अयमग्निर्गृहपतिरिति ॥

पुरोबृहती स्कन्धोग्रीवी वा ॥

अस्याः पूर्वसूत्रोक्ताया एव बृहत्या वैकल्पिकमेतल्लक्षणाद्वयम् । यस्या न्यङ्कुसारिणीतिसंज्ञा विहिता सा उरोबृहती वा स्कन्धो-

ग्रीवी वा इत्येवंसंज्ञाऽपि भवति। तथा च पिङ्गलः। न्यङ्कुसारिणी द्वितीयः स्कन्धो ग्रीवी क्रौष्टुकेः। उरोबृहती यास्कस्येति। छन्दोगानामपि। द्वितीयेन न्यङ्कुसारिणी स्कन्धोग्रीवी वोरोबृहती यास्क इति॥

अन्त्यश्चेदुपरिष्टाद्बृहती॥

यस्या बृहत्या अन्त्यः पादो द्वादशाक्षरोऽन्ये त्रयोऽष्टाक्षराः सा षट्त्रिंशदक्षरा उपरिष्टाद्बृहतीत्युच्यते। पिङ्गलोऽपि। उपरिष्टाद्बृहत्यन्त इति। छन्दोगानान्तु प्रागुक्तम्। अग्नपतेऽमस्य नो देहीत्याद्युदाहरणम्॥

अष्टिनोर्मध्ये दशकौ विष्टारबृहती॥

यस्या अष्टिनोरष्टाक्षरयोः पादयोर्मध्ये दशकौ दशाक्षरौ पादौ सा षट्त्रिंशदक्षरा विष्टारबृहती। युवं श्यावं मह इत्युदाहरणमृग्वेदे। पिङ्गलः। वैराजौ गायत्रौ चेति। छन्दोगानां च। अथापि दशाक्षरावष्टाक्षरौ चेति॥

त्रिजागतोर्द्धबृहती॥

त्रयः पादा जागता द्वादशाक्षरा यस्याः सा त्रिजागता सा षड्त्रिंशदक्षरा ऊर्द्धबृहतीसञ्ज्ञा। अस्या उदाहरणम्। अग्नेऽभ्यावर्त्तिन्नित्यादिकम्॥

त्रयोदशिनोर्मध्येऽष्टकः पिपीलिकमध्या॥

यस्यास्त्रयोदशिनोस्त्रयोदशाक्षरयोः पादयोर्मध्येऽष्टकोऽष्टाक्षरः पादः सा चतुस्त्रिंशदक्षरा पिपीलिकमध्या बृहतीसञ्ज्ञा। अस्या उदाहरणम्। पृथिव्यामहुमित्यादिकम्॥

नवकाष्टकैकादशाष्टिनो विषमपदा ॥

यस्या नवाक्षराष्टाक्षरैकादशाक्षराष्टाक्षराः क्रमेण पादाः सा षट्त्रिंशदक्षरा विषमपदा बृहतीत्युच्यते । सतितः सुसनितश्च इत्युदाहरणम् । तथा चोक्तम् ॥

नवाक्षरोऽष्टाक्षरश्च तथैवैकादशाक्षरः ।
चतुर्थोऽष्टाक्षरश्चेति पादा यस्यास्तु सोच्यते ॥
बृहत्येषा तु विषमपदेति खलु बह्वृचैः ॥ इति ।

चतुर्नवका बृहत्येव ॥

चत्वारो नवका नवाक्षराः पादा यस्याः सा तथा सा बृहत्येव । केवलबृहतीशब्दशाख्या सेवेत्यर्थः । तथा चोक्तम् । चतुर्भिर्नवकैः पादैर्युक्ताऽपि बृहती मता । उदाहरणमृग्वेदे । तं त्वा वयं पितो वाचाभिरिति । पिङ्गलश्च । क्वचिन्नवकाश्चत्वार इति । तथा त्रिभिर्जागतैर्महाबृहती । सतोबृहतीताण्डिन इति च । इति नव बृहत्य उक्ताः । तदुक्तम् । बह्वृचाचार्यसिंहेन बृहत्यो नव ईरिता । इति ॥

पञ्चमं पङ्क्तिः पञ्चपदा ॥

चत्वारिंशदक्षरं पञ्चमं छन्दः पञ्चपदा पङ्क्तिर्भवति । पञ्च पादा यस्याः सा पञ्चपदा । अस्या उदाहरणमग्निं तम्मन्येयो वसुरित्यादिकम् । पादास्तु अष्टाक्षरा एव । अनादेशेऽष्टाक्षराः पादा इति प्रागुक्तत्वात् । पङ्क्तिरित्ययमधिकारः प्राक्त्रिष्टुबधिकारात् । अत्राह पिङ्गलः । पथ्या पञ्चभिर्गायत्रैरिति । छन्दोगानामपि । गायत्रैः पञ्चभिः पथ्येति । प्रातिशाख्ये ऽपि । अष्टाक्षराः पञ्च पादा यस्याः सा पङ्क्तिरुच्यते ॥

अथ चतुष्पदा ॥

अथानन्तरं चतुष्पदा पङ्क्तिरुच्यत इति शेषः ॥

विराड् दशकाः ॥

यस्याः पङ्क्तेर्दशका दशाक्षराश्चत्वारः पादाः सा विराट्पङ्क्तिरित्युच्यते। विराड् दशकैरिति केचित् पठन्ति। वैराजैर्विराडित्यपरे। स एवार्थः। उदाहरणम्। समुद्रे ते हृदयमप्स्वन्तरिति ॥

अयुजौ जागतौ सतोबृहती ॥

यस्याः पङ्क्तेरयुजौ प्रथमतृतीयौ पादौ जागतौ द्वादशाक्षरौ द्वितीयचतुर्थौ त्वष्टाक्षरौ सतोबृहतीत्येवंसञ्ज्ञा पङ्क्तिरुच्यते। तथा चोक्तम् ॥

अनादेशेऽष्टाक्षरौ विद्यात् सोपसर्गेषु नामसु।
युग्मावष्टाक्षरौ पादावयुजौ द्वादशाक्षरौ ॥
सा सतोबृहती नाम विपरीता विपर्यये ॥ इति।

पिङ्गलेनाप्युक्तः सतःपङ्क्तिरिति संज्ञोक्ता। पङ्क्तिर्जागतौ गायत्रौ च। पूर्वौ चेदयुजौ सतःपङ्क्तिर्विपरीतौ चेति। उदाहरणम्। न त्वावां अन्यो दिव्य इत्यादिकम् ॥

युजौ चेद्विपरीता ॥

यस्या युजौ द्वितीयचतुर्थौ पादौ द्वादशाक्षरौ अर्थात् प्रथमतृतीयावष्टाक्षरौ सा चत्वारिंशदक्षरा विपरीता बृहती। अस्या उदाहरणम्। यत्ते सोम दिवीत्यादि ॥

आद्यौ चेत् प्रस्तारपङ्क्तिः ॥

यस्या आद्यौ प्रथमौ पादौ द्वादशाक्षरौ तृतीयचतुर्थावष्टाक्षरौ सा चत्वारिंशदक्षरा प्रस्तारपङ्क्तिः। अस्या उदाहरणम्। भूर-

सीत्यादि । पिङ्गलः । प्रस्तारपङ्क्तिः पुरत इति । छन्दोगानामपि । क्रमेण जागती गायत्री च प्रस्तारपङ्क्तिरिति ॥

अन्त्यौ चेदास्तारपङ्क्तिः ॥

यस्या अन्त्यौ तृतीयचतुर्थौ द्वादशाक्षरौ प्रथमद्वितीयावष्टाक्षरौ सा आस्तारपङ्क्तिश्चत्वारिंशदक्षरा । अस्या उदाहरणम् । समस्व देव्या धियेत्यादि । पिङ्गलः । आस्तारपङ्क्तिः परत इति । विपरीताऽऽस्तारेति छन्दोगानाम् ॥

आद्यन्त्यौ चेत् संस्तारपङ्क्तिः ॥

यस्या आद्यन्तौ प्रथमचतुर्थौ पादौ द्वादशाक्षरौ द्वितीयतृतीयावष्टाक्षरौ सा चत्वारिंशदक्षरा संस्तारपङ्क्तिः । पितृभृतोनतन्तुमित्युदाहरणमृग्वेदे । तथा च पिङ्गलः । संस्तारपङ्क्तिर्बहिरिति ॥

मध्यमौ चेद्विष्टारपङ्क्तिः ॥

यस्या मध्यमौ द्वितीयतृतीयौ पादौ जागतौ द्वादशाक्षरौ प्रथमचतुर्थावष्टाक्षरौ सा चत्वारिंशदक्षरा विष्टारपङ्क्तिः । अस्या उदाहरणमग्ने तवश्रवोवय इति । तथा च पिङ्गलः । विष्टारपङ्क्तिरन्त इति । इत्यष्टौ पङ्क्तय उक्ताः । तदुक्तम् ॥

इति पङ्क्तय उद्दिष्टा अष्टौ सिष्टिष्टपुष्टिदाः ।
बह्वृचाचार्यसिंहेन कात्यायनमहर्षिणा । इति ॥

षष्ठं त्रिष्टुप् त्रैष्टुभपदा ॥

चतुश्चत्वारिंशदक्षरं षष्ठं छन्दस्त्रिष्टुप् त्रैष्टुभपदा भवति । त्रैष्टुभा एकादशाक्षराश्चत्वारः पादा यस्याः सा त्रैष्टुभपदा । अस्या उदाहरणम् । पुरा क्रूरस्येत्यादि ॥

द्वौ तु जागतौ यस्याः सा जागते जगती ॥

यस्या द्वौ पादौ जागतौ द्वादशाक्षरौ सा जागते जगतीछन्दस्के छन्दसि जगती। अस्या उदाहरणम्। तं नो वातोभयोश्चिति ॥

त्रैष्टुभे त्रिष्टुप् ॥

यस्या द्वौ पादौ जागतौ सा त्रैष्टुभे त्रिष्टुण्छन्दस्के छन्दसि त्रिष्टुप्पङ्क्तिका। अस्या उदाहरणम्। ये वाजिनं परिपश्यन्तीति। तदुक्तम्। यस्या द्वादशकौ पादावन्त्यावेकादशाक्षरौ त्रिष्टुब्जागतसूक्तस्था सोच्यते। जगतीति वै सैव त्रैष्टुभसूक्तस्था त्रिष्टुबित्युच्यते। यथा। यूपव्रस्काये वाजिनं नाम सूक्तं हि त्रैष्टुभम् ॥

वैराजौ जागतौ चाभिसारिणी ॥

यस्या वैराजौ दशाक्षरौ द्वौ पादौ तथा जागतौ द्वादशाक्षरौ पादौ सा चतुश्चत्वारिंशदक्षरा अभिसारणीसञ्ज्ञा। येवाचे इत्युदाहरणमृग्वेदे ॥

नवकौ वैराजस्त्रैष्टुभश्च द्वौ वा वैराजौ नवकस्त्रैष्टुभश्च विराट्स्थाना ॥

यस्या नवकौ द्वौ पादौ नवाक्षरौ एको वैराज एको दशाक्षरएकस्त्रैष्टुभ एकादशाक्षरः सैकोनचत्वारिंशदक्षरा विराट्स्थानासञ्ज्ञा। अस्या उदाहरणम्। स्वस्तिन इन्द्रो वृद्धश्रवा इत्यादिकम्। अथवा द्वौ पादौ वैराजौ दशाक्षरावेको नवको नवाक्षर एकस्त्रैष्टुभ एकादशाक्षरः सा चत्वारिंशदक्षरा विराट्स्थाना। अस्या उदाहरणम्। स्वस्तिन इन्द्रो वृद्धश्रवा इत्यादिकम्। तथा चोक्तम् ॥

यस्या नवाक्षरौ पादौ तृतीयो दशकस्तथा ।
एकादशाक्षरोऽन्त्यश्च विराट्स्थाना तु सा मता ॥ तथा ।
यस्या दशाक्षरावाद्यौ तृतीयश्च नवाक्षरः ।
एकादशाक्षरश्चान्त्यो विराट्स्थानैव साऽपि च ॥

वेति प्रकारविकल्पार्थः ॥

एकादशिनस्त्रयो ऽष्टकश्च विराड्रूपा ॥

यस्या एकादशिन एकादशाक्षरास्त्रयः पादा एकोऽष्टकोऽष्टाक्षरश्च सैकचत्वारिंशदक्षरा विराड्रूपा त्रिष्टुप् । अस्या उदाहरणम् । सम्बर्हिरङ्गामिति । तथा चोक्तम् ॥

एकादशाक्षरा यस्याः पादाः स्युस्त्रय आदितः ।
चतुर्थस्त्वाष्टकः सोक्ता विराड्रूपेति बह्वृचैः ॥

द्वादशिनस्त्रयो ऽष्टकश्च ज्योतिष्मती ॥

यस्या द्वादशिनो द्वादशाक्षरास्त्रयः पादा एकोष्टकोऽष्टाक्षरश्च सा चतुश्चत्वारिंशदक्षरा ज्योतिष्मतीत्येवंनामिका त्रिष्टुप् । नरश्चिद्वीत्युदाहरणमृग्वेदे ॥

यस्या द्वादशकाः पादास्त्रयः क्वाप्यस्ति चाष्टमः ।
एषा ज्योतिष्मती त्रिष्टुबन्नेत्याद्युदाहृतिः ॥

यतो ऽष्टकस्ततो ज्योतिः ॥

यत इति सप्तम्यर्थे । तत इति तु करणे । यत इति यत्र पुरस्ताद्वा मध्ये वोपरिष्टाद्वाऽष्टकः । ततस्तेन युक्तो ज्योतिःशब्दो नाम भवति । यस्याः पुरस्तादष्टकः सा पुरस्ताज्ज्योतिः । यस्या मध्येऽष्टकः सा मध्येज्योतिः । यस्यास्तूपरिष्टादष्टकः सोपरिष्टाज्ज्योतिरिति । तथा च पिङ्गलः । पुरस्ताज्ज्योतिः प्रथमेन । मध्ये ज्योतिर्मध्येन । उपरिष्टाज्ज्योतिरन्त्येनेति । एकोऽष्टकस्ततोऽन्ये त्रयो

द्वादशिन एव। ताꣳ सवितुरिति पुरस्ताज्ज्योतिष उदाहरणम्। तदग्निर्वाभिषजेति मध्येज्योतिषः। ऋतावानं महिषमित्युपरिष्टाज्ज्योतिष इति॥

चत्वारोऽष्टका आगतश्च महाबृहती॥

यस्याश्चत्वारोऽष्टका अष्टाक्षराः पादा एको आगतो द्वादशाक्षरः सा चतुश्चत्वारिंशदक्षरा महाबृहतीत्येवंसंज्ञा त्रिष्टुप्। अत्र क्रमो न विवक्षितः। अस्या उदाहरणम्। सोमो राजा ऋतꣳ सुत इत्यादि। तथा चोक्तम्॥

चत्वारोऽष्टाक्षराः पादाः काऽप्यतो द्वादशाक्षरः।
यस्यास्तु प्रोच्यते नाम्ना सा महाबृहतीति वै॥

मध्ये चागतश्चेद्यवमध्या॥

चतुर्णामष्टाक्षराणां पादानां मध्ये आगतश्चेत् द्वादशाक्षरः पादश्चेत् सा चतुश्चत्वारिंशदक्षरा यवमध्या नाम त्रिष्टुप्। अस्या उदाहरणमृग्वेदे सम्मातपश्चित इति। तथा चोक्तम्॥

आदावष्टाक्षरौ यस्या तृतीयो द्वादशाक्षरः।
पुनर्द्वावष्टकौ चेत् सा यवमध्या प्रकीर्तिता॥

आद्यौ दशकावष्टकास्त्रयः पङ्क्त्युत्तरा विराड्पूर्वा वा॥

यस्या आद्यौ पादौ दशकौ दशाक्षरौ त्रयोऽष्टका अष्टाक्षराः सा पङ्क्त्युत्तरा वा विराड्पूर्वा चेति नामविकल्पः। तथा चोक्तम्॥

आद्यौ दशाक्षरौ यस्यास्त्रयश्चाष्टाक्षराः परे।
पङ्क्त्युत्तरा विराड्पूर्वेत्यस्या द्वे नामनी इमे॥

एवैन्द्राग्निभ्यां महाविष्णुमित्युदाहरणमृग्वेदे। इति दश त्रिष्टुभ उक्ताः । तदुक्तम् । दश त्रिष्टुभ उद्दिष्टाः कात्यायनमहर्षिणेति ॥

सप्तमं जगती जागतपदा ॥

अष्टाचत्वारिंशदक्षरं सप्तमं छन्दो जगती । सा च जागतपदा द्वादशाक्षरपदा इत्यर्थः। जागतत्यष्टाक्षरनिष्ठचार्थम् । चतुष्पदाऽसौ । चतुष्पदाश्चेत्युक्तिः ।

यस्याः पादास्तु चत्वारो द्वादशाक्षरसंयुताः ।
जगती नाम सा प्रोक्ता। अयमिद्रित्युदाहृतिः ॥

अष्टिनस्त्रयः स्त्रौ च द्वौ महासतोबृहती ॥

त्रयः पादा यस्या अष्टिनोऽष्टाक्षराः स्त्रौ च जागतौ द्वौ पादौ सा महासतोबृहती जगती ॥

यस्यास्त्वष्टाक्षराः पादास्त्रयो द्वौ द्वादशाक्षरौ ।
महासतोबृहत्युक्ता सा नाचोक्तक्रमादरः ॥

· आयः पप्रीभानुतेत्युदाहरणमृग्वेदे ॥

अष्टकौ सप्तकः षट्को दशको नवकश्च षडष्टका वा महापङ्क्तिः ॥

यस्या द्वौ पादावष्टकावेकः सप्तक एकः षटक एको दशक एको नवकश्च । साष्टाचत्वारिंशदक्षरा महापङ्क्तिर्नाम जगती-त्युच्यते । अत्रापि न क्रमनियमः । अस्या उदाहरणम् । विश्वस्य सूर्यधीति । अथवा या षडष्टका सा महापङ्क्तिः । षट्पदा अष्टका अष्टाक्षरा यस्याः सा षडष्टका । अथवा पृथक् पदे । यस्या अष्टका अष्टाक्षराः षट् पादाः सा महापङ्क्तिर्नाम जगती । अस्या

उदाहरणमाजिघ्रकलशमहीत्यादि । वेति प्रकारविकल्पे । तथा चोक्तम् ॥

आदावष्टाक्षरौ यस्याः सप्तकोऽथ षडक्षरः ।
दशाक्षरोऽथ नवकः सा महापङ्क्तिरुच्यते ॥
अष्टाक्षरा वा यस्याः षट् सा महापङ्क्तिरेव हि ॥ इति ।

एवं तिस्रो जगत्य उक्ताः । तदुक्तम् । तिस्रो जगत्यः संप्रोक्ताः कात्यायनमहर्षिणेति । इति छन्दांसि सर्वेह व्याख्यातानि विभागशः । पादाक्षरसंख्यानियमस्तु पूर्वसप्तक एवोक्तः । तेनातिजगत्याद्युत्कृत्यन्तेषु छन्दःसु यथाध्ययनमेव पादाक्षरसंख्या भवति इयमप्यछन्दासीत्यादिका परिभाषा ऋग्वेदानुक्रमणिकासम्बन्धिन्येव सोपयोगत्वादिह पञ्चमाध्यायत्वेनाध्येतृभिः स्वीकृताऽस्ति । तेनात्र प्रतिपादितानां गायत्र्यादिभेदानां सर्वेषां मध्ये कानिचिदुदाहरणान्यस्यां वाजसनेयसंहितायां न सन्ति ।ताननुक्रामन्त एवोदाहरिष्याम इति भविष्यदर्थस्लृट्प्रयोगोऽपि परिभाषाया अस्वकीयत्वे लिङ्गम् । अन्यथोदाहरामेत्येवमतीतार्थनिर्देशः स्यात् । किञ्च । तस्मादेनमब्रह्मचारिणे अनेनाधीतेन चान्द्रायणाब्दफलमवाप्नोतीत्यादिग्रन्थसमाप्तिचिह्नमपि चतुर्थाध्यायान्त एव दृश्यते । तेनायं ग्रन्थस्तत्रैव समाप्त इति ज्ञायते । यतः सर्वत्र ग्रन्थान्त एव तद्ग्रन्थाध्ययनतज्ज्ञानफलप्रदर्शनं कृतं दृश्यते ॥

माध्यन्दिनीये वाजसनेयके सर्वानुक्रमणिकैषा कृतिर्भगवतः कात्यायनस्यैषा कृतिर्भगवतः कात्यायनस्य ॥

इदमपि सूत्रं परिभाषोपजीविभिरध्येतृभिः प्रक्षिप्तमिव ज्ञायते ।

माध्यन्दिनीये वाजसनेये यजुर्वेदाम्नाये एषा सर्वानुक्रमणिका भगवतः कात्यायनस्य कृतिः । द्विरभ्यासोऽध्यायपरिसमाप्तिज्ञानार्थः ॥

इति श्रीमद्याज्ञिकश्रीप्रजापतिसुतमहायाज्ञिक-
श्रीश्रीदेवकृते ऽनुक्रमणीभाष्ये पञ्चमोऽध्यायः ।

समाप्तश्चायं ग्रन्थः ।

श्रीगणेशाय नमः।

मौनमन्त्रावबोधः[1]।

श्रीसुन्दरशुक्लविरचितः।

अथातो मैनहस्तसंज्ञया यजुर्वाजसनेयसंहिताया मन्त्राणामवबोधं सुन्दरशुक्लो ब्रवीति यन्मन्त्रपाठार्थवेदनफलविद्भिर्विपश्चिद्भिर्निगदितं निषिद्धश्रुतिमन्त्रावीर्यत्वभयापगमाय तदेव तन्मन्त्रक्रमेणाधोमध्याधऊर्ध्वाधोमध्याधऊर्ध्वं इति चत्वारोऽध्यायास्तेषु क्रमेणर्जुविसर्गसमस्वरितमध्योर्ध्वरङ्गन्युब्जानुस्वरितह्रस्वदीर्घतिर्यक्कृतनमान्तसंज्ञाभिः सुधीर्विजानाति ॥ १ ॥

अथर्जुसंज्ञामाह। मन्त्रान अग्नेस्तनूर्विष्णवे त्वाग्निर्देवताग्नये स्वाहापां प्राणाय स्वाहा चक्षुषे चतस्रो हृदे त्वोर्ध्वे मायासाय स्वाहा देनाप्रयची वताप्रस्य यका सकौ सविताते शक्राणि युक्ष्वाहि केशिना चतस्रः कदाचनस्तरीर्दिदेवीस्तिस्रोऽश्विने-

(१) अस्य ग्रन्थस्यादर्शपुस्तकमशुद्धिबहुलं जीर्णं भूयोविलुप्ताक्षरमेकमेव लब्धं किं तु संहितासम्बन्धित्वादत्र मुद्रणमावश्यकं बुद्ध्वा एतस्मादेवादर्शपुस्तकाद्यथालभ्येन संशोध्य मुद्रयितुमारब्धम् अशुद्धयश्चादर्शान्तरसंवादेन परिहर्तव्या वैदिकैरिति ।

डाऋतिस्रो देवि मे मह्वीनां पयोग्नेर्जनित्वं कुविदङ्ग दिष्ट्यूर्ध्व-जघुषः सङ्ख्यादिर्मखस्य शिरोध्रदेवोर्ध्वो दशजुषु चयोविंश-अतिः ॥ २ ॥

अथ कनिष्ठिकामोक्षोर्ध्वक्षेपसमसंज्ञामाह। ऋतापाडक्र-तधामे शिरो विश्वव्यचादेवायज्ञमश्विभ्यां चक्षुर्मह्वो अर्णोऊर्जा-कृतीरुधे सदुघेन्द्रे केतुं कृण्वञ्चन्द्रमा मनस इमान्तेन्यदेव-विद्याया दश ॥ ३ ॥

अयमग्निर्गृहपतिरिष्टो यज्ञतिस्रो देवीर्हविषा पाव-कानाडषेयको अमुच भूयादथाग्निर्वृत्राणि सविता शरीरे-भ्योऽष्टौसजूरब्दोग्निमग्य त्रिरग्निर्वपिपञ्चत्रयोदश ॥ ४ ॥

ऋक्सामयोः शिल्पे पृथिवी छन्दो वयं नामदेवं वह्निर्वा-रितीनामध्वर इयं वेदः स्वस्तिन रितपादूर्ध्वः सप्तेन्द्र इषोष-स्त्वाना धृष्णो जातवेदा हे पृथिव्यै स्वहा स्रुद्रा हे कृणुष्व-पाजोऽस्माकमिन्द्रो हे अजोह्वि समित्रियान्निस्वनस्वः सप्त-दश ॥ ५ ॥

यज्ञस्य दोह्वो दृष्ट्वा रूपे प्रथमाद्वितीयैर्धूम्रावभ्रनीका-शायमायस्वाहाग्रं तमो द्विःसप्तस्वराडस्युदीची शिवेन वच-सेष्टो अग्निरश्विनान् मुचेरभियज्ञं पञ्चप्रुक्स्वपस्याय पुरोह-रिकैशस्तिस्रो देवो देवैर्मधुशाष एकोपावीरध्येकायन्तीत्रि-स्त्र्यायुषं जमदग्नेरुत्तिष्ठं कोजसेषावोभीषुणोद्विरुतेदानी-न्नपड्विंशतिः समेषट्षष्टिः ॥ ६ ॥

अथ स्वरितउभक्षेपसंज्ञमाह। सत्रस्य ऋद्धिवृतेन सीता-
याचकयायस्तिस्रो योदेवोधीमक्रदग्निस्तिस्र इडेस्वेवाऽग्नेः स्वस-
स्वः सजूर्ऋतुभिर्मन्द्रा उत हे अग्नावग्निरईशानोहव्योदिस्तिस्रो
यज्जाग्रते मनस्विन्क्रतुथेन्द्र स्तनः षोडशः ॥ ७ ॥

इषेत्वायज्ञोदेवानां हविस्त्वञ्जुषाणो बर्हिः पुरुष्टुतस्वन्द्र-
मसः पश्वाय गिह विरश्मिना तेजसा चतस्रःशमितान इमं
जीवेभ्य द एकादशस्वरिते सप्तविंशतिः ॥ ८ ॥

अथ मध्यमसंज्ञामाह। अग्निः प्रियेषु सिञ्चन्तिपरिमाय
त्वां गिरस्त्वने तिस्रोऽग्निर्ज्योतिरैन्द्रः प्राण इमानुबद्धानां पिता-
आग्नेयः कृष्णग्रीवो मेधां मे षडग्निमृद्धाचिः स्वाचाः पीता
अभिगोत्राणि सद्यो जात षडग्निः पृथुर्वायोः पूतः कृष्णभौ-
मास्तिस्रोऽष्टादश ॥ ९ ॥

अग्नेस्तनूर्वाचः सुप्रजाः प्रजा अग्निः पशुस्तिस्रः स्वर्णघ-
र्मैका चित्रं देवानां हविर्भिः संसृज्य रुद्रा संसृज्ये-
यमुपर्यद्भ्यः। घोरं षड्युक्तेन मनस पृथिव्याः सधस्थादभि-
भ्राचा तिस्रो देवीस्तिस्रः पतिमेके मारुद्रायस्तीर्णं बर्हिर्वे
षोडशमध्ये चतुस्त्रिंशत् ॥ १० ॥

अथोर्ध्वसंज्ञामाह। सजूर्हे वेनोत्तानायामवहे रूपां पृं हि (?)
सुवर्हिरग्निरग्नये स्वाहेन्द्राय चतस्रोयमग्निः सहस्रिणोसौ-
यस्ताम्रः स्ववस्थाऽयवृत्तंनिचतस्रो धाताराति: सौरीवलाका
नहिस्पृशन्ति सोऽपिवृष्टगोन पृष्ठो दिवि पञ्चस्वन्तो मही
अग्नेः पञ्चाष्टादश ॥ ११ ॥

अयं पुरोभुवऽएकाऽग्नुस्त्रिवृदिदं पितृभ्यो देवा देवानां देवोऽग्निः । स्विष्टकृद्देवा अनस्रोयमग्निः पुरीष्यो देवं बर्हि-सरस्वत्येव बर्हिस्रो देवो दग्निः स्विष्टकृद्धोतारिति तिस्रो-स्रोमोषितनोन्यदेवमश्ववाश्वतस्रोयमग्निहोतारम एका प्राणा-य स्वाहा वेधन्तादिवो हे पञ्चदशोर्ध्वेत्रयस्त्रिंशत् ॥ १२ ॥

अथ रङ्गसंज्ञामाह । चत्वारि शृङ्गाग्निं हूतमीडितो देवै-रन्दोमन्धोरइन्द्रो अश्वस्तोमध्वायरूज सासमुद्रादूर्मिरङ्गे-षट् ॥ १३ ॥

अथ न्युङ्खसंज्ञामाह । अयो देवाऽअसर्यानामहे अश्वन-गायत्रीत्रिष्टुब्वो । अयं पश्चाच्चक्षुरेका समुद्रे नेदियज्ञस्य त्वा सुमित्राणी हे तनूपा भिषजैकाप्रत्यूवैन्नेयं तस्तोऽग्निस्ति-ग्मे नाश्विना गोभिस्त्वनस्रोन्युङ्खे द्वादश ॥ १४ ॥

अथ ह्रस्वएकारसंज्ञामाह । अयं वेनो देवो दवैरश्विभ्या-मन्तरामित्रावरुणातिस्रोर्ध्वकचैरुकस्यानामेकासोमानए स्व-रणं मित्रोनः परोदिवातिस्रोपाए रसए स्वर्यत इमंस्तनं मधु-कान् केशैस्तनस्तं सिए द्यसिए व्यासिद्धिर्तैनात्त्वाविन्द्रा-ग्नी मित्रावरुणा इतस्रोयुङ्जाथाए रासभमायोष्टवा हे ह्रस्वे सप्तदश ॥ १५ ॥

अथ दीर्घएकारसंज्ञामाह । समुद्रस्य त्वात्मनुपस्थेचि-क्राय स्वाहा यूपव्रस्काऽउततिस्रोदेवीर्वहिः प्रातर्जितं भग-ए षोडशप्रत्नां वामसत्यप्रस्थ भक्षनासएहितो विश्वसाः

मानयामनः हविर्ह्वानं यदः सहस्रं देवासो हि कुर्वन्नेव मर्घ्रंमह्मामायःसोवनस्यनुस्तिस्रः ककुभः रूपं देवश्रावं श्व बिरिदः हविस्तया देवा उपासनक्तः षड्वीनः हविर्युवः सुरामन्देव इन्द्रः सरस्वत्या प्रातरग्निं चतस्रो ऽष्टाविंशतिः ॥ १६ ॥

राथा वयमेवस्यायेमर्थं बृहस्पतिमद्दीमृषुस्तस्रऽश्रापये स्वाहा ऋतः सत्यः सुनः सुवनस्य योनिरयो अद्य चातारमिन्द्रं वह्यन्तो वेदनये पोमनमष्टावभित्यं वाङ्म मे द्व आसन्दी रूपमेका देवंबर्हिरिन्द्रं देव इन्द्रस्त्विवन्धुरा देवो न रात्रावः सऽश्रादित्यैर्नचतस्रो देवीर्द्वार इन्द्रमेका ब्राह्मणमद्यप्रतीचीमारोहयुवः सुरामः पोडशीस्तोमोयामिदं देवस्य चेतनो देवेभ्यो हि सप्तसप्तविंशति दीर्घपञ्चपञ्चाशत् ॥ १७ ॥

अथ तिर्यक्संज्ञामाह। कदाचन प्रयुक्तेसिमद्दोस्यभ्यर्षतकुविन्दं गोपयामं गृहीतो देवो उषसे। यत्ते स्वाहा षट्कोदोऽस्य यमुपरिसमुद्रोऽसि नभस्वान् यकासकौ चतस्रोधान्यमसि पुरीष्योस्यश्वग्ने पुरीष्यासो अग्नयोन्यवापोर्द्दमासानां पञ्चयुजे वामयं पश्चाद्रथप्रोतो द्वे सुपर्णोऽसि पृक्ष एवे द्वे नवदश ॥ १८ ॥

समुद्रोऽसि विश्वव्यचाएकादिविष्णुः। सुपर्णोऽसि त्रिवृद्वे कुक्कुटोऽसि ध्रुवोसीशा वास्यन्तिस्रोऽग्नेर्भागः कन्या-इव वहतु वायव्यैर्वायव्यानि संवत्सरोऽसि ब्राह्मणोऽस्यायुष्यं वर्चस्यःषट्देवी उषासा नक्तोद्रमेकात्रयोदशानिर्यञ्चद्वात्रिंशत् ॥ १९ ॥

अथ टतनान्तषोडाटकारतकारनकारेनषष्ठः । नृषदेवेट् लोकानामिन्द्रं द्वे ग्लोचाविश्वचर्षणिर्देवं बर्हिर्वयोधसं द्वेचो वनस्पतिर्देवं बर्हिर्वारितीनां वयोधसं देवव्यचसो देवं बर्हिर्वा- रितीनामवर्द्धयत् षड्देवी जोष्ट्रीवसुतिरुषा आह्वं धुनि- नांजदृनिविपृष्ठो देवीस्तिस्रो वयोधसं पञ्च नटनान्तेषु षयो- दश ॥ २० ॥

अथ मान्तमकारमुष्ण्याकृतिमाह । समिधाग्निं हवि- षरायेतिषस्वधा चोदयित्री सूनृतानान्देवीउषे सानक्ता देवं देवा दैव्याव्वयोधसमिदम्मेऽहं दिवोमूर्द्धापासानक्ता वृह- ती प्रतमिन्ति त्सोरायेन्विका शिवो भूत्वैकायुनक्तघोरा विश्वा- ड्वृहद् द्वे पञ्चदश ॥ २१ ॥

इदं विष्णुरादित्यं गर्भं सुनावमारुहेयं द्वे वीजोष्ट्रीहिर- वर्द्धतां वयोधसं पञ्चदेवी जद्याङ्कती हिरवर्द्धतां तिस्रोवयोध- सन्देवा दैव्यावर्द्धतां तिस्रः पुराकूरस्यैकापृथिव्याअग्मिन्द्र- वायुबृहस्पते द्वे एकादशमान्ते षड्विंशतिरधोमध्याध्या- यो ॥ ३४४ ॥

अतच्चयंचतुस्त्वारिंशद्भवति ॥ २२ ॥

इति श्रीसुन्दरशुक्लविरचिते मीमन्त्रावबोधे अधोमध्या-
यो नाम प्रथमोऽध्यायः ॥ १ ॥

अथर्जुसंख्यमस्ति । अद्यद्योतमानं आवाचना आयुम-
तिस्रो ममाग्नस्तायैर्वोविश्वयोगायत्र्यै तिस्रो वसवस्त्वाधूपय-
न्तु चिदसि तया हे यत्ते अस्य पनिर्वेशोना त्वा प्राच्यै दिशे तिस्र
एकादश ॥ १ ॥

ओषधिरिति विश्वस्मै प्राणाय । निर्यदस्माय यत्तेसादेव च-
तस्रो मुञ्चन्तमयजमानं स्तोत । यमग्नेमिधेन्द्रमायुश्चानग्ने ति-
स्रो ऽग्नेऽभ्यावर्त्तिनपे इन्द्रस्य हे च सद्यागोनन्तं हे एकाद-
श ॥ २ ॥

योगेयोगे तानासत्याकाइमरे तिस्रोय स्तेऽस्य मुच्यध्वं
यदा हिरण्य आयन्त इव सूर्यमिडाय स्त्वा पञ्च ववायो मृतक एक-
इयदसि तपसे स्वाहा हे एकादश ॥ ३ ॥

अग्ने पावकवार्त्त्वहत्यायश वशावसेऽस्मियमः स्तिस्रः ऋज-
रुद्रस्य मास्मोयदस्त्रि विश्वानि देव तिस्रो यदग्ने यत्ते पवित्रं हे
बृहस्पते वाजमेका नव ॥ ४ ॥

तत्वा सविदुपत्वामाहिर्नमोनमस्त अयुधाय स्तनवांसेन्द्रा-
य कत्वास्वाहा षट्स समिद्धाय शोचिषेन्द्राय त्वेन्द्रायाह
रप्रावण्ड्सनोभुवनस्य समध्वराय पञ्च सोमस्य त्वाकाव्ययोरा-
जानेषु हे अग्नाईद्रुपत्नी वन्यस्तु सर्वाणिवहारिणो हिःपञ्चष-
ड्वतस्रः सप्तदशर्जुषु नवपञ्चाशत् ॥ ५ ॥

अथ कनिष्ठविषमाङ्कसमसंख्यमस्ति । स्वाकृतोस्युदाना-
कासौ काकात्कापवादात्प्ररोहन्ति यमेन्द्रः कयानो हिचिर-

ह्यपायि: सविता सप्तविश्वस्य केतुर्यजुर्भिराप्यन्तो सप्त्यवाहूं वो दैव्याङ्घोतारास्तपायाक्रन्दय षट्ममह्ये यज्ञयज्ञं यदश्वस्य तिस्रो माखेकाकार्षिरसि ये जनेषु त्वामग्ने यजमानाकामं कामदुघे त्वष्टातुरपः पञ्चयस्तेसोमसमास्त्वा शन्नोदेदितस्रः सिनिवालिपृथुष्टुक एका षड्विंशतिः ॥ ६ ॥

वाताय स्वाहैकायाते अग्ने योऽदित्यैरास्नादितिः स्वाहा प्राणेभ्यस्तिस्रोऽग्ने जातान्मानस्तोके विश्व अद्य दिहृव्या अश्वर्यवा हे विरूपे विश्वेभिः सोमᳫ्ससान एरुचिदसिमना यस्त्रौषधी तिस्रोरेवतीरमध्वं बृहस्पते तदिदे त्वामग्ने अङ्गिरसइडाभिरग्निरनाधृष्टापुरस्तास्तिस्रोद्दम्नः सर्पिरासतिर्यञ्चैौषधी पृषदस्वामरुतस्तिस्र ओषधीः प्रातर्युभिरक्तुभिर्ब्राह्मणासः पितरो नमो वो नक्षत्रेभ्यः स्वाहा सोमेभ्यः स्वाहा त्रिकावद्रुषामेकाङ्गिरसो न इन्द्रायाद्विधया द्विपदायाश्चतुस्पदास्तिस्र ओषधयः प्रत्याश्रावये व्यचस्वतीरुर्वियातिस्रस्त्वा शौर्याष्टतं पत्नीभिर्नीलग्रीवाः शितिकण्ठाः शर्वरोहितो धूम्ररोहितस्तनस्त्वं नो अग्ने वरुणस्यैकादशायुवाकवोदद्व्येभिः सवितर्दिविश्वदेवास्तमग्नेषु चतस्रो विष्णोरराटं या ओषधीर्विहिता इन्द्रो वृत्रं तिस्रो वसोः पवित्रᳫ्शतधारमेकाष्टाचत्वारिᳫ्शत् ॥ ७ ॥

मरुतीयस्य वाजो नः सप्तेन्द्रायाद्विवृजानस्तिस्रोदेविरूपमिन्द्रे प्रवीरयानु ते ब्रह्मणस्पते समवाजे वाजे दियावो दि-

पवमानः सोऽग्निष्वात्ताः पितरो वरुणाः प्राविता उपमीयतो यतः
समीक्षसे स्वाहा पूष्णे दुर्भेदित एकादशाग्ने अङ्गिर एकेन्द्रम-
रुत्व आपि प्रायन्तु नक्षत्रः सूर्यायः संपुनर्न उपहूताः पितर-
स्तिस्रो भुवो यज्ञस्य द्विर्दे सप्तविंशतिः ॥ ८ ॥

अषाढस्यैकाया आोषधिवट्कौसूर्यानपान्नमोऽस्तु रुद्रेभ्यो दि-
र्हिवि द्विव्यां सिन्धोरिव प्राध्वने समिद्धो अद्यास्वानिर्गोम-
तीः सप्तेन्द्रस्य मरुत एकानो यज्ञं दिव्येका स्वद्या मरुद्भिर्मनसः
कामं द्वे शं नो भवन्तु दिक्षुर्गास्ति तिस्रः पनस्त्वायं परिधिमेकै-
का समदश ॥ ९ ॥

ततो विराट् त्वमग्ने प्रथम एकैका देव सवितस्त्रिर्हिरण्य-
हस्तो असुरस्तनस्रो विपाजसासद्धिसरोभ्यो धैवरमष्टौ स्वां-
कृतोऽसि देवांश्च एकाश्विनौ छागस्य सरस्वती मेषस्येन्द्रमृष-
भस्य हविषः स्तिस्रः सन्त्वमग्ने सद्भु हस्तैर्द्वे तव भ्रमास
एकासप्तदश ॥ ११ ॥

अनुत्वा मामाता देवीरापः शुद्धाया ओषधीः पूर्वाषीषधयः
संवेदेनरूपे अध्वर्यो अद्रिभिः षट्त्वसमेदे यच्छे पारावतान-
जस्रमिथुमेकैकासूर्यरश्मिर्हरिकेश उपाश्मै द्वे मधुरस्वा अन्तु-
निषसाद दिदृत्वमुत्तमाग्रे हवाजीवर्हिवदपितरः पञ्चदश॥१२॥

स्वाहा यज्ञं तस्माद्यज्ञाद्दचो दे तामस्य हिरण्यजाता सोमा-
निप्रयाति सुरेमसष्वभका सर्वोदयोतः पुनरूर्जा दिवदुत्वा हि-
मस्वापि मे आपो देवी नीलग्रीवाः शितिकण्ठा द्विमज्जा-

न्यात्मन्नह्यानिशन्दशतद्दिष्णीर्यैत्वाडैविकिरिद्रविलोहितैकास-
मिन्द्रयज्ञस्यानवोद्दैभवतन्नोहिदैसत्वंनस्त्रिचैका मानिन्द्र-
मिन्द्राग्नीअपाद्यदे धूरसि वेद्या दन्दशूका उद्कामिन्नावः
शिरोमे विश्वेदेवा शृणुतेष्व षट्द्वाचिंशत् ॥ १२ ॥

अश्ववेतस्यास्तेहीरण्यरूपा उषसोनमस्तेअस्तुमधुश्च तमि-
न्द्रं वसोः पवित्रं द्यौस्तस्मा यस्मात्संभूतोऽष्टावात्वाहार्ष२स्वाहा
यज्ञं वरुणो यदक्रन्दः सवनिमिषाचतस्रः सोमायत्वबाप्नानो-
मित्रस्त्वामग्नेवृषनेयत्पुरुषं त्रीणि पदा पञ्चचतुषः पितारूपाः
हवं२समिधान्यंव्यचस्वती सुप्रायणाः समिद्धोअञ्जन्यश्वहा-
विं२शतिसमेशते भवतः ॥ १३ ॥

अथ स्वरितोभवेपसंज्ञमस्ति ॥ राज्ञवेमीदुष्टमशिव
तमघ्नघर्गांस्त्यानिसोवाजस्यन्वावभूवाङ्कपतेनस्युत्वा गन्धर्वाया-
स्ते अग्नेद्विः सरस्वतीमनसाद्यौराशीदिरिन्द्रस्य वज्रोमरु-
तानवाग्नेयुक्ष्वायातेहेतिरत्वा चित्रश्वं स्तस्मादित्यैरास्नासी-
न्द्राण्यै द्विकौधृष्णावे यज्जायत उतिष्ठ ब्रह्मणस्पते तिस्रो गणे-
भ्यो भूम्या आपूस्ते अस्याह्रत्वमग्ने द्युभिस्त नूनपात्यथह्वरयो-
धूमकेतवो यन्मे छिद्रं चतुष्कौ यस्यास्ते नमोस्तु नीलग्रीवाय
यक्रन्दसोतिस्र उदुतिष्ठत्वामग्ने पुष्करादे द्वाविं२शत् ॥ १४ ॥

स्तनः पितेपरित्वागिर्वणः प्रनोयक्ताशीनासोअरुणीनान्दुरो
देवीस्त्वामित्वउपहूता इह स्वर्यंत्वचसकस्पता नेतिस्रः सत्त्वाय-
तयाविश्वजद्भ्यस्वतुः स्वस्तिनोभिपणायतमत्वाद्ध्यं पञ्चचतु-
र्दश ॥ १५ ॥

नमोस्तु सर्पेभ्यो या इषवो नमस्ते चक्रायायोष्णीषिण इन्द्राय।चित्रचित्रभानो नार्यस्ते सप्तसोमः पवते यो वोदिमाच्छन्दः प्रश्नवाय वनस्पतिमभिषट् स्वाहा रुद्राय सभाभ्यस्त्वमग्ने अनपावस्तुभ्यश्चाप्यास्त्वे अग्ने पञ्चाष्टादश ॥ १६ ॥

त्वष्टावीरमश्वस्य त्वा पीवोअन्नरयिवृधः प्रवावृजेचतस्रो क्विनस्य ते त्व मिन्द्रेष्यद्रः सुत्रामा स्ववासनः पावकद्विकौपयः पृथिव्यां दुरोदिश इन्द्रः सुत्रामा हृदयेन तिस्र एकादश ॥१७॥

तेजः पशुना मह्यः केतुनाराज्ञसिवसव इडाभिर्भक्षानमस्ते हरसेद्वियैनपितायदूवध्यं चतुष्कौतत्वायामिद्विरजोजनोषि-चित्तं जुहोमि नतस्यानोनियुद्भिः स्विक्कौकपर्दिने सिकत्या-यायो अस्माजेष्टाय विलिवने पञ्च तत्सवितुस्त्विः सूर्य एकाकोद्विः पञ्चातद्येन सपत्नाद्वे आप्यायस्व परिते धन्वनो वाजः पुर-स्तादायानगर्भोदेवानामनत्वारथषद्वाविंशन्तस्त्वरिते शतं सप्तति ॥ १८ ॥

अथ मध्यमसंज्ञमस्ति । तर्जनोसिर्गः मह्विचीणां याते रुद्र शिवातनः शिवेन्द्रस्य वज्रोऽसि मित्रावरुणयोः कस्त्वा छ्यति-स्वादिष्टयानुवीरैर्देवी द्यावापृथिवी देव्यो मम्प्रोष्ठैयमग्नेपृ-त्सुयचवाणा दारोदेवीरचातच्छजोते परिपञ्च समिधा अग्निः समिधा कत्यस्य देधन्वनागा अदितिष्ट्वापडस्य ब्रह्मयज्ञानं स्वतघ एकोनविंशतिः ॥ १९ ॥

अग्ने दद्ध्यायोजनस्य गोपा उदीरतां तिस्रो ये अग्नि-

ध्वान्ता एषोऽस्य ककुद्दर्विनस्त्रिरिन्द्र आर्तां चमीभूप इन्द्र इन्द्रायेन्दो मरुत्वते इन्द्रमिद्देवतातये हे अग्नावग्ने ऋत्यावो वनस्पतयो चतस्रः सोमराजं समिद्धो अग्निरश्विना पूर्वमिदस्योनपृष्ठ- तिस्रः सप्तदश ॥ २० ॥

विनोदिरस्मसूपरः समिद्ध इन्द्रो होतादैव्यो तारा श्वि- न्द्र वातोवा त्रिको सूर्यस्य चक्षुर्दक्षिणामारोहाबोध्यग्निर्विश्व- कर्मन् हविषा वावृधानः ऐशान्यतोऽस्तिस्रः पञ्चैकादशमध्ये सप्त- चत्वारिंशम् ॥ २१ ॥

अथोर्ध्वसंज्ञमस्ति ॥ विश्वारूपाणि विश्वस्य मूर्धं नामूरव- भूर्मानिचुश्चपरिणाहेतिस्त्रुत्रा देवीरिडाविश्वादित्यान्स्व- शिवत्वंसादित्यप्रतिचचेयदापक्षदेजतिपञ्च आतप्यः प्राण- स्यो प्रियंमोनोदृशुत्यतस्रो दैव्यायथर्वे अन्योमित्रो हे त्वमग्ने- ईडितो नाविकल्पा स्वदासमाना पितरो विरवभोगैः धमादि- निद्याः त्रिक्को अयोविंशतिः ॥ २२ ॥

त्वं यविष्ठ दिर्यं इन्द्र एकः खिदिरानोभद्राः स्थयवत्सप्तायं गौः पेशमानाजीवाहे सप्रथमो यदाकृतान् यश्चात्मदाश्मौषि- त उपश्च नो द्यौः प्रपर्वतस्य धामन्ते नेओऽस्ति यज्ञं चतुष्का- वाश्वथनिचुम्पुणदेवानां यस्य प्रयाणं देवाजखेमं द्यौः शान्तर- श्विकद्रूपानिस्त्रीयाः सेनावाश्वेमा वाजस्यनुमातरं यदापिपेष- मात्रा पृथिव्याः पञ्चचत्वारिंशतिश्चत्वं पञ्चाशत् ॥ २३ ॥

अथ रक्षःसंज्ञमस्ति । परिमामत्वाशाजयन्ति येनापाव-

काद्दग्यमस्य बृहस्पते पर्यनुत्तमाने भग एव चतुष्को॑ परिते दुडभो निहोताग्ने दिवो मधुमन्ना वाजो नोऽद्य नवै दिर्यश्च हरिसप्ताश्वो घृतेन परस्या अधिवङ्सूर्यया आवहो यजानः पञ्चरङ्गे विंशतिः ॥ २४ ॥

अथ न्यङ्जसंज्ञमस्ति कृष्णोऽस्यदित्यै व्युन्दनमात्यै प्रयुजे मधुमतीर्णायाते सद्राद्योरापश्च वाजाय स्वाहा स्वर्नभोस्तु रुद्रेभ्योऽन्तरिक्षे तनूनपात्सुरस्वती द्यौस्ते पृथिवी मात्वातपत् पञ्चनद्यः षट् सोमाय कुलुङ्ग उदग्ने रेवती रमध्वमस्मिन् वनेषु विदिकौयवानां भागो हो नत्समिधाग्निमापश्चिद्दिताऐन्द्राग्ना अनसुप्नो तो जोनचिकौ न्यङ्जेचैकविंशतिः ॥ २५ ॥

अथ क्रस्वंकारसंज्ञमस्ति । यस्यैन उक्तमन्तव वायो तिस्रः आपतये त्वा देवा गातुविदः पुनरासः द्योहवीयान्चित्यं चेच्कृर्नीमहोनाध्वर्युरस्ताग्यग्निस्तिस्रः एदम्वहन्नात्वष्टः सुयेमस इन्द्रंस्वाहा तद्विप्रासपश्चोमासमर्धपणोधूनोग्निच्छस्विष्टकृतं न तदुंध्रन्द्राभ्यां मलिम्लनस्तो विंशतिः ॥ २६ ॥

आकूतिमग्निंहोताग्निं स्वाहायुर्यज्ञेन सादंदक्षिवांतं प्राणेन प्रजापतेनास्वयमायुर्यज्ञेन वाक्सरस्वति योन्यामश्विनौ छागस्य वपाया या तंघर्मपञ्चवकानुहिवं वसवस्रयोदशास्वरेणानोयज्ञं भारत्या नासत्या चतस्र एकस्मै स्वाहै अज्योतिरसि संघसाथां किंस्विदासित्मनस्त आप्यायतामायुर्यज्ञेन पृष्टं वयसोरेतसिकावोजश्वनते इताएं सवितुरपाट युक्ष्मप्रजापते

न वयमिन्द्रस्य वृष्ण इन्द्रस्य रूपं पञ्चाष्टाविंशतिश्चस्वेऽष्टाचत्वारिंशतिः ॥ २७ ॥

अथ दीर्घंसंज्ञमस्ति तं रूनैरायोसवेस्वाहा हे मनोजूतिर्जुष्टस्य हिः संभृतिं व चतस्र आतिष्ठो देनंसोमस्य रूपं पवस्रोरूपं वनस्पते वपं चैकादश ॥ २८ ॥

अग्ने व्रतपा इयमिरावती वातरंहा भवत आयजन्तावरपृष्टापराचतुर्विंशाहाजिनः कस्त्वासत्योहिरष्टावश्विनौसरस्वतिमापः संसृष्टां वसुभिः पृथिविं देवयजनि क्रमध्वमग्निना पञ्च प्रत्युष्टंरक्षोहिरग्ने गृहपते द्यां मातदस्य रूपंसंशितोरस्मिनापद्वोधामेयामिषुं यदस्या अग्रमन्वनिरियते चतस्रो मयि गृह्णामिद्राय हि वृत्रघ्नीडेन्यमीडितं भायेदावीहारं यदाबध्नं पञ्चाष्टाविंशतिः ॥ २९ ॥

आदित्यास्त्वामूर्धन्प्रवोमन्दमानाय तत्सूर्यस्याप्यायस्वमदिन्तमब्रह्मात्त्वं यदग्निकावग्ने वाजजिद्द्यौस्ते पृष्टमाराचिस्त्वं सोमपितृभिः प्रयसाशुक्रमश्विनाघर्मं त्रिकौ हादश ॥ ३० ॥

होताय सत्यजापतिमक्रामामाद्विंमध्वा यज्ञं नाभ्या आसीत्सोमदभ्यश्चतस्रसंसोदस्व तस्य वयं हे संवर्चसा चौसुबर्हिषं पूषं एवं तं चतस्रोऽग्ने व्रतपामयचतस्रोऽग्ने व्रतपामयि चतुस्त्रिंशतं तव समितं वास्पतजूतिमधिपत्न्यासि विधृतिश्चाभ्या षट्सप्तदश ॥ ३१ ॥

धृष्टिरसि नमो मित्रस्य देवीराप एष वो वाजाय स्वाहा वसव एकया च पथभूरसि सुरावन्तं बर्हिषदमदीक्षीमारोहे डामग्ने

नराशꣳसं दैव्यावध्वर्यू तिरश्ची षट्सꣳशितं स एका बृहस्पते सवितरित्यानास्त्वा नवविꣳशत्यास्तु वनेका चतस्रवनस्पतिꣳशमितारं त्रिभिर्मिन्द्रयो हिरण्यपर्णा तपसे कैलालं नवसोमो धेनुमश्विरसि त्वꣳ सोम प्रचिकितो दैव्यावध्वर्यू चित्रं देवानां चतस्रः पञ्चविꣳशतिः ॥ २२ ॥

असकन्नमद्य विश्वेदेवा अꣳशुनाङ्गं पवीवत्युरूप एव चतस्रो कृतमसि यस्ते द्रप्स इन्द्रस्य वज्रो वाजस्यास्तिस्रो देवसवितरेषते दꣳहस्व देसीसेन तन्त्रꣳसोमाय हꣳसांस्त्रीणि शतापञ्चेन्द्राग्नी अव्यथमानामिन्द्राग्नी आगतं परित्वाग्नेरुचं नः सरितसं त्वष्टावं विश्वेदेवास आगतं हस्त अध्यायत्वष्टारमिन्द्रमपातामश्विना सपरिपञ्चकौ द्वाविꣳशद्दीर्घं शतं पञ्चदश ॥ २३ ॥

तिर्यक् अदित्यै रास्नाविष्णोरग्नेस्तपरिषमापो देवास इन्द्रस्य स्यूस्तस्रो नभश्च सहश्च तपश्चतिस्रो देवीरापो अवामपेतः सदुद्रवदं नात्यरि रिस्तुनो द्विकौ जनयत्यै त्वा को सिकस्यावद्द्विध्यं वनस्पते विद्वङ्गश्चतस्रो यन्नो सपायत्पुषेण द्वे प्रतद्विष्णुरेकाष्टादश ॥ २४ ॥

तेजोऽसि तेज एकावसवस्त्वज्ञ एवं तु प्रेद्धो अग्नेमेध्यो हस्तिपं तिस्रो रक्षसाम्भागः सुजातो ज्यतोतिवसूनां भागः सत्वं नो अग्ने त्वं नो तव प्रवो महे षट्वृजामिरद्वाव्यग्नेमघवे स्वाहेन्द्रस्य क्रोडश्चतस्रो वो चाम कवये कोसि कस्मै द्वे शर्म च वाजश्च सुचश्चयद्दातो ब्राह्मणोय ब्राह्मणमधिनः षट्द्वाविꣳशतिस्तिर्यञ्चि चत्वारिꣳशत् ॥ २५ ॥

अथ कतनान्तसंज्ञमस्ति । सीरा युञ्जन्ति राज्ञसिविराड-
ढ्यवोचत् तिस्रो वसवस्त्वाकृदं त्वा पवस्वानिवस्व एकयास्तुवता-
याधमत्प्रमन्मदेऽज नेजन दिकंऽसप्राग्नेवृहन्नाभिमं द कोदा-
त्वरं मत्योः तव्वतस्तिस्रसोमस्य त्विषिमृत्योः प्रतदोचेद्देवाजस्य
मासोमस्य त्विषिरग्नये हिरण्यशृङ्गो । य उपस्थासयचतस्रोम-
नोमिमान इन्द्रेशानाय परस्वतस्तिस्रउरुकव्याअवारोदसी द
सवोध्युत्कामयेत्नेषु त्रिधाहितं चतस्रः कतनान्तेष त्रिं-
शत ॥ ३६ ॥

अथ मान्तसंज्ञमस्ति । ज्येष्ठ्यां च मंचोक्तोऽमाच वमुप-
स्यविश्वचटकस्त्वा युनक्ति हिरण्यपाणिमूतये यावती द्यावा-
पृथिवीतिस्रो वृहस्पते अत्येकाये देवास आत्वाजिघर्मि गोम-
दूषुणासत्याविश्वासां भुवां चतस्रोऽग्ने व्रतपते व्रतं चरिष्यामस्य-
दित्यास्त्वा पृष्ठेतव्रस्तरोपं तनूनपातमुद्भिदंऽसुपेशसामुशन्त्येप-
स्वात्र पितर आगमविश्वो देवस्य त्रिरिन्द्रश्च संम्राड्वेतसा
द्देवानांऽस्वाहा यतीरग्निमिन्द्रवायू इमे नवगर्भो अश्विकाम-
र्गोणि ते श्रोप्रचाप्रस्वतीमश्विनातिस्रो द्वात्रिंशत ॥ ३७ ॥

यं तेदेवीयेनासमत्सु प्रमुञ्चतमीशानं चतस्रस्तोन समुद्रान्मा-
नोमहान्तमपघ्यं गोपाक्तिस्रो दैव्याहोतारा ऊर्ध्वमरुद्रं विश्व-
कर्मन् हविषा वर्द्धनेन हिरिन्द्रवायू इमे सुता । उपयाम गृहीतप्र-
त्यनुक्तं वाजिन्यस्य कूर्मो नूनं द्वचतुष्को । यमग्ने कव्यवाहनब-
र्हिषोन्द्रमिडाभिरिन्द्रं विश्वेषामदितिर्हि काकुदेषामेकावि-
ंशतिः ॥ ३८ ॥

राजन्तमध्वराणामसंख्यातसहस्राण्यग्नौ मित्रावरुणयो-र्वंपत्तनूनपानमूतिभिः सदःसद्यादनिष्पड्वसुभ्यस्त्वाग्रहा ऊ-र्जाङ्कतयस्तमु त्वा पाथ्यः प्रेद्धहेवा देवहेडनन्तान् पूर्व्या षडवि-स्वस्य दूतमेकाधत्तः त्र्यम्बकं यजामहे हे सन्ते वायुरेका षोड-शमान्तेऽष्टावष्टिरूर्ध्वाधो नामाध्याये ऽष्टौ शतानि द्वादश भवन्ति ॥ ९८ ॥

इति श्रीसुन्दरराजकविरचिते मौनमन्त्रावबोधे ऊर्ध्वाधो नाम द्वितीयाध्यायः ॥ २ ॥

अथयजुसंज्ञं विद्यते । वामकर्णात् प्रत्यक्चरितः ॥

मा भेरनमेद्धरं भस्मान्नेसत्यस्य वाचो ये ते द्विक्वौ यद्ग्रामे
यदा नो चरिभिः स नो बन्धुरुस्तदिन्द्रो। विश्वस्य पञ्च
मन्यास्य प्राचीमनु यद्ग्रामे प्रद्रे प्रवाचवायत्ते गावाद्दद्य-
क इव एहि सरस्वतीव सप्त आपो हि हिर्यदि मा गाव
उपद्विः पूचन्तय घर्मैतस्तेमकावृजुषु चयोविंशतिः ॥ १ ॥

अथ समसंज्ञं विद्यते । वामकरणाद्विसर्गः त्वामद्य तनून-
पाच्छुचिव्रतो हे तस्मा अरक्रमाद्द्रियेऽग्निरग्निः अर्दैव्यास्तो-
तसभिवजेन्द्रेण विश्वायापञ्चान्वग्निर्ये देवा देवेषु यो देवेभ्य
आतपत्या न इडाभिस्तस्तो यस्मिन्नश्वासो यदेवासो हे चयो-
दश ॥ २ ॥

विष्णोः कर्माणि द्विर्दैव्यभिव्यामिमाना तिस्रो गृह्य मा
मधुवाता ईश्वस नदेव चतस्रो ये देवा अग्निनेमविष्णोः क्रमो-
ऽसि हे ये ते पन्था अद्या ययाग्नन्तेषुत्या पञ्च चतस्रः सेना-
भ्यस्तवभ्यः अभ्यः रूपं वाचं चतस्रोऽग्न इन्द्र इन्द्रे हि सा
विश्वायुरग्ने अच्छपश्ये रमः पञ्चदशाविंशतिः ॥ ३ ॥

अग्ने वाजस्य प्रेता तस्मादश्वा भगप्रणेतस्तस्रो ये नः पूर्वे-
यो रेवान्युनर्मनो ये रूपाणि याश्चेदमुपपञ्च यत्र मह्नौ पप्रच्छ
सनं येन कर्माणि तिस्रो मनो न यद्दत्तं कुतस्त्वं त्वमिमाच-
तस्रषोडशः ॥ ४ ॥

आमन्त्रैः परिमे हे भर्भवो यौरेवावा दये वृक्षेषु यस्मिन्-

स्वस्तिद्वो मानः शतशस्ते गो अर्वन्तः प्रतिष्यद्वो अग्ने तं द्विर्न-
यन् शं वातः सप्तत्रयोदश ॥ ५ ॥

सोम्याय प्रैत् ब्रह्मणो द्विःस्तिष्टः पार्याय शुण्ख्याय भूर्भुवो
द्विः सुप्रजास्तस्वितुर्द्विकौ। या ते धामानि परमाणि यथेमा
कूप्याय परिद्यावा पृथिवी घतस्न इड इद्धीकाभ्याः परिवाजयति
द्वीपे अन्धसः पश्वदिशो वेदाश्वमेतं मयोदं ते हि नमः सुवेद्या-
वेदोरूपप्रसुमन्यश्च कावेकविंशतिः सभे पञ्चाशीतिः ॥ ६ ॥

अथ स्वरितसंज्ञं विद्यते । रोहिताय मयि त्वदेकैकायो
अस्मभ्यं दैव्याहातारा प्रथमा यत्प्रज्ञानं तिस्रसन इन्द्राय
संचेयद्द्यासूरनिस्रोऽष्टौ ॥ ७ ॥

वन्यायाश्मंनूर्जंमे हितान्मित्रस्यापाद्यं पञ्चाक्रन्कमीति
विश्वा द्वे सौ। अग्निरिन्दुहंचो य इमा याते धामान्युश्मसि
तुभ्यन्ता मा त्वाग्निः षट्त्रयोदश ॥ ८ ॥

ये वै एव छन्दो ये भूतानां त्वया हि चतस्रस्तावुभौ रथे-
तिष्ठन्यस्यायमपेतो यस्ते स्तनः पञ्च विज्यं धनुरेकाविंशत इद्-
न्दुरो द्वे द्वादश ॥ ९ ॥

उदुत्यण्स्वाहा वञ्चते ये पथा ये तीर्थानि शतो वातः
पञ्चेन्द्रं विश्वा स्तम्भोऽग्ने यद्विविकाय स्वाहा द्वे ऊर्जंवहन्तो-
ऽग्ने यवस्या स्वादुत्वं हिंसन्नस्यनुहैमस्वरिते सप्तचत्वा-
रिंशत् ॥ १० ॥

अथ मध्यमसंज्ञं विद्यते । समस्याह तनूनपाद्द्वरो यो

मेधामित्यम इन्द्रस्यौजस्यपञ्च सजातीयाः फलिनि यस्मि-
न्सर्वाणि लिङ्गो यस्मिन्निर्णिजाग्रप्रायं यत्र धारा अथैतान् प्रोथदश्वः
सन्ते मनः षण्मध्ये चतुर्दश ॥ ११ ॥

अथोर्ध्वसंज्ञं विद्यते । तं यज्ञमेका यज्ञायज्ञावाचो योऽग्निः
कव्यवाहन आनो दूरात्सन्नो वातः पञ्चायातु वनस्पतिरवसृष्टः
कोऽद्यन्ता ये वाजीनमायत् ब्रह्मसूर्यसमं चोक्तौ यो भूताना-
मपि तेषु द्वे ऊर्ध्वे चतुर्दश ॥ १२ ॥

अथ रङ्कुन्युब्जके विद्यते । अत्यं भ्यांसाद्यं पितृपेचे ह्योपप्रप-
रमं वरामहान्यंषाग्नेवेरग्ने तव अव उद्वयं धनुः षड्ङ्के न्यु-
ब्जके चैकादश ॥ १३ ॥

अथ ह्रस्वऌकारसंज्ञं विद्यते । ये देवा देवानाम छायऌ-
सवर्हिः सन्तेपयाग्रऌमिदिक्तौ येन वपयोगेन आयुऌ वि द्वि
वचो नाम किऌह्लसूर्यसमं त्वाऌहि त्रिक्तौ किऌस्विद् वन-
ऌस्वैर्हंसैर्यं एतावन्तः प्रयाभिस्ते आचरन्ती पञ्च तं प्रत्नाथा
सम्बा यदि दिवा यदि जग्याश्चनन्तो ह्रस्वे नवदश ॥ १४ ॥

अथ दीर्घऌकारसंज्ञं विद्यते । उच्छ्वा उपऊमन्गोगिर्न्-
ग्नेपत्नी धनञ्चः क्षमोषि विश्वणाऽसुव्वयं तीव्रव इन्द्राय तिस्रः
सऌनमिन्मुखऌतद्धे नवा ॥ १५ ॥

प्रमोऽपद्विमेनीश्वाच्या जानुतराग्रऌसःप्रतीन्द्रगोमन्यञ्च-
मधुनक्तमेकायस्ये मेनराग्रऌमस्य महिमानं द्वे नक्तोपावास-
मनसादित्स्वमङ्गनिश्चोऽग्ने षट्कालादश ॥ १६ ॥

नवायं समग्निर्ब्रह्मने ब्रह्माग्ने सृजागृहि परीतः सोमं राजानं नाना हि वायाव्याम्रं यमाश्विना नमुचेरिन्द्रायैद्युमस्तो य इम एका सोमो राजा सुते प्रवायुं इते हं हिः पञ्च पोक्ष दीर्घे सप्तचिंशत ॥ १७ ॥

अथ तिर्यक्संज्ञा विद्यते । कस्त्वा विमुञ्चत्यसमीमहं न्त हिरण्ययवाह्वे वात्याय द्विकौ द्यौरेषाहि विष्णोस्तग्ने तं पुरीष्यो यद्वाजिनो दामप्रनूनं पडम्ने त्वं नस्त्वरतिनिषो मख्याय तव शरीरं यन्वीराडविनं चतुष्कौ तिर्यक्षष्टादश ॥ १८ ॥

अथ कृतनान्तसंज्ञं विद्यते । अपाय एकोऽरन्त अमिंष्टे मन्तिस इन्द्रं देवीस्त्वष्टादधद्यमश्विना सरस्वत्या षण्णेन द्विः कया त्वं पडग्ने नय चिः सीदत्वं चतस्रः कृतनान्तेषु चतुर्दश ॥ १९ ॥

अथ मान्तसंज्ञं विद्यते । या वां या शतेन द्वे स्तीनाभिषं जाप्रागपागन्ने यन्ते शुक्रं यश्चिद्दाप उस्राविनं चतुष्कौ प्रतिपन्था मन्ने प्रेहि तदश्विना याते धम्मानि हविषा माभेर्जयेमेदं त्रिकौ वेदाहमस्यको अस्य रेतो मूत्रं येन वह सिद्धिरिन्द्रमिदिषमूर्जन्तानोऽग्ने स्वाहा नवमान्ते चयो विंशतिर्मध्याषो नाम तृतीयेऽध्याये त्रीणि शतानि पञ्च भवन्ति ॥ २० ॥

इति श्रीसुन्दरशुक्लविरचिते मौनमन्त्रावबोधे मध्याषो नाम तृतीयोऽध्यायः ॥ ३ ॥

अथर्जुसंज्ञं भवति । रक्षोहणः खराडस्युपान्त्या रश्मिना सत्याय प्रतिपदस्युपयामगृहीतोऽस्यश्विभ्यां धूम्रान्वसन्ताय ग्रहोपप्रयन्तो अध्वरमुखां वृणोतु विश्वातिस्रो दश ॥ १ ॥

स्वयंभूते रस्युपयामगृहीतोऽसि दूरिः संक्रन्दनेनानिमिषेण वयं ते अश्विन ऋतस्य त इमं मे इषे पिन्वस्व सप्त ऋचे त्वा ध्रुवक्षितिर्ध्रुवयो निद्ध्याविघनिन। तिस्र एतं ते युज्य त्वष्टा घृतवती भुवनानां वाचे स्वाहा चतस्र एषा ते शुक्रतनूरिमामगृभ्णं द्वे षोडश ॥ २ ॥

वाचस्पतिं द्विरश्विना हविः पृच्छामि त्वा चितये प्रजापतिश्चरति पञ्चगायत्रेण त्वोरुविष्णो विस्तोनासि साकं यज्ञऋजवे त्वा समुद्राय त्वा सप्तदशप्रर्जुश्चवहाविंशति ॥ ३ ॥

अथ समसंज्ञं भवति । रक्षोहणो व आविर्मर्या प्रजापतये पुरुषास्तिस्रपावकवर्चाः शुक्रवर्चाः इदङ्गाजारे आतिष्ठन्तं पर्युक्थेभिर्वृत्रह मापञ्च सिनीवाली सुकपर्दा प्रजापतिर्विश्वकर्मा मानाचाग्ने निष्क्रमणं निषदनमेतावानस्य पञ्चावपतन्तीरवदन्नुपयामगृहीतोऽसि चन्द्रमा द्वे युष्मा इन्द्र उशन्तस्त्वे मा उ त्वास्तिस्रोऽष्टादश ॥ ४ ॥

प्रवासिनो हवामहे श्वात्रास्थ प्रोक्ष्यमाणः सोम आयुष्मान् सुप्रतीकसमवस्रवन्ते तेभ्योनापृथिव्यापो द्विविधाः सप्तमित्रस्य मारजताहरिणो रमे वन एना उवस्तीन्नान् घोषांस्तपर्षौ वस्तेभ्योनापृथिव्यपनं समघृतं घृतं पावानः श्रोणामुदारोऽपां फेनेन मघानाम्नी रेवत्यो वर्च विश्वाय स्थविरः प्रजापतिः संश्चि-

यमाग्नौ भद्रं कर्णेभिरिच्छन्ति त्वा षष्टुष्काव ग्रेणोरस्याश्विनाभै-
षज्यमोमन्तोसः सिलिकमध्यमास्तिस्र आयुर्ध्यान इंश एका-
निवेशो नः सङ्गमना सप्त ऋषयः स द्वे अष्टाविंशतिः ॥ ५ ॥

उभाभ्यां देवोपयामगृहीतोऽसि सूर्यसहस्तोमाः सह छन्द-
स्तिस्रो दिवस्परिसम्यक्स्रवन्ति घृतस्य कुलायिनी घृतवत्यौ
त्रीणि स्थालीः सहस्रशीर्षा पुरुष इन्द्रवायुसुसंदृशा सविता
प्रथमे सप्त गन्धर्वस्त्वा शुक्रवान्तः सर्वं शुक्र वान्त उपयामगृही-
तोऽसि बृहस्पतिसुतस्य रूपेण वासौ योऽवसर्पत्यभिप्रवन्ति
त्रिकावुभाराशंसंधये जार द्वे अष्टादश ॥ ६ ॥

सुगावः पुत्रमिवपितरौ हिरन्तरग्ने एतत्ते मातानायं सु-
त्रेणाऽग्नेऽग्नगायत्राय चतुष्कौ विभूरसि परमस्याः परावतः
पथस्यथपरिपतिमिमा गिरस्ततस्रो गायत्रं छन्द इदमापो
द्वे चतुर्दश ॥ ७ ॥

सजोषा इन्द्रे हरति शिवो भवत् ध्रुवासि वरुणेनाऽसौ
या पञ्च ध्रुवसदन्त्वाग्निस्य धर्मोऽश्विभ्यां प्रातः सच न अधिस्रु-
त्कर्णौ पिबतं प्रजापतौ त्वा षडेकादशसप्तमे त्रिकोननवतिः ॥ ८ ॥

अथ स्वरितसंज्ञं भवति । उपक्षेपः । शतं वः क्षपारा-
जन्नेतं जानाथ युञ्जन्ति ब्रध्नमृतवस्त ऋतुथा वैश्वानरो न उस्ये-
न परीत्य भूतानि सप्तैष ते निर्ऋतेऽनड्वानयप्रजापतये तिस्रो
द्रप्सस्वस्कन्दैभिर्ऋतवस्थप्रैषेभि प्रैषानृतवस्ते यज्ञं पञ्चवि-
त्यतिमर्षसहस्राणि सहस्रर्द्दद्ऽस्वासऽस्मादित्यरूपमेष छागो-
भित्वा षडेकविंशतिः ॥ ९ ॥

उष्णिगस्त्यर्थे तस्य मूर्द्धावय आक्रन्दीऽग्नये नीकवते प्रथमजान्यं च सवितुस्त्वोपयामगृहीतोऽसि सुशर्मासि विश्वकर्मासि दिवि वैश्वानरो नः पितृभ्यः स्वधायिभ्यः पुनन्तु मा पितरः स्वगात्वा सप्त सप्त ते कृष्णग्रीवा आग्नेया श्विता उत्सादेभ्यः कुब्जमस्याजरासस्य तस्य कृष्णग्रीवा आग्नेया उपध्वस्ता एकासप्तदश ॥ १० ॥

अयं दक्षिणामणो विराडसि संम्राडसि तिस्रः पुरुद्युम्नो विश्वरूपोऽग्निं तमपशुभिः पशूनश्विना पिबता दधिक्राव्णो अकारिषं पञ्चप्रतं कृष्णतनदीभ्यः पौंजिष्टं विद्युतिभ्योभिभूरसि इमा म उपयामगृहीतरेस्याश्विनं बीभत्सायै पौल्कसम्वनस्योऽयं नोदिरष्टो विभ्रुक्तं त्वाग्नेर्वो युवन्तं चिकावेकविंशतिः स्वरिते नवपञ्चाशत् ॥ ११ ॥

अथ मध्यमसंज्ञं भवति । उभिन्नं प्राणं मक्षस्वर्जिश्ववैश्वानरस्य सुमतौ सविन्द्राप्रसचित्राकुम्भो घनिष्ठुर्वसन्तेन ऋतुना वर्षाभिऋतुनेषोद्द पञ्चकानुतस्मै प्राणदा आपनदाः पुनन्तु मादेवजना जिह्वा मे पृक्षामि त्वा परमं तं षष्ठवाहो विराजे सप्तास्या संसन् सप्तसप्तदश ॥ १२ ॥

अश्विभ्यां पच्यस्व द्रुपदादिवमुमुचानः षड्गो वैश्वदेवोऽग्नये नीकवते रोहिता शितिपृष्ठो रुद्रजवोयएणयक्षः प्रजापतेस्तपसा चतुष्कौ यमाय त्वा मखाय त्वाग्निश्च पृथिवी नवभिरस्तु वसकव्यादमग्निं वायुरग्ने गाः प्राचीनं बर्हिः षट्चतुष्कमध्ये चैकविंशत् ॥ १३ ॥

अथोर्ध्वसंज्ञं भवति । समिद्ध्युपयामगृहीतोऽसि गायत्रं छान्दस वायुष्ट्वा द्रविणोदोः पीपीषति चतस्रः प्राणायामे मधुश्चः सूर्यरश्मिभुज्युसुपर्णो वायुः पुनातु चतस्रो क्षेमन्तेन ऋतुनाद्भ्यः संभृतो दिदिग्भ्यः । स्वाहासन्नः सिन्धुरपाङ्गं भंनुत्काः सञ्चराः शुनासीरो या वर्षाह ऋतूनां पञ्चपञ्चदश ॥ १४ ॥

युञ्जानः प्रथममन्यावः श्वित्र आदित्यानां तिस्रो हिरण्यगर्भः सन्निर्भद्रो नो ग्रीष्मेण ऋतुनोक्ताः सञ्चराः कृष्णादिवः पृथिव्या सम्पाद्भ्यः स्वाहोन्नत ऋषभ उक्ताः मद्धरा प्राष्टङ्गा इन्द्राग्न्योः पञ्चतिस्रतस्रो देवस्त्वा सविरेतौ पृथिव्याः परीषमाशुः शिशान उद्या समुद्रो धानाऽकरम्भः शुभः स्वर्भ षड्विंशतिः ॥ १५ ॥

देवस्य त्वा षोडशाग्नये जुष्टमुपांशोः पृथिव्या अश्विनोश्चतस्रो आददेऽध्वरकृतं बृहन्यवोद्दिरावागायत्रेण नारिः सम्बपामि सरस्वत्यै द्विर्यनेयेण दशाददे दित्यैकारनीषमाभ्यामेकें षोडश ॥ १६ ॥

अर्द्धमासाः परूंषि कृष्णग्रीवा आग्नेयाः शितिभ्रुवोऽग्ने पञ्चचतिस्रोऽयं वामयुः प्रजापत्यः सुपर्णा पार्जन्य उत्सिक्यावका दिगौकौमच्छिद्यो दिर्नवोर्ध्वषष्ठिः ॥ १७ ॥

अथ रज्जन्युब्जसंज्ञं भवति । सुसंदशं त्वा हविष्मतीरिमामहत्वा इन्द्रो मद्यां इन्द्रो युक्ष्वाहि देव दिःषट् पाहि न एकपरमेष्ठ्यभीषीतसषमादो कन्निनीरापरभीमं तिस्रोकब-

घ्योनाग्निषोमयोरुज्जिहति चन्द्रमा अप्सु मुञ्चन्तु माग्निल्या वैश्वदेव्यो ध्रुवासि ध्रुवः समुद्रे त्वा सप्त ऋत्व्यन्युञ्जे सप्तदश ॥ १८ ॥

अथ ह्रस्वᳪसंज्ञं भवति। मित्रेण वाचस्पतेर्ण्योमेसुम्न प्रविधेम नतिस्तोऽस्मै वोधानानाᳪरूपं हे सᳪस्रवभागाःस्थाग्नये कव्यवाहनाय प्रथमावामुपावसृजत्मन्या अन्वऽवाहमन्वारभामहे पञ्चोद्धी अस्येमाते वाजिन्मरुताᳪस्कन्धा नमायपुंस्त्वन्द्विकौ-चतुर्दश ॥ १९ ॥

सविता त्वमैा ते यमायमय्मेषाते अग्ने एष ते गायत्रः प्रजापतये त्वा त्रिकावश्वावतीᳪसोमावती मेना वो अग्निᳪस्तोमेन देवानां भद्रोपस्करे गिरीणामृतये स्तेनहृदयᳪषट्‌द्वादश ह्रस्वे षट्‌विᳪशतिः ॥ २० ॥

अथ दीर्घᳪकारः ॥ पूर्णादर्विद्विमस्य त्वारातिᳪमत्यतिं तिस्रो वीति ह्योत्रं त्वा ध्रुवासि धरुणा सृता स्वादीन्ताड्ढमेनं विद्यां च पञ्चदेवं देव एकानव ॥ २१ ॥

उद्गामारोह नवदशभिरस्तुव तवाचस्य तय एतᳪ मध्वस्यद्विकौनह्निताᳪस्वतावानं मद्विषमद्यादेववाः पितानोसिषन्निधाग्रस्येकावयᳪसोमभृत्कज्योतिर्द्दष्टा परिस्रुतो विभक्तारᳪहवामहे चतस्रः पञ्चदश ॥ २२ ॥

घृताचीस्थः यूषापञ्चाक्षरेण पृथ्वीमें उखाते स्वादुषᳪसदः पितरः पञ्चेरवर्त्तारमध्वरस्याग्निष्वात्तानानुमतः प्रारदेन ऋतुना सुगव्यं तस्यतम्रो हᳪसः शुचिषद्विद्वषᳪहिता-

भिमं मेकमफण्श्रौ।ग्निरेण ऋतुना तिस्रः समुद्रञ्छमन्द्रेवा-द्विरंभुवोर्ह्लमेना पूषणं वनिष्टभां षड्विंशतिः ॥ २३ ॥

इदमुत्तरात्स्वर्मन्यवे यस्तापं दे आगत्य वाजीमं माद्विपाद-मृग्यं लोहितेनाशुना ते चतस्रो विश्वकर्मा त्वा परमेष्ठी त्वा द्वयोर्व्यचस्वतिं पुनाति ते पातं नो सुत्रामाणं गणानां त्वाशुर शुष्टोऽग्निश्चोतारंसुष्टुतिंसुमती रथवाहणंहविः प-ञ्चकौ घृताच्यसीमंसाहस्रञ्जीत्रभिदञ्जो विदन्दीश्वायश्चोप-मस्ते इगग्निंहृदये न षट् द्वाविंशतिः ॥ २४ ॥

परिवीरसि देवेन म उपयामगृहीतोऽस्यादित्येभ्यो देवी-र्द्वारो वयोधसं द्विकौ नृताय सूनं प्रप्रतिश्रुतं *(१) नं देम-रूत्वन्तं वृषभमेकाग्नये * ऽग्निं युनज्मि नियुत्वा-न्वायोय * मित्रज्ञवेत्वायुरनिंषड्जा * मेकाचतुर्दश दीर्घशीतिः ॥ २५ ॥

अथ तिर्यक्संज्ञं भवति । उपयामगृहीतोऽसि भा- * तस्यैनसः सहस्रस्य प्रमाप्र- * रधिनादेवीर्द्वारो अ-श्विना स्व * अस्य त्वासन्नाय मुत्तरात्सं यद्द * श्वदेपवित्रेस्थो द्विर्द्वैवरनिभृ * शुखारयि श्वानि-वास्मात्वं चतस्र उपयाम गृहीतोऽसि ध्रुव उत नोऽग्निरेका-क्षरेणाक्षिन् महति माते पणारथस्तनोचिकाभूता * तस्मे-भवति तिस्रो द्वाविंशतिः * मित्रावरुणाभ्यां चोपयाम गृ-

(१) आदर्शपुस्तकस्यातिगलितत्वादत्राक्षराणि विलुप्तानि । एवमग्रेऽपि ।

हीतः * मघवे त्वा मह्यं चिवृदसि * सन-
याग्ने उपयाम गृहीतोऽसी * बृहद्दते स्थिरो भव
वैश्वदे * देवा दिवमेकाग्नेरनीका *
सरस्वती वितं च तिस्त्रयोदश * च पञ्चविंऌ्शतिः ॥२७॥

अथ कृतसंज्ञं भवति । विश्वकर्मा विमना ए *
* वीवाभ्यावर्तस्य पवित्रेण पुनिह्वि यमेन दत्त-
मश्विभ्य * ऋत चवस्थोलवऌ् *
* विराड्ज्योतिः * मारग्निर-
स्मिव * प्रायणाश्रम *
यज्ञं * ॥ २८ ॥

अथ मान्तसंज्ञं भवति । * अग्निश्चन्द्रः प्राणा-
यामे * कौयता च श्रीश्च *
च व्रतं च षष्ठवाद- * पृथिवी च चत
* * गृहीतो *(१)

(१) अतः परं ग्रन्थसमाप्ती आदर्शपुस्तकस्यातिगलितत्वात् कतिपयपङ्क्तयश्छिन्ना जातास्तत्पूर्त्यर्थं बलभद्रात्मजदेवभद्रकृतस्य मीनसूत्रस्यान्तिमश्चतुर्थाध्यायोऽत्र सन्निवेश्यते ।

मौनमन्त्रसूत्रे ।

चतुर्थोऽध्यायः ।

चन्द्रे शततं ह्यगोवराजन्नेतं जाता थ युञ्जन्ति श्रद्धमृतव-
स्त ऋतुना परीत्य भूतानि सहस्राणि सहस्रशः प्रजापतये चा-
थ तस्यैष ते निर्ऋते सप्त ते अग्ने । वैश्वानरो द्वे सवितुस्त्वाति-
थ्यरूपमपयाम् शर्मास्युत्सादेभ्यः कुब्जमनड्वान्चयोवीभत्साय
पौल्कसं पुरुदंसोऽधिकाष्ठोऽभिभरसि । अभित्वाश्वाजरासः
प्रैषेभिः प्रैषान्नवस्ते यज्ञं द्रप्सश्चस्कन्दैर्भिन्नऋतव स्थ ऋ-
तावृध एकोनत्रिंशत् ॥ १ ॥

विराडसि सम्राडस्यश्विना पिबतामग्निं तमाच्छन्दो-
मद्भविर्योऽन्नं कृणुतैष छागो नदीभ्यः पौञ्जिष्टमग्नये नीकवते
प्रथमजान् । उशिगसि विश्वकर्मा हि पुनन्तु मा पितरः कृष्ण-
ग्रीवा आग्नेयाः श्वेता उपध्वस्ता द्वे इमा मे वियद्ध्ययं दक्षिणा-
मनः पशुभिः पशूनुपयाश्विनं तेजो युवन्तम् । पितृभ्यः स्वधायि-
भ्यः शुक्रं त्वाग्नेर्वस्त्वित्यतिमांसगात्वेदत्तासोऽयन्नो द्वे अष्टौ
द्विचत्वारिंशदेकोनषष्टिः ॥ २ ॥

लोचने प्रतिपदसि समुद्राय त्वोपयाहरिरसि संक्रन्दनेना-
निमिषेण वसन्ते ऽश्विने कृतस्य इममग्ने साकं यच्छोरु विष्णो द्वे
रक्षोहणं बलगहनमपयाश्विभ्यां त्वा स्वयंभरसि गायत्रेण त्वा

वाचस्पतिन्द्रे ऋचे त्वा ध्रुवक्षितिरिषे पिन्वस्वोग्राविद्यानेनास्व-राडसि सपत्नहाश्विना हविः। प्रजापतिश्चरत्युपप्रयन्तः । ऋजवे त्वा युंजन्त्यस्य घृतवती भुवनानामेतन्ते । स्योनास्येष्वाने शुक्रतनूः । रश्मिना सत्याय धूम्रान्वसन्ताय वाचे स्वाहा । इमामगृभ्णान्पृच्छामि त्वा वित्तये। उखां कृणोतु विद्यात अपां त्वाष्ट-त्रिंशत् ॥ ३ ॥

राम इमा उत्वो शान्तस्त्वाजारेयुष्मा इन्द्र आविर्मर्या माता चाग्रे निक्रमणमातिष्ठन्तमेतावानस्य प्रजापतये पशुपा-नाहङ्वोस्थेभिः प्रजापतिर्विश्वकर्मा । प्रोह्यमाणः सोमः सम्यक् स्रवन्त्येने द्विविधा उभाभ्यां देवा जज्ञानः सुप्रतीकः स्वाचास्व-स्योनापृथिवि देहे द्विवस्परि सम्यक्स्रवन्ति घृतस्यां चोणि स्थालीः । अयमेव नोपां फेनेन तोव्रान् घोषान्महानाग्न्ये। घृतं घृतपावानः श्रोणामुदार एता उ व एकत्रिंशत् ॥ ४ ॥

रक्षोहणो वः पावकवर्चाः कुलायिनी सविता प्रथमेसिनो वाक्षोस्त्वकपद्दावपतन्तोरूपया प्रजापतये त्वा सूर्यश्चन्द्रमा दे प्रघासिनोग्रेणारसि रजताहरिणीर्गन्धर्वस्त्वा वनविज्ञायः सु-पर्णं वस्त इन्द्रवायू सुसंदृशोदय। बृहस्पतिसुतस्य ध्रुवसदन्त्वा गायत्रं छन्दः । परमस्याविभूरसोमागिरः शुद्धवान्तः क्षत्रेणाग्ने पथस्य दोहरूपेण वोसै तोवमत्पेत्यभिप्रवन्ताग्नये गायत्राय स्वहस्तोमा एकोनत्रिंशत् ॥ ५ ॥

एतत्ते पुत्रमिव दे अन्तरग्ने मित्रस्य माश्विना भेषजमिच्छ-

न्ती त्वे माता मासोताचतेऽयं प्रजापतिः संप्रियमाणा भद्रं कर्णेभिः स्वगावा देवाः। सन्ध्येजारमुभावाग्निवेश्नोऽश्विभ्यां प्रातः सवनमग्निस्त्व मे घर्मः पृथुधिश्नत्कर्णप्रजापतौ त्वा सप्त ऋषय उभा पिबत्तमिदमापः सहस्रशीर्षाजुह्वात इन्द्रः सजोष इन्द्रे हरतिः शिवो भव ध्रुवासि वरुणेताशौ यासेनको नश्चिंशत्रवाशीतिः॥ ६॥

अध्या उशिक्कं प्राणं म ऋतश्चान्तर्जिच्च कुम्भी वनिष्टुविर्जम्नाकमे प्रजापतेस्तु संपते रुद्रभागो वर्षाभिर्ऋतुना वसन्तेन ऋतुना द्रुपदादिवैषोहृदवः षडशो वैश्वदेवाऽग्नये नीकवते रोहिताञ्जिः पुनन्तु मा देवा तस्मान्न पृच्छामि त्वा परं वैश्वानरस्य सुमतौ स वचा पष्ठवाहो विराजे प्राणदा अपानदा जवोय एण्यङ्गा यमाय त्वा मखाय त्वाश्विभ्यां पच्यस्वाग्निस्च पृथिवी च सप्तास्य प्राचीनं बर्हिर्वायरग्रेगा नवभिरस्तुवत क्रव्यादमग्निमेकत्रिंशत्॥ ७॥

प्राणे वायुः पुनानूत्ताः संचराः कृष्णां प्राष्टङ्गाशुनासीरोयास्तिस्राऽग्नेः पचति सभूः स्वयंभूः सन्नः सिन्धुरद्भ्यः स्वाहादिवः पृथिव्याधाताः करम्भोदिग्भ्यः स्वाहा भुज्युः सुपर्णोऽद्भ्यसंभृत आपनुः शिशानो महीद्यौर्दैमयुः प्राजापत्याः। युञ्जानाहिरण्यगर्भस्त्विः सुषुम्णः सूर्यरश्मिर्द्रविणोदाः पृथिव्याः पुरीषमद्भमासाः पह्वंशिष सुपर्णः पार्जन्य इन्द्राग्न्योः पश्यतिः सप्तविंशतिः॥ ८॥

प्राणाथाम उन्नत ऋषभो हेमन्तेन ऋतुना वर्षाङ्कितनाम-
पयाग्नय त्वा गायत्रच्छन्दसं भद्रो नो ग्रीष्मेण ऋतुना श्वित्रआ-
दित्यानामन्यावः कृष्णग्रीवा आग्नेयाः शित्ययं वामयाङ्गं भन्न-
शिक्यावकः समिदस्युस्यासमुद्रो वायुष्ट्वा देवस्त्वा। देवस्य त्वाग्न-
ये जुष्टमग्नीषोमाभ्यांजुष्टमाददेऽध्वरकृतᳪसंवपामि सरस्वत्यै-
दे पृथिव्या उपाᳪशोरश्विनोर्गायत्रेण एवासिना रिरस्यदित्यै
रास्नासि बृहन्नसि यवोऽसि दे त्रयस्त्रिᳪशत्षष्टिः ॥ ९ ॥

अङ्गतुभेसुश्चद्रोणावस्तत्रयाविधेम त एषाते अग्नेश्चावतो-
ᳪसᳪस्वभागास्थ प्रथमावामनड्वाहमन्वारभामहे सविता
त्वोपह्वरे गिरोणामस्मे वः प्रजापतये त्वेपते गायत्र इमाते वा-
जिन्नग्नये कव्यवाहनायोर्ध्वा अस्येमे। ते धानानाᳪरूपं मरुताᳪ
स्कंधानमोयपृष्ठ चर्न्नूयमाययमसून्तये स्तनहृदयमेतावोदेवानां
भद्राग्नि मेतमित्रोनवाचरेण षडविᳪशतिः ॥ १० ॥

नगे देवं देवं वो ध्रुवासि रुधणास्तृना शुक्रज्योतिश्चनहि-
नेषां ᳪशिवो नाम विश्वकर्मा त्वा व्यचस्व कर्मात्वा व्यचस्वती-
मागत्यवाजो पुनाति ते वाचस्पतये स्वादिन्द्रः स्वाहोत्वोर्ध्वामि-
नामूर्ध्वमेनं दोत्रायै रूपमिमन्देवा दे पृष्ठीर्मेघाः देवाः पूर्णा-
दर्विहिमस्यत्वा विद्या च पातन्ना दृष्टा परिश्रुतः पूषणं वनिष्टु-
नाभीति होत्रं हित्वोर्ध्वमारोहरात्तिᳪसत्यत्तिं वयᳪ सोम-
वयᳪ हृतावानं महिषमुच्यते। सुष्टतिᳪसुमन्तो वृधोभिधा
स्वसि शारदेन ऋतुना रथवाहणᳪहविः स्वादुषᳪसदोᳪशुना

ते परिवीरसि परमेष्ठी त्वा व्यचस्वतीमꣳ शूरꣳशुष्टैशुष्मसꣳ
हितासि हꣳसः शुचिषद्देइष्कर्तारमध्वरस्याग्निष्वात्तानृतुम-
तो गोत्रविदं गोविदग्विभक्तारꣳहवामहे शैशिरेण ऋतुना
समद्रं गच्छ पश्चाशत् ॥ ११ ॥

इयम्मा देइमꣳ साहस्रमग्निं युनज्मीदमुत्तराहेवेन वो
ताच्यसि घृताचीस्थो नवदशभिरस्तुवं तैतꣳ सम्भस्थऋगव्यन्न
उपेयादित्येभ्यस्त्वा देवीर्द्वारो वयोधसमुग्रंश्लोहितेन मित्रꣳ
ऋवेग्निꣳ सुत्रामाणं पृथिवीं मरुत्वन्तं वृषभं वायोरग्निस्तया-
ग्निꣳ हृदयेन नृताय सतमग्नये गृहपतये गणानां त्वा पूषा
पश्चाक्षरेण पितानो नियुत्वान्वायो यज्ञायज्ञा व ऊर्ज्जोनपातं
मन्यवे यस्तापं प्रतिश्रुत्कायाअर्तनं त्रिꣳ शदशीतिः ॥ १२ ॥

नाग उपयामावित्रोऽसि प्रस्तरेण परिधिना सुपारधिरसा-
नित्रोपयाग्रयणोस्युपर्येन्द्राय त्वा बृहद्वतेनूपा अग्न उपयाध्रु-
वोऽसि वैश्वदेवी पुनात्युपयाममधवे त्वा । उत नोऽहिर्बुध्न्योयमु-
तरात्संयद्वसुरस्मात्वमग्रश्वायं दक्षिणारथस्तनोमातेव पुत्रं जी-
मूतस्येव भवत्यग्निरेकाक्षरेणास्मिन्महति भूताय त्वाग्नये त्वा
मह्यं त्रिवृदसि मित्रावरुणाभ्यां त्वा पवित्रेस्थो दे वितं त्वा जु-
ह्वाना सरस्वतीमन्त्रोऽग्नेरनीकꣳ स्थिरो भव देवां दिवम् ।
सहस्रस्य प्रमा क्षत्रस्य त्वा स्वयं वाजिन्देवीद्वारोअश्विना देव-
कृतस्यैनसः पञ्चविꣳ शत् ॥ १३ ॥

गोपङ्क्तिरुद्रादित्येन्द्रेषु सुसंदृशं त्वामहाꣳ इन्द्रोनुवद्ह

विष्णुतीरिमायुद्धवाहिदेवकृतमान्द्रे मरुत्वां इन्द्र। पाहि नः परमेष्ठ्यभिधीतः कववोष्णोनाभीमं चन्द्रमा अप्सु सधमादोऽयु-ष्मिनीमुञ्चन्तु माशिल्यावैश्वदेव्यः समुद्रे त्वा ध्रुवासि ध्रुवीयम-ग्नीषोमयोरुज्जितिम्। अभ्यावर्तस्वाश्विभ्यां पिन्वस्वादेवो वा प-वित्रेण पुनीहि मायमेनदत्तं सत्रस्थोऽस्त्वं विश्वतस्युरुतसंज्ञान-मसि विराड्ज्योतिस्सप्तायनीभे वसन्ताय कपिञ्जलास्समुद्राय शिशुमारानग्नये कुटरून्प्रजापतिश्चोद्ग्राभं च यज्ञेन यज्ञं भद्रा मेऽग्निरस्युर्ध्वा भवाग्निर्ज्योतिषा विश्वकर्मा विमना अष्ट-त्रिंशत॥ १४॥

तिथौ भेषजमस्युपयान्तयच्छ परमेष्ठी त्वा ज्योतिष्मन्तो वि-श्वकर्मा त्वा ज्योतिमन्तो व्रतेन दीक्षामुतावानं वैश्वानरमेतावि-श्वान्युद्या यद्वृहत्येतावद्रूपं बृहदिन्द्राय सहदानुं पुरुहूतदेवस्य सवितुर्वेनस्तदियं ते सवीरो वीरानात्मानन्ते। आक्रम्य वाजि-न्विमान एष संप्रव्यवधत्रमुपमृह्यानं दिवोदधे धानावन्तं करम्भिण-मर्वाञ्चो अद्य देवभुतां देवशिमममृणायं युत्काय सविता लोकं पृण दे दीर्घायुस्ते पितुन्न त्रिंशत॥ १५॥

सत्यं चर विश्वयं तापश्च श्रीहृदयस्याग्निस्वापो मित्रस्य पृथिवी-चाग्रयणश्च प्रष्ठवाड व्रतं च प्राणश्चाग्निश्चेन्द्र आत्मने मे प्राणाय म ऋतं च मित्रस्य चर्षणिधृतोऽश्वत्थे वो देवमीषां चितमेता अर्धन्यतश्चरत्यभ्यादधामि घृतं मिमिक्षे तरणि-र्विश्वदर्शतोऽध्वराजाय क्रतवमिरज्यतऽग्ने सविता वरुणो हिरण्मयेन पात्रेणाम्॥

एवं मद्याष्टविंशतिरष्टपञ्चाशन्मोक्षपत्रे पञ्चशती चतुर्दशपञ्चशत्यूनाद्विसाहस्रीपञ्चविंशत्यना द्विसाहस्री पञ्चविंशत्यूना द्विसाहस्री ॥ १६ ॥

ढुंढिराजप्रसादेन सूत्रं चेदं मयाकृतम् ।
वैदिकास्तेन तुष्यन्तु विप्रा माध्यन्दिनीयकाः ॥
अध्येतव्यमिदं सूत्रं विप्रैर्माध्यन्दिनीयकैः ।
मौनेनाधीतमन्त्राणां चिप्रं ज्ञानाभिलाषिभिः ॥
मुहुर्मुहुः प्रार्थयेऽहन्दुर्जनान्दुष्टमानसान् ।
मत्कृतं सूत्रमेतत्तु न द्रष्टव्यं कदाचन ॥
एषा मत्सूत्रगा विद्या गोप्यैव फलदा भवेत् ।
अन्यथा विफलैव स्यादिति मद्वचनं कुरु ॥
शिष्यं मित्रं कलत्रं दुष्टं प्रभुं बालं न बोधयेत् ।
सच्छिष्यं शिक्षयेद्वाथ स्वगृह्यानेव बोधयेत् ॥
यश्च श्रमः समुत्पन्नः सूत्रस्यास्य कृतौ मयि ।
गजाननो विभुस्तेन प्रीयतान्मम दैवतम् ॥

इति श्रीमन्महायाज्ञिकनागरज्ञातीयपाठकश्रीरामचन्द्रसुनुमहायाज्ञिक गङ्गाधरपाठकवंश संभूतपाठक श्रीबलभद्रात्मजदेवभद्रविरचिते माध्यन्दिनीयसंहितायां मौनमन्त्रसूत्रे चतुर्थोऽध्यायः सूत्रं च समाप्तम् ॥

Printed by KRISHNA DAS GUPTA, *Proprietor,*
at the Benares Printing Press.

दिनांक	लेने वाले के हस्ताक्षर	वापसी का दिनांक